Crimson, *a.* शोण, रक्त, अरुण, लोहित. —*s.* शोणः, रक्तिमन् *m.*, रक्तवर्णः, अरुणिमन् *m.*, लोहितः; 'covered with c.' अरुणित, पाटलित. —*v. t.* अरुणीकृ 8 U, अरुणयति-शोणयति-लोहितयति (D.).

Crincum, *s.* वलि *f.*, कुञ्चः, संकोचः.

Cringe, *v. i.* अंजलिं बंध् 9P; चाटुवचनानि प्रयुज् 1 P or अनुवृत् 1 P; 'c. at the feet' चरणपातं कृ 8 U (Bh. 1. 31). —*s.*, —ing, *s.* अंजलिकर्मन् *n.*, अधोमुखपातः; अनुवृत्ति *f.* —*v. t.* See **Contract.**

Crinigerous, *a.* रोमवत्, रोमोत्पन्न.

Crinkle, *s.* वलि *f.*, कुञ्चः, भंगः. —*v. i.* घूर्णीभू 1 P, व्यावृत् 1 A. —*v. t.* घूर्णीकृ 8 U, व्यावृत् *c.*

Cripple, *a.* or *s.* पंगु (गू *f.*), विकल, विकलांग (गी *f.*): पादविकल; गतिहीन; श्रोण. —*v. t.* विकलयति (D.), विकलीकृ 8 U, खंजीकृ. 2 (fig.) दुर्बलीकृ. —**ness,** *s.* पंगुता, अंगवैकल्यं.

Crisis, *s.* संकटं, संकटवेला, संदेहसमयः; ग्रु-व्याकुलता. 2 व्याधिसीमा. —**Critical,** *a.* संदिग्ध, 'c. time' कार्यसंकटं, संकटसमयः, कार्यनिर्णयकालः; 'at c. times' उपस्थितेषु कृत्येषु.

Crisp, *a.* आकुंचित, कुंचित, भंगवत्. 2 भंगुर, भिदुर, भिदेलिम. —*v. t.* (केशान्) रच् 10, कुंचितीकृ 8 U. आकुंच् *c.*, 'c. ing-iron, -pin' केशवक्रकीलः; 'c. ed tresses' चूर्णकुंतलाः, वलीभूताः अलकाः. —**ation,** —**ature,** *s.* आकुंचनं (केशानां).

Criterion, *s.* लक्षणं, चिह्नं, लिंगं, संज्ञा. 2 निकषः.

Critic, *s.* गुणदोषविचारकः-निरूपकः, गुणागुणज्ञः; विज्ञः, गुणग्राहिन् *m.*, गुणदोषविवेचकः 2 (cavilling c.) दोषैकदृश्-छिद्रान्वेषिन् *m.* —**al,** *a.* गुणदोषविचारक, गुणागुणज्ञ, गुणदोषग्राहिन्, गुणदोषविवेचक. 2 दोषदर्शिन्, छिद्रान्वेषिन्. —**ally,** *adv.* सूक्ष्मं, सूक्ष्मतया, निपुणं. 2 गुणदोषपरीक्षया. 3 संकटसमये. —**ise,** *v. t.* गुणदोषविचारं-विवेचनं कृ 8 U, गुणदोषान् निरूप् 10 or परीक्ष् 1 A or निर्-विच् 3, 7 U. 2 छिद्राणि अन्विष् 4 P. or दूष् 1 P. —**ism, Critique,** *s.* गुणागुणपरीक्षा, गुणदोषविवेचनं-परीक्षणं-निरूपणं. 2 छिद्रान्वेषणं.

Croak, *v. i.* आरट् 1 P, विरु 2 P. 2 (As a crow) कै 1 P, ध्वांक्ष् 1 P. —*s.* आरटनं; भेकरवः, काकरवः.

Croceous, *a.* कुंकुमाभ, गौर (री *f.*).

Crock, *s.* छिद्रं, कज्जलं. 2 भांडं. 3 अरमंगी. 4 अयसूत्रः. —*v. t.* कृष्णीकृ 8 U, कज्जलेन लिप् 6 P. —**ery,** *s.* मृद्भांडानि (pl.); कौलालकानि; मार्त्तिकं.

Crocodile, *s.* नक्रः, कुंभीरः, मकरः, ग्राहः, अवहारः (a kind of c.).

Croft, *s.* वाटिका; वाटः, वृत्ति *f.*

Crone, *s.* स्थविरा, जरती, वृद्धा, जरठा.

Crony, *s.* चिरमित्रं, प्रियमित्रं-सुहृद् *m.*

Crook, *s.* वक्रः; कुंचिताग्रयष्टि *f.*; अपवर्तनी; 'by hook or c.' येन केन प्रकारेण, यथाकथंचित्; 'c. back' कुब्जः, न्युब्जः, गडुरः. —*v. t.* आकुंच् *c.*, वक्रीकृ 8 U, कुटिलीकृ, नम् *c.* —**ed,** *a.* वक्र, कुटिल, जिह्म, अराल, नामित, आकुंचित, भुग्न, न्युब्ज; 'c. bodied' विकृताकारः; 'c. armed' कुणिः, कु(कू)णिः, विकरः; 'c. nature' वक्रभावः, कौटिल्यं; 'c. minded' कुटिलमति, जिह्मचेतस्, प्रतीप, अनृजुप्रकृति; 'c. with age' जरानतकाय, जरापरिणत. —**edly,** *adv.* वक्रं, कुटिलं, कुटिलतया, जिह्मं, साचि, तिर्यक्; 'going c.' जिह्मगः, कुटिलगतिः. —**edness,** *s.* वक्रता, कुटिलता, जिह्मता. 2 विरूपता, विकृति *f.*

Crop, *s.* शस्यं, शस्यसंग्रहः, कृषिफलं; 'c. s' शस्यक्षेत्राणि 2 अग्र, शिखा. —*v. t.* (शस्यं) चर् 1 P, अद् 2 P, भक्ष् 10, चर्व् 1 P. 2 छिद् 7 P, लू 9 U, शस्यं लू or संग्रह् 9 P. —*v. i.* (up) आविर्भू 1 P, प्रादुर्भू, सहसा उद्भू 1 P, 'c. eared' छिन्नकर्णाग्र, लूनकर्ण; 'c. ful' परिपूर्णोदर, अतितृप्त.

Crore, *s.* कोटि-टी *f.*

Cross, *v. t.* तॄ 1 P, (lit. and fig.), सं-उत्°, लंघ्, उत्° 1 A, 10, अति-इ 2 P, अतिक्रम् 1 U. 4 P, आक्रम्; 'these thoughts c. ed my mind' एते संकल्पा मम प्रादुरासन् or आसीन्-मम मूढ ते मनसि (Ka.); 'he c. ed my sight' मम दृष्टिपथमागतः (S. 3), नयनविषयमवतीर्णः. 2 वि-प्रति-रुध् 7 U, व्याहन् 2 U. प्रतिबंध् 9 P. 3 व्यति-अस् 4 U; 'with the arms c. ed' न्यस्तबाहुः, स्तनविनिहितहस्तस्वस्तिकाभिर्वधूभिः (Mal. 4), 'c. legged' व्यस्तपाद्, 'to c. the legs' व्यस्तपादाभ्यां आस् 2 A. 4 (in love) खंड् 10, खंडिता नारी 'c. ed or defeated in love' —*s.* क्रुश. 2 शूलः-लं. 3 प्रतिरोधः, विघ्नः, प्रत्यूहः, व्याघातः, प्रतिबंधः. 4 व्यस्तरेखाद्वयं, स्वस्तिकचिह्नं, स्वस्तिकं. —*a.* व्यत्यस्त, तिरश्चीन, मार्गस्थित. 2 वि-प्रतिलोम, विरुद्ध, वाम, प्रतीप, प्रतिकूल. 3 दुःशील, विद्विष, दुरासद, वक्रस्वभाव, जिह्मप्रकृति, वामशील; 'c. road' उपपथः, उपमार्गः; चतुष्पथं, शृंगाटकं; 'c.-examine' विविधं परीक्ष् 1 A or अनुयुज् 7 A; 'c. grained' प्रतीप, विलोम, विरुद्ध; 'to be c.' प्रतीपं वृत् 1 P, प्रतीपायते (D.); 'c. multiplication' वज्राभ्यासः; 'c. threads' तूर्णं. —**ly,** *adv.* तिर्यक्, व्यत्यस्तं, साचि. 2 प्रतीपं,

प्रतिकूलं, विपर्ययं. 3 पिशुनतया. -ness, s. वक्रता, अनृजुता, जिह्मत्वभावः, वैमुख्यं.

Crotch, *s.* अंकुशः, आकर्षणी, वडिशः.

Crotchet, *s.* कामचारः, लहरी, मनोलौल्यं, स्वैरिता.

Crouch, *v. i.* पत् 1 P (पादयोः); पादयोर्लुठ् 4 A, नम्रीभू 1 P, कायं नम् c. 2 चाटूक्त्या अनुगम् 1 P or प्रसद् c.; *See* **Cringe.**

Crow, *s.* काकः, वायसः, ध्वांक्षः, मौकुलिः; 'carrion c.' कुणपभुज्, द्रोणकाकः; 'c. bar' लोहदंडः. -*v. i.* विरु 2 P, नद् 1 P. 2 विकत्थ् 1 A; *See* **Boast.**

Crowd, *s.* समूहः, संघः, वृंदं, गणः; *See* **Collection;** 'c. of people' जनसंमर्दः, संकुलं, जनौघः, लोकसंघः, बहुजनमेलकः. -*v. i.* 'to be c. ed' सं-आ-कॄ pass., परिवृ pass., संकुल-समाकुल-*a.* भू 1 P, 'house c. ed with people' जनाकीर्णं-जनसंकुलं गृहं; 'the place was very much c. ed' तस्मिन्स्थाने महान् जनसंमर्द आसीत्. -*v. t.* आ-सं-कॄ 6 P, परिवृ c. or वृ 10, व्याप् 5 P, संकुलीकृ 8 U. 2 संमृद् 9 P, संबाध् 1 A, संकुलीकृ.

Crown, *s.* मुकुटं, किरीटः-टं. 2 राज्यं, राजपदं, राजत्वं; 'placed the c. on' राजपदमारोपितः, राज्येऽभिषिक्तः. 3 राजन् *m.*, शासितृ *m.* 4 (Of the head) चूडा, शिखा, मौलिः. 5 अग्रं, शिखा, शिखरं, शीर्षकं, शिरस् *n.* शृंगं, अग्रभागः. 6 स्रज् *f.*, माला. 7 रूप्यमुद्रा -*v. t.* राज्ये अभिषिच् 6 P, मुकुटं परिधा c. (धापयति). 2 संपद् c., समाप् c., निष्पद् c.; 'c.-ed kings' मूर्धावसिक्ताः-मूर्धाभिषिक्ताः-राजानः; 'to c. all' इदं च तत्र विशिष्टतमं जातं; 'to be c. ed' फल् 1 P, सफलीभू; 'his efforts were c. ed with success' सर्वेऽस्य प्रयत्नाः सफलतां ययुः-फलिताः.

Crucial, *a.* सूक्ष्म, निपुण.

Crucible, *s.* मु(मू)षा-षी, तैजसावर्तनी.

Crude, *a.* अपक्व, अपरिणत, असिद्ध, असंस्कृत, आम. 2 अजीर्ण. 3 असंपूर्ण, असमाप्त; अपूर्णकाल, आकालिक (की *f.*); 'c. form' प्रातिपदिकं, असिद्धं रूपं. -ly, *adv.* अपूर्णकाले. -ness, *s.* अपक्वता, आमता, अपाकः, अपरिणामः.

Cruel, *a.* नृशंस, क्रूर, निष्ठुर, निष्करुण, निर्दय, निर्घृण, कठिनहृदय, क्रूरकर्मन्. -ly, *adv.* निष्करुणं, निर्दयं, निष्ठुरं, &c. -ty, -ness, *s.* नृशंसता, निष्ठुरता, निर्दयत्वं, क्रूरता, निर्घृणता; 'c. to animals' प्राणिहिंसा.

Cruise, *s.* समुद्रे परिभ्रमणं, पर्यटनं. -*v. i.* परिभ्रम् 1, 4 P, इतस्ततो भ्रम्.

Crum, Crumb, *s.* खंडः, लवः, शकलः-लं. 2 उच्छिष्टं, अवशेषः, पिष्टकशकलं. -**Crummy**, *a.* कोमल, मृदु.

Crumble, *v. i.* चूर्णीभू 1 P, विशृ pass., शकलीभू; पत् desid. (पिपतिषति). 2 विनश् 4 P, क्षि pass., अवसद् 1 P. -*v. t.* चूर्ण् 10, क्षुद् 7 U, निष्पिष् 7P, मृद् 9P, शकलीकृ 8 U; खंडशो पिष् 10. 2 विनश् c., अवसद् c. -ing, *a.* जीर्ण, अवसन्न, विशीर्ण.

Crump, *a.* कुब्ज, न्युब्ज, वक्र.

Crumple, *v. t.* संकुच् 1 P, संपुट् 10; *See* **Contract.** 2 चूर्ण् 10, संमृद् 9 P.

Crunch, *v. t.* दंतैर्निष्पिष् 7 P.

Crupper, *s.* पुच्छबंधः.

Cruse, *s.* मृद्भांडं.

Cruset, *s.* *See* **Crucible.**

Crush, *v. t.* संमृद् 9 P or c., संपीड् 10, निष्पिष् 7 P, क्षुद् 7 U, मंथ् 9 P, निर्दल् 1 P, 10 चूर्ण् 10; 'c. under the foot' पादतलेन-पादाघातेन-मृद्, पादभरेण आक्रम् 1 U, 4 P. 2 विध्वंस् c., विनश् c., उच्छिद् 7 P. -*s.* मर्दनं, निष्पेषः. 2 जनसंमर्दः, संकुलं. -ing, *a.* प्रमाथिन्; 'c. defeat' सर्वनाशकरः पराजयः.

Crust, *s.* त्वच् *f.*, बाह्यपटलं, वल्कं, बाह्यवेष्टनं. 2 घनभागः, बाह्यभागः. -*v. t.* घनपटलेन वेष्ट् c. or आवृ 5 U or आच्छद् 10, बाह्यतः घनीकृ 8 U. -*v. i.* घनपटलं वेष्ट् 9 P, घनीभू; संहतीभू. -aceous, *a.* कठिन, वल्कवत्, पटलवत्. -y, *a.* घनपटलयुक्त, सपटल. 2 प्रतीप, परुष, निष्ठुर, पिशुन.

Crutch, *s.* अवलंबनार्थं दंडः; आधारदंडः.

Cry, *v. i.* क्रुश् 1 P, विलप् 1 P, रुद् 2 P, परि-देव् 1 A, 10, बाष्पं मुच्-विसृज् 6 P, or पत् c. 2 (of crows &c.) वाश् 4 A, विरु 2 P; नद् 1 P, रस् 1 P. 3 वि-उद्-घुष् 10, प्रकाश् c., प्रख्या c. (ख्यापयति); 'c. ing in the wilderness' अरण्यरुदितं. 4 तारस्वरेण-उच्चैः वद् 1 P, or भाष् 1 A, आ-वि-क्रुश् 1 P, आ-, क्रंद् 1 P. -*s.* क्रंदनं, रुदितं, रोदनं, आक्रोशः, विलापः, परिदेवनं. 2 ध्वनिः, स्वनः, स्वरः, शब्दः, नादः; 'c. of distress' आर्तनादः, करुणस्वनः; रुतं, विरावः; (gen. of animals). 3 उत्क्रोशः, घोषणं, उच्चैर्घोषः, कोलाहलः. -down, अपवद् 1 P, अवगण् 10, अवमन् 4 A, अपलप्. -out, उत्क्रुश्, उच्चैः-तारस्वरेण घुष्. -up, प्रशंस् 1 P, कृत् 10. -er, *s.* घोषकः, प्रकाशकः, घोषणाकृत् *m.*

Crypt, *s.* गुहागृहं.

Crystal, *s.* स्फटिकः, सितोपलः, सितमणिः, स्फटिकाश्मन् *m.* -*a.* 'c. like' स्फटिकाभ, विमल, स्वच्छ. -lize, *v. t.* स्फटिकरूपेण घनीकृ 8 U or घनीभू.

Cub, *s.* शावः-वकः, पोतः, कलभः, वत्सः, शिशुः, किशोरः-रकः.

Cube, *s.* घनः; 'c. root' घनमूलं, घनपदं. -**Cubical**, *a.* घनाकार; 'c. contents' घनफलं

Cubit, *s.* हस्तः, किष्कुः; अरत्नि *m., f.* (with the last finger stretched).
Cuckold, *s.* बंधकीभार्यः; जारिणीपतिः and sim. comp.; 'c. maker' *See* **Adulterer.**
Cuckoo, *s.* कोकिलः, पिकः, परभृतः, पुंस्कोकिलः (male c.); 'female c.' अन्य-परपुष्टा or भृता, कोकिला.
Cucumber, *s.* चर्भटिका, चर्भटः, कर्कटी, उर्वारु *f.*, इ(ई)र्वारु-रु *f.*
Cud, *s.* चर्व्यः, आहारः.
Cuddle, *v. i.* अंके-निकटे स्वप् 2 P or शी 2 A.
Cudgel, *s.* लगुडः, यष्टि *f.*, दंडः, काष्ठं, गदा; 'c.-play' गदायुद्धं, दंडादंडि. —*v. t.* लगुडेन प्रहृ 1 P or आहन् 2 U or तड् 10; 'giving a sound c. ing' लगुडप्रहारैः जर्जरीकृत्य; 'c. your memory' स्मृतिं प्रबोधय तावत्.
Cue, *s.* संज्ञा, इंगितं, सूचना; सूत्रं. 2 अंचलः. 3 छंदः, भावः.
Cuff, *s.* मुष्टिप्रहारः, मुष्ट्याघातः. 2 पिप्पलांचलः. —*v. t.* मुष्टिना-पाणिना-तड् 10 or प्रहृ 1 P or आहन् 2 U; मुष्टीमुष्टि युध् 4 A.
Cuirass, *s.* कवचः-चं, उरस्त्राणं. 2 कूर्मासः; निचोलकः.
Cuish, *s.* ऊरुत्राणं, ऊरुवर्मन् *n.*
Cuisine, *s.* पाकशाला, पाकपद्धति *f.*
Culinary, *a.* पाक in comp.; 'c. skill' पाकसिद्धिज्ञानं.
Cull, *v. t.* उद्धृ 1 P, वृ 5 U; संमा-वृ; एकत्र कृ 8 U; 'c. passages' चूर्णिकां कृ.
Cullion, *s.* जाल्मः, धूर्तः, शठः.
Cully, *s.* वेश्याजितः, सुखप्रतार्यः.
Culm, *s.* नालं, कांडं.
Culminate, *v. i.* उच्चस्थानं प्राप् 5 P; 'the sun is c. ing' नभसो मध्यमध्यास्ते रविः; (fig.) परां कोटिं-काष्ठां-गम् 1 P, अतिभूमिं गम्; पाताभिमुखीभू, क्षयिष्णु *a.* भू. —**ion,** *s.* परा कोटिः, परा काष्ठा.
Culpable, *a.* सदोष, सापराध, निंदार्ह, दोषिन्, अपराद्ध, वाच्य, निंद्य, दूषणीय. —**ness, Culpability,** *s.* सदोषता, अपराधिता, वाच्यता.
Culprit, *s. See* **Criminal.**
Cult, *s. See* **Creed.**
Cultivate, *v. t.* कृष् 1 P, (land &c.) 2 वृध् c., उप-प्र-चि 5 U, परि-अनु-शील् 10, अभ्यस् 4 P, आसेव् 1 A, अनुष्ठा 1 P, भज् 1 U; 'c. friendship with the good' सतां मैत्रीं प्रचिनु-अभ्यस्य. —**ion, Culture,** *s.* कृषि *f.*, कर्षणं, कृषिकर्मन् *n.* 2 अनुशीलनं, अभिवृद्धि *f.*, संवर्धनं, प्रबोधनं. 3 उन्नति *f.*, उत्कर्षः; 'c. of the mind' प्रबोधः, मनुष्यता; 'men of c.' मनुष्यसंस्कारवंतो-जनाः, सुसभ्याः; 'c. of learning' विद्याभिवृद्धिः, ज्ञानोन्नतिः &c. —**or,** *s.* कृषीवलः, कर्षकः, क्षेत्रिन् *m.* 2 अनुष्ठातृ *m.* परिशीलितृ *m*, संवर्धकः.
Culver, *See* **Dove.**
Culvert, *s.* प्रच्छन्नः जल-प्रवाहः-निर्गमः.
Cumber, *v. t.* बाध् 1 A, क्लिश् 9 P; कष्टं-दुःखं-आवह् 1 P, अतिभारो भू 1 P. —*s.* क्लेशः, कंटकः, शल्यं, अतिभारः. —**some, Cumbrous,** *s.* कष्ट-दुःख-कर (री *f.*), क्लेशप्रद, अतिभारभूत. —**Cumbrance,** *s.* अतिभारः, शल्यभूतः, भारभूतः. 2 उपरोधः, प्रतिबंधः, प्रत्यूहः.
Cumin, *s.* जीरकः, जरणः, कणा, अजाजी; 'black c.' सुषवि, कारवी, पृथ्वी; पृथुः, काला, उपकुंचिका.
Cumulate, *See* **Accumulate.**
Cunning, *a.* विदग्ध, धूर्त, चतुर. 2 मायिन्, वंचनशील, विप्रलंभक, कपटिन्. —*s.* विदग्धता, धूर्तता, चातुर्य, नैपुण्यं, पटुता. 2 कपटं, माया, वंचनं, शाठ्यं, व्याजः, कैतवं, छलं. —**ly,** *adv.* चातुर्येण, विदग्धतया, धूर्ततया, सव्याजं.
Cup, *s.* पात्रं, चषकः-कं, भाजनं, काचपात्रं. 2 पुटः, कोशः-षः; 'fond of the c.' पानासक्तः; 'taste the c. of misery' दुःखभाग् भू. —*v. i.* आचूषण-यंत्रेण रक्तं मुच् c. or मोक्ष् 10 'c.-board' लघुकोष्ठः; 'c.-ing glass' रक्तचूषणयंत्रं, 'dry c.-ing' घटिकया or अलाबुना आचूषणं.
Cupid, *s.* मदनः, स्मरः, कामः, अनंगः, कंदर्पः, मन्मथः, मनसिजः, कुसुमबाणः, पंचशरः, मारः, प्रद्युम्नः, मीनकेतनः, कुसुमेषुः, मकरध्वजः, पुष्पधन्वा, आत्मभूः, अनन्यजः, चित्तजन्मन् and sim. comp. —**ity,** *s.* लोभः, गृध्नुता, अतिलोभः-स्पृहा, लालसा, अतितृष्णा, लाभलिप्सा. 2 कामुकता.
Cupola, *s.* तोरणशृंगं, प्रासादशीर्षं.
Cur, *s.* शुनकः; *See* **Dog.** —**rish,** *a.* शील, दुष्ट.
Curate, *s.* उपयाजकः, पुरोहितप्रतिनिधिः.
Curator, *s.* अवेक्षकः, अधिकारिन् *m.*, अध्यक्षः; 'c. of a depot' ग्रंथशालाधिकारी.
Curb, *v. t.* आप् 5 U, सं-नि-यम् 1 P, निर्बंध् 10, प्र-नि-ग्रह् 9 P, अव-नि-रुध् 7 U. संह् 1 P; 'c. the horses' प्रगृहीतं वाजिनः (S. 1); *See* **Control** also. —*s.* मुखयंत्रणं, मुखशृंखला-लः. 2 यंत्रणं, संयमः, निरोधः, &c.
Curd, *v. i.* दधिरूपेण घनीभू, स्त्यै 1 A. —*v. t.* घनीकृ 8 U, स्त्यै c., संहन् 2 P. —*s.* दधि *n.*, पयस्यं, प्रस्तः-सं. —**y,** *a.* दधिमय (यी *f.*), 2 घनीभूत, स्त्यान, संहत.

Curdle, *v. i. See* **Curd.** **-ed,** *See* **Curdy.**

Cure, *v. t.* (disease) कित् desid. (चिकित्सति-ते), प्र-उप-शम् c. (शमयति), साध् c., प्रतिकृ 8 U, समाधा 3 U. (persons) सुस्थ-प्रकृतिस्थ-नीरोग *a.* कृ ; gen. ex. by. निर्-गत-वीत in comp.; 'Rama was c. ed of his fever' रामो ज्वरोपशमनान्नीरोगः कृतः, प्रकृतिस्थः संजातः; 'c. ed of wounds' निर्व्रणः कृतः; निर्विषः; &c. **-s.** चिकित्सा, उपशमः, प्रति(ती)कारः, रोगोपशमः. 2 सुस्थता, स्वास्थ्यं. 3 भेषजं औषधं. **-able,** *a.* साध्य; 'inc. by physicians' भिषजामसाध्यं (R. VIII. 93); शमनीय, प्रतिकार्य. **-ative,** *a.* रोगहर, रोगघ्न (घ्नी *f.*), व्याधिशमक, शांतिद. **-er,** *s.* चिकित्सकः, **-less,** *a.* असाध्य, दुरुपचार.

Curiosity, *s.* कुतूहलं, कौतूहलं, जिज्ञासा, कौतुकं, कुतुकं; oft. ex. by desid. nouns; 'c. to see' दिदृक्षा. 2 (Object of c.) अपूर्ववस्तु *n.* दुर्लभद्रव्यं, उत्कृष्टद्रव्यं. **-Curious,** *a.* कुतूहलिन्, जिज्ञासु, कौतुकाक्रांतचित्त, कुतुकाविष्ट, सकौतुक; 'my heart is c. to know' जिज्ञासाक्रांतहृदयोस्मि, oft. by desid.; 'c. to ascertain' उपलिप्सुः. 2 अपूर्व, अदृष्टपूर्व, अद्भुत, चित्र, दुष्प्राप, दुर्लभ; दुर्दर्शनीय. 3 सूक्ष्म, विज्ञ; निपुण, विचक्षण, सूक्ष्मदर्शिन्. **-ly,** *adv.* कुतूहलेन; सूक्ष्मं, अद्भुतं, चित्रं.

Curl, *s.* चूर्णकुंतलः, अलकः, कुरलः; 'hair thick with c s.' कुंतलाकीर्णाः शिरोरुहाः. 2 तरंगः, ऊर्मि *f.* **-v.** *t.* (केशान्) आकुंच् c. व्यावृत् c., रच् 10. 2 तरंगयति (D) **-v.** *i.* जिम्हीभू, वक्रीभू, आकुंच् pass., व्यावृत् 1 A. 2 तरंगायते (D). **-ed, -ing,** *a.* कुटिल, अराल, कुंचित; 'c. mass of smoke' धूमस्योत्पीडः (U. 3).

Curmudgeon, *See* **Miser.**

Currant, *s.* शुष्कद्राक्षं.

Current, *a.* प्रचलित, प्रचल, सर्वसंमत; 'languages c. in India' भरतखंडे प्रचलिता भाषाः. 2 वर्तमान, विद्यमान; 'c. year' वर्तमानसंवत्सरः; 'c. report' जनप्रवादः; 'c. moment' आपातः. आपातरम्या विषयाः (KI. XI. 12). 3 सर्वसाधारण लोकप्रसिद्ध-विश्रुत, **-s.** स्रोतस् *n.*, प्रवाहः, रयः, वेगः, धारा. ओघः; 'c. of opinion' साधारणमतौघः. **-ly,** *adv.* साधारणतः, सामान्यतः, लौकिकतया; 'c. known' लोकप्रसिद्ध. **-Currency,** *s.* प्रचलनं, प्रचारः, प्रसरणं; 'to gain c.' प्रचलित *a.* भू, प्रसृ 1 P. व्यवहृ 'c. pass..' सर्वसंमत *a.* भू; 'a report gained c.' इति जनप्रवादः प्रवृत्तः 2 प्रवाहः, प्रसरः, 3 सुखोच्चार्यता. 4 प्रचलित मुद्रा.

Curriculum, *s.* अध्ययनक्रमः-मार्गः.

Currier, *s.* चर्मकारः, पादूकृत् *m.*

Curry, *v. t.* (favour) अतिचाटूक्त्या प्रसादं संपद् c. or आराध् 10. 2 (a horse) अश्वदेहं मृज् 2 P. 3 (leather) परिष्कृ 8 U, क्षुप् c. 4 **Beat,** q. v.; 'c. comb' अश्वदेहमार्जनी.

Curse, *v. t.* शप् 1 U, अभिशंस् 1 P, शापं दा 3 U (with dat.), आक्रुश् 1 P; गर्ह् 1, 10 A. **-s.** शापः, अभिशापः, आक्रोशः. 2 कंटकः, आधिः; 'a c. to the family' कुलस्याधिः, कुलांगारः, कुलपांसुलः; 'a c. on thy folly' धिक् त्वां मूढ. **-sd,** *a.* शप्त, आक्रुष्ट; *See* **Accursed.**

Cursory, *a.* क्षिप्र, अक्रम, त्वरित, अनिपुण, अनवहित, स्थूल; 'even at a c. glance' स्थूलदृष्ट्यापि. **-ly,** *adv.* शीघ्रं, स्थूलदृष्ट्या, अनिपुणं.

Curt, *a.* ह्रस्व, संक्षिप्त. **-ly,** *adv.* संक्षेपेण. **-ness,** *s.* संक्षेपः, संहारः, संक्षिप्तता.

Curtail, *v. t.* ह्रस् c., संक्षिप् 6 P; संहृ 1 P; अवच्छिद् 7 P, अल्पीकृ 8 U.

Curtain, *s.* ज(य)वनिका, तिरस्करिणी, व्यवधानं, आवरणपटः; 'behind the c.' नेपथ्ये; 'c. lecture' शय्यानुशासनं; 'bed c.' मशहरी, मशकहरी. **-v.** *t.* आवरणेन प्रच्छद् 10, व्यवधा 3 U.

Curtsy } *See* **Courtesy** under
Curtsey } **Court.**

Curve, *v. t.* नम् c., अव-आ-नम् c., आकुंच् c., वक्रीकृ 8 U, कुटिलीकृ, आवृज् 10. **-s.** नति *f.*, आवर्जनं, वक्रता, आकुंचनं, अंचनं. 2 वक्ररेखा. **-a.** आनत, वक्र, कुटिल, आभुग्न, जिम्ह; *See* **Crooked.** **-ated,** *a.* आभुग्न, वक्र &c. **-ation,** *s.* आकुंचनं, आवर्जनं, वक्रीकरणं. **-ature,** *s.* वक्रता, वक्रिमन् *m.*, कुटिलता, आनति *f.* वक्रीभावः.

Curvet, *v. i.* प्लु 1 A, वल्ग् 1 P. **-s.** प्लुतं, वल्गनं.

Cushion, *s.* उपधानं, उपबर्हः, पीठोपधानं.

Cusp, *s.* अर्धचंद्रशिखा, अर्धचंद्राग्रं. **-ated,** *a.* सूच्यग्र, तीक्ष्णाग्र.

Custody, *s.* रक्षा, अवेक्षणं, रक्षणं, पालनं, गुप्ति *f.*; *See* **Charge.** 2 निरोधः, बंधनं, कारानिरोधः, आसेधः.

Custom, *s.* आचारः, संप्रदायः, व्यवहारः, रीति *f.*, अनुसारः, क्रमः, रूढिः; शुल्कं, राजस्व; 'c. house' शुल्कस्थानं; 'the officer of c. s' शौल्किकः. **-ary,** *a.* आचारिक-व्यावहारिक (की *f.*), प्रचलित, लोकसिद्ध, लौकिक (की *f.*); gen. by आचार in comp.; 'to take flowers as is c.' आचारपुष्पग्रहणार्थं (M. 4); आचारलाजाः; &c. **-arily,** *adv.* यथाव्यवहारं,

संबद्धापाकुलारेण, मायकः, वचनकार्. **–er,** *s.* ग्राहकः, केतृ *m.*, निस्वक्रयिन् *m.*

Cut, *v. t.* लू 9 U, छिद् 7 P, कृत् 6 P, छो 4 P, व्रश्च् 6 P, छो 4 P, **2** भिद् 7 U; खंड् 10; 'c. ing to the quick' मर्मच्छिद्-भिद् मर्माणि कृंतत्; 'c. a hole through,' व्यध् 4 P, निर्भिद्, समुत्कृ 6 P; 'c. a figure' अतिशय-कीर्ति-लभ् 1 A; 'c. short' संहृ 1 P, संक्षिप् 6 P; न्यूनीकृ 8 U; 'to c. the matter short' किंबहुना; 'c. ing short my speech' मद्वचनमाक्षिप्य; 'c. to, or in, pieces' खंडशः-लवशः-छिद्. **–v.** *i.* उन्निर् pass., उत्पद् 4 A, स्फुट् 6 P. **–s.** छेदः, प्रहारः, आघातः. **2** कुल्या, खातं. **3** खंडः-डं, भागः, दलं, लवः, लेशः. **4** सरलमार्गः, अविमार्गः. **5** रीति *f.*, रूपं, मार्गः, पद्धति *f.* 'c.-purse' ग्रंथिभेदकः चोरः; 'c.-throat' कंठच्छेदकः; प्राणघातकः, घातकः; (*a.*) मारात्मक, वधोद्यत. **–down,** अवच्छिद्, कर्तित्वा निपत् c. **–off,** निकृत्, व्यवच्छिद्. **2** उच्छिद्, उन्मूल् 10. विनश् c. **3** विलुप् c., अपनी 1 P, **4** विच्छिद्, अव-नि-रुध् 7 U, खंड् 10, निवार् 10. **–out,** उत्कृत् c. **2** परि-सं-कल्प् c. (मनसा); निरूप् 10, चिंत् 10, युज् 10. **3** अतिक्रम् 1 U, 4 P, अतिशी 2 A; *See* **Excel. –ter,** *s.* छेदकः, छेत्तृ *m.*, छिद् in comp.; 'wood-c.' काष्ठच्छिद्. **–ting,** *s.* छेदनं, कर्तनं, &c. **2** खंडः-डं, शकलः-लं, दलं. **–a.** तीव्र. तीक्ष्ण, मर्मभेदिन्, मर्मस्पृश्-छिद्, अरुंतुद.

Cutaneous, *a.* त्वाच (-ची *f.*), त्वक्संबंधिन्, त्वच् in comp.; 'c. disease' त्वग्रोगः.

Cuticle, *s.* बाह्यत्वच् *f.*, बाह्यचर्मन् *n.*

Cutlass, *s.* खड्गः; कृपाणी.

Cutler, *s.* छुरिकाकारः, शस्त्रकारः.

Cycle, *s.* चक्रं, आ-परि-वृत्ति *f.*, पर्यायः; कालचक्रं.

Cyclone, *s.* चक्रवातः, वातावर्तः.

Cyclops(æ)dia, *s. See* **Encyclopædia.**

Cygnet, *s.* हंसशावकः, बालहंसः.

Cylinder, *s.* गोलः, वर्तुलं. **–Cylindrical,** *a.* वर्तुल, गोलाकार.

Cymbal, *s.* झल्लकं, झल्लरी.

Cynic, *s.* मनुष्यद्वेषिन् *m.* **–al,** *a.* सदावक्र, कुटिलशील, दुरात्मन्, वक्रभाव, निंदाशील.

Cynosure, *s.* ध्रुवः; ज्योतीरथः.

D

Dab, *v. t.* सिक्तवस्त्रेण लघु तड् 10. **–s.** लघ्वाघातः, सेचनं. **2** लघुपिंडः. **3** चिपिटमत्स्यः.

Dabble, *v. t.* सिच् 6 P, प्रोक्ष् 1 P, लिप् 6 P. **–v. i.** जले-पंके-क्रीड् 1 P; 'd. ing in books' पल्लवग्राहि पांडित्यं (H. 1), शास्त्रचुंबनं. **–er,** *s.* जलक्रीडः; शास्त्रचुंबकः.

Dacoit, *s.* दस्यु *m.* **–y,** *s.* दस्युकर्मन् *n.*

Dagger, *s.* कृपाणः, छुरिका, कर्तरि, असिपुत्रिका; 'at d. s drawn' सह्यपद्भुवैर *a.*

Daggle, *v. t.* मलेन दुष् c. (दूषयति), पंकेन लिप् 6 P.

Daily, *See* under **Day.**

Dainty, *a.* स्वादु, रुचिर, सुरस, मिष्ट. **2** ललित, कोमल, मृदु, सूक्ष्म. **3** अतिविवेचिन्, अतिसभ्य. **–s.** मिष्ट-विशिष्ट-भोजनं, स्वाद्वन्नं, भोजनविशेषः. **–ly,** *adv.* स्वादुतया, ललितं, कोमलं. **–ness,** *s.* स्वादुता; कोमलता, लालित्यं, विलासः, विभ्रमः.

Dairy, *s.* दुग्धशाला, दधिमंथनगृहं; 'd. maid' गोपकन्या, आभीरी, गोदोहिनी.

Dais, *s.* सवितानं उच्चासनं.

Dale, *s.* दरी, कंदरः; उपत्यका.

Dally, *v. i.* विलस् 1 P, विभ्रम् 1, 4 P, क्रीड् 1 P, रम् 1 A, विह् 1 P. **2 Delay,** q. v. **–ance,** *s.* विलासः, विभ्रमः, क्रीडा, विहारः, कामचेष्टा.

Dam, *s.* सेतुः, जलावरणं, धरणः. **2** (पशूनां) मातृ *f.*, जननी अंबा, प्रसूः. **–v. t.** (up) (सेतुना) जलं निरुध् 7 U or संस्तंभ् 9 P.

Damage, *s.* हानि *f.*, अपकारः, अपायः, नाशः, ध्वंसः. **2** (of things in use) क्षयः, क्षति *f.*, उपक्षयः, अपचयः. **3** निष्कृति *f.*, प्रतिफलं, क्षतिपूरणं. **–v. t.** नि-अप-कृ 8 U, क्षि c., नश् c., दुष् c. (दूषयति). **2** हिंस् 7 P, क्षण् 8 P.

Damask, *s.* चित्रदुकूलं. **–v. t. Variegate,** q. v.

Dame, *s.* आर्या, भवती (in addressing). **2** स्त्री, गृहिणी, 'old d.' वृद्धा स्त्री, दुःस्त्री.

Damn, *v. t.* दंड् 10; *See* **Condemn. 2** नरकदंडं आदिश् 6 P, नरके निपत् c. **3** गर्ह् 1, 10 A; *See* **Censure. –able,** *a.* गर्ह्य, निंद्य. **2** नरकदंडार्ह. **–ation,** *s.* निरयनरक-वासः; नरकदंडः, नरकयातना, निरयनिपातः, अनंतदंडः-यातना.

Damp, *s.* क्लिन्न, स्तिमित, आर्द्र, जलासिक्त, उन्न; 'to be d.' क्लिद्, 4 P. **2** विषण्ण, म्लान, अवसन्न, भग्नोत्साह. **–s.** क्लेदः, जलावसेकः, स्तेमः. **2** वाष्पः, धूमः. **3** विषादः, म्लानता, उत्साहभंगः. **–v. t.** क्लिद् c., उंद् 7 P. आर्द्रीकृ 8 U. **2** भंज् 7 P, खंड् 10, सद् c.. भग्नाश *a.* भग्नोत्साह-कृ. 'do

not d. his energy' तस्योत्साहभंगं मा कृथाः; 'd. ed by defeat' पराजयेन भग्नोत्साहः. -ish, a. आक्लिन्न, ईषदार्द्र. -ness, s. आर्द्रता, क्लिन्नता.

Damsel, s. कन्या, बाला, कुमारी, बालिका, युवति (ती) f. 'd.'s child' कानीनः (नी f.); 'celestial d.' अप्सरस् f., स्वर्गस्त्री-योषित् f.

Dance, v. i. नृत् 4 P, नट् 1 P; 'who always d. s attendance' यः अहर्निशमुपरचितांजलिः (अधिदैवतमिव) स्तौति (Ka. 109), or merely सांजलि उपस्था 1 A or उपास् 2 A. -v. t. नृत् c., संचल् c. -s. नृत्यं, लास्यं, तांडवं, नाट्यं, पादन्यासः. -er, s. नटः, नर्तकः, कुशीलवः, शैलूषः; 'male d. in a female dress' भ्रु (भ्रू or भ्रू) कुंसः (सः). -ing, s. नाट्यं, नृत्यं; 'd. girl' नर्तकी, 'd. house-school' नृत्यशाला; 'd. master' नाट्याचार्यः.

Dandle, v. t. अंके निधाय लल् 10.

Dandri(u)ff, s. मज्जा; दारुणं.

Dandy, s. सुवसनः, सुभगंमन्यः; दांभिकः.

Danger, s. भयं, भीति, f., शंका, संदेहः, संशयः. 2 आपद्-विपद् f., अपायः, अनर्थः, व्यसनं, संकटं, दुर्गं, कृच्छ्रं, कष्टः-ष्टं. 'd. to life' जीवितसंशयः; 'the hour of d.' आपत्समयः; 'money is in d. of being lost' द्रव्यापहरणस्य भयं वर्तते; 'without any d.' अकुतोभय a.; 'brought into d.' संशयित; 'attended with d.' संदिग्ध, संशयदोलारूढ. -v. t. संशये पत् c., संशयस्थ a. कृ 8 U. -ous, a. संकट, संबाध, विषम. 2 भयावह, भयंकर, भीतिमद्, भयहेतुक; oft by (s.) in comp. 3 संदिग्ध, शंकाक्रांत, संशयापन्न, विपज्जनक; 'a d. man' अविश्वास्यः, घातुकः. -ously, adv. भयपूर्वकं; 'my brother is d. ill' मम भ्राता जीवितसंशये वर्तते.

Dangle, v. i. दुल् 1 P, लुठ् 6 P, चंच् 1 P, लंब् 1 A; 'd-ing at the feet' पादलग्न, चरणलोल.

Dank, a. See **Damp.**

Dapple, v. t. चित्र् 10, कर्बुरीकृ 8 U, कल्माषयति (D.). -ed, a. चित्र, कर्बुर, कल्माषित, शबल.

Dare, v. i. धृष् 5 P, उत्सह् 1 A; साहसं कृ 8 U, शक् 5 P. -v. t. आह्वे 1 A, धृष् c. -s. आह्वानं, योधसंरावः. -ing, s. साहसं, धार्ष्ट्यं, धैर्यं, प्रगल्भता, निर्भीकता. -a. साहसिक (की f.), निर्विशंक, धृष्ट, शूर, प्रगल्भ, निर्भय. -ingly, adv. धृष्टं, साहसेन; प्रगल्भं, निर्भयं. -ingness, s. साहसं, धृष्टता, &c.

Dark, a. अंधकारमय (यी f.), तिमिरावृत, तमोवृत, तामस ( ), तमस्विन्, निष्प्रभ, सतिमिर, सांधकार. 2 कृष्ण, श्याम, नील. 3 अस्पष्ट, गूढ, दुर्बोध. 4 पाप, दुष्ट, खल, मर्ष, मिश्र; 'd. in soul तमोवृत्ति, पापात्मन्; 'd. thoughts' पापसंकल्पाः. s., -ness, s. अंधकारः, तमस् n., तमिस्रा-स्रं, ध्वांतं, तिमिरं; 'quality of (tendency to) d.' तमोगुणः; 'slight d.' अवतमसं; 'pitchy (blinding) d.' अंधतमः, सूचिभेद्यं तमः; 'in the d.' रजनीतिमिरे; 'all-pervading d.' संतमसं. 2 गूढं; रहस्यं; 'I am still in the d. about the matter' तस्यार्थस्याहमद्याप्यनभिज्ञः, न किमपि वेद्मि. -en, v. t. अंधकारयति (D.), तिमिरेण आवृ 5 U, तिमिरेण आच्छद् 10. 2 (fig.) कलुषयति-कलंकयति (D.), दुष् c. (दूषयति); 'face d. ed with fury' कोपकलुषिताननं. -v. i. अंधीभू 1 P. -ish, a. ईषत्कृष्ण, आनील. -ly, adv. सांधकारं, अस्पष्टं, अव्यक्तं, गूढं. -some, a. निष्प्रभ, तमोवृत.

Darling, a. प्रिय, प्रियतम, दयित; ex. by जात, तात. -s. स्नेहपात्रं, वत्सः, जातः, दयितः.

Darn, s. वस्त्रसंधिः. -v. t. जीर्णवस्त्राणि सिव् 4 P, or संधा 3 U.

Dart, s. अस्त्रं, शल्यं, शंकुः. 2 बाणः; See **Arrow.** -v. t. मुच्-क्षिप् 6 P, अस् 4 P, पत् c., विसृज् 6 P, (with loc.). -v. i. जवेन-सहसा-सवेगं-उत्पत् 1 P, or पलाय् 1 A. 2 सहसा उद्वि 2 P or आविर्भू 1 P. 3 स्फुर् 6 P, विलस् 1 P; 'd. on' रभसा-जवेन प्रचल् 1 P or आपत् 1 P or अभिद्रु 1 P.

Dash, v. t. रभसा प्रक्षिप् 6 P or पत् c., आघात्य-हन् 2 U; 'd. ed her head against a rock' प्रस्तरे तस्याः शिरः आजघ्ने. 2 भञ् 9 P, प्रभंज् 7 P, खंडशः कृ 8 U, चूर्ण् 10, छिद् 10; 'the ship was d. ed to pieces' पोतः खंडशो भग्नः, सहस्रधा विदीर्णः, (प्रतिघातेन) शकलीकृतः. 3 अवकॄ 6 P; उक्ष् 1 P, सिच् 6 P. 4 संमिश्र् 10. 5 विनश् c., व्याकुल् 2 P or c., विलुप् c. -v.i. (against) आपत् 1 P, आ-समा-हन्. 2 शकलीभू 1 P, विद्-प्रभंज् pass.; 'd. off' जवेन पलाय् 1 A or अपसृ 1 P. -s. संघट्टः, समापातः, अभिघातः, निष्पेषः, संमर्दः. 2 प्रहारः, आघातः, आक्रमः. 3 प्रागल्भ्यं, धीरता, उत्साहः.

Dastard, -ly, See **Coward,-ly.**

Data, s. स्वीकृतानि तत्त्वानि; उपन्यासः.

Date, s. खर्जूरः-री. 2 कालः, तिथि m. f.; कालावधिः, लेखनदिवसः-तिथिः-दिनं; 'out of d.' व्यवहारातिक्रांत. -v. t. दिनं-तिथिं लिख् 6 P. -v. i. (from) आरभ् 1 A (with abl.); विशिष्टकालादारभ्य प्रवृत् 1 A.

Daub, *v. t.* लिप् 6 P, अंज् 7 P, दिह् 2 U. —*s.* लेपः, विलेपनं. 2 कुचित्रं, कदालेख्यं. **—er,** *s.* लेपकः. 2 अकुशलचित्रकारः. **—y,** *a.* श्यान, सांद्र.

Daughter, *s.* कन्या, दुहितृ *f.*, तनया, पुत्रिका, आत्मजा, सुता, पुत्री, नंदिनी; oft ex. by Patronymics; ' d. of Parvata ' पार्वती; ' d, of Janaka ' जानकी; 'd.-in-law ' स्नुषा, वधूः.

Daunt, *v. t.* त्रस् c., भी c., उत्साहं-धैर्यं-भंज् 7 P, भग्नाश *a.* कृ 8 U, धैर्यं स्खल् c. **—less,** (und.-ed), *a.* निर्भीक, निर्भय, अजातशंक, अभीत, अस्खलितधैर्य. **—lessness.** *s.* अभयं, विशंकता.

Daw, *s.* द्रोणकाकः.

Dawdle, *v.* विलंब् 1 A; कालं हृ 1 P or क्षिप् 6 P.

Dawn, *s.* उषस् *f.*, *n.*, प्रत्यूषः, प्रभातं, विभातं, दिनमुखं, अरुणोदयः; ' it is d. ' प्रभाता रजनी. 2 उदयः; ' d. of liberty ' स्वातंत्र्योदयः ; ' belonging to the d. ' उषस्य, प्रभातीय, (*s.*) in comp. —*v. i.* आविर्भू 1 P, उद्भिद् pass., उद्गम् 1 P, प्रभा 2 P; 'before the day d. ed ' अप्रभातायां शर्वर्यां; ' the day d. ed ' प्रभाता रजनी.

Day, *s.* दिनं, दिवसः, वासरः, अहन् *n.*, वारः ' a lunar d. ' तिथि *m. f.*, ' d. by d. ' दिने दिने, अनुदिवसं, प्रत्यहं; 'by d. ' दिवा; ' the next d. ' परेद्युः, ' the d. before ' पूर्वेद्युः; ' another d. ' अन्येद्युः; ' the other d.' अचिरं; 'd. and night' अहर्निशं, अहोरात्रः; दिवारात्रं, नक्तंदिवं; 'all d. long' अहर्निशं, रात्रिंदिवं, दिवा-निशं-रात्रं; 'till this d.' अद्य यावत्; 'the d. after to-morrow' परश्वः; ' he gained the d. तस्मिन् दिने स विजयी बभूव; ' d. break ' *See* **Dawn;** 'd. labour ' भृतं, दैनिकं कर्म; 'd. labourer ' भृतीनः; 'd. light ' सूर्यप्रकाशः, दिनज्योतिस् *n.*; ' d. star ' प्रभातनक्षत्रं; ' d. time ' दिनकालः, दिनसमयः ; ' being in the d. ' दिवातन (नी *f.*); ' during d. ' दिवा. **—Daily,** *a.* दैनिक-प्रत्यहिक- आह्निक (की *f.*), दैनंदिन (नी *f.*) ' d. business ' आह्निकं, नित्यकर्मन् *n.* —*adv.* प्रति in comp. with ' day '; प्रत्यहं, प्रतिदिनं; दिने दिने, अहरहः. &c.

Daze, *v. t. See* **Stun.**

Dazzle, ~~*v. t.*~~ (the eye) चक्षुषः तेजः प्रतिहन् 2 P (Ka. 43), नेत्रं प्रतिहन्. **—ing,** *a.* दुष्प्रेक्ष्य, दुर्निरीक्ष्य; ' of d. splendour ' प्रभाविशेषोदयदुर्निरीक्ष्यः (R. vi. 5); नेत्रप्रतिघातिन्, (विजित्य नेत्रप्रतिघातिनीं प्रभां K. v. 20).

Dead, *See* under **Die.**

Deaf, *a.* बधिर, श्रोत्रविकल, अकर्ण, एड ; ' d. and dumb ' एडमूकः. **—en,** *v. t.* बधिरयति (D.), कर्णौ उपहन् 2 P, बधिरीकृ 8 U; ' d. ing all directions with cries of alas ' हाहाभिनादैर्नादिशो बधिरयंतः. **—ly,** *adv.* बधिरवत् ; अश्रुतिपूर्वं. **—ness,** *s.* बधिरता, एडता, श्रवणाक्षमता.

Deal, *s.* बाहुल्यं, प्राचुर्यं ; ' a good d. of ' बहु, प्रचुर, भूरि, विपुल; ' a good d. of corn ' बहुधान्यं; ' a good d. ' (*adv.*) अत्यंतं, बहु, भृशं, गाढं, अति or सु pr.: सुतप्त, अतिकृश, &c. 2 देवदारु *n.* —*v. t.* विभज् 1 U, परिकल्प् c., पृथक् पृथग् विन्यस् 4 U. 2 विकॄ 6 U, व्यस् 4 P; ' d. blows ' मुष्टिना प्रहृ 1 P, आघातं-प्रहारं-कृ 8 U. —*v. i.* (in) पण् 1 A, व्यापृ 6 A; क्रयविक्रयं कृ, व्यवहृ 1 P; 'he does not d. in missiles' नास्य व्यवहारोऽस्त्रेषु (U. 5). **—with,** आचर् 1 P, वृत् 1 A, व्यवहृ. 2 प्रतिकृ 8 U; निरुध् 7 U; स्पर्ध् 1 A; *See* **Contend.** 3 विधा 3U, वशीकृ, विनी 1 P ; ' easy to d. ' विधेयः, वश्यः. **—er,** *s.* वणिज् *m.*, आपणिकः, विपणिन् *m.*, क्रयविक्रयिन् *m.* 2 व्यवहारिन्-व्यापारिन्-व्यवसायिन् *m.*; ' d. in wood ' काष्ठव्यवहारकः. **—ing,** *s.* वाणिज्यं, निगमः, विपणः, क्रयविक्रयः. 2 व्यवहारः, व्यवसायः, आचरणं, व्यापारः, चेष्टितं, क्रिया, कर्मन् *n.*, वृत्ति *f.*, वर्तनं. 3 सव्यवहारः, संसर्गः, संगमः.

Dear, *a.* बहुमूल्य, महार्घ-र्ह, महामूल्य. 2 प्रिय, दयित, वल्लभ, अभिमत, इष्ट, कांत, अभीप्सित ; ' d. friend ' हृदयंगमः सखा ; ' as d. as one's life ' प्राणप्रियसम. 3 (As a term of endearment) दयित, कांत, तात, वत्स, प्रिय; ' d. Jânaki ' प्रिये जानकि; वत्स राम, &c. —*adv.*, **—ly,** बहुमूल्येन, महार्घेण. 2 अत्यंतं; सुप्रियं, सुप्रीत्या, अति-सु-pr. 3 अहो, बत, हा, हंत, अहह. **—ness,** *s.* प्रियता, अभीष्टता, प्रीति *f.* 2 बहुमूल्यं, महार्घता, महार्घः.

Dearth, *s.* दुर्भिक्षं, दुष्कालः ; ' d. felt ' शीर्षाकः, प्रयामः. 2 अभावः, अप्राप्ति *f.*, विरहः, दुर्लभता.

Death, *See* under **Die.**

Debar, *v. t.* नि-प्रति-विध् 1 P, निवारि 10, निरुध् 7 U. 2 निराकृ 8 U, निरस् 4 U.

Debark, *v. i.* उद्दृ 1 P, नौकायाः अवतॄ. —*v. t.* अवतॄ c.

Debase, *v. t.* Ex. by कृ 8 U, with **Base,** q. v.; अपकृष् 1 P, स्वपदात् पत् c. or भ्रंश् c. or च्यु c.; लघूकृ, अवज्ञा 9 P. **—ment,** *s.* अपकर्षः, अभिभवः, पदच्यावनं, लघूकरणं, अवमानना, अवज्ञा. 2 अप-नि-कृष्टता, अधोगति *f.*, नीचस्थिति *f.*

Debate, *s.* वि-,वादः, वाक्प्रतिवादः. वाग्युद्धं, विचारः, वितर्कः, हेतुवादः. —*v. t.* विचर् c.,

वितर्क् 10; *See* **Argue.** –*v. i.* विवद् 1 A, विप्रलप् 1 P, वाक्कलहं-वादयुद्धं-कृ 8 U. **–er,** *s.* वादिन् *m.*, वितर्किन्-विवादकृत्-हेतुवादिन् *m.* **–ful,** *a.* वादप्रिय, विवादशील, वादार्थिन्.

Debauch, *v. t.* दुष् c. (दूषयति), नश् c., सत्पथात् च्यु c. or भ्रंश् c.; 'd. a girl.' (कन्यां) दुष् c., धृष् c., सतीत्वात् भ्रंश् c., क्षतयोनिं कृ. **–s.** कामावेशः; विषयोपभोगः, विषयनिरति *f.* **–er,** *s.* विषयिन् *m.*, विषयासक्तः, कामासक्तः. विषयोपभोगरतः. **2** दुराचारः, दुश्चरितः, खंडितवृत्तः. **–er,** *s.* दूषकः, नाशकः. **–ery,** *s.* विषयासक्ति *f.*, कामासक्तता, विषयोपभोगः, व्यसनं, विषयित्वं.

Debenture, *s.* प्रतिज्ञापत्रं, नियमलेखः.

Debilitate, *v. t.* तेजो हृ 1 P or नश् c.; क्षै c. (क्षपयति), दुर्बलीकृ 8 U, क्षीणीकृ. **–ed,** *a.* दुर्बल, क्षीण, कृश, अशक्त, क्षाम. **–Debility,** *s.* दौर्बल्यं, शक्तिहीनता, क्षामता, कार्श्यं, तेजोहानि *f.*, शक्तिक्षयः, शक्तिपातः, अशक्तता.

Debit, *v. t.* देयधनभागे लिख् 6 P.

Debonair, *a.* सभ्य, शिष्ट, सुशील, सुविनीत, आर्य. **–ly,** *adv.* सभ्यवत्, सुविनीतं.

Debt, *s.* ऋणं; 'pay off or discharge a d.' ऋणं दा 3 U or शुध् c., अनृणतां-आनृण्यं गम् 1 P: 'he paid off the d. of his master by his life' स्वासुभिर्भर्तुरानृण्यं गतः (M. 5); 'discharge of d.' ऋणशोधनं-निस्तारः, ऋणमोक्षः; 'involved in d.' ऋणग्रस्त, ऋणिन्; 'run into or incur d.' ऋणं कृ, ऋणं ग्रह् 9 P; 'free from d.' अनृण. **–or,** *s.* ऋणिन् *m.*, अधमर्णः.

Decade, *s.* दशकं; 'd. of year' दशवर्षं.

Decadence, } *s.* क्षयः, अवपातः, अवसादः.
Decadency, }

Decagon, *s.* दशास्रं, दशभुजः.

Decamp, *v. i.* कटकं-शिबिरं त्यज् 1 P, कटकनिवेशात् अपसृ 1 P or अपक्रम् 1 U, 4 P, सहसा पलाय् 1 A or अपक्रम्. **–ment,** *s.* कटकत्यागः, अपसरणं, पलायनं; अपगमनं.

Decant, *v. t.* काचपात्रे स्रु c. or निक्षिप् 6 P, **–er,** काचपात्रं, कूपी.

Decapitate, *See* **Behead.**

Decay, *v. i.* क्षि pass., क्षयं-लयं-नाशं-इ 2 P, जॄ 4 P, शॄ pass., ह्रस् 1 P, अवसद् 1 P; म्लै 1 P, नश् 4 P, म्ली 4 A, क्षै-म्लै-ग्लै 1 P, ध्वंस् 1 A; 'with d.-ed leaves' प्रपर्णः-शीर्णपर्णः (वृक्षः). –*v. t.* Causal of roots above. **–s.** क्षयः, अवसादः, जीर्णता, ह्रासः, प्रलयः; नाशः, अपचयः; क्षामता, ग्लानि *f.* **–ing,** *a.* क्षयिन्, क्षीयमाण, विशीर्यमाण.

Decease, *v. i.* मृ 6 A, उपरम् 1 P; *See* **Die.** **–s.** मरणं, मृत्युः, निधनं, तनुत्यागः, उपरमः, संस्थानं. **–ed,** *a.* **Dead,** q. v.

Deceive, *v. t.* वंच् 10, प्रलभ् c., प्रतृ c., भ्रम् c. (भ्रमयति), मुह् c.; *See* **Cheat**; 'you are much d. ed (in thinking so)' महाभ्रमोयं तव. **–er,** *s.* वंचकः, प्रतारकः, कितवः, मायिन् *m.*, धूर्तः, शठः. **–Deceit,** **–Deception,** *s.* प्रतारणा, कपटं, छद्मन् *n.*, छलं, वंचनं-ना, कैतवं, माया, विप्रलंभः, कूटं, अतिसंधानं, उपधिः. **2** मोहः, भ्रमः. **–ful,** **–Deceptive,** *a.* कपटपर, वंचक, धूर्त, वंचनशील, कपटिन्, मायिन्, छाद्मिक, शठ, कितव. **2** भ्रमकारिन्, मोहिन्, भ्रांतिजनक, मोहोत्पादक. **–fully,** *adv.* सव्याजं, छद्मना, मायया, सकपटं, छलेन.

December, *s.* सहस्यः, मार्गशीर्षपौषौ.

Decennial, *a.* दशवार्षिक (की *f.*), दशवर्षीय-ण, दशवर्षस्थायिन्.

Decent, *a.* विनीत, सविनय, समर्याद, शिष्ट, सभ्य. **2** युक्त, उचित, योग्य, उपपन्न, शिष्टाचारानुरूप, साधुसंमत. **–ly,** *adv.* सविनयं, सभ्यतया; युक्तं, यथातथं, यथोचितं. **–Decence,-cy,** *s.* विनयः, सभ्यता, मर्यादा, लज्जा, शालीनता. **2** औचित्यं, युक्तता, उपपत्ति *f.*, यथार्थता.

Decharm, *v. t.* मंत्रं प्रतिकृ 8 U.

Decide, *v.* निर्णी 1 P, व्यवसो 4 P, विनिश्चि 5 U, परिच्छिद् 7 P, अव-सम-धृ 10; 'd. a case' कार्यं निर्णी, व्यवहारं दृश् 1 P or अवेक्ष् 1 A; 'perplexed so as not being able to d.' अपरिच्छेदाकुलं (S. 5). **2** निष्पद् c., साध् c. **–ed,** *a.* निश्चित, ध्रुव, दृढ, स्थिर; स्थिरो निश्चयः; 'd. or firm resolution'; असंदिग्ध, नियत, व्यवस्थापित. **–edly,** *adv.* असंशयं, नूनं, नियतं; *See* **Certainly.** **–er,** *s.* निर्णेतृ *m.*, निश्चायकः; प्रमाणपुरुषः, **–Decision,** *s.* निर्णयः, निश्चयः, व्यवसायः, संप्रधारणं, परिच्छेदः. **2** (Final result) निर्णयः; निष्पत्ति *f.* **–Decisive,** *a.* संशयच्छिद्, निर्णायक, असंदिग्ध, निश्चयकारिन्, निश्चायक; 'said in a d. ly stern tone' परिच्छेदनिष्ठुरमाहस्म (Ka. 277). **–ly,** *adv.* सनिश्चयं, असंदिग्धं, सनिर्णयं; दृढं, स्थिरतया.

Deciduous, *a.* पातुक, पतनशील, क्षयिन्, अस्थायिन्. **–ness,** *s.* अवपातः, विध्वंसः, पतनशीलता. **2** अस्थायित्वं.

Decimal, *a.* दशक, दशगुणित. **–s.** दशांशः. **–Decimate,** *v. t.* दशमांशं ग्रह् 9 P, दशमपुरुषं उद्धृ 1 P.

Decipher, *v. t.* (a letter &c.) निर्-अनुवच् c., (गूढाक्षराणि) व्याख्या 2 P, स्पष्टीकृ 8 U, व्याकृ, विशदीकृ. **–er,** *s.* व्याख्यातृ *m.*, विवरणकर्तृ *m.* **–ing,** *s.* व्याख्या, स्पष्टीकरणं.

Deck, *v. t.* अलं-कृ 8 U, भूष् 10, मंड् 10; *See* **Adorn. 2** आच्छद् 10, आस्तृ 9 U. –*s.* नौतलं, नौकापृष्ठं.

Declaim, *v. i.* (against) अपभाष् 1 A, निंद् 1 P, आक्षिप् 6 P; *See* **Abuse. 2** सालंकारं ब्रू 2 U, वाक्तांडवं कृ 8 U. –**er, Declamator,** *s.* वाक्पटुः, वाग्मीशः. 2 निर्भर्त्सकः, निंदकः. –**Declamation,** *s.* सालंकारं वचनं, शब्दपांडित्यं, वाक्चातुर्यं, वाक्तांडवं.

Declare, *v. t.* वद् 1 P, कथ् 10, ख्या 2 P; आ-प्र-ख्या c. (ख्यापयति), प्र-काश् c., प्रकटीकृ 8 U, उद्-घुष् 10, नि-आ-विद् c., अभिधा 3 U. **2** उदीर् c., उच्चर् c., कृत् 10, स्तु 1 P, (in scriptures). –*v. i.* स्वमतं-अभिप्रायं-निविद् c. or ज्ञा c.; 'd. for ' अवलंब् 1 A, आश्रि 1 U; ' the army d. ed against its king ' स्वराजानं परित्यज्य प्रतिपक्षं समालंबत सैन्यं. –**ation,** *s.* प्रख्यापनं, प्रकाशनं, आख्यानं, ज्ञापनं, कीर्तनं, निवेदनं. **2** उक्ति *f.*, वचनं, भाषणं, प्रतिज्ञा, उपन्यासः. –**atory,** *a.* ख्यापक, ज्ञापक, निवेदक, वाचक, सूचक, अभिधायक. –**edly,** *adv.* स्पष्टं, व्यक्तं, प्रतिज्ञापूर्वकं.

Decline, *v. i.* क्षयं, ह्रासं-या-इ 2 P, or गम् 1 P, अवसद् 1 P, क्षि pass.; स्रंस् 1 A, ध्वंस् 1 A, अपचि-विशॄ pass. **2** त्यज् 1 P, विचल् 1 P, निवृत् 1 A, भ्रंश् 1 A, 4 P. **3** परिणम् 1 P, आ-अव-नम्, अस्तं गम् 1 P, अस्तमवलंब् 1 A, अनेन समयेन परिणतो दिवसः (Ka. 47) ' the sun had d. ed' &c. –*v. t.* प्रत्याख्या 2 P, प्रत्याचक्ष् 2 A, प्रत्यादिश् 6 P, अपाकृ 8 U, परिहृ 10. **2** आ-अव-नम् c. (नमयति), अपकृष् 1 P, आवृज्. **3** शब्दरूपाणि आख्या or कथ् 10. –*s.* ह्रासः, क्षयः, परिणति *f.*, पातः, अवसादः, ध्वंसः. अपचयः, अस्तः; 'in the d. of life' in d.-ing years ' पश्चिमे वयसि, परिणतवयसि. **2** देहक्षयः, क्षयरोगः. –**ation,** *s.* भ्रंशः क्षयः, च्युति *f.*, &c. **2** वक्रता, अवनमनं, आवर्जनं. **3** क्रांति *f.* अपगमः. –**Declension,** *s.* विभक्तिरूपाणि, शब्दविकारः. **2** क्षयः.

Declivity, *s.* अवसर्पिणी भूमिः, उत्संगः. –**ous, Declivous,** *a.* प्रवण, अवसर्पिन्.

Decoct, *v. t.* क्वथ् 1 P, पच् 1 P. –**ion,** *s.* क्वाथः, कषायः-यं, निर्यासः.

Decollation, *s.* शीर्षच्छेदः.

Decompose, *v. t.* पृथक् कृ 8 U; व्या-कृ, वि-ली c., विद्रु c. –**ition,** *s.* पृथक्करणं, व्याकरणं, विश्लेषः, विलयः.

Decompound, *v. t.* पुनर्मिश्र् 10 **2 Decompose,** q. v.

Decorate, *v. t.* भूष् 10, प्रसाध् c., अलंकृ 8 U, मंड् 10. –**ion,** *s.* प्रसाधनं, मंडनं, भूषणं, अलंकारः, परिष्कारः, आभरणं, **2** आकल्पः, वेषः, नेपथ्यं, प्रति (परि)कर्मन् *n.* –**or,** *s.* प्रसाधकः, विभूषकः.

Decorous, *a.* विनीत, सविनय; युक्त, उचित; *See* **Decent.** –**Decorum,** *s.* विनयः, मर्यादा, सभ्यता, शिष्टाचारः, सुरीति *f.* सौजन्यं. **2** युक्तता, औचित्यं.

Decorticate, *v. t.* त्वचं निष्कृष् 1 P, निस्त्वचीकृ 8 U, निर्वल्कयति (D.)

Decoy, *v. t.* कपटेन आकृष् 1 P, वि-, मुह् c., प्रलुभ् c., प्रदृ c.; *See* **Cheat. 2** पाशे बंध्-ग्रह् 9 P.

Decrease, *v. i.* परिक्षि Pass., ह्रासं गम् 1 P, or या-इ 2 P, अवसद् 1 P, ह्रस् 1 P, अल्पीभू 1 P, न्यूनीभू, अपचि pass. –*v. t.* ह्रस् c., अल्पीकृ 8 U, न्यूनीकृ, लघयति (D.), ऊन् 10, अपचि 5 U. –*s.*, –**Decrement,** *s.* ह्रासः, क्षयः, अपचयः, अवसादः, न्यूनता-त्वं, अल्पत्वं.

Decree, *v. t.* आदिश् 6 P, आज्ञा c. (ज्ञापयति), शास् 2 P. **2** द्रा c. (द्रापयति), प्रक्लृप् c., विधा 3 U, दातुं निर्णी 1 P. –*v. i.* व्यवस्थाद्वारेण निर्णी, शासनं कृ, व्यवस्थां-विधिं-कृ; विचर् c., तीर् 10. –*s.* व्यवस्था, शासनपत्रं, व्यवस्थापत्रं, विधिः, राजाज्ञा; आ-नि-देशः; आज्ञा, शासनं.

Decrepit, *a.* जराक्रांत, जरातुर, जीर्ण, जरापरिणत. –**ude, (d. age,),** *s.* जरा, वार्धक्यं, जीर्णावस्था, जरावस्था.

Decrescent, *a.* क्षयिन्, क्षीयमाण, क्षयिष्णु.

Decretal, *s.* विधिसंहिता. –*a* शासनपत्रनिविष्ट.

Decry, *v. t.* अप-परि-वद् 1 U, निंद् 1 P, आक्षिप् 6 P, अपलप् 1 P. –**al,** *s.* परिवादः, आक्षेपः, अपलपनं.

Decumbent, *a.* शयान, संविष्ट, निषण्ण, उपविष्ट.

Decumbence, *s.* शयनं, शय्योपवेशनं.

Decuple, *a.* दशगुण.

Dedicate, *v. t.* उत्सृज् 6 P, निक्षिप् 6 P, प्र-वि-नि-युज् 7 A, 10, **2** प्रतिष्ठा c. (-ष्ठापयति), संस्कृ 8 U, उपक्लृप् c.; (books) सम्-ऋ c. (अर्पयति) निविद् c., –**ion,** *s.* उत्सर्गः, विनियोगः, प्रतिष्ठा, संस्कारः; समर्पणं, निवेदनं.

Deduce, *v. t.* अनुमा 2 P, 3 A, ऊह् 1 A, अपवह् 1 P, निर्णी 1 P, उपलक्ष् 10. –**ible,** *a.* आनुमानिक (की *f.*), ऊहनीय. –**ment,** –**Deduction,** *s.* अनुमानं, अनुमिति *f.*, ऊहनं, ऊहा, अपवाहः, –**Deductive,** *a.* आनुमानिक (की *f.*). –**ly,** *adv.* अनुमानेन.

Deduct, *v. t.* वियुज् 10, अवच्छिद् 7 P, उद्धृ 1 P, व्यवकल् 10, ऊन् 10. –**ion,** *s.* वियोजनं, उद्धारः, व्यवकलनं, उद्धृतांशः.

Deed, *s.* कर्मन् *n.*, कार्यं, क्रिया, कृत्यं, चेष्टितं. **2** लेख्यप्रमाणं, लिखितं; ' sale d. ' विक्रय-

वर्ण; ' title d. ' आगमः. 3 तत्वं, अर्थः, वस्तु न.

Deem, *v. t.* मन् 4 A, गण् 10, अवगम् 1 P, संभू c.

Deep, *a.* गभीर, गंभीर, अगाध, गहन, गाढ. 2 (of sound) मंद्र, धीर, गंभीर, मांसल, घन. 3 (of colours) घन; ' d. red ' घनारुण, सुरक्त. 4 निम्न, नीच. 5 गहन, दुर्बोध, निगूढार्थ, अगम्य. 6 गभीरबुद्धि, दूरदृष्टि, विदग्ध; ' d. darkness ' अंध-घोर-तमः, संतमसं; ' she is d. in love, ' दूरगतमन्मथा सा (S. 3); ' d. sigh ' दीर्घनिश्वासः; ' d. love ' दृढबद्धं प्रेम, गाढानुरागः; ' water knee-d. ' जानुदघ्नं-मात्रं-द्वयसं जलं. **—s.** **Sea,** q. v.; ' d. of night ' निशीथः; घोररात्रि *f.* **—en,** *v. t.* गंभीरीकृ 8 U, घनीकृ, वृध् c. **—ly,** *adv.* गाढं, घनं, दीर्घं; अत्यंतं, अतीव, नितरां, निर्भरं, भृशं; ' sighing d. ' दीर्घं निश्वस्य; ' d. sorry ' शोकमग्न, अतिदुःखित; ' d. rooted ' बद्धमूल. **—ness, —Depth,** *s.* गांभीर्यं, गाढता, घनता, अगाधता; 'd. of meaning' अर्थतोगौरवं (Mal. 1) अर्थगौरवं. 2 उदरं, गभीरस्थानं; ' the d. of lower regions ' पातालोदरं. 3 वेधः, वेधनं. 4 मध्यं.

Deer, *s.* मृगः, हरिणः, कुरंगः, कुरंगमः, वातायुः, अजिनयोनिः; पृषत् *m.*, कृष्णसारः, रुरुः, शंबरः, रौहिषः, वातप्रमीः (varieties of d.)

Deface, *v. t.* विनश् c., उच्छिद् 7 P, विलुप् 6 P, or c., व्या-अप-मृज् 2 P. 2 विकृ 8 U, विरूप् 10, दुष् c. (दूषयति). **—er.** *s.* दूषकः, विनाशकः **—ment.** *s.* लोपः, उच्छेदः, दूषणं नाशनं.

De facto, *adv.* वस्तुतः, परमार्थतः.

Defalcate, *v. t.* न्यूनीकृ 8 U, ह्रस् c., अवच्छिद् 7 P, ऊन् 10. **—ion,** *s.* ह्रासः, अवच्छेदः, न्यूनता, अपचयः.

Defame, *v. t.* परि-अप-वद् 1 U, अपभाष् 1 A, आक्षिप् 6 P, गुणान्-अपलप् 1 P, अभिशंस् 1 P. **—ation,** *s.* परि-अप-वादः, आक्षेपः, अपभाषणं, निंदा, अभिशंसनं. **—atory,** *a.* परिवादक, गुणापवादक, अकीर्तिकर (री *f.*), आक्षेपगर्भ. **—er,** *s.* परिवादिन् *m.*, गुणापवादकः, आक्षेपकः, निंदकः.

Default, *s.* अपराधः, दोषः; व्यतिक्रमः, अननुष्ठानं, लोपः. 2 अभावः, असंभवः, अप्राप्तिः *f.*, ' in d. of fine ' अदत्ते दंडे, दंडदानाभावे. **—er,** *s.* अपराधिन् *m.*, नियम-लंघिन्-व्यतिक्रामिन् *m.*

Defeasance, *s.* लोपः, व्यतिक्रमः, नियमभंगः-लोपः.

Defeasible, *a.* लोपनीय.

Defeat, *v. t.* परा-जि 1 A, परा-परि-भू 1 U, जि 1 P, भंज् 7 P; वि-द्रु c., पराहन् 2 P, (d. completely). 2 मोघीकृ 8 U, व्याहन् 2 P, विहन्, *See* **Baffle.** **—s.** पराजयः, परिभवः, पराभवः. अभिभवः, भंगः. 2 व्याघातः, भंगः, प्रध्वंसः.

Defecate, *v. t.* मलं हृ 1 P, शुध् c., निर्मलीकृ 8 U. **—a.** निर्मल, शोधित, हृतमल. **—ion,** *s.* शोधनं, मलहरणं.

Defect, *s.* विकारः, दोषः, छिद्रं, वैकल्यं, न्यूनता; ' bodily d. ' अंगविकारः, व्यंगता. 2 अभावः, विरहः. **—ive,** *a.* विकारवत्, दोषयुक्त, सदोष, विकल; अंगहीन 2 असंपूर्ण, असमग्र, अपर्याप्त, न्यून.

Defection, *s.* त्यागः, उत्सर्गः, भ्रंशः, च्युति *f.*

Defend, *v. t.* रक्ष् 1 P, पा 2 P, त्रै 1 A, परित्रै, पा c. (पालयति) (with abl.); *See* **Protect.** 2 (In law) उत्तरं दा 3 U, पक्षं समर्थ् 10. **—ant,** *s.* प्रत्यर्थिन् *m.*, प्रतिवादिन् *m.*, अभियुक्तः. **—er,** *s.* रक्षकः, गोप्तृ *m.*, त्रातृ-रक्षितृ *m.*, पालकः, पः in comp. **—Defensive,** *a.* रक्षक, पालक, निवारक, आत्मरक्षक. **—s.** आत्मरक्षा, स्वपरित्राणं, शत्रुनिवारणं. **—Defence,** *s.* रक्षा, गुप्ति *f.*, रक्षणं, त्राणं, पालनं. 2 उत्तरं, प्रत्युत्तरं; व्यपदेशः. **—less,** *a.* अशरण, अरक्षित, अनाश्रय, अनाथ. 2 निरायुध, शस्त्रहीन.

Defer, *v. t.* विलंब् c., व्याक्षिप् 6 P. 2 (अन्यस्मिन्) निक्षिप् 6 P, न्यस् 4 P, सम्-ऋ c. (अर्पयति). **—v. i.** विलंब् 1 A, कालं क्षिप् or हृ 1 P, चिर(रा)यति (D.). 2 (to) अनुवृत् 1 A, अनुपा c. (पालयति), आदृ 6 A, सादरं आश्रि 1 U, अनुरुध् 4 A. **—ence,** *s.* अनुरोधः, अनुवर्तनं, बहुमानः, आदरः, प्रश्रयः. 2 नम्रता, विनयः, वशता. **—ring,** *s.* कालयापनं, कालहरणं, विलंबः, व्याक्षेपः.

Deficient, *a.* न्यून, ऊन, असंपूर्ण, विकल; often ex. by अल्प-हीन-रहित in comp.; ' d. in water ' अल्पजल; ' d. in intellect ' अल्पधी, बुद्धिहीन; ' d. in any organ ' हीनांग, विकलेंद्रिय, विकलांग, अपोगंड, पो(पौ)गंड. **—Deficience, —cy,** *s.* न्यूनता, हीनता, अल्पता, अभावः, विरहः वैकल्यं, अपूर्णता. 2 दोषः, छिद्रं.

Defile, *v. t.* दुष् c. (दूषयति), मलिनीकृ 8 U, मलिनयति-कलुषयति-आविलयति (D.); ' d. a virgin ' कुमारीं दुष् c., आधृष् c.; 'a d. ed virgin ' क्षतयोनिः. **—v. i.** दंडव्यूहेन या 2 P or अपसृ 1 P. **—s** संबाधपथः, संकटमार्गः, दुर्मार्गः, संचारः. **—er** *s.* दूषकः. **—ment,** *s.* दूषणं. 2 मालिन्यं, कलंकः.

Define, *v. t.* लक्षणं व्याख्या 2 P; उप लक्ष् 10, परिच्छिद् 7 P, निरूप् 10, निर्वच् 2 P. 2 निर्दिश् 6 P, निर्णी 1 P, निश्चि 5 U. निर्धृ 10. 3 चिन्ह् 10, परिमा 3 A. **—er,** *s.* लक्षणव्याख्यातृ *m.*, निर्वक्तृ *m.* **—ite,** *a.*

नियत, निर्णीत, निश्चित, निर्दिष्ट; 'without any d. subject' अनिर्दिष्टकारणं. 2 परिमित, समर्याद, सावधिक. -itely, *adv*. निश्चितं, व्यक्तं, सनिर्णयं, सपरिच्छेदं. -tion, *s*. व्याख्या, परिच्छेदः, लक्षणं, निर्वचनं, निर्देशः; 'my anguish transcends d.' मम विकारः परिच्छेदातीतः (Mal. 1). -itive, *a*. नियत, निर्णायक, स्थिर; अवश्यक.

Deflagration, *s*. दाहः, दाहनं, ज्वलनं.

Deflect, *v. i*. भ्रंश् 1 A, 4 P, च्यु 1 A, विचल् 1 P, अप-व्या-वृत् 1 A. -*v. t*. व्यावृत् c. -ion, *s*. भ्रंशः, च्युति *f*., विचलनं, विमार्गगमनं. 2 उत्क्रमः, भ्रेषः.

Deflour, Deflower, *v. t*. चारित्र्यं नश् c. or हृ 1 P, दूष् c., क्षतयोनिं कृ 8 U, दूष् c. (दूषयति); 'a virgin d.ed' क्षता, क्षतयोनिः 2 शोभां हृ or नश् c. -er, *s*. कुमारीदूषकः, सतीत्वनाशकः.

Defluxion, *s*. निस्यंदः, क्षरणं, स्रवणं.

Defoliation, *s*. पत्रापगमः, पर्णमोक्षः. 2 पत्रच्युतिसमयः

Deform, *v. t*. विरूप् 10, विकृ 8 U, व्यंगीकृ, विरूपीकृ. -ed, *a*. विरूप, विकृत, पोगंड, कु-अप-रूप, विकृतांग-व्यंग (गी *f*.); 'd. features' विकृताकारः. -ity, *s*. वैरूप्यं, विरूपता, कुरूपता, व्यंगता, विकृति *f*.

Defraud, *v. t*. वंच् 10, प्रलुभ् c.; *See* **Cheat.** 2 छलेन-कपटेन-अपहृ 1 P. -ation, *s*. कपटापहरणं. -er, *s*. वंचकः, प्रतारकः.

Defray, *v. t*. (Expenses) दा 3 U, अपाकृ 8 U, शुध् c.; धनव्ययं-व्ययशोधनं-स्वीकृ 8 U; 'to be d.-ed' शुध् 4 P; एकस्य मूल्येन व्ययः शुध्यति, सर्वा व्ययशुद्धिः संपद्यते (P. v. 8). -er, *s*. व्ययशोधकः. -ing,-ment, *s*. व्ययशोधनं-शुद्धि *f*.

Deft, *a*, विनीत, दक्ष, चतुर, विदग्ध.

Defunct, *a*. मृत, विपन्न; *See* **Dead.** 2 (fig.) त्यक्तव्यापार, निश्चेष्ट. -ion, *s*. मरणं, मृत्युः, देहत्यागः.

Defy, *v. t*. तृणीकृ 8 U, अवज्ञा 9 U, अवमन् 4 A, अवगृ 6 P, लघूकृ, तृणाय मन्-परिभू 1 P, अवगण् 10; 'I d. a king' राजेति किंयती-का मम मात्रा; 'I d. you to find a mistake in my writing' मम लेखे स्खलितं कथं त्वं दर्शयसीति प्रेक्षे तावत्; 'a disease which d.ed medical skill' वैद्ययत्नपरिभाविनं गदं (R. xix. 53). 2 युद्धार्थं आह्वे 1 A, अभियुज् 7 A, वृ 5 P. -ance, *s*. समाह्वानं, युद्धाह्वानं, योधसंरावः. 2 अवज्ञा, अवमनना; 'in d. of' अवमत्य, तृणीकृत्य, अनादृत्य; ex. by gen. or loc. abs. -ant, *a*. उद्धत, सदर्प, सावज्ञ; अवमानिन्; 'in a d. tone' उद्धतं, सदर्पं, सावज्ञं. -er, *s*. समाह्वातृ *m*., अभियोक्तृ *m*.

Degenerate, *v. i*. (कुलाचारात्) च्यु 1 A, भ्रंश् 1 A, 4 P, दुष् 4 P. -*a*. क्षीणपुण्य, -महत्त्व, परिभ्रष्ट, अपकृष्ट, कुलाचारभ्रष्ट. -ness, -**Degeneracy,** *s*. क्षीणपुण्यत्वं, कुलाचारभ्रंशः, कुलमर्यादातिक्रमः. 2 अपकर्षः, नीचावस्था, अपकृष्टदशा.

Deglutition, *s*. निगरण, ग्रसनं.

Degrade, *v. t*. (पदात् or अधिकारात्) अपकृष् 1 P, भ्रंश् c., च्यु c., अवरुह् c. (रोपयति), नीचपदं प्राप् c. 2 अवमन् c., लघूकृ 8 U, मूल्यं लघयति (D.) or ह्रस् c., 'd.-ed from office' अधिकारभ्रष्ट, पदभ्रष्ट, भ्रष्टाधिकार, पदावरोपित. -ation, *s*. पद-अधिकारभ्रंशः, अपकर्षः, पदच्युति *f*., पदलोपः. 2 अवमानना, लघूकरणं, मानभंगः. 3 अपकृष्टता, अधोगति *f*., नीचावस्था, अपकृष्टस्थिति *f*. -ing, *a*. लाघवकारिन्, अयशस्कर (री *f*.).

Degree, *s*. पदं, स्थानं, पदवि-वी *f*., आस्पदं. 2 दशा, स्थिति *f*., अवस्था. 3 उपाधिः, उपपदं. 4 कुलं, वंशः, अन्वयः. 5 प्रमाणं, परिमाणं. 6 गणः, वर्गः. 7 भागः, अंशः. 8 कोटि *f*., काष्ठा; 'the highest d.' पराकोटिः-काष्ठा, अतिभूमिः. 9 क्रमः, अनुक्रमः, आवृत् *f*., परिपाटि-टी *f*., आनुपूर्व्य-र्वी, पर्यायः, तारतम्यभावः; 'in the highest d.' निरतिशयं, एकांततः; 'in some d.' किंचित्, कियत्यंशेन, ईषत्; 'not in any d.' न केनाप्यंशेन; 'by d.s' क्रमेण, क्रमशः, शनैःशनैः, प्रतिपदं.

Deify, *v. t*. देवत्वमारुह् c. (आरोपयति), देवं कृ 8 U. 'to be deified' देवीभू 1 P, देवत्वं इ 2 P, देवत्वमापद् 4 A. -**Deiform,** *a*. देवाकार, देवरूप. -**Deification,** *s*. ईश्वरसायुज्यं, ब्रह्मणि लयः, देवत्वप्राप्ति *f*. 2 देवत्वं, देवकरणं.

Deign, *v*. अर्ह् 1 P, प्रसद् 1 P, with inf., 'd. to look at me' मयि दृष्टिप्रसादं कुरु; *See* **Please.** 2 प्रसादपूर्वं दा 3 U, अनुग्रह् 9 P. 3 अनुज्ञा 9 U, अनुमन् 4 A.

Deism, *s*. ईश्वरवादः, आस्तिक्यं. -**Deist,** *s*. आस्तिकः, ईश्वरवादिन् *m*.

Deity, *s*. देवता, दैवतं, देवः; *See* **God.**

Deject, *v. t*. विषद् c., निर्विद् c, विषादं उत्पद् c., म्लानीकृ, धैर्यं त्यज् c. -ed, *a*. विषण्ण, निर्विण्ण, विषादापन्न, अवसन्न, दीन, म्लान, खिन्न; 'd. in mind' दीनमनस्, दुर्मनायमान, उद्विग्न, विमनस्, धैर्यच्युत; 'to be b. d.' विषद् 1 P, विषादं गम् 1 दुर्मनायते (D.), धैर्यं त्यज् 1 P. -edly, *adv*. सविषादं, सोद्वेगं, विषण्णं. -edness, -ion, *s*. विषादः, वैमनस्यं, निर्वेदः, अवसादः, उद्वेगः, विषण्णता, दीनता, म्लानि *f*., ग्लानि *f*., खेदः, दौर्मनस्यं.

Dejecture, *s*. अवस्करः, पुरीषं.

Delate, *v. t.* वह् 1 P, आनी 1 P. **2 Accuse,** q. v.

Delay, *v. t.* विलंब् c., व्याक्षिप् 6 P, अतिपत् c. **2** निरुध् 7 U, धृ 1 P, विष्टंभ् 9 P. **–***v. i.* विलंब् 1 A, चिर(रा)यति (D.), कालं या c. (यापयति) or क्षिप् 6 P or हृ 1 P; ' why d. then ' ततः किं विलंब्यते (U. 1). **2** विकल्प् c., विचर् c. **–***s.* विलंबः, व्याक्षेपः, कालातिपातः, कालयापनं, कालहरणं, कालक्षेपः. **2** आघातः, अंतरायः, विलंबं, हेतुः. **3** दीर्घसूत्रता; ' without d. ' अविलंबितं, अविलंबं, अविलंबेन, अचिरं-रात्-रेण; ' d. is dangerous ' दीर्घसूत्री विनश्यति. **–er,** *s.* कालक्षेपकः.

Delectable, *a.* रम्य, कमनीय, मनोज्ञ, आह्लादक, मनोरम-हर, रुचिर. **–Delectation,** *s.* आनंदः, आह्लादः, प्रमोदः, हर्षः.

Delegate, *v. t.* नियुज् 7 A, 10, व्यादिश् 6 P; प्रेर् c., (with acc. of person); न्यस् 4 P, निक्षिप् 6 P, ऋ c. (अर्पयति), प्रतिपद् c. **–***s.* प्रतिनिधिः, नियोगिन् *m.*, नियोज्यः, प्रतिपुरुषः, अधिकृतः पुरुषः. **–ion,** *s.* नियोजनं, प्रेरणं, निक्षेपः, &c.

Delete, *v. t.* अप-व्या-मृज् 2 P, विलुप् c., विनश् c., उच्छिद् 7 P. **–ion,** *s.* व्यामर्शः, लोपः, उच्छेदः. **–Deleterious,** *a* विनाशक, घातिन्, हिंस्र, घातुक.

Delf, *s.* मृद्भांडं, मृण्मयद्रव्यं, कौलालकं.

Deliberate, *v. i.* विचर् c., चिंत् 10, विमृश् 6 P, संमंत्र् 10 A, विकल्प् c.; *See* **Consider.** **–***a.* कामतः-विचारपूर्वकं-कृत, विमृश्यकृत. **2** विमृश्यकारिन्, स्वपहित, असाहसिक, अप्रमत्त. **–ion,** *s.* विचारः-रणं-रणा, चिंता, मंत्रणं-णा, विमर्शः, समीक्षा, वितर्कः, विवेचनं, चर्चा. **–ive,** *a.* विचारशील, विचारिन्, विमर्शिन्. **–ly,** *adv.* जानत् with अपि or एव, बुद्धिपुरःसर, कामतः, विचारपूर्वकं. **2** विमृश्य, समीक्ष्य, अवधानेन, असहसा, अप्रमत्तं. **–ness,** *s.* समीक्ष्य-विमृश्य-कारित्वं, अप्रमादः, सावधानता, अवेक्षा.

Delicate, *a.* मधुर, स्वादु, मिष्ट. **2** ललित, चारु, शोभन. **3** (Soft) मृदु, कोमल, सुकुमार, तनु, श्लक्ष्ण, लघु, प्रतनु, विरल, परि,-पेलव ; ' d. of person ' कोमलांग (गी *f.*). मृदुशरीर ; ' a d. woman ' तन्वी, तन्वंगी, पेलवांगी. **4** विशिष्ट, उत्कृष्ट, उत्तम. **5** सभ्य, विनीत, शिष्ट, ' of a d. constitution ' प्रकृतिकोमल, जन्मरोगिन. **–ly,** *adv.* ललितं, सुकुमारं; मृदुतया. **–Delicacy,** *s.* माधुर्यं, स्वादुता, सौरस्यं. **2** लालित्यं, लावण्यं. **3** सौकुमार्य, मार्दवं, पेलवता, तनुता. **4** आदरः, विनयः, शिष्टाचारः, सुशीलता, सौजन्यं. **5** प्रकृतिदुर्बलता. **6** स्वादुद्रव्यं, भोजनविशेषः, विशिष्टान्नं

Delicious, *s.* स्वादु, मिष्ट, रुचिकर (री *f.*), मधुर, सुरस, आस्वादवत्. **2** (of beauty &c.) मनोरम-हर, मधुर, कमनीय, रमणीय, हारिन्, चित्ताकर्षिन्. **–ly,** *adv.* स्वादु, मधुरं, मनोरमं. **–ness,** *s.* स्वादुता, माधुर्यं, रम्यता, &c.

Delight, *s.* आह्लादः, आ-प्र-मोदः, सुखं, हर्षः, प्रीति *f.*, प्र-सं-मदः, उल्लासः, शर्मन्, आनंदः, संतोषः, तुष्टि *f.*, मुद्-दा *f.*; 'takes no d. in sports ' नाभिनंदति केलिकलाः (Mal. 3); ' thrill of d. ' पुलकः, रोमांचः; ' thrilling with d. ' आनंदपुलकिततनुः. **2** आनंदनं, आनंददः, हर्षकरः, आनंदहेतुः. **–***v. i.* ' to be d.ed ' मुद् 1 A, हृष् 4 P, आनंद् 1 P, ह्लद् 1 A, रम् 1 A, प्री 4 A, सं-परि-तुष् 4 P, उल्लस् 1 P. **–***v. t.* सुखयति (D.); causal of roots above. **–ed,** *a.* सानंद, प्रीत, सहर्ष, सुखान्वित, हृष्ट, आह्लन्न, आनंदित, प्रमुदित, सोल्लास, आह्लादित, उल्लसित, साह्लाद. **–ful,** *a.* प्रमोदिन्, प्रामोदिक (की *f.*), आनंदप्रद, हर्षजनन (नी *f.*), आह्लादक, आनंदक, सुखद; रुचिर, कांत, रम्य, रमणीय, मनोहर-रम. **–fully,** *adv.* सानंदं, सहर्षं, साह्लादं; रम्यं, कांतं.

Delimit, *v. t.* मर्यादी कृ 8 U.

Delineate, *v. t.* वर्ण् 10; *See* **Describe. 2** आलिख् 6 P, चित्र् 10, चित्रे निविश् c. **–ed,** *a.* चित्रलिखित, चित्रगत, आलिखित, वर्णित. **–ion,** *s.* आलेखनं, वर्णनं. **2** आलेख्यं, चित्रं, चित्रारंभः.

Delinquency, *s.* दोषः-अपराधः, पापं, दुष्कर्मन् *n.*, पापचरितं, अपक्रिया, दुष्कृति *f.* **–Delinquent,** *s.* पापिन्-पापकृत्-अपराधिन् *m.*, सदोषः, कृतापराधः.

Deliquesce, *v. i.* द्रवीभू 1 P, विली 9 P.

Deliquium, *s.* विलयनं, द्रवः.

Delirium, *s.* चित्तभ्रमः, चैतन्यनाशः, ज्ञानभ्रांति *f.* **–Delirious,** *a.* भ्रांतचित्त, नष्टचेतन, चैतन्यरहित.

Deliver, *v. t.* मुच् c., वि-प्र-मोक्ष् 10, उद्-हृ-धृ 1 P, निस्तॄ c., रक्ष् 1 P, परित्रै 1 A. **2** समऋ c (अर्पयति), न्यस् 4 P, प्रतिपद् c., प्र-दा 3 U, 1 P, संक्रम् c., आरुह् c. (रोपयति), हस्ते निक्षिप् 6 P, हस्तं प्राप् c., हस्तगत-गामिन् *a.* कृ 8 U. (तस्य वसुधामपि हस्तगामिनीमकरोत् R. v 1); ' shall d. it into his hand (to him) ' इमं अस्य हस्तं, प्रापयिष्यामि (S. 3) ' d.ed charge of office ' स्वाधिकारं अन्यहस्ते न्यक्षिपत्. **3** उद्-ईर् c., उच्चर् c., उदाहृ 1 P, व्याहृ, वद् 1 P. **4** (Of a message) निविद् c., कथ् 10, आख्या 2 P, आचक्ष् 2 A, शंस् 1 P. **5** (Give back) उत्सृज् 6 P, प्रतिदा, निर्यत् c., (हस्तन्यासं निर्यातय V. 5);

'd. a woman' प्रसवं कृ c., सू c.; 'to be d.ed of' प्रसू 2 A, जन् c. (जनयति), उत्पद् c.; 'was d.ed of a son' सा पुत्रं प्रासूत. **-ance,** *s.* मोचनं, मोक्षः, मुक्ति *f.*, उद्धारः, परित्राणं, रक्षणं, निस्तारणं, मोक्षणं, विमुक्तिः-मोचन. **-er,** *s.* मोचकः, रक्षकः, त्रातृ *m.*, मुक्तिदातृ *m.*, तारकः, उद्धर्तृ *m.* 2 निवेदकः,आख्यायकः. **-y,** *s.* मुक्ति *f.*; *See* **Deliverance,** above. 2 अर्पणं, निक्षेपणं, प्रतिपादनं, संक्रामणं, न्यसनं, प्रदानं. 3 उच्चारणं, उदीरणं, व्याहारः-हरणं; 'a fluent d.' अस्खलितभाषणं, अप्रतिहतभाषणौघः-वाक्सरणिः. 4 निवेदनं, विज्ञापनं, विज्ञप्ति *f.*, कथनं. 5 उत्सर्गः, निर्यातनं, वितरणं. 6 प्रसवः, प्रसूति *f.*, गर्भमोचनं; 'd. bed' अरिष्टशय्या, 'a woman near her d.' आसन्न-प्राप्त-प्रसवा; 'place of d.' अरिष्टं, सूतिकागृहं.

Dell, *s.* दरी, गुहा, कंदरः.

Delude, *v. t.* मुह् c., वंच् 10, प्रलुभ् c., आकृष् 1 P, वि-सं-भ्रम् c. (भ्रमयति); *See* **Cheat** also. **-er,** *s.* मोहकः, वंचकः, प्रतारकः, मायिन् *m.* **-Delusion,** *s.* मोहः, भ्रमः, आभासः, माया, मतिभ्रमः, इंद्रजालं, विवर्तः; 'the world is all a d.' विश्वमिदं मायामयं, असारं, विवर्त एव. 2 वंचनं, प्रतारणा, प्रलोभनं, कपटं. **-Delusive,-Delusory,** *a.* मायामय (यी *f.*), असार, मायिन्, मोहक, ऐंद्रजालिक (की *f.*), मोहिन्, मोह-भ्रांति-जनक.

Deluge, *s.* आप्लावः, संप्लवः, जलप्रलयः, भूतसंप्लवः, तोयविप्लवः, 'universal d.' प्रलयः, महासंप्लवः, संवर्तः, क्षयः, कल्पांतः. 2 धारासंपातः, वारिपूरः, अविरलधारासारः, अतिवृष्टिः *f.* 3 उत्पातः,आकस्मिकी आपद्. *-v. t.* प्लु c., आ-सं°, निमस्ज् c. (मज्जयति).

Delve, *v. t.* खन् 1 P, नि-अव°; उर्वीं भिद् 7 P *-s.* खातं, विवरं, बिलं, गर्तः-र्तः. **-er,** *s.* खनकः, खनितृ *m.*

Demagogue, *s* प्राकृतजननायकः, प्रजानायकः.

Demain, Demesne, *s.* स्वाधीना भूमिः.

Demand, *v. t.* प्रच्छ् 6 P, अनुयुज् 7 A, ज्ञा deside. (जिज्ञासते); 'd. ed his name' किं तव नामेति पप्रच्छ; 'd. a boon' वरं वृ-वृ-5, 9 U. 2 **Claim,** q. v. 3 अर्ह् 1 P, oft. by pot. pass. part.; 'Oh Goddess, Godâvari the matter d. s thy care (attention)' भगवति गोदावरि तत्र त्वया सावधानया भवितव्यं (U. 3); अयमर्थो विचारमर्हति 'd. s consideration'; 'this offence d. s an atonement of serious expense' भूरिद्रव्यव्ययेनायं दोषः प्रमार्ष्टुं शक्यः, भूरिधनव्ययसाध्यप्रायश्चित्तः दोषः. *-s.* प्रश्नः, अनुयोगः, पृच्छा, जिज्ञासा. 2 अभियोगः, प्रार्थना; याचना; 'on d.' प्राप्ते पृष्टः सन्. **-ant,-or,** *s.* प्रार्थयितृ *m.*, याचितृ *m.*, अभियाचक *m.*, अर्थिन् *m.*

Demarkation, *s.* सीमा-मर्यादा-परिच्छेदः.

Demean (oneself), *v. i.* वृत्तिं अनुष्ठा 1 P, चेष्ट् 1 A, वृत् 1 A, व्यवहृ 1 P; *See* **Act.** **-our,** *s.* वृत्ति *f.*, आचरणं, आचारः, चेष्टितं, व्यवहारः.

Dementate, *v. t.* उन्मद् c., संज्ञां अपहृ 1 P. *-a.* उन्मत्त, नष्टसंज्ञ, मूढचित्त.

Demerit, *s.* अगुणः, दोषः, न्यूनता.

Demi, अर्ध, सामि *ind.* in comp.

Demi-god, *s.* नरदेवः, विद्याधरः,यक्षः, गंधर्वः, उपदेवता, देवयोनिः

Demi-man, *s.* अर्धपुरुषः-नरः, किन्नरः.

Demise, *s.* मृत्युः, मरणं, उपरति *f.* 2 समर्पणं, विधिवत् प्रदानं. *-v. t.* मृत्युपत्रेण प्रदा 3 U.

Demission, *s.* अवपातः, अवसादनं,अपकर्षणं.

Demobilize, *v. t.* *See* **'Disband.'**

Democracy, *s.* प्रजाप्रभुत्वं, प्रजासत्तात्मकं राज्यं, प्रजातंत्रं. **-Democrat,** *s.* प्रजातंत्रवादिन् *m.*, प्रजापक्षानुकूलः, प्रजाप्रभुत्वानुग्राहकः, प्रजापक्षावलंबिन् *m.* **-tical,** *a.* सार्वलौकिक (की *f.*), प्रजातंत्रीय.

Demolish, *v. t.* विनश् c., उच्छिद् 7 P, अवसद् c., ध्वंस् c., प्र-वि°; उन्मूल् 10, उत्पट् 10. **-er,** *s.* विनाशकः, उच्छेदकः. **-Demolition,** *s.* विनाशः, उच्छेदः, प्र-विध्वंसः, उन्मूलनं, उत्पाटनं, अवसादनं.

Demon, *s.* दानवः, असुरः, रक्षस् *n.*, राक्षसः, दैत्यः, दनुजः, दैतेयः,सुरद्विष्; भूतः, पिशाचः, रात्रि(त्रिं)चरः, निशाचरः, यातुधानः. **-iac,** *s.* भूताविष्टः, वेतालोपहतः. *-a.*, **-iacal,** *a.* राक्षस (सी *f.*), पैशाच (ची *f.*), आसुर (री *f.*), (*s.*) in comp. **-ology,** *s.* भूतपिशाच-विद्या.

Demonstrate, *v. t.* साध् c., सिध् c. (साधयति), प्रदृश् c., प्रतिपद् c., उपपद् c., प्रमाणयति (D.); निर्णी 1 P, निर्दिश् 6 P. **-ion,** *s.* साधनं, सिद्धि *f.*, उपपत्ति *f.*, प्रतिपादनं. 2 निर्णयः; प्रामाण्यं, सिद्धांतः; 'ocular d.' प्रत्यक्षप्रमाणं-चाक्षुषज्ञानं-प्रमाणं. **-ive,** *a.* दर्शक, निर्देशक, निर्णायक, प्रतिपादक, सिद्धांतकरण. **-ively,** *adv.* सिद्धिपूर्वं. सप्रमाणं, सुव्यक्तं, सोपपत्तिकं. **-or,** *s.* निर्देशकः, प्रतिपादकः, प्रदर्शकः.

Demoralize, *v. t.* धर्मात्-आचारात्-भ्रंश् c. or च्यु c., आचारं दुष् c. (दूषयति), भ्रष्टीकृ 8 U, दुर्वृत्त *a.* कृ **-ation,** *s.* आचारभ्रष्टता, धर्मच्युति *f.*, धर्म-आचार-विप्लवः, अपकर्षः

Demulcent, *a.* शामक, शांतिद. 2 स्निग्ध, चिक्कण.

Demur, *v. i.* शंक् 1 A, वि-आ°; विचर् c., विकॢप् c., विलंब् 1 A, मनसा दोलायते (D.); सवितर्कं व्याक्षिप् c. *-s.* आशंका-

संदेहः, वितर्कः. विचारणं, विकल्पः; 'without d.' अविचारितं, अविलंबं.

Demure, *a.* विनीत, अतिनम्र, गंभीर, धीर, शांत, सलज्ज, सव्रीड, अवनत; 'with d. looks' सव्रीडवदन. **-ly,** *adv.* सलज्जं, सव्रीडं, धीरं, सविनयं. **-ness,** *s.* विनयः, नम्रता, गांभीर्यं, त्रपा, लज्जा, व्रीडा, ह्रीः.

Den, *s.* बिलं, विवरं, गुहा, गह्वरं, कंदरः, कुहरं.

Dengue, *s.* संधिकसंनिपात,

Denizen, *s.* नि-वासिन् *m.*, ओकस् in comp; 'd. of heaven' दिवौकसः, &c. **2** पौरः, नागरः, नगरजनः, इतरजनः.

Denominate, *v. t.* वद्-भण्-वद् आह्वे 1 P, व्यपादिश् 6 P, अभिधा 3 U, वच् 2 P, ख्या 2 P; *See* **Call** also. **-ion,** *s.* नामन् *n.*, अभिधानं, संज्ञा, आख्या. **-ive,** *a.* अभिधायिन्, आख्यायक (in grammar) नामधातुः. **-or,** *s.* नामकृत्-नामदातृ *m.* **2** हरः, हारः, छेदः; 'of the same d.' समच्छेद; 'reduced to the same d.' सवर्णित.

Denote, *v. t.* निर्दिश् 6 P. सूच् 10, उपलक्ष् 10, वच् 2 P, अभिधा 3 U, सूच् c., गम् c. (गमयति); oft. ex. by अर्थ in comp.; *See* **Mean**; 'the word क्षेत्र here d. s body' अत्र क्षेत्रशब्दः शरीरार्थे-र्थः. **-ation,** *s.* निर्देशः, सूचनं; अभिधा-धानं, उपलक्षणं-णा. **-ing, -ative,** *a.* सूचक, दर्शक, वाचक, आभिधायक, गमक.

Denouement, *s.* कार्यं, निर्वहणं, निष्ठा.

Denounce, *v. t.* (अमंगलं or अनिष्टं) प्रकाश् c. ख्या c. (ख्यापयति), आ-नि-विद् c., कथ् 10. **2** प्रकाशं तर्ज् 10 A, भर्त्स् 10A, अभिशप् 1 U, अभिशंस् 1 P, निंद् 1 P, गर्ह् 1, 10 A, आक्रुश् 1 P. **-er,** *s.* अनिष्टावेदकः **2** अधिक्षेपकः, निंदकः. **-ment, Denunciation,** *s.* अनिष्टख्यापनं-प्रकाशनं. **2** निर्भर्त्सना-नं, आक्रोशः, अभिशंसन, निंदा, गर्हा.

Denovean } **Denovo** } *adv.* पुनर्, भूयः.

Dense, *a.* घन, निबिड, सांद्र, अविरल, निरंतर. अनंतर गाढ, बहल. **2** सुसंहत, दृढ, पीवर. **-ity,** *s.* घनता, सांद्रता, आनंतर्यं; पीवरता.

Dent, *s.* प्रहार-आघात-चिह्नं.

Dental, *a.* दंत्य; 'a d. letter' दन्त्यं.

Dented, Dentated, *a.* दंतुर, भंगुर, अनुकक्ष.

Dentifrice, *s.* दंतशोधन-धावनं.

Dentist, *s.* दंतवैद्यः-चिकित्सकः.

Dentition, *s.* दंतोद्भवः, दंतवृद्धि *f.*

Denude, Denudate, *v. t.* नग्नीकृ 8 U, विवस्त्रीकृ विवासयति (D.), वस्त्रं अपहृ 1 P, शून्यीकृ; निर् in comp.; 'a tree d. of leaves' निष्पत्रो or निष्पत्रीकृतो वृक्षः.

Deny, *v. t.* अपलप् 1 P, अपवद् 1 P, न स्वीकृ-अंगीकृ 8 U, निषिध् 1 P, प्रत्याख्या 2 P, नि-अप-ह्नु 2 A, प्रत्यादिश् 6 P. **-al,** *s.* अपनिह्नवः, प्रत्यादेशः, निषेधः, अस्वीकारः, प्रत्याख्यानं, अपलापः; 'self d.' आत्मसंयमः, आत्मनिग्रहः. **-er,** *s.* नि-ह्नोतृ *m.*, अपलापिन् *m.*, प्रत्यादेशकः.

Deobstruct, *v. t.* निर्विघ्नीकृ 8 U, विघ्नान् हृ or अपनी 1 P.

Deodand, *s.* देवोपहारः.

Deodorize *v. t.* दुर्गंधं हृ or अपनी 1 P.

Depaint, *See* **Paint.**

Depart, *v. i.* प्रस्था 1 A, प्रया 2 P, वि-निर्-गम् 1 P, अपक्रम् 1 U, 4 P, अपया, अप-इ 2 P, अपगम् अपसृ-सृप् 1 P, 'whose life has d. ed' वि-गत-जीवितः. **2** प्र-इ, देहं उत्सृज् 6 P, विपद् 4 A, मृ 6 A, संस्था 1 A; *See* **Die.** **-v. t** त्यज् 1 P, हा 3 P, उत्सृज्. **-ed,** *a.* अपगत, व्यपेत; 'not d. from the meaning' अर्थादनपेत, अर्थ्य. **2** प्रेत, मृत, दिवंगत, संस्थित, विपन्न. **-ment,** *s.* भागः, विच्छेदः, प्र-वि-भागः. **2** विषयः, प्रकरणं. अंगं. **3** अधिकारः, नियोगः, कर्मन् *n.*, व्यापारः. **4** देशः, विषयः, मंडलं. **-ure,** *s.* अपगमः, अपयानं, प्रस्थानं, प्रयाणं, अपसरणं, अपसृति *f.*, निर्गमः, अपक्रमः. **2** देहत्यागः, संस्थिति *f.*, मरणं, उपरति *f.*

Depend, *v. i.* अवलंब् 1 A, प्रलंब्. **2** अव-आलंब्, आश्रि 1 U, संश्रि; निबंधन, तंत्र, अधीन, आयत्त, वश, in comp.; 'every thing d. s on fate' सर्वं दैवाधीनं-यत्तं; मम प्राणास्त्वदाशानिबंधनाः (M. 4); oft. by अपेक्ष् 1 A, व्यपेक्ष्; *See* below. **3** अनु-उप-जीव् 1 P. **4** (rely) विश्वस् 2 P (with loc.); समृ-ऋ c. (अर्पयति.); 'I d. upon you alone' त्वय्येव मे विश्वासः; 'd. upon it, I shall starve myself to death' मया प्रायोपवेशनं कृतं विद्धि (P. iv. 1); 'd. upon it' असंशयं, नियतं, ध्रुवं, खलु. **5** संबंध्, प्र-अनु-सज् pass., समनु-इ 2 P. **-ance, -ence,** *s.* अवलंबनं, आश्रयः, संश्रयः, निष्ठा, तंत्रता, निबंधनं, अधीनता; 'mutual d.' परस्परनिबंधनं, अन्योन्याश्रयः. **2** पराधीनता, परवशता, परवत्ता, पारतंत्र्यं, पराधीनत्वं. **3** विश्वासः, प्रत्ययः. **4** संबंधः, अनुबंधः, समन्वयः, संपर्कः. **-ency,** *s.* आयत्तता, अधीनता, &c. **2** अधीनः प्रदेशः, अन्यतंत्रं राज्यं. **-ant, -ent,** *a.* प्रलंब. **2** अधीन, आयत्त, आश्रित, अवलंबिन्, वश, तंत्र, निबंधन in comp. **3** (d. on another) पराश्रित, पराधीन, परतंत्र, परवश, परवत्, परवश; 'd on a cause' निमित्तापेक्षः (Mal.

–s. उप-अनु-जीविन् *m.*, आश्रितः, परवशो जनः, भृत्यः, परिवारः.

Depict, *v. t.* आलिख् 6 P, वर्ण् 10, निर्दिश् 6 P.

Depilation, *s.* लो(रो)महरणं, उल्लुंचनं. **–Depilatory,** *a.* केशनाशक, लोमहारिन्.

Depilous, *a.* अकेश, रो(लो)महीन.

Deplete, *v. t.* शून्यीकृ 8 U, रिच् c. निःशिष् c. **–ion,** *s.* अपक्षयः, निःशेषता, रिक्तता, शून्यत्वं, शून्यीकरणं.

Deplore, *v. t.* शुच् 1 P, विलप् 1 P, परिदेव् 1 A, परिदेव् 10 A. *See* **Lament.** **–ably,** *adv.* शोच्यप्रकारेण, शोचनीयं. **–er,** *s.* परिदेवकः, अनुशोचकः.

Deploy, *v. t.* विस्तृ 9 U (सैन्यव्यूहान्).

Deplume, *v. t.* पक्षान् उत्पट् 10 or उद्‌वृह् 1 P, निष्पक्षीकृ 8 U. **–ation,** *s.* पक्षोत्पाटनं.

Depone, *v. i.* सशपथं वद् 1 P or कथ् 10, शपथपूर्वं उपदिश् 6 P or उदाहृ 4 U. **–ent,** *s.* साक्षिन् *m.* 2 अकर्तरि क्रिया.

Depopulate, *v. t.* निर्जनीकृ 8 U, विजनीकृ, नरशून्य *a.* कृ; उत्पीड् 10, बाध् 1 A, समुच्छिद् 7 P. **–ion,** *s.* निर्जनीकरणं 2 उपद्रवः, उच्छेदः, उत्पीडनं, बाधा. **–or,** *s.* उच्छेदकः, उत्पीडकः, विद्रवकारिन् *m.*

Deport, *v. t.* प्रव्रज् c., निः-प्र-वि-वस् c., देशांतरं नम् c. (गमयति). **–v. i.** (oneself) आचर्-व्यवहृ 1 P, वृत् A; *See* **Act.** **–ation,** *s.* प्र-वि-वासनं, प्रव्राजनं. **–ment,** *s.* वृत्ति *f.*, आचरणं, चेष्टितं, व्यवहारः, वृत्तं.

Depose, *v. t.* (राज्यात् or अधिकारात्) अवरुह् c. (रोपयति), भ्रंश् c., पत् c., च्यु c. **–v. i.** साक्ष्यं दा 3 U, वद् 1 P, वच् 2 P, कथ् 10. **–ition,** *s.* साक्ष्यं, साक्ष्यदानं. 2 (Deposal) राज्यभ्रंशः-च्युति *f.*, राज्यावरोपणं, अधिकारच्युतिः-भ्रंशः.

Deposit, *v. t.* निक्षिप् 6 P, न्यस् 4 P, निधा 3 U, आधा, अृ c. (अर्पयति), आधीकृ 8 U. **–s.** न्यासः, निक्षेपः, आधिः, उपनिधिः. 2 किट्टं, शेषः, खलं, कल्कः, मलः-लं. **–ary,** *s.* निक्षेपग्राहकः, न्यासधारिन् *m.* 2 निक्षेपस्थानं-पात्रं-भूमि *f.* **–or,** *s.* निक्षेपितृ *m.*, न्यासकर्तृ *m.* **–ory,** *s.* आधारः, आश्रयः, निधानं, निधिः, भाजनं, आगारं, संग्रहस्थानं.

Depot, *s.* आगारं, शाला, स्थानं, आलयः, 'book d.' पुस्तकालयः, ग्रंथशाला; 'military d.' युद्धसामग्र्यागारं.

Deprave, *v. t.* दुष् c. (दूषयति) भ्रंश् c. मलिनीकृ 8 U, कलुषयति (D.). **–ed,** *a.* दुराचार, भ्रष्ट, दुष्ट, संक्लिष्टवृत्त, दुरात्मन्, पापचेतस्, दुर्वृत्त, भ्रष्टशील, कलुषाचार. **–edness,–ity,** *s.* दुष्टता, भ्रष्टता, दुष्टभावता, दौरात्म्यं, दुराचारता, दौर्जन्यं, कालुष्यं, दुर्वृत्तता.

Deprecate, *v. t.* (प्रार्थनापूर्वकं) निवारय् 10, व्यावृत् c., मा भूदिति याच् 1 A. 2 अनुशुच् 1 P. **–ion,** *s.* निवारणार्थं प्रार्थनास्तवः. **–ive,–atory,** *a.* अनिष्टनिवारक.

Depreciate, *v. t.* अर्घतः पत् c., अवमन् 4 A, लघूकृ 8 U, लघु मन्, मूल्यं न्यूनीकृ, अवक्षिप् 6 P. अपलप् 1 P, अपकृष् 1 P. **–ion,** *s.* लघूकरणं, अवमाननं, अपकर्षः, अपलापः.

Depredate, *v. t.* अपहृ 1 P, लुंठ्-ड् 1 P, 10, उपहृ 1 A, उपद्रुत्य ग्रह् 9 P. **–ion,** *s.* उपप्लवः, अपहरणं, लुंठनं, लोप्त्रग्रहणं. **–or,** *s.* विप्लवकारिन् *m.*, अपहारकः.

Deprehend, *See* **Apprehend.**

Depress, *v. t.* अवनम् c. (नमयति), पत् c., अपकृष् 1 P, अवपीड् 10, निम्नीकृ 8 U, अवसद् c., भ्रंश् c., अवगाह् 1 A. 2 विषादं नी 1 P, विषद् c., विषण्णीकृ; 'd.ed behind' पश्चादवनताः (S. 3); 'd.ed in spirits' विषण्ण, म्लान, मुक्तावयव, खिन्नचित्त; *See* **Dejected** **–ion,** *s.* पातः, अवनमनं, अपकर्षः-र्षणं. 2 विषादः, खिन्नता, अवसादः, उद्वेगः, दौर्मनस्यं, म्लानि *f.*, 'd. of spirits' सत्त्वभ्रंशः.

Deprive, *v. t.* अपनी 1 P, अपहृ 1 P, (with gen. of person); भ्रंश् c., च्यु c. (with abl.); वियुज् 7 A, 10, विनाकृ 8 U, (with instr. of the object deprived). **–ation,** *s.* हरणं, अपचयः, क्षयः, लोपः, हानि *f.*, नाशः. **–ed,** *a.* हृत, अपहृत, हीन, वियुक्त, भ्रष्ट, विरहित, विनाकृत (gen. in comp.), वीत-लुप्त निर् in comp.; 'd. of wealth' निर्धन, लुप्तवित्त; 'd. of authority' भ्रष्टाधिकार, पदभ्रष्ट; 'to be d.' हा pass.; परिहा, वियुज् pass.

Depure, Depurate, *See* **Purify.**

Depute, *v. t.* नियुज् 7 A, 10, प्रेर् c., प्रेष् c., प्रहि 5 P, समादिश् 6 P (of a person); निक्षिप् 6 P, न्यस् 4 P, (of business). **–ation,** *s.* नियोजनं, प्रेरणं, प्रेषणं. 2 नियुक्ताः-समादिष्टाः (*pl.*), नियोगिजनः, नियुक्तजनाः. **–y,** *s.* प्रतिनिधिः, प्रतिहस्तः-स्तकः, नियोगिन् *m.*; नियुक्तः, प्रतिपुरुषः.

Deracinate, *See* **Eradicate.**

Derail, *v.* लोहमार्गात् निःसृ 1 P, or c.

Derange, *v. t.* विपर्यस् 4 U, विक्षिप् 6 P, क्रमं-व्यवस्थां-भंज् 7 P, or उपहन् 2 P, विक्षुभ् c., संकृ 6 P, आकुलीकृ 8 U. **–ed,** *a.* व्यस्त, अनवस्थित, भग्नक्रम, अव्यवस्थित, विक्षिप्त, संकीर्ण; 'd. in mind' उन्मत्त, भ्रांतचित्त. **–ment,** *s.* व्युत्क्रमः, प्रक्रमभंगः, अव्यवस्था, व्यस्तता, अक्रमः. विप्लुतता, वैलक्षण्यं; 'd. of mind' मतिभ्रमः चित्तविभ्रमः, मतिविपर्यासः.

Derelict, *a.* त्यक्त, उत्सृष्ट, परित्यक्त. **-ion,** *s.* त्यागः, उत्सर्गः, उपेक्षा.

Deride, *v. t.* वि-उप-अव-हस् 1 P, उपहासास्पदी कृ 8 U, अवज्ञा 9 U, भर्त्स् 10 A, गर्ह् 1, 10 A; 'to be d. ed' उपहास्यतां गम् 1 P, उपहासास्पदं भू 1 P; 'are d.ed by all' सर्वजनस्योपहास्यतामुपयांति (Ka. 108). **-er,** *s.* उपहासकः, अवक्षेपकः. **-ingly,** *adv.* अवहासेन, उपहासपूर्वं. सोपहासं. **-Derision,** *s.* उप-अव-हासः, अवमानना, धिक्कारः, अवज्ञा, गर्हणं, निर्भर्त्सनं. **-Derisive,** *a.* सोपहास, अवहासगर्भ, अवहासिन्; उपहास्य; गर्ह्य.

Derive, *v. t.* निष्कृष् 1 P, उद्-भू c., जन् c. (जनयति). उत्पद् c., 2 प्राप् 5 P, लभ् 1 A, Ge , q. v.) 3 व्युत्पद् c. निर्वच् 2 P, 10, व्युत्पत्तिं वद् 1 P. **-ed,** *a.* उत्पन्न, उद्भूत; oft. ex. by प-,भव-मूल-उद्भव-ज in comp., 'the race d. ed from the Sun' सूर्यप्रभवो वंशः; 'to be d. ed' उत्पद् 4 A, प्रभू 1 P, जन् 4 A, उद्-भू, निर्गम् 1 P. **-ation,** *s.* व्युत्पत्ति *f.*, निर्वचनं, शब्दोत्पत्ति *f.*, शब्दयोनि *f.* 2 प्रभवः, उद्भवः. योनि *f.*, मूलं, निर्गमः. **-ative,** *a.* व्युत्पन्न; यौगिक (की *f.*). 'd. suffixes' तद्धितप्रत्ययाः. **-s.** साधितः शब्दः, व्युत्पन्नः शब्दः.

Dermis, *s. See* **Skin.**

Derogate, *v. t.* अल्पीकृ 8 U, न्यूनीकृ, लघयति (D.): *See* **Depreciate. -ion,** *s.* लघूकरणं, अपमानः, गौरवन्यूनता अवमानना, लाघवं. **-ory,** *a.* अननुरूप; अकीर्तिकर, लाघवकारिन्, असदृश शी *f.*), अयशस्कर (री *f.*).

Dervise, *s.* संन्यासिन् *m.* (महंमदीयः).

Descant, *v. i.* सविस्तरं व्याख्या 2 P. वि-वृ 5 U, विस्तरेण वर्ण् 10. 2 गै 1 P, वर्ण् 10. **-s.** वचनं, वादः, प्रवादः, भाषितं. 2 गीतं.

Descend, *v. i.* अवतॄ-अवरुह्-अवपत् 1 P, निपत्, च्यु 1 A, भ्रंश् 1 A, 4 P. 2 आ-अभि-गम् 1 P, प्रविश् 6 P. 3 (upon) अभिद्रु 1 P, अभियात्र् 1 P, आक्रम् 1 U, 4 P: *See* **Attack.** 4 (from) उत्पद् 4 A, प्र-उद्-भू 1 P, जन् 4A; *See* **Derive.** वंश-कुल-क्रमेण आगम् 1 P, or या 2 P, परंपरया प्राप् pass.; 'd. into details' सविस्तरं वर्ण् 10, विस्तरशः वद् 1 P, प्रपंचयति (D.) **-v.** *t.* Causal of roots (1) above. **-ant,** *s.* वंश्यः, वंशजः, अपत्यं, संतति *f.* प्रसूति *f*, संतानः; 'd. s.' पुत्रपौत्राः, कुलसंततिः, वंशः, अन्वयः, कुलं; 'male d.' पुत्रसंतानः. **-ed,** *a.* अवतीर्ण, अधोगत; 'lineally d.' कुलक्रमागत, वंशपरंपराप्राप्त, क्रमायात, पितृप्राप्त; 'to be d.' उत्पद्. जन्, प्रभू 1 P; gen. by derivative affixes; 'd. from Puru' पौरवः. **-ent,** *a.* अवरोहिन्, अधोगामिन्. **-Descent,** *s.* अवतरणं, अवपातः, अवरोहः-हणं, अवतारः. 2 आक्रमः, अवस्कंदः, अभिद्रवणं. 3 जन्मन् *n.*, उत्पत्ति *f.*, वंशः, उद्भवः, कुलं; 'of noble d.' कुलीन, कुलोत्पन्न, महाकुलप्रसूत, अभिजात, अभिजनवत्. 4 संतति *f.*, अन्वयः, आवलि-ली *f.*, संतानः-नं. 5 वंशक्रमागमः, अन्वयागमः. 6 अवसर्पिणी भूमिः, प्रवणस्थानं.

Descension, *s.* अवपातः, अधोगमनं, अधःपतनं.

Describe, *v. t.* वर्ण् 10, निर्दिश् 6 P, वि-वृ 5 U, कृत् 10, कथ् 10, निरूप् 10, वच्. 2 P, व्याख्या 2 P; 'her splendour can't be d. ed' तस्याः श्रीर्वचनानामविषया. 2 (Draw) लिख् 6 P. **-Description,** *s.* वर्णनं-ना, निर्देशः, व्याख्यानं, कथनं, निरूपणं, विवरणं. **-Descriptive,** *a.* निर्देशक, वाचक, अभिधायिन्, निर्देशिन्. 2 वर्णनपर.

Descry, *v. t.* दूराद् आलोक् 1 A, 10 or दृश् 1 P, or ईक्ष् 1 A, निवर्ण् 10, आलक्ष् 10. 2 ज्ञा 9 U, अवगम् 1 P; *See* **Know.**

Desecrate, *v. t.* दुष् c. (दूषयति), अपवित्रीकृ 8 U, पुण्यत्वं लुप् c., संस्कारहीन *a.* कृ. **-ion,** *s.* दूषणं, संस्कारदूषणं, अपवित्रीकरणं.

Desert, *s.* मरुः, मरुस्थलं-ली, वालुकाप्रदेशः, धन्वन् *m.* 2 गुणः, पुण्यं, योग्यता, पात्रत्वं, पुण्यापुण्यं, अर्हत्वं, **-a.** निर्जन, निर्मानुष (षी *f.*), वन्य, खिल, निर्जल, शून्य, आरण्यक. **-v.** *t.* त्यज् 1 P, हा 3 P, उत्-वि-सृज् 6 P, रह् 10, (रहयति), अपध्यष् 4 P, **-v.** *i.* सेनां त्यक्त्वा पलाय् 1 A. **-er,** *s.* त्यागिन् सेनात्यागिन् *m.*, परावर्तकः. रणपराङ्मुखः, पलायिन् *m.* **-ion,** *s.* त्यागः, उत्सर्गः; सेनात्यागः, निर्गमनं. अपक्रमणं. **-less,** *a.* निर्गुण, अनर्ह, अयुक्त, अपात्र.

Deserve, *v. t.* अर्ह् 1 P, अर्ह-उचित-योग्य *a.* in comp.; oft. by pot. pass. part. **-ed,** *a.* योग्य, उचित, अर्ह. **-edly,** *adv.* उचितं, योग्यं, न्यायतः. **-er, -ing,** *a.* अर्हत् गुणवत्, अर्ह, उचित, योग्य, पात्र; 'd of' ex. by pot. pass. part. 'd. of pity' अनुकंप्य, &c. **-s.** गुणः, पात्रता, योग्यता, अर्हत्वं.

Deshabille, *See* **Dishabille.**

Desiccate. *v. t.* शुष् c., आचम् 1 P, **-v.** *i.* शुष् 4 P, **-ion,** *s.* शोषणं, परिशोषः. **-ive,** *a.* शोषक. **-Dessicants,** *s.* व्रणशोषकाः.

Desiderate, *See* **Desire. -ive,** *a.* इच्छार्थक, सन्नंत. **-Desideratum,** *s.* अभीष्टवस्त्वभावः.

Design, *v. t.* परि-सं-क्लृप् c., अनुसंधा 3 U, व्यवसो 4 P, अभि-प्र-इ 2 P, उद्दिश् 6 P; चिंत् 10, घट् c. (घटयति), मनः-मतिं कृ.

8 U. 2 प्र-विनि-युज् 7 A, 10. 3 आलिख् 6 P, सूत्रपातं कृ. -s. अभिप्रायः, अर्थः, आकांक्षा, उद्देशः, संकल्पः, आशयः, हेतुः, चिकीर्षितं, प्रयोजनं, कार्यं. 2 उपायः, चिंता, कल्पना, घटना, विधानं, व्यवसायः. 3 आलिखनं, सूत्रपातः, संस्कारः. -edly, adv. कामतः, यथाकामं, इच्छातः, बुद्धिपुरःसरं. -er, s. चिंतकः, परिकल्पकः. 2 आलेखकः, सूत्रपातकः. -ing, a. उपजापिन्, मायिन्, छलिन्, वंचनशील, प्रतारक, विदग्ध, कपटपटु, धूर्त. -less, a. निरर्थक, निष्प्रयोजन.

Designate, v. t. उप-लक्ष् 10, अप-व्यप-दिश् 6 P, निर्दिश्, सूच् 10, सुत c., अभिधा, 3 U, निर्वच् 2 P, गम् c. (गमयति). 2 नियुज् 7 A, 10, परि-सं-क्लृप् c. -ing, s. लक्षणं, उपलक्षणं, चिह्नं. विशेषणं, अभिधानं, संज्ञा, आख्या, नामन् n.

Desire, v. t. इष् 6 P, वांछ् 1 P, कम् 10 A, स्पृह् 10 (with dat.), इह् 1 A, आकांक्ष् 1 U, अभिलष् 1, 4 P, oft. ex. by desid. of roots. 2 अर्थ् 10A, याच् 1A, वृ 5U. -s. इच्छा, अभिलाषः, कामः, ईहा, आकांक्षा, समीहितं, आशा, इष्टं, ईप्सितं, मनोरथः, स्पृहा, अभीष्टं; 'according to one's d.' यथाकामं, यथेष्टं, स्वेच्छातः, स्वच्छंदं, स्वरुच्या; 'ardent d.' लालसा, औत्सुक्यं, उत्कंठा, लोभः, तृष्णा. -able, a. स्पृहणीय, काम्य. 2 इष्ट, प्रशस्त, श्रेयस्. -ous, a. सस्पृह, वांछिन्, इच्छु, ईप्सु; oft. by desid. forms, 'd. to speak.' विवक्षुः; 'd. to take' जिघृक्षुः; or by काम or मनस् in comp. with inf.; 'd. to take' आदातुकामः-मनाः.

Desist, v. i. विरम् 1 P, निवृत् 1 A, विश्रम् 4 P, (with abl.); See **Cease.** -ance, s. विरामः, निवृत्ति f., विश्रामः.

Desk, s. लिखनफलकः. लेखनाधारः.

Desolate, a. निर्मानुष (षी f.), निर्जन, शून्य, विविक्त, वसतिहीन, विजन. 2 उच्छिन्न, जीर्ण, उद्ध्वस्त, उत्सन्न. 3 असहाय, निराश्रय, अगतिक, अनाथ. -v. t. उच्छिद् 7 P, अवसद् c., निर्जनीकृ 8 U; उपपीड् 10, शून्यीकृ, प्रबाध् 1 A. -ion, s. उच्छेदः, अवसादनं, वसतिनाशः, निर्जनीकरणं. 2 शून्यता, निर्जनत्वं, विविक्तता.

Despair, v. i. निराश a. भू 1 P, आशां हा 3 P, नैराश्यं गम्-व्रज् 1 P, विषद् 1 P, भग्नाश a. भू; 'd.ed. of success' जयविषयं निराशोभूत्. -s. नैराश्यं, निराशता, आशाहीनता, वैक्लव्यं, विषादः; 'being in d.' त्यक्ताश, गताश. -**Desperate,** a. निराश, आशातीत, त्यक्ताश, आशाहीन. 2 जीवितनिरपेक्ष, आततायिन्, निर्भय, साहसिक (की f.) 3 निष्प्रतीकार, उग्र, संरब्ध, साहसद्योतक, अत्यंत; 'a d. act' साहसं, आततायिता. -ly, adv. जीवितनिरपेक्षं, प्रसह्य, उग्रं, उन्मत्तवत्. 2 अति-सु pr.; अत्यंतं, भृशं. -ness, साहसिकता, उन्मादः, संरंभः जीवितनिरपेक्षता.

Despatch, v. t. (सत्वरं) प्रेष् c., प्रहि 5 P. प्रस्था c. (स्थापयति), विसृज् 6 P. 2 शीघ्रं. झटिति संपद् c.; त्वर् c. (त्वरयति), आशु संविधा 3 U. 3 हन् 2 U, व्यापद् c.; See **Kill.** -s. त्वरा, शीघ्रता, शीघ्रकारित्वं, अदीर्घसूत्रता. 2 पत्रं, राजलेखः-लेख्यं, वाचिकपत्रं. 3 धावकः, प्रजाविन् m., वार्ताहरः, दूतः. -ful, a. त्वराशील, शीघ्रकारिन्, अविलंबिन्, अदीर्घसूत्र.

Desperado, s. साहसिकः, प्रसह्यचौरः, साहसिन् m., आततायिन् m., वधोद्यतः.

Despise, v. t. अवज्ञा 9 U, तिरस्कृ 8 U, अवमन् 4 A, परिभू 1 P, अवधीर् 10; See **Contemn.** -er, s. अवमंतृ m., अवज्ञातृ m., निंदकः. -ingly, adv. सावज्ञं, सावमानं. -**Despicable,** a. अवमान्य, अवज्ञेय, गर्ह्य, निंद्य, नीच, निकृष्ट, अधम, तुच्छ, कुत्सित, क्षुद्र.

Despite, s. द्वेषः, जुगुप्सा, मात्सर्यं, ईर्ष्या, अभ्यसूया, असूया. 2 प्रतिरोधः, प्रतिकारः; 'in d. of' (prep.) अनादृत्य, अवगणय्य, or gen. abs.; 'd. the (presence of the) teacher' पश्यतोपि गुरोः; See 'in spite of' under **Spite.** -ful, a. द्वेषिन्, सासूय, अभ्यसूयक, मत्सरिन्, द्रोहबुद्धि. -fully, adv. सद्वेषं, सद्रोहं, ईर्ष्यया. -fulness, s. मात्सर्यं, असूया. दौर्जन्यं, द्रोहः, द्रोहबुद्धि f.

Despoil, v. t. हृ 1 P, अपहृ; See **Deprive;** 'd. ed of everything' हृतसर्वस्व. -er, s. अपहारकः. -**Despoilation,** s. अपहरणं.

Despond, v. i. निर्विद् 4 A, नैराश्यं-निर्वेदं-विषादं-गम् 1 P or आपद् 4 A, विषद् 1 P, आशां त्यज् 1 P, अंगानि मुच् 6 P. -ency, s. निर्वेदः, विषादः, नैराश्यं, उद्वेगः, अवसादः, विषण्णता. -ent, -ing, a. निर्विण्ण, विषण्ण, निराश, त्यक्ताश, म्लान, उद्विग्न; 'do not take a d. view' मा भवानंगानि मुचतु (V. 2). -ingly, adv. सविषादं, सनिर्वेदं.

Despot, s. प्रजापीडकः, लोकोपद्रवकः, 2 अधीश्वरः, सम्राज् m., सार्वभौमः, चक्रवर्तिन् m. -ic, -ical, a. स्वतंत्र, निष्प्रतिबंध, अनियंत्रण, अनियत, निर्यंत्रण. -ically, adv. स्वैरं, स्वेच्छातः, कामचारेण. -ism, s. प्रजापीडनं, निष्ठुरशासनं, प्रजोपप्लवः. स्वेच्छाचारित्वं, स्वेच्छाप्रभुत्वं; निर्यंत्रणाराज्यसरणिः f.

Despumate, v. i. उत्सिच् pass., फेनायते (D.)

Dessert, v. t. (भोजनांते) फलाहारः.

Destine, v. t. (**Destinate**) निरूप् 10, परि-प्र-क्लृप् c., निर्दिश् 6.P, नियुज् 7 A, 10.

समुपस्था 1 U, (न जाने भोक्तारं कमिह समुपस्थास्यति विधिः S. 2), oft. ex. by pot. pass. part., with or without अवश्यं, नूनं; 'he is d. ed to be a king' अनेनावश्यं राज्ञा भवितव्यं; 'man is d. ed to die' मनुष्या नश्वराः; 'who is able to avoid what is d. ed for him' लिखितमपि ललाटे प्रोज्झितुं कः समर्थः; तथा भवितव्यतया च तस्य तस्य वस्तुनः (Ka. 143) 'every thing being d. ed to occur' &c. **-ation,** *s.* ईप्सितं स्थानं, इष्टः प्रदेशः, निरूपित-निर्दिष्ट-स्थानं. 2 उपयोगः, प्रयोजनं, उद्देशः; अर्थः, अभिप्रायः. **-y,** *s.* दैवं, भवितव्यता, नियति, *f.*, भाग्यं, भागधेयं; विधातृ *m.*, विधिः, दिष्टं, अदृष्टं, प्राक्तनं.

Destitute, *a.* निर्धन, अर्थहीन, निराश्रय, दुर्गत, अशरण, दीन, अकिंचन, दुःस्थित. 2 (of) हीन, रहित, वर्जित, शून्य, वियुक्त, लुप्त, विहीन, परिहीण, with instr. or in comp.; gen. by निर्-अ-वि- in comp.; 'd. of courage' धैर्यहीन-शून्य, &c.; निरुत्साह 'd. of energy'; 'd. of hands and feet' अपाणिपाद. **-ion,** *s.* दैन्यं, धनाभावः, अकिंचनत्वं, दारिद्र्यं, निराश्रयता. 2 हीनत्वं, राहित्यं, शून्यत्वं, अभावः, विरहः, वियोगः.

Destroy, *v. t.* नश् c., प्र-वि°, अव-उत्-सद् c., ध्वंस् c., प्र-वि°; विलुप् c., क्षै c. (क्षपयति), क्षि 5 P or c., संहृ 1 P, उत्-निर्-मूल् c., उच्छिद् 7 P, प्रतिहन् 2 P. 2 (persons &c.) हन् 2 P, निषूद् 10, व्यापद् c., मृ c.; 'to be d. ed' वि-,नश्, 4 P, ध्वंस् 1 A, क्षयं या-इ 2 P, or गम् 1 P, प्र-वि-ली 4 A. **-er,** *s.* नाशकः, हंतृ *m.*, निषूदनः, घातिन् *m.*, अंतकः, ध्वंसकः, हन्-अपह in comp, 'd. of Vritra' वृत्रहा, वृत्रनिषूदनः; 'd. of every thing' कृतांतः. **-Destructible,** *a.* नश्वर, विध्वंसिन्, भंगुर, क्षयिन्. **-Destruction,** *s.* नाशः, विनाशः, प्रणाशः; प्र-, वि-, ध्वंसः, क्षयः, उच्छेदः, संहारः; उद्दलनं, उत्पाटनं. 2 निषूदनं, घातः, वधः; 'd. of the whole world' प्रलयः, प्रत्यवहारः, कल्पांतः, संवर्तः. **-Destructive,** *a.* विनाशिन्, क्षयकर (री *f.*), घातिन्, अंतकर, घातुक, अपह-घ्न (घ्नी *f.*) in comp.: 'd. to life' जीवितापह, प्राणहर, निधनकारिन्.

Desuetude, *s.* विरति *f.*, निवृत्ति *f.*, विच्छेदः, विरामः, प्रवृत्तिविच्छेदः.

Desultory, *a.* असतत, उच्छृंखल, अस्थिर, लोल, अनियत, चंचल, अनवस्थित, अव्यवस्थित.

Detach, *v. t.* विश्लिष् c., विभिद् 7 P, विच्छिद् 7 P, वियुज् 7 A, 10, पृथक् कृ 8 U; *See* **Separate.** **-ed,** *a.* वियुक्त, विभिन्न, विच्छिन्न; असंसक्त, असंलग्न, व्यासंग, विश्लिष्ट, असंयत. **-ment,** *s.* विभागः, वियोगः, विच्छेदः, विश्लेषः, विभेदः. 2 सैन्यदलं, गुल्मः-ल्मं.

Detail, *s.* विस्तरः, विस्तारः; वाग्विस्तरः, प्रपंचः. 2 वृत्तांताख्यानं; 'in d.' or 'd. ed' सविस्तर (*a.*), विस्तरेण, विस्तरतः-शः, सविस्तरं. **-v. t** सविस्तरं-विस्तरेण-वर्ण् 10 or आख्या 2 P. or कथ् 10, प्रपंचयति (D.).

Detain, *v. t.* धृ 1 P, निरुध् 7 U; जामातृयज्ञेन वयं निरुद्धाः (U. 1) 'd. ed by reason of' &c. 2 निवार् 10, निग्रह् 9 P. 3 (in custody) आसिध् 1 P, बंध् 9 P, निरुध्. **-Detention,** *s.* धरणं, निग्रहः, संरोधः, निरोधः. 2 आसेधः, प्रति-नि-रोधः, बंधनं, बलात्कारेण धरणं.

Detect, *v. t.* निरूप् 10, ज्ञा 9 U, अनुसंधा 3 U, अधि-अव-गम् 1 P; दृश् 1 P, उपलभ् 1 A, आसद् c. 2 धृ 1 P, प्रकाश् c., व्यंज् 7 P; 'd. ed in a crime' दृष्टदोष; निर्णीतापराध. **-ion,** *s.* ज्ञानं, निरूपणं, अनुसंधानं, उपलंभः, अवगमनं **-ive,** *a.* (Officer) चरः, चारः, प्रणिधिः, अपसर्पः; *See* **Spy**

Deter, *v. t.* (सभयं) निवृत् c., निवार् 10, विरम् c. (रमयति), भी c., निरुध् 7 U; *See* **Prevent.** **-ment,** *s.* निवर्तनं, निवारणं.

Deterge, *v. t.* शुध् c., मलं अपनी 1 P, परिमृज् 2 P. **-ent,** *a.* शोधन (नी *f.*), परिमार्जक.

Deteriorate, *v. i.* क्षि-हा pass., ह्रस् 1 P, क्षयं गम् 1 P; दुष् 4 P, भ्रंश् 4 P, 1 A, अपकृष् pass. **-v. t.** अपकृष् 1 P, दुष् c. (दूषयति), विकृ 8 U, ह्रस् c. **-ion,** *s.* क्षयः, अपचयः, विकारः, विकृति *f.*, ह्रासः, भ्रष्टता. 2 अपकर्षः, दूषणं.

Determine, *v. t.* निश्चि 5 U, स्था c. (स्थापयति), संक्लृप् c., निरूप् 10, निर्णी 1 P, निर्-अव-धृ 10, निर्दिश् 6 P, लक्ष् 10, परिच्छिद् 7 P. 2 निरूप्, अनुसंधा 3 U, निर्णी (a dispute &c.). **-v. i.** व्यव-अव-सो 4 P, निश्चयं कृ 8 U; 'd. ed to go' गमने कृतसंकल्प, गंतुं व्यवसित. **-ate,** *a.* स्थिर, दृढ, निर्धारित, निश्चित, निर्णीत. नियत, सिद्ध, व्यवस्थित. 2 निश्चायक, निर्णायक. 3 (of persons) कृतनिश्चय, दृढसंकल्प, व्यवसित. **-ately,** *adv.* सनिश्चयं, सनिर्णयं, नूनं. **-ation,** *s.* निश्चयः, निर्णयः, संकल्पः, निर्धारणं, व्यवसायः, विचारः निरूपणं, परिच्छेदः, अवधारणं-णा. 2 अभिनिवेशः, अध्यवसायः, निर्बंधः. **-ative,** *a.* निर्णायक, निर्धारक. **-ed,** *a.* निश्चित, निर्णीत, सिद्ध, नियत, व्यवस्थित, परिच्छिन्न, अवधारित. 2 (of persons) स्थिरनिश्चय, दृढ-कृत-संकल्प, अभिनिविष्ट, कृतनिश्चय. **-edly,**

adv. स्थिरचेतसा, दृढं, दृढनिश्चयेन. **-or,** *s*. निर्णयकृत् *m*., निर्णेतृ *m*.

Detest, *v. t*. विद्विष् 2 U, गर्ह् 1, 10 A, गुप् desid. (जुगुप्सते) (with abl.); *See* **Abhor. -able,** *a*. जुगुप्सित, गर्हित, निंद्य, गर्हणीय, विद्वेष्य. **-ation,** *s*. गर्हा, जुगुप्सा, घृणा, विद्वेषः. **-er,** *s*. द्वेषिन् *m*., विद्वेष्टृ *m*.

Dethrone, *v. t*. राज्यात् भ्रंश् c. or च्यु c. or अवपत् c. or अवरुह् c. (रोपयति). **-ment,** *s*. राज्यभ्रंशः-च्युति *f*.

Detonate, *v. i*. सहसा स्तन् 1 P or ध्वन् 1 P. **-ion,** *s*. स्तनितं, आकस्मिकध्वनि *m*.

Detort, *See* **Pervert.**

Detract, *v*. अपकृष्-अपनी 1 P. **2** अपलप् 1 P, अपवद्-भाष् 1 A, अधिक्षिप् 6 P, निंद् 1 P, असूयति (D.) (with dat.), मूल्यं न्यूनीकृ 8 U; लघूकृ; *See* **Depreciate. -ion,** *s*. अपकर्षः, लघूकरणं, ह्रासः. **2** असूया, अप-परि-वादः, आक्षेपः, गुणनिंदा, पैशुन्यं, परदोषाविष्करणं, मात्सर्यं. **-or,** *s*. अपवादकः, अधिक्षेपकः, निंदकः, असूयकः, परिवादरतः **-ory,** *a*. अपवादिन्, निंदक, अभ्यसूयक; पिशुन.

Detriment, *s*. हानि *f*., अपकारः, क्षति *f*., नाशः, अपायः बाधा, विरोधः. **-al,** *a*. हानिकर (री *f*.), विरोधिन्, अपायकारक.

Detrude, *v. t* अवपत् c., अधः क्षिप् 6 P, भ्रंश् c. **-Detrusion,** *s*. अवपातनं.

Detruncate, *v. t*. अवच्छिद् 7 P, निकृत् 6 P, वि-लू 9 U. **-ion,** *s*. अवच्छेदः, निकर्तनं.

Deuce, *s*. द्वयं, द्विकं. **2** पिशाचः, भूतः.

Devastate, *v. t*. उच्छिद् 7 P, उत्-अव-सद् c.; उपपीड् 10, वि-उप-द्रु 1 A, प्रबाध् 1 A, निर्जनीकृ 8 U. **-ion,** *s*. उच्छेदः, उपप्लवः, प्रबाधनं, विनाशः, निर्जनीकरणं.

Develop, *v. t*. पुष् 1, 4, 9 P, प्र-उप-चि 5 U, प्र-सं-वृध् c.; 'she d. ed her lovely limbs' पुपोष लावण्यमयान् विशेषान् (K. I. 25): also प्रत्यंगमावयवा R. III. 7) उपचितांगी. **2** विकस् c., विस्तृ c., उद्भिद् c.; तस्य (कार्यपक्षस्य) विस्तारमिच्छन् (Mu. 4) 'wishing to d. it.' **-v. i.** प्र-उप-चि pass., उद्भिद् pass., क्रमशः विकस् 1 P, क्रमेण प्र-सं-वृध् 1 A. **-ment,** *s*. प्रचयः, उपचयः, संवर्धनं; विस्तारः, विकासः, उद्भवः.

Devergence, *See* **Divergence.**

Deviate, *v. i*. अति-व्यति-इ 2 P, अतिक्रम् 1 U, 4 P, अति-व्यभि-चर् 1 P; 'did not d. even an inch from the beaten path' क्षुण्णाद्वर्त्मनो रेखामात्रमपि न व्यतीयुः (R. I. 17); अप-या-इ 2 P, चल् 1 P, प्र-वि-°; च्यु 1 A, भ्रंश् 4 P, 1 A, (with abl.). **-ion,** *s*. अतिक्रमः, विचलनं, च्युति *f*., भ्रंशः, भ्रंशः, व्यभिचारः, त्यागः; 'd. from the right path' उत्पथयानं, विमार्गगमनं.

Device, *s*. उपायः, युक्ति *f*., प्रयोगः, कल्पना, साधनं. **2** अप-व्यप-देशः, छलं, माया, छद्मन् *n*., कैतवं, व्याजः. **3** लक्षणं, चिह्नं, अंकः. **4** निर्माणशक्ति *f*., कल्पनाचातुर्यं.

Devil, *s*. भूतः, वेतालः, पिशाचः; 'I shall not raise a d. for my own destruction' नाहमात्मविनाशाय वेतालोत्थापनं करिष्यामि.

Devious, *a*. वक्र, कुटिल, जिह्म. **2** मर्यादातिक्रमिन्, व्यभिचारिन्.

Devise, *v*. चिंत् 10, उप-सं-क्लृप् c., निरूप् 10, युज् 7 U, 10. आ-पर्या-लोच् 10, घट् c. **2** इच्छापत्रेण प्रदा 3 U. **-s.** इच्छापत्रेण रिक्थदानं. **-er,** *s*. धनाधिकारिन्, *m*. **-er,** *s*. उपायज्ञः, परिकल्पकः, प्रयोजकः.

Devoid, (of), *a*. *See* **Destitute** (of).

Devoir, *s*. स्वकर्तव्यं, कर्तव्यता, धर्मः. **2** सत्कारः, आदरः, पूजा, संमानः.

Devolve, *v. t*. निक्षिप् 6 P, न्यस् 4 P, संक्रम् c., सम्-ऋ c. (अर्पयति), आरुह् (रोपयति) 'having d. ed their property upon their sons' पुत्रसंक्रामितश्रियः (U. 1); गुणवत्सुतरोपितश्रियः (R. VIII. 11). **2** प्रपत् c., प्रसु-प्रवह् c. **-v. i.** आगम् 1 P, आया 2 P, पत् 1 P, [illegible] 1 U, 4 P; न्यस् निक्षिप्-सम् c. pass.; 'after his death the kingdom d. ed upon his eldest son' मृते तस्मिंस्तस्य ज्येष्ठपुत्रो राजपदभाग्बभूव. **2** अधः पत् 1 P, अवपत्. **-Devolution,** *s*. निक्षेपणं, समर्पणं, संक्रामणं.

Devote, *v. t*. प्र-विनि-युज् 7 A, 10, सम्-ऋ c. (अर्पयति), निक्षिप् 6 P, उत्सृज् 6 P, सं-उप-क्लृप् c. **2** (Oneself to) आसंज्-अनुरंज् pass., मनः युज् or बंध् 9 P or अभिनिविश् c., आसक्त-अभिनिविष्ट *a*. भू (all with loc.): भज् 1 U, आसेव् 1 A. **3** नाशाय क्लृप् c; *See* **Doom. -ed,** *a*. सक्त, आ-प्र-व्या-सक्त; नि-, रत, अभिनिविष्ट, समाहित, पर-तत्पर-परायण in comp. **2** भक्त, दृढभक्ति, अनुरक्त, अनुरागिन्; 'd to the king' राजनिष्ठ, नृपासक्तचित्त; 'a d. wife' एकपत्नी, पतिव्रता, साध्वी, सती, 'a d. husband' भार्यानिरतः, पत्नीसेविन् *m*. 'a d. friend' स्थिरप्रेम मित्रं, दृढसखः सुहृद् **-edly,** *adv*. चित्तकाग्रतया, भक्त्या, निष्ठया, अभिनिवेशं, मनोभिनिवेशेन, मनोयोगेन, सुसमाहितं. **-edness,** *s* आसक्ति *f*., भक्ति *f*., अभिनिवेशः, परायणता. **-ee,** *s*. तापसः, यतिः, योगिन् *m*., तपस्विन् *m*., मुनिः, व्रतिन् *m*. **2** भक्तजनः, प्रणयिजनः, उपासकः, भक्तः. **-ion,** *s*. अभियोगः, अभिनिवेशः, अनुरागः,

सेवा, उपासना, प्रसक्ति *f.*, आसक्ति *f.*' भक्तिः, निरति *f.*, परायणता. 2 नियमः, धर्मक्रिया, तपस् *n.* ईश्वरभक्ति *f.* सेवा ; 'self-d.' आत्मोत्सर्गः-परित्यागः; 'd. to a husband' पातिव्रत्यं, पतिसेवा; 'to perform d. s' तपश्चर् 1 P or तप् 4 A, तपस्यति (D.). **-ional,** *a.* धर्मपर. धर्मनिष्ठ, भजनशील. 2 धर्मक्रियाविषयक, तपोमय (यी *f.*).

Devour, *v. t.* भक्ष् 10, अद् 2 P, खाद् 1 P, ग्रस् 1 A, गृ 6 P. 2 उपयुज् 10, उपयोगेन विनश् c. **-er,** *s.* भक्षकः, खादकः.

Devout, *a.* धार्मिक, धर्म-परायणशील, धर्मनिष्ठ, धर्मात्मन्, भक्त, ईश्वरनिरत, पुण्यशील, प्रयत त्मन्, पुण्यात्मन्. **-ly,** *adv.* भक्त्या, भक्तिपूर्वकं, भक्तिपुरःसरं, श्रद्धान्वितं. **-ness,** *s.* धार्मिकता, धर्मात्मता, ईश्वरनिष्ठता, भक्ति *f.*

Dew, *s.* नीहारः, अवश्यायः, तुषारः, प्रालेयं, हिम-रात्रि-ख-जलं. **-***v. t.* नीहारेण सिच् 6 P or प्रोक्ष् 1 P; 'd. drop' तुषारकणः-बिंदुः-शीकरः, and sim. comps. **-y,** *a.* तुषारमय (यी *f.*), अवश्यायावसिक्त; तुषारकणोपम.

Dexterous, *a.* कुशल, निपुण, पटु, दक्ष, लघुहस्त, करदक्ष. **-ly,** *adv.* निपुणं, दक्षतया, सपाटवं, हस्तलाघवेन. **-Dexterity,** *s.* दक्षता, पटुता, नैपुण्यं, हस्तकौशलं, हस्तलाघवं.

Dextral, *a.* दक्षिण, अपसव्य, दक्षिणपार्श्वस्थ.

Diabetes, *s.* मधुमेहः, प्रमेहः, बहुमूत्ररोगः.

Diabolical, *a.* पैशाच (ची *f.*), पिशाचोपम. 2 घोर, दारुण, पापिष्ठ, अतिघोर-पाप, अतिनिंद्य.

Diacoustics, *s.* स्वनिविद्या.

Diadem, *s.* मुकुटं, किरीटः-टं, मौलिः, उष्णीषः-षं, शिरोवेष्टनं, 'd. ed' किरीटिन्, किरीटधारिन्.

Diagnosis, *s.* रोगनिर्णयः-निरूपणं, रोगनिदानं, मीमांसा, चिकित्सा.

Diagnostic, *s.* रोगलक्षणं-चिह्नं.

Diagonal, *s.* कर्णः, श्रुति *f.* **-ly,** *adv.* कोणाकोणि, कर्णाकर्णि.

Diagram, *s.* चित्रं.

Dial, *s.* शंकुयंत्रं, सूर्यघटी.

Dialect, *s.* प्राकृतभाषा, भाषा (as opposed to संस्कृत). 2 भाषणं, वचनं, उक्ति. *f.*

Dialectic, *s.* तर्कः, न्यायः, हेतुविद्या, आन्वीक्षिकी विद्या. **-al,** *a.* तार्किक (की *f.*), न्यायिन्. **-ian,** *s.* तार्किकः, नैयायिकः, न्यायविद् *m.*

Dialogue, *s.* संलापः, संवादः, संकथा, संभाषणं, प्रश्नोत्तरं, कथोपकथनं. **-Dialogist,** *s.* संवादकः, उत्तरप्रत्युत्तरदायकः.

Diameter, *s.* व्यासः, विष्कंभः. **-Diametrically,** *adv.* विपरीतं, प्रतिकूलं, अत्यंतं, एकांततः.

Diamond, *s.* वज्रः-ज्रं, हीरं, हीरकः ; 'd. cutter' हीरकारः-मार्जकः

Diapason, *s.* स्वराष्टकं, स्वरग्रामः.

Diaper, *s.* चित्रितं क्षौमं. **-***v. i.* क्षौमं चित्र् 10 or कर्बुरीकृ, &c.

Diaphanic, *a.* स्वच्छ, विशद; *See* **Clear.**

Diaphoretic, *a.* स्वेदन (नी *f.*), स्वेदजनक, घर्मोत्पादक; 'd. medicine' स्वेदनं.

Diaphragm, *s.* शरीरमध्यदेशः.

Diarrhœa, *a.* अतिसारः, प्रवाहिका; ग्रहणी-, रुज् *f.*

Diary, *s.* दिनपत्रिका, दैनिकवृत्तपुस्तकं.

Diatribe, *s.* अधिक्षेपः, कुत्सात्मको लेखः.

Dibble, *s.* लघुखनित्रं.

Dice, *s.* plural of **Die,** *s.* q. v.

Dictate, *v. t.* आज्ञापूर्वकं कथ् 10. आदिश् 6 P, आज्ञा c. (ज्ञापयति). 2 सूच् 10, प्रोत्सह् c., प्रचुद् 10, प्रेर् c. ; 'd. ed by good motives' सदाशयप्रेरित. **-***s.* आज्ञा, आदेशः, शासनं. 2 चोदनं-ना, प्रेरणं-णा. **-ion,** प्रोत्साहनं. 2 आज्ञापनं, आज्ञापूर्वकं कथनं. **-or,** *s.* एकाधिपतिः, अनन्याधीनः शास्ता, अनियंत्रणः प्रभुः. 2 आदेशकः, शासितृ *m.* **-orial,** *a.* अवलिप्त; *See* **Arrogant.**

Diction, *s.* भाषा, वाणी, वाक्सरणि *f.*, वचोविन्यासः.

Dictionary, *s.* कोशः-षः, शब्दसंग्रहः; अभिधानं.

Dictum, *s.* वचनं, आदेशः, विधिः, नियमः.

Didactic,-al, *a.* उपदेशपर, प्रबोधक.

Die, *s.* अक्षः, पाशकः, देवनः; 'a loaded d.' कूटाक्षः. **-Dice,** (pl.) अक्षाः, &c. **-***v. i.* अक्षैः दिव् 4 P, ग्लह् 1 P. **-er,** *s.* अक्षधूर्तः, अक्षदेविन् *m.*, धूर्तः, कितवः. **-ing,** *s.* द्यूतं, अक्षक्रीडा; 'd. board' अष्टापदं, शारिफलं; 'd. box' अक्षाधारः; 'the die is cast' कृतं दैवाधीनं (अप्रतिविधेयं) कर्म, अधुना यद्भावि तद्भवतु.

Die, *v. i.* मृ 6 A, प्राणान्-असून्-जीवितं त्यज् 1 P or उत्सृज् 6 P or हा 3 P, पंचत्वं या 2 P or गम् 1 P, उपरम् 1 P; परासु-गतासु-*a.* भू 1 P, देहं-तनुं त्यज्, प्र-इ 2 P, विपद् 4 A, संस्था 1 A, प्रमी pass. 2 विनश् 4 P, प्रली 4 A, ध्वंस् 1 A क्षि pass., अवसद् 1 P. 3 म्लै 1 P, विद्रा pass. **-Dead,** *a.* मृत, उपरत, संस्थित, प्रेत, पंचत, परासु, गतासु, विपन्न, गतप्राण, विचेतन. प्राणहीन, प्रमीत. 2 निश्चल, निश्चेष्ट, जड, निस्तेजस्, निःसत्व, असार, निष्फल. 3 सुप्त, स्तब्ध (as of limbs); 'd. body' शवं, मृतशरीरं; कुणपः. 'd. language' अप्रचलिता भाषा; 'd. sleep' घोर-गाढ-निद्रा; 'd. loss' परिपूर्णा-सकला हानिः; 'd. letter' लुप्तार्थं वचनं, 'd. soul' निरभिमानः आत्मा. **-***s.* (Of night) मध्यरात्रः, निशीथः, अर्धरात्रः. 2 मध्यं; *See* **Depth.** **-en,** *v. t.* दुर्बलीकृ. 8 U, शिथिलीकृ, तेजो हृ 1 P, नश् c.,

म्लानीभू. -*v. i.* म्लै 1 P, शिथिलीभू. **-ly,** *a.* प्राणापहारक, जीवितापह, मारात्मक, निधनकारिन्, प्राणांतक, प्राणहारिन्, प्राणनाशक, जीवितघ्न (घ्नी *f.*). **2** अशाम्य; 'd. enmity' आमरणांतिकं वैरं, अशाम्यं वैरं; 'd. poison' हाला(ल)हलं विषं. -*adv.* मृतवत्, प्राणांतिकं; 'd. wounded' भिन्नमर्मन्; 'd. pale' प्रेतसवर्ण. **-ness,** *s.* दौर्बल्यं, निःसत्वता, जडत्वं, स्तंभः; वैकल्यं, विरक्ति, *f.*, शिथिलता.

-Death, *s.* मरणं, मृत्युः, उपरमः, निधनः-नं, अंतः, पंचत्वं-ता, संस्थिति *f.*, कालधर्मः, दिष्टांतः, प्रलयः, अत्ययः, नाशः, प्राणनाशः, तनुत्यागः, &c. **2** यमः, कालः, कृतांतः. **3** वधः, घातः, व्यापादनं; 'he was pelted to d.' सलोष्टघातं हतः; 'he was sentenced to d.' तस्य प्राणदंड आदिष्टः; 'to put to d.' हन् 2 P, व्यापद् c., वधं आदिश् 6 P; 'a violent d.' अपमृत्युः; अपघातः; 'angel of d.' यमदूतः; 'd. by fasting' प्रायः, प्रायोपवेशनं; 'd. bed' मृत्युशय्या. **-less,** *a.* अमर, अनश्वर, अमर्त्य, चिरस्थायिन्.

Diet, *s.* आहारः, अन्नं, भोजनं, भक्ष्यं. **2** पथ्यं, पथ्याशनं, पथ्याशित्वं. **3** राजसभा, शिष्टसभा. -*v. t.* पु c., भृ 3 U. **2** पथ्यं निर्दिश् 6 P.

Differ, *v. i.* भिद् pass., प्र-वि-°; विशिष् pass., (न कारणात्स्वाद्बिभिदे कुमारः R. v. 35); gen. ex. by (*s.*); 'they two do not d.' न तयोर्भेदः, विशेषः, &c. **2** अन्यथा मन् 4 A, न संमन्, विवद् 1 A, भिन्नमत *a.* भू, विप्रतिपद् 4 A, (एवं हि विप्रतिपन्नाः प्राणेभ्यत्तां प्रति श्रुतयः S. B. 702); 'I d. from you' मम मतं त्वन्मताद्भिन्नं. **3** विमति-कृ pass. **-ence,** *s.* भेदः, विशेषः, अंतरं, (with gen.). **2** पार्थक्यं, इतरत्वं, भिन्नत्वं, व्यतिरेकः; 'that makes no d.' तेन न कोपि विशेषो जायते. **3** विरोधः, वैपरीत्यं, विपर्ययः, वैलक्षण्यं. **4** विप्रतिपत्ति *f.*, मतिभेदः, विसंवादः, वैमत्यं; कलिः, कलहः, विवादः. **5** असाम्यं, असादृश्यं; 'd. in quantity' वैषम्यं. **-ent,** *a.* भिन्न, वि-प्र-भिन्न, इतर-अन्य-पर-*pron. a.*, व्यतिरिक्त, विपरीत, पृथक्, विशिष्ट, (with abl.); अंतर in comp.; 'she is not d. from my body (myself)' अव्यतिरिक्तेयमस्मच्छरीरात् (Ka. 151); 'a d. sense' अर्थांतरं. **2** असदृश (शी *f.*), असमान, विषम, असम. **3** विविध, नानाप्रकार, नाना in comp.; तत्तत् *pron. a.*, 'd. S'âstras' तानि तानि शास्त्राणि; 'in a d. way' अन्यथा, भिन्नप्रकारेण. **-ential,** *a.* भेदकर (री *f.*), विशेषक. **-ently,** *adv.* अन्यथा, इतरथा, भिन्नरूपेण; अन्यप्रकारेण, पृथक्.

Difficult *a.* असुकर, दुष्कर, कठिन, दुष्कर, दुःसाध्य, कष्ट. **2** गहन, विषम, दुर्बोध, असुगम, कष्टक्षेप गूढार्थ, दुर्ज्ञेय. **3** (With inf.) ex. by दुर्, दुः, कष्ट, in comp.; 'd. to get दुष्प्राप, दुराप, कष्टसाध्य; दुरारोह, दुःखभेद्य, &c.; 'a d. case' सशल्ययोगः; 'a d. road' दुर्गसंचा(च)रः, संक्रमः; 'a d. place' विषमस्थानं, दुर्गं, दुर्गमस्थलं. **-ly,** *adv.* दुःखेन, कष्टेन, कृच्छ्रेण, कष्टं, आयासेन, दुर्, pr. **-y,** *s.* असौकर्यं, वैषम्यं, काठिन्यता, दुष्करत्वं, कष्टता, दुःसाध्यता. **2** आयासः, वैक्लव्यं, विरोधः. **3** कृच्छ्रं, संकटं, विघ्नः, आयासः, दुर्गं, दुःखं, विरोधः, क्लेशः, बाधा, कष्टः-ष्टं. **4** विषमपदं, असुबोधं-दुर्बोधं पदं, असुगमं स्थानं; 'without d.' अनायासेन, सुखं; 'with d.' कथमपि, कथं कथमपि, कथंचित्, दुःखेन, कृच्छ्रेण; 'a commentary explaining the d. es' विषमपदविमर्शिनी टीका; 'beset with d. es' सशल्य, सकंटक; 'overcoming d. es' दुर्गलंघन.

Diffidence, *s.* अविश्वासः, अप्रत्ययः, आ-, शंका. **2** (In oneself) अप्रगल्भता, विनयः, ह्रीः, लज्जा. **-Diffident,** *a.* अविश्वासिन्, शंकाशील, अप्रत्यय, साशंक; 'the mind feels d. of itself' आत्मन्यप्रत्ययं चेतः (S. 1). **2** अप्रगल्भ, अधृष्ट, विनीत, ह्रीमत्, लज्जावत्. **-ly,** *adv.* अप्रगल्भं, साशंकं, लज्जया, सविनयं.

Diffract, *v. t.* वियुज् 7 A, 10, विभिद् c.

Diffuse, *v. t.* प्रसृ c., वि-परि-स्तृ c., विसृप् c., प्रचर् c. विकॄ 6 P, तन् 8 U, अभि-प्र-वृध् c. **2** प्र-श्रु c., विद् c., प्रक्षिप् P. **3** (Itself) व्याप् 5 P, विसृ-विसृप् 1 P, विस्तॄ pass., व्यश् 5 A, सर्वत्र गम् 1 P. or प्रविश् 6 P. -*a.* वितत, सविस्तर, विस्तृत, असंक्षिप्त, विस्तीर्ण, सप्रपंच. **-ly,** *adv.* सविस्तरं, विस्तरेण, विस्तरशः, प्रपंचेन, असंक्षेपतः, असमासेन. **-ion,** *s.* प्रसारः, प्र-वि-सरः, विस्तारः, अभिवृद्धि *f.*, वितति *f.*, प्रचारणं, प्रसरणं. **-ive,** *a.* वि-प्र-सारिन्, व्यापक, व्यापिन्, प्रसरणशील. **-iveness,** *s.* विस्तारः, विस्तृति *f.*, व्यापकत्वं. **2** वाग्विस्तारः, प्रपंचः, वाक्यविस्तरः.

Dig, *v. t.* खन् 1 P; 'd. down' (भूमिं) अवदॄ 10, भिद् 7 U; 'd. in' निखन्. **2** निर्भिद्, छिद् 10, व्यध् 4 P. **-ger,** *s.* खनकः, खनितृ *m.*

Digest, *v. t.* (जठरे) जॄ c. (जरयति), पच् 1 P, परिपाकं नी 1 P, परिणम् c. (णमयति), वृह् 1 P, **2** क्रमेण-यथाक्रमं-विन्यस् 4 U or रच् 10 or ग्रंथ् 9 P or लिख् 6 P. **3** मनसा विचर् c. or चिंत् 10. **4** suffer, q. v. -*v. i.* जॄ 4 P, पच् pass., परिणम् 1 P. **-er,** *s.* पाचकं, जारणं, अग्निवर्धनं, रोचनं, रोचकं. **-ion,** *s.* पाकः; वि-परि-पाकः, पचनं, परिणामः. **2** जठराग्निः, जठरानलः, अग्निः; 'slowness of d.' अग्निमांद्यं; 'having a

good d. ' प्रदीप्ताग्निः. -ive, *a.* पाचन (नी *f.*), पाचक, अग्निवर्धक, परिपाकिन्.

Dight, *See* **Adorn.**

Digit, *s.* कला, लेखा, रेखा. 2 अंकः.

Dignity, *s.* महिमन् *m.*, माहात्म्यं, औदार्यं. 2 अनुभावः, प्रतापः, तेजस् *n.*, प्रौढि *f.*, प्रौढत्वं-ता. 3 प्रतिष्ठा, गौरवं, पदं, उत्कृष्ट-परमपदं, उत्कर्षः, उन्नति *f.*, आभिजात्यं, प्रतिपत्ति *f.*, ओजस्विता, उन्नत्वं, कुलीनता; ' d. of style ' ओजस् *n.* 4 मानः, अभिमानः, गर्वः, दर्पः; ' d. of expression ' प्रौढत्वं वचसां. **-Dignify,** *v. t.* संमन् c., सत्कृ 8 U, पूज् 10. 2 उत्कृष्टपदे नियुज् 7 A, 10, परमपदं प्रा पृ c., उत्कर्षं नी 1 P. **-ed,** *a.* महानुभाव, अनुभाववत्, ग(गं)भीर, ओजस्विन्, प्रौढ, महाप्रताप; ' d. in mien ' गंभीराकृति. 2 मानिन्, महाशय, महेच्छ. 3 उत्कृष्टपदनियुक्त, प्रतिपत्तिमत्, परमपदारूढ. **-Dignitary,** *s.* मान्यजनः, शिष्टजनः, कुलीनपुरुषः.

Digress, *v. i.* प्रस्तुतं न अनुसंधा 3 U, अप्रस्तुतं वद्-भण् 1 P or वच् 2 P, प्रकृतं-कथायोगं त्यज् 1 P; ' you are d. ing ' न त्वया प्रस्तुतमनुसंधीयते. 2 उत्क्रम् 1 U, 4 P, विचल् 1 P, प्रच्यु 1 A, भ्रंश् 1 A, 4 P; *See* **Deviate. -ion,** *s.* प्रकृतत्यागः, अप्रस्तुतानुसंधानं; प्रसंगः, प्रासंगिकं वचनं; ' enough of d. ' अलं प्रासंगिकेन or प्रसंगेन, प्रकृतमेवानुसंधीयतां. 2 उत्क्रमः, विचलनं, भ्रंशः, च्युति *f.*, त्यागः. **-ive,** *a.* अनन्वित, अप्रस्तुत, अप्रकृत, असंगत, असंबद्ध.

Dike, *s.* सेतुः, सेतुबंधः, पिंडलः, धरणः, कूलकः-कं. 2 कुल्या, परिखा, खातं, प्रणालः-ली.

Dilacerate, *See* **Tear.**

Dilapidate, *v. i.* जॄ 4 P, विनश् 4 P, क्षि-उच्छिद्-pass., अवसद् 1 P. *-v. t.* उच्छिद् 7 P, अवसद् c., प्रध्वंस् c., क्षि c., विनश् c.; *See* **Destroy. -ion,** *s.* क्षयः, ध्वंसः, नाशः, उच्छेदः, अवसादः.

Dilate, *v. t.* विस्तॄ c., वितन् 8 U, प्र-वि-सृ c., दीर्घाकृ 8 U. 2 (upon) प्रपंचयति (D.), सविस्तरं विवृ 5 U, or व्याचक्ष् 2 A, अति-विवृ. *-v. i.* वितन्-विस्तॄ-विवृ pass., आयतीभू, दीर्घीभू. **-ed,** *a.* वितत, व्यायत; उत्फुल्ल, विकासित. **-ion,** *s.* विस्तारः, वितति *f.*, विस्तरणं, विवृति *f.*; विकासः-सनं. उत्फुल्लता.

Dilatory, *a.* दीर्घसूत्रिन्, दीर्घसूत्र, विलंबिन्, मंद, मंथर, चिरक्रिय, अक्षिप्रकारिन्. **-ly,** *adv.* सविलंबं, मंदंमंदं, कालक्षेपेण. **-ness,** *s.* दीर्घसूत्रता, विलंबः, कालक्षेपः, मांद्यं, कार्यजडता.

Dilemma, *s.* उभयसंभवः, विकल्पः.

Diligent, *a.* उद्योगिन्, व्यवसायिन्, उद्युक्त, सोद्योग, उद्यमिन्, अनलस, अभिनिविष्ट, उद्यम-व्यवसाय-पर, उद्योगतत्पर. 2 (of things), अनवरत, सतत, नित्यप्रवृत्त, प्र-आ-सक्त, अभ्यस्त, प्रसित, अविच्छिन्न. **-ly,** *adv.* प्रयत्नतः, सोद्योगं, सोद्यमं; अनवरतं, प्रसक्तं. **-Diligence,** *s.* उद्यमः, अध्यव-व्यवसायः, उद्योगः, अभियोगः, अभिनिवेशः, प्रयत्नः, अभ्यासः, प्रसक्ति *f.*, उत्साहः. 2 सातत्यं, अविच्छेदः, अविरामः, नैरंतर्यं.

Dill, *s.* सालेयः, मधुरिका.

Dilute, *v. t.* जलेन मिश्र् 10, or संसृज् 6 P, विली c., तनूकृ 8 U, क्षीणीकृ; मिश्रणेन शक्तिं तनूकृ. **-ion,** *s.* जलसंसर्गः, जलमिश्रणं; तनूकरणं. **-Diluent,** *s.* विलयनं, तनूकरणं.

Dim, *a.* मंदद्युति, मंदप्रभ, मलिनकांति, मलिन, निष्प्रभ, निस्तेजस्, सतिमिर. 2 अप्रकाश, अव्यक्त, अस्पष्ट, दुरालोक, दुर्दृश; ' seeing d.-ly ' हतदृष्टि, अस्पष्टदृश्; ' of d. understanding ' मंदमति, जड-स्थूल-धी-बुद्धि, &c. *-v. t.* अंधीकृ 8 U, अस्पष्टीकृ, कलुषीकृ, निष्प्रभीकृ, मलिनयति (D.). **-ly,** *adv.* अस्पष्टं, अव्यक्तं, निष्प्रभं, मलिनं. **-ness** *s.* तिमिरं, अस्पष्टता, तेजोहानि *f.*, दुरालोकता, मालिन्यं, अस्पष्टता. 2 स्थूलमतिता, बुद्धिमांद्यं.

Dimension, *s.* प्रमाणं, परिमाणं, मात्रा, मानं, विस्तारः.

Diminish, *v. t., v. i. See* **Decrease. -Diminution,** *s.* न्यूनीकरणं, ह्रासः, क्षयः, अपचयः, अवसादः, हानि *f.* **-Diminutive,** *a.* अल्पकाय, क्षुद्र, अल्प, स्तोक, सूक्ष्म, लघु. 2 अल्पार्थ (प्रत्ययः); 'कन् is a d. termination' अल्पार्थे कन्.

Dimity, *s.* दृढं कार्पासवस्त्रं.

Dimple, *s.* कपोलभंगः, गंडतरंगः; कपोलोर्मि *f.* ऊर्मि *f.*, भंगुरता, दंतुरता, भंगः, तरंगः. **-Dimply,** *a.* भंगुर, ऊर्मिमत्, दंतुर.

Din, *s.* कलकलः, निनादः, कोलाहलः, तुमुलरवः, निःस्वनः, उच्चघोषः, तुमुलः. *-v. t.* (श्रवणपुटं) जर्जरीकृ 8 U, कर्णौ उपहन् 2 P or जर्जरयति (D.); *See* **Stun.**

Dine, *v. i.* भुज् 7 A, आहारं-भोजनं सेव् 1 A, or निर्वृत् c., शरीरस्थितिं कृ 8 U or कल्पृ c. *-v. t.* भुज् c., अश् c. **-Dinner,** *s.* भोजनं, आहारः, अशनं; *See* **Food.** 2 उत्सवः, जग्धि *f.*, भोजनोत्सवः.

Ding, *v. t.* झङ्कृयते (D.), नद्-स्वन्-क्वण् 1 P; 'ding dong' घंटानादः-शब्दः; किंकिणीरवः-शब्दः-नादः, सततनादः.

Dingle, *See* **Dale.**

Dingy, *See* **Black.**

Dint, *s.* प्रहारः, आघातः, अभिघातः. 2 बलं, प्रभावः, सामर्थ्यं; ' by d. of ' बलेन, प्रभावेण, सामर्थ्यात्, योगेन. *-v. t.* प्रहारेण अंक् 10 or चिह्न् 10.

Diocesan, *s.* प्रधानधर्माध्यक्षः.

Diorthesis, *s.* वक्राङ्गचिकित्सा.

Dip, *v. i.* नि-,मस्ज् 6 P (with loc.); अव-वि-गाह् 1 A, प्र-नि-विश् 6 P, आप्लु 1 A, (acc.). 2 व्यापृ 6 A, व्यापृत *a.* भू. -*v. t.* अवगाह् c., मस्ज् c. (मज्जयति), प्रवेश् c. 2 सिच् 6 P, क्लिद् c., आर्द्रीकृ 8 U; 'd. in a business' इषत् व्यापृ or प्रवृत् 1 A; 'd. into books' क्षुर् 1 P; अल्पशः अधि-इ 2 A. -*s.* निमज्जनं, अवगाहः, प्रवेशः. 2 अवपातः, नम्रता, आनति *f*.

Diphtheria, *s.* मांसतंतानिका.

Diphthong, *s.* स्वरद्वयं, संयुक्तस्वरः, संध्यक्षरं.

Diploma, *s.* पदवी अधिकार-दायकं पत्रं

Diplomacy, *s.* सामन् *n.*, नीति *f.*, दौत्यकर्मन् *n.* 2 राजदूतमंडलं-समूहः. -**Diplomatical**, *a.* दूतकार्यविषय. -**Diplomatist**, *s.* सामप्रयोगज्ञः, राजनीतिकुशलः, दौत्यकार्यनिपुणः, सामकुशलः

Dipsomania, *s.* मद्यासक्ति *f*.

Dire,-ful, *a.* दारुण, घोर, उग्र, तीव्र. 2 भीषण, क्रूर, भयानक, रौद्र. -**ness**, *s.* दारुणत्वं, घोरता, रौद्रता.

Direct, *v. t.* संधा 3 U, लक्ष्यीकृ 8 U, उद्दिश् 6 P, प्रेर् c., अधिकृत्य क्षिप् 6 P, (a missile &c.); 'd. attention or mind' मनो नियुज् 7 A, 10, मनः समाधा or बंध् 9 P or आसंज् c. or निक्षिप्. 2 शास् 2 P, विनियम् 1 P, प्रणी 1 P, निबंध् c., अधिष्ठा 1 P, अवेक्ष् 1 A. 3 आ-निर्-उप-दिश्, प्रदृश् c. 4 नियुज्, आदिश्, आज्ञा c. (ज्ञापयति), प्रचुद् 10. 5 विधा 3 U, प्र-युज्. 6 (A letter &c.) *See* **Address.** -*a.* ऋजु, अवक्र, सरल, अकुटिल, अविलोम, अजिह्म, अनुलोम; 'd. descendants' अनुलोमाः, अनुलोमवंशजाः 2 क्रमागत, अविप्रकृष्ट. 3 व्यक्त, स्पष्ट, सुस्पष्ट-व्यक्त, प्रत्यक्ष, साक्षात् *ind.* -**ion**, *s.* शासनं, नियोगः, निर्देशः, आज्ञा, आदेशः. 2 संधानं, उद्देशः, प्रेरणं. 3 प्रणयनं, प्रशासनं, विनियमनं, अधिष्ठातृत्वं, अधिष्ठानं, अवेक्षा-क्षणं. 4 दिश् *f.*, दिशा, आशा, काष्ठा, ककुभ् *f.*, हरित् *f.* 5 Address q. v. -**ive**, *a.* निर्देशक, सूचक. -**ly**, *adv.* सपद्येव, सद्यः, अचिरात्, तत्क्षणं-णात्, अविलंबितं, शीघ्रं, आशु. 2 स्पष्टं, प्रत्यक्षं, सुव्यक्तं, अगूढतया, भिन्नार्थं. 3 अनुलोमं, सरलतया. -**or**, *s.* शासितृ-अधिष्ठातृ *m.*, अनुशासकः, अध्यक्षः, अधिकारिन् *m.*, अवेक्षकः, निर्वाहकः. -**ory**, *s.* विधिसंहिता. 2 नामधामसूचकं पुस्तकं.

Direption, *s.* अपहरणं, अपहारः, लुंठनं.

Dirge, *s.* करुणगीतं, करुणरससंगीतं.

Dirigible, *a.* नियम्य.

Dirigle, *s. See* **Baloon.**

Dirk. *See* **Dagger.**

Dirt, *s.* मलः-लं, पंकः, कर्दमः, जंबालः-लं, कल्कं, किट्टं. -**y**, *a.* मलिन, समल, मलीमस, पंकिल, कलुष, आविल, मलदूषित, सकर्दम. 2 नीच, कुत्सित, खल, गर्ह्य. -*v. t.* मलेन-पंकेन-दुष् c. (दूषयति) or लिप् 6 P. मलिनीकृ 8 U, मलिनयति-आविलयति (D.).

Diruption, *See* **Eruption.**

Disable, *v. t.* अनुपयुक्त *a.* कृ 8 U, विहस्तीकृ, (रुजा विहस्तचरणां दृष्ट्वा M. 4); अशक्त-असमर्थ *a.* कृ. 2 अपमृद् c., विकलीकृ, उपहन् 2 P, दुर्बलीकृ. -**Disability**, *s.* अशक्ति *f.*, असामर्थ्यं, अक्षमता, अयोग्यता; अनुपयोगः.

Disabuse, *v. t.* भ्रमं निरस् 4 U or उच्छिद् 7 P or अपनी 1 P, or हृ 1 P or अपाकृ 8 U, भ्रांतिमुद् 6 P.

Disaccustom, *v. t.* अभ्यासं लुप् c.

Disadvantage, *s.* अहितं, अलाभः, अपकारः, अनर्थः, अनिष्टं, अपायः, हानि *f.*, पीडा, बाधा; 'at a d.' विषमावस्थ *a.*, असमवस्थ *a.* -**ous**, *a.* अहितकर (री *f.*), प्रतिकूल, अहित, अनुपकारक, विरोधिन्, अपायावह, क्षतिकारक. -**ously**, *adv.* अहितं, अनिष्टं, सापकारं.

Disaffect, *v. t.* विरंज् c., अपरागं उत्पद् c., उपजप् 1 P. -**ed**, *a.* वि अप-रक्त, विप्रिय, असंतुष्ट, अप्रीत, अननुरक्त. -**ion**, *s.* विरागः, असंतोषः, विरक्ति *f.*, अभक्ति *f.*

Disaffirmance, *s.* प्रत्याख्यानं, प्रत्यादेशः, प्रत्यावर्तनं.

Doubt, *v. i.* आ-वि-शंक् 1 A, विकृप् 1 A, संदिह् 2 U, संशी 2 A, विचर् c., मनसा दोलायते (D.). -*v. t.* न विश्वस् or न प्रति-इ 2 P, आशंक्. -*s.* संशयः, संशीति *f*, संदेहः, शंका, वितर्कः, आशंका, विकल्पः; 'my mind is still in d.' मनस्तु मे संशयमेव गाहते; 'without any d.', 'undoubtedly' असंदेहं, असंशयं, निराशंकं, निःसंशयं, संदेहं विना; अत्र कः संदेहः (in replies). 2 अस्थैर्यं, अनिर्णयः, आंदोलनं, चित्तविभ्रमः. 3 शंका, अविश्वासः, अप्रत्ययः. 4 कृच्छ्रं, विषमं, बाधा, शल्यं, विषमपदं; 'case of d.' संदेहपदं; 'in d.' सशंक-संदेहान्वित-दोलायमान- *a.* **-ful,** *a.* संदिग्ध, शंकनीय, साशंक, शंकान्वित, संशयापन्न, ससंशय; सशयित, संदेहाकुल, संशयावृत, विकल्प्य; संदेहपदं, शंकास्थानं. 2 संदिग्धार्थ, अस्पष्ट; 'to make d.' संदिह् c. **-fully, -ingly,** *adv.* ससंदेहं, साशंकं, सविकल्पं. **-less,** *a.* निराशंक, निःसंदेह, असंशय. -*adv.*, **-lessly,** निःसंशयं, असंशयं, विना संदेहेन, निःशंकं.

Douceur, *s.* पारितोषिकं, उपायनं, उत्कोचः. 2 सौजन्यं, सुशीलता, सद्भावः.

Dough, *s.* गुंडिका, जलसंसृष्टः सक्तवः.

Doughty, *a.* शूर, वीर; *See* **Brave.**

Dour, *a.* दुर्दम, प्रतीप, कठिन.

Douse, *v. t.* जले निमस्ज् c. (मज्जयति). 2 निर्वा c. (वापयति).

Dove, *s.* कपोतः, पारावतः, कलरवः; 'female d.' कपोतिका; 'd.-cot or house' कपोतपालिका, विटंकः-कं; 'd. tail' काष्ठसंधिः, दारुसीवनं.

Dowager, *s.* विधवा, गतभर्तृका.

Dowdy, *s.* विस्रपिणी; दुर्वसना.

Dower, Dowry, *s.* शुल्कं, यौतकं, युतकं, वाहनिकं; स्त्रीधनं. **-ed,** *a.* यौतकवती, शुल्किनी. **-less,** *a.* यौतक-शुल्क-हीन.

Dowlas, *s.* स्थूलवस्त्रं, स्थूलपटं.

Down, *s.* कोमलरोमन् *n.* 2 तूलं, कोमलपक्षः; 'd. of goose' हंसतूलं; तृणलोमन् *n.* (of plants). 3 निर्जनपर्वतः. 4 निम्नं, निम्नप्रदेशः; the road having ups and d. s' नतोन्नतभूमिभागो मार्गः; 'ups and d. s' पातोत्पाताः; 'there are ups and d. s in our condition (in life) as in the course of the wheel' नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण (Me. 112). -*prep.* अधः, अधस्तात् (with gen.); gen. ex. by अनु in comp.; 'd. the current' अनुस्रोतं; 'd to' यावत् (with acc.), पर्यंतं in comp.; 'd. to the present day' अद्य यावत्. -*adv.* अधः, अधस्तात्, नीचैः, नीचे; gen. ex. by अव-नि-अधः pr. to roots, 'bent d' अवनत, नीचैः प्रणत; 'to come d.' अव-नि-पत् 1 P; 'd. with the tyrant' निपात्यतां-उच्छेद्यतां-असौ प्रजापीडकः; 'd. cast' अधोमुख (खी *f.*), अवनतदृष्टि, विषण्ण, अधोदृष्टि, दीनवदन, म्लान, खिन्न; 'd.-fall' विनि-अप-पातः, विनाशः, क्षयः, उच्छेदः, विध्वंसः, लयः; 'd.-hearted' खिन्न-दीन-चेतस्, म्लान, विषण्ण; 'd-hill' प्रवणभूमि *f.*, उपत्यका; 'd. lying' प्रासप्रसवकाला; (*s.*) शयनसमयः; 'd.-right' अवक्र, अकुटिल, स्पष्ट, सुव्यक्त, असंदिग्ध, प्रत्यक्ष; (*adv.*) अवक्रं, अकुटिलं, सरलं, अशेषतः; व्यक्तं, प्रत्यक्षं, सुस्पष्टं, भिन्नार्थं, सर्वतः, साकल्येन, सु-अति pr. **-ward,** *a.* प्रवण, पतनशील, अधस्तन (नी *f.*). अधोगामिन्, पतयालु, पातुक. -*adv* (downwards) अव pr., अधः, अवाक्, अधस्तात्. **-y,** *a.* मृदुलोमवत्. 2 मृदु, कोमल, सुकुमार, सुखस्पर्श.

Dowse, *s.* चपेटिका, तलप्रहारः. चपेटाघातः. -*v. t.* **Dip,** q. v.

Doxology, *s.* ईश-स्तुति *f* -स्तवनं.

Doyne, *s.* गुरुजनः, ज्येष्ठः, श्रेष्ठः, नेतृ *m.*, धुरीणः.

Doze, *v. i.* निद्रा 2 P, स्वप् 2 P. **-ing, -y,** *a.* निद्रालस, निद्राशील.

Dozen, *a.*, *s.* द्वादशन्, द्वादशसंख्याक.

Drab, *a.* कपिश, कपिल. -*s.* कपिशवस्त्रं. 2 कुलटा, बंधकी, व्यभिचारिणी, पुंश्चली.

Drabble, *v. t.* पंकेन लिप् 6 P or दिह् 2 U.

Draff, *s.* उच्छिष्टं, शेषं, भुक्तावशेषं, मलं, किट्टं. **-ish, -y,** *a.* मलिन, असार, फल्गु.

Draft, *v. t.* लिख् 6 P. -*s.* *See* **Draught 2, 3, 4.**

Drag, *v. t.* आकृष् 1 P, हृ 1 P: 'd. away, off' अप-अव-कृष्; 'd. out' निष्कृष्, निर्हृ, उत्पट् 10; 'd. s on his life' कथमपि-कृच्छ्रेण-प्राणधारणां करोति, जीवितमतिवाहयति. -*v. i.* कृष् pass. 2 विलंब् 1 A, चिर-(रा)यति (D.). -*s.* रथः, चक्रयानं, कोलिरथः. 2 आकर्षणी; 'd.-net' आकर्षकजालं-पाशः.

Draggle, *v. i.* पंके लुट् c. pass. लोठ्यमानत्वाद् मलिनीभू 1 P. -*v. t.* पंकेन लुठ् (लुठयति); 'd. tail' (*a.*) मलिनवसन, अपरिष्कृत.

Dragon, *s.* नागः, व्यालः, पन्नगः, सपक्षो नागः.

Dragoon, *s.* अश्वारोहः, सादिन् *m.*

Drain, *s.* निर्गमः, रेचनं; (for water) जलनिर्गमः, परी(रि)वाहः, प्रणालः-ली, प्रणालिका, जलोच्छ्वासः. -*v. t.* (क्रमशः) निर्गम् c. (गमयति), अपवह् c., निःसृ c., स्रु c. 2 शुष् c., आ-ना 1 P, क्षै c. (क्षपयति), रिच् c., रिक्तीकृ 8 U.

Drake, *s.* हंसः, कादंबः, कलहंसः.

Dram, *s.* अल्पभागः, मात्रा. 2 सुरा, वारुणी, मदिरा.

Drama, *s.* नाटकं; 'science of d.' नाट्यं -**Dramatic,-al,** *a.* नाटकीय, नाटकविषय -**ally,** *adv.* नाटकरूपेण, प्रयोगतः. -**Dramatist,** *s.* नाटकानां प्रणेतृ *m.*, नाटककारः.

Drap, *s.* वस्त्रं, वसनं, चेलः-लं; *See* **Cloth.** -**er,** *s.* वस्त्र-पट-विक्रयिन् *m.* -**ery,** *s.* वस्त्रव्यवहारः. 2 वस्त्रं, पटः, वासस् *n.* 3 प्रच्छदपटः, परिच्छदः.

Drastic. *a.* अमोघ, बलवत्, प्रभविष्णु, अनतिक्रमणीय.

Draught, *s.* पानं; 'a d. of water' गंडूषमात्रं जलं. 2 संग्रहः, सारः. 3 आलेखनं, चित्रारंभः, पांडुलेख्यं. 4 चित्रं, आलेख्यं, प्रतिमा-मानं. 5 परि(री)वाहः, जलनिर्गमः, जलोच्छ्वासः, प्रणालः-ली. 6 आकर्षणं; 'a d. horse' रथ्यः, शाकट., शाकटीनः; 'd. board' अष्टापदं, शारिफलं; अष्टापदक्रीडा, शारिक्रीडा; 'a piece at d.' शा(सा)रिः, नयः, शा(सा)रः; जतुपुत्रकः; 'moving a piece at d' परि(री)णायः. -**Draughtsman,** *s.* लेखकः, चित्रकरः.

Draw, *v. t.* कृष् 1 P, आ-समा-कृष्, वह् 1 P, नी 1 P; 'a carriage d. n by horses' अश्वोढः रथः. 2 निष्कृष्, संहृ 1 P, (प्रजाभ्यो धनं संहरति), निर्दुह् 2 U. 3 आ-अभिलिख् 6 P, वर्ण् 10. 4 (Water) उद्-अंच् 1 U, पर्युदंच्. 5 स्रु c., मोक्ष् 10. 6 समाकृष्, लुभ् c., 'd. n by merits' गुणलुब्ध. 7 अनुनी 1 P. आराध् c. 8 लभ् 1 A, ग्रह् 9 P, आदा 3 A; 'the day is fast d. ing to a close' परिणतप्रायमहः; 'd. curtains' जवनिकां संवृ 5 U; 'd. a sword' खड्गं कोषाद् निःसृ c. or आकृष्; 'd. in air' प्राण् 2 P, श्वस् 2 P; 'd. the breast' नि-पा 1 P, धे 1 P. -*v. i.* कृष्-आकृष्-pass. संकोचं-इ-या 2 P. 3 पूयं-पाकं जन् c. (जनयति) or उत्पद् c. -**away,** अपकृष्, अपनी, अपहृ. -**back,** प्रत्याहृ, प्रतिसंहृ, प्रत्यानी. 2 (*v. i.*) अपक्रम् 1 U, 4 P, अपसृ 1 P, अपया 2 P, परा-नि-वृत् 1 A, पलाय् 1 A. -**down,** उत्पद् c., जन् c., आवह् 1 P; 'you have d. n down ruin upon yourself with your own hands' त्वया स्वहस्तेनांगाराः कर्षिताः (P. 1. 3). -**in,** संहृ, निकृष्, प्रत्याहृ; 'd. in the reins' प्रगृहीतां रश्मयः. -**near,** प्रत्यासद् 1 P; उपसृप् 1 P, उपागम् 1 P, उपस्था 1 U; *See* **Approach;** (प्रत्यासीदति स्नानसमयः Ka. 47). -**off,** अप-वि-कृष्, अपहृ, अपनी; 'd. off the cloud' निवार्यतां जलदः (Mr. 5.). 2 स्रु c., सुच् 6 P or c. (as liquids). 3 (*v. i.*) अपसृ 1 P; *See* **Drawback.** -**on,** आनी, आकृष्. 2 उत्पद् c., आवह् 1 P. 3 (*v. i.*) उपस्था, उपागम्, प्रत्यासद्. -**out,** निष्कृष्, निर्हृ, सं-हृ, निर्दुह्. 2 तन् 8 U, विस्तृ c., दीर्घीकृ 8 U. विततीकृ. 3 निर्गम् c. (गमयति), उद्-भू c. 4 (Army) व्यूहेन रच् 10, सैन्यं व्यूह् 1 U. -**together,** समाकृष्, संग्रह्, समानी. -**up,** उत्कृष्, उद्-हृ-धृ 1 P, उत्तुल् 10. 2 लिख् 6 P, निरच् 10 निबंध् 9 P. 3 उन्नम् c. (नमयति); 'the goat drew himself up' अज उत्तस्थौ, शनैर्वपुरुदनमयत्. -**Drawback,** *s.* प्रत्यूहः, अंतरायः. 2 हानि *f.*, अपचयः, अपायः. 3 उद्धारः; 'd.-bridge' जंगम-चल-सेतुः. -**er,** *s.* कर्षकः. 2 चलसमुद्गकः, संपुटः, निष्कर्षणी; 'd. s' जंघावारः. -**ing,** *s.* आकर्षणं. 2 चित्रं, आलेख्यं, प्रतिरूपं; चित्रफलकः, प्रतिमानं. 3 चित्रकर्मन् *n.*, चित्रविद्या; 'd. room' दर्शनगृहं, सभाजनकोष्ठः.

Drawl, *v. i.* चिरेण-मंदं मंदं-वाक्यानि उच्चर् c. or उद्वाह् 1 P. -**ing,** *s.* मंदोच्चारणं.

Dray, -**man,** *See* **Cart,-man.**

Dread, *s.* भीति *f.*, त्रासः, भय, साध्वसं. -*v. t.* भी 3 P, त्रस् 1, 4 P, उद्विज् 6 A, (with abl.). -**ed,** *a.* भयहेतुः, त्रासस्थानं. -*a.*,-**ful,** *a.* दारुण, भयप्रद, भीम, भयंकर (री *f.*), त्रासावह, भीषण, भयानक, घोर, उग्र, भैरव (वी *f.*), रौद्र (द्री *f.*). -**fully,** *adv.* दारुणं, उग्रं, भीमं. -**less,** *a.* निर्भय, त्रासहीन. -**naught,** *s.* युद्धनौका.

Dream, *s.* स्वप्नः, स्वापः, स्वप्नदर्शनं. 2 स्वप्नसृष्टि *f.*, मिथ्यावासना, असंभवकल्पना, आभासः, वृथावासना; 'bad d.' दुःस्वप्नः; 'speak in a d.' उत्स्वप्नायते (D.). -*v. t.* स्वप्नं दृश् 1 P. -*v. i.* स्वप्नं दृश्, स्वप्नायते (D.). 2 चिंत् 10, भू c., मनसा कल्प् c., चित्ते आकल् 10 (कलयति). 3 वृथावासनां कृ 8 U, असंभवकल्पनां कृ. -**er,** *s.* स्वप्नदर्शिन् *m.* 2 दुर्वासनाकृत् *m.*, असंभवकल्पनाकृत् *m.* 3 उन्मत्तः. -**y,** *a.* स्वप्नोपम, स्वप्नवत् *ind.*; असार.

Dreary, *a.* घोर, निर्जन, शून्य, जीर्ण. 2 निरानंद, दुरालोक, दुर्दर्शन, निष्प्रभ. -**ness,** *s.* निर्जनत्वं, घोरता, शून्यत्वं.

Dredge, *v. t.* आकृष् 1 P. -*s.* आकर्षणी.

Dregs, *s.* खलं, मलः-लं, उच्छिष्टं, शेषं, किट्टं, अवकरः, संकरः, असारः; 'he belongs to the d. of society' नीच-अधम-तमोर्थ पुरुषः. -**Dreggist,** *a.* मलिन, समल.

Drench, *v. t.* क्लिद् c., मोक्ष् 1 P, सिच् 6 P, जलेन क्लु c or स्ना c. (स्ना-स्न-पयति); 'd. ed with sweat' स्वेदसलिलस्नात. -*s.* पानं, पेयं.

Dress, *s.* वेशः-षः, नेपथ्यं, वस्त्रं, परिच्छदः, वासस् *n.*, वसनं, परिधानं. **2** आकल्पः, परिकर्मन् *n.*, आभरणं, प्रसाधनं, भूषणं, अलंकारः, संस्कारः, परिष्कारः, मंडनविधिः. -*v. t.* प्रसाध् c., अलंकृ 8 U, परिष्कृ, मंड् 10, भूष् 10; प्रा-वृ 5 U, वस्त्रेण आच्छद् 10 or परिवेष्ट् c., संव्ये 1 P, वस्त्रं परिधा c. (धापयति). **2** (Oneself) वस् 2 A, वस्त्रं परिधा 3 U. **3** उपक्लृप् c., संस्कृ, विधा 3 U, सज्जीकृ; 'd. food' (अन्नं) पच् 1 P, श्रा c. (श्रपयति), संस्कृ, श्री 9 U, सिद्धीकृ; 'd. hair' केशान् रच् 10 or विन्यस् 4 P; 'd. leather' चर्म परिष्कृ; 'd. wounds' क्षतं निर्णिज् 3 U or प्रक्षल् 10. -**ed,** *a.* परिच्छन्न, वस्त्रवेष्टित, सवेश, संवीत, प्रावृत, प्रसाधित, मंडित,भूषित, अलंकृत, सवासस्, वस्त्रान्वित, कृतनेपथ्य, कृतपरिकर्मन्, रचितवेष-आकल्प; 'well d.' सुवेश, 'd. as' ex. by वेश-वासस् in comp.; 'd. as a sage' मुनिवेशः, मुनिवेषधारी; 'd. in black' नीलांबर. **2** पक्व, सिद्ध, संस्कृत, श्राण, श्रपित, शृत; 'half d.' आपक्व. **3** निर्णिक्त. -**er,** *s.* प्रसाधकः, आच्छादकः, आकल्पकः. **2** अन्नफलकः. -**ing,** *s.* वस्त्रपरिधानं, नेपथ्यविधानं-अंगसंस्कारः, परिकर्मन् *n.* **2** पाकनिष्पत्ति *f.*, अन्नसंस्कारः, पाकसिद्धि *f.* **3** विलेपः-पनं, उपनाहः; 'd. room' नेपथ्यं, प्रसाधनागारं, वस्त्रपरिधानस्थानं.

Drib, *v. t.* अवच्छिद् 7 P, उद्धृ 1 P; अन्यायेन स्वायत्तीकृ or आत्मसात्कृ 8 U.

Dribble, *v. i.* कणशः स्यंद् 1 A, बिंदुक्रमेण पत् 1 P, शनैः क्षर् 1 P or स्रु 1 P or गल् 1 P. -*v. t.* कणशः स्रु c. or गल् c. -**Dribblet,** *s.* कणः, लवः, लेशः, कणिका, अल्पभागः, 'in d. s' बिंदुक्रमेण; कणशः, अल्पाल्पं.

Drift, *s.* भावः, तात्पर्यं, आशयः, अभिप्रायः, उद्देशः, प्रवृत्ति *f.*, आकांक्षा. **2** वेगः, रयः. **3** राशिः, संचयः, पुंजः, निकरः; 'd. of snow' हिमसंहति *f.*, हिमानी. **4** संपातः, वर्षः. -*v. i.* प्रवह् 1 P, जलस्रोतसा नी-वह् pass. **2** विप्लु 1 A, (विप्लवेतेह नौरिव H. 3) **3** वायुवेगेन पुंजीभू 1 P. -*v. t.* प्रवह् c., प्रेर् c. प्रचुद् 10, प्रणुद् 6 P or c. **2** संपत् c., राशीकृ 8 U, संहन् 2 P, पुंजीकृ.

Drill, *s.* वेधनी-निका, आस्फोटनी. **2** व्यायामः, अस्त्रशिक्षा, शस्त्राभ्यासः. -*v. t.* व्यध् 4 P, छिद्र् 10, समुत्कृ 6 P. **2** युद्धविद्यां शिक्ष् c.; शस्त्राभ्यासं कृ c.; रणशिक्षां दा 3 U.

Drink, *v. t.* पा 1 P; 'd. up' आचम् 1 P आपा, क्षुध् c. -*s.* पानं, पानीयं, पयस् *n.*, पेयं. **2** सुरा, मद्यं. -*v. i.* जलं पा or सेव् 1 A; 'd. together' सं-पा, सपीतिं कृ 8 U; 'd. (to) the health of' स्वास्थ्याय or शुभं भूयादिति प्रार्थनापूर्वकं पा. -**er,** *s.* पातृ *m.*, पायिन् *m.*, पानरतः, पानासक्तः. -**ing,** *s.* पानं, आचमनं, पीति *f.*; 'd. vessel' पानपात्रं-भाजनं, चषकः, सरकः; 'd. together' सपीति *f.*, तुल्यपानं. -**Drunk, Drunken,** *a.* मत्त, क्षीब, समद, मदोन्मत्त, उपोढमद, मदोद्धत; 'to be d.' मद् 4 P; 'to make d.' मद् c. **2** सिक्त, क्लिन्न. -**ard,** *s.* पानरतः, पानासक्तः, पानशौंडः, मधुपः, मद्यपः. -**enness,** *s.* मदः, मत्तता, क्षीवता, उन्मादः.

Drip, *v. i.* कणशः-बिंदुक्रमेण-क्षर्-गल्-स्रु 1 P or स्यंद् 1 A; 'd. ing garment' जलनिस्यंदि वस्त्रं. -*v. t.* कणशः स्रु c. or गल् c. -*s.* पटलप्रांतः-तं, वलीकः-कं, नीध्रं. -**ping,** *s.* क्षरणं, स्रवणं, गलनं, स्यंदनं, निस्यंदः. **2** मांसवसा, मांसस्नेहः-रसः; 'd. pan' रसधारिणी.

Drive, *v. t.* चर्-ल् c., नुद् 6 P or c., प्रणुद्; प्रेर् c.; (fig.) प्रवृत् c., प्रोत्सह् c., उत्तिज् c., उद्युज् 10. **2** वह् c., कृष् 1 P, नी 1 P, प्र-चुद् 10 (fig. also); 'd. n to do this rash act' चापलाय प्रचोदितः (R. 1. 9); 'd. a nail' कीलं प्रविश् c. -*v. i.* रथेन गम्-चल्-चर् 1 P. **2** सं-अप-वह् pass., चल् c. pass., नुद्-कृष्-नी pass.; 'a sharp d. ing shower' अविरलवारिधारासंपातः (U. 6) पटुधारासारः (V. 4). **3** आपत् 1 P, अभिद्रु 1 P, संपत् 1 A. -*s.* रथेन संचरणं or विहारः. -**at,** उद्दिश् 6 P, अभि-प्र-इ 2 P; अधिकृत्य-उद्दिश्य-वद् 1 P; 'what are you d. ing at' किमुद्दिश्य भवान्भाषते. -**away,** -**off,** निर्-अप्-अस् 4 U, अपवह् c., निर्-अप-सृ c., निरा-अपा-कृ 8 U, अपानुद् निर्धू 5, 9 U; हृ 1 P, अप-परि-हृ, अप-ऊह् 1 U. -**out,** निर्वस् c., निष्कस् c., बहिष्कृ, निर्गम् c., विवस् c., नि-अप-सृ c. -**er,** *s.* प्रेरकः, वाहकः. **2** यंतृ *m.*, रथवाहकः,प्राजितृ *m.*, सूतः, नियंतृ *m.*, क्षत्तृ *m.*, सारथिः, सव्येष्टृ *m.*, दाक्षिणस्थः. -**ing,** *s.* प्रेरणं, प्रचोदनं, निराकरणं &c. -**Drove,** *s.* कदंबकं, यूथं, गणः, कुलं, संघः. **2** पशुसमूहः.

Drivel, *s.* लाला, सृणि(णी)का, स्यंदिनी, द्राविका. -*v. i.* लालां पत् c. or निःसृ c. or स्रु c. **2** बुद्धिविकल *a.* भू 1 P, जडीभू, हतज्ञान *a.* भू. -**ler,** *s.* लालास्रावकः. **2** मूर्खः, बालिशः, जडः, मूढः, हतज्ञानः.

Drizzle, *v. i.* मंदं मंदं वृष् 1 P, शीकरायते (D.). -*v. t.* शीकरं वृष्. -**ing,** *s.* शीकर-

वर्षः-पातः (a d. shower). **-Drizzly,** *a.* शीकरयुक्त, तुषारविशिष्ट.

Droll, *s.* भंडः, वैहासिकः, विदूषकः. **-a.** हास-कर (री *f.*), उपहास्य, विनोदिन्, असंबद्ध. **-v.** *i.* परिहासं उत्पद् c. **-ery,** *s.* परिहासः, हास्यं, विहासः, विनोदः, नर्मालापः.

Dromedary, *s.* क्रमेलः-लकः, एककुद् *m.*

Drone, *s.* (**dronish**) अलसः, निरुद्योगः; आलस्यशीलः, तंद्रालुः, निरुत्साहः.

Droop, *v. t.* अवनम् c. (नमयति); नम्रीकृ 8 U; *See* **Bend.** **-v.** *i.* अव-वि-सद् 1 P, म्लै 1 P, ग्लै 1 P, स्रंस् 1 A, गल् 1 P, क्लम् 1, 4 P; ध्वंस् 1 A, क्षि-मुच्-pass., शिथिलीभू 1 P, अव-आ-नम् 1 P. 'let not your spirits d. (flag) ' मा भवानंगानि मुंचतु (V. 2); ' I slept with d. ing limbs ' शुकैरवयवैरशायिषि (D. K. II. 2); ' the vine is d. ing with its load ' फलभारानमिता द्राक्षालता; ' the whole frame d. s down ' स्रंसते देहबंधः (U. 3) **-ing,** *a.* अवसन्न, म्लान, क्लांत, स्रस्त, शिथिल, स्रंसिन्. **2** आ-अव-नत, आवर्जित, नम्रीभूत, नमित.

Drop, *s.* बिंदु, *m*, पृषत् *n.* लवः, विप्रुष् *f.*, पृषतः, कणिका, कणः, शीकरः; ' d. by d. ' बिंदुक्रमेण, कणशः; ' small d. s make a pool' जलबिंदुनिपातेन क्रमशः पूर्यते घटः. (H. 2). **2** कर्णावतंसः; लोलकः, कुंडलं. **-v.** *t.* कणशः स्र c. or पत् c. or स्यंद् c. ' d. ing rut ' मदं क्षरंतः, मदनिस्यंदिनः (गजाः) ' d ing. nectar ' अमृतस्रुत्, सुधास्यंदिन्. **2** अव-, नि पत् c., स्रंस् c., भ्रंश् c., च्यु c , मुच् 6 P, विसृज् 6 P, निविश् c. **3** सं-ह्व 1 P, अपास् 4 P, त्यज् 1 P, निवृत् 1 A, (with abl.); ' I shall d. congratulatory lines regarding you in my letters ' मदीयेषु लेखेषु त्वामुद्दिश्य सभाजनाक्षराणि पातयिष्यामि (M. 5). ' let this matter (story) be d. ed ' संह्रियतामियं कथा (Ka. 169). **-v.** *i.* स्रु 1 P, च्युत्-श्चुत् 1 P, क्षर् 1 P, गल् 1 P, स्यंद् 1 A **2** स्रंस्-च्यु-1 A, भ्रंश् 1 A, 4 P; नि-,पत्, ' d. ing on his knees' जानुभ्यामवनौ गत्वा,क्षितितलनिहितजानुः. **3** नि-,अव-, पत् 1 P, अवसद् 1 P, मुर्छ् 1 P, *See* **Droop;** ' I feel ready to d.' अवसन्नप्रायाणि मे गात्राणि, सीदंति मे अंगानि. **4** (in) सहसा-अतर्कितं-गम् 1 P or आगम्.

Dropsy, *s.* (generally) शोफः , शोथः. **2** जलोदरं, जठरामयः, उदरी ; ' dropsied honour ' केवलं स्थूलः-महाप्रमाणः-मानः.

Dross, *s.* मंडूरं, सिंहाणं (नं), लोहमलं, सिंघाणं. **2** मलं, खलं, किट्टं; *See* **Dregs.** **-y,** *a.* समल.

Drought, *s.* अवग्र(ग्रा)हः, अनावृष्टि *f.*, अवर्षणं, जलशोषः, वृष्टिविघातः. वर्षनिरोधः. **-y,** *a.* जलशून्य, शुष्क, निरुदक, निर्वृष्टि.

Drove, *s.* *See* under **Drive.**

Drown, *v. t.* प्लु c.; आ सं-परि प्लु c. **2** जले निमस्ज् c., (मज्जयति) or प्रविश् c. **3** जलमज्जनेन व्यापद् c. or मृ c. **4** तिरोधा 3 U, तिरयति (D.) ' d. s my voice with his cries ' केकाभिस्तिरयति मे वचनं (Mal. 9) **-v.** *i.*, ' to be d. ed ' नि-मस्ज् 6 P, निमज्जनेन मृ 6 A, or नश् 4 P or व्यापद् 4 A;' d. ed in the sea ' पयोराशौ निमग्न; ' d. ed in reflection' चिंतामग्न. **-ing,** *s.* मज्जनं, आप्लावः, प्लावनं.

Drowse, *v. i.* नि-द्रा 2 P, स्वप् 2 P, स्वप् desid. (सुषुप्सति). **-Drowsy,** *a.* निद्रालु, तंद्रिल, निद्रालस, निद्राशील, अलस. **-ness,** *s.* तंद्रा, निद्रालुत्वं, आलस्यं, निद्रा, निद्राशीलत्वं, शयालुता.

Drub, *v. t.* वेत्रेण तड् 10 or प्र-हृ 1 P.

Drudge, *v. i.* अविरतं-अतिक्लेशेन-आयस् 1, 4 P or परिश्रमं कृ 8 U, शरीरायासेन व्रातं कृ. **-s.** व्रातीनः, अविरतायासिन् *m.*, अतिक्लेशेन निकृष्टकर्मकारिन् *m.*, हीनवृत्ति *m.* **-ry,** *s.* अविरतायासः, शरीरक्लेशः, नित्यश्रमः, नित्यक्लेशः, निकृष्टकर्माभियोगः, व्रातं.

Drug, *s.* औषधं, भेषजं, अगदः, भैषज्यं, जायु *m.* **-v.** *t.* औषधादिना मिश्र् 10 or संसृज् 6 P. **-Druggist,** *s.* औषधविक्रयिन् *m.*, भेषजकारः.

Drugget, *s.* स्थूलपटः, स्थूलशाटकः, वराशि *m.*

Drum, *s.* पटहः *m.*, दुंदुभि *m.* डिंडिमः, भेरी, आनकः. **2** कर्णोदरं, कर्णदुंदुभि *m.* **-v.** *i.* पटहं तड् 10 **2** स्पंद् 1 A. **-mer,** *s.* पटहताडकः. **-Drumstick,** *s.* कोणः, शारिका.

Dry, (up) *v. i.* शुष् 4 P, शोषं या 2 P or गम् 1 P,आश्यै 1 A, नीरसीभू 1 P, शुष्कीभू. **-v.** *t.* शुष् c., शोषं नी 1 P, आश्यै c., रसं अपनी or हृ 1 P, शुष्कीकृ 8 U ' she dried rice in the sun ' तंडुलान्सूर्यातपे दत्तवती. **2** (up) आचम् 1 P, (आचामति स्वेदलवान् मुखे ते R. XIII. 20); उच्छुष् c., आ-नि-पा 1 P. **-a.** शुष्क, निर्जल, नीरस, अक्लिन्न, वान. **2** असार, निःसार, निःसत्त्व, अरस, नीरस, फल्गु, विरस, तुच्छ. **3** उदकार्थिन्, तृषित, तृषात; ' d. soil ' मरु *m.*, मरुस्थली-ली; ' d. ground ' स्थलं; ' d.-eyed ' निरश्रुनयन. ' d. nurse ' शिशुपालिका, अंकपाली; ' d. [illegible] ' शुष्कचरण *a.* **-er,** *s.* शोषकः-णः **-ing,** *s.* शोषः, शोषणं, शुष्कीकरणं. **-ly,** *adv.* शुष्कं,नीरसं अरसिकतया. **-ness,** *s.* शोषः, शुष्कता, निर्जलत्वं, अरसिकत्वं.

Dryad, *s.* वनदेवता.

Dual, *a.* द्विसंख्य, द्विवाचक, द्विक; 'the d. number' द्विवचनं. **-ity,** *s.* द्वैतं, द्वित्वं, द्वैधं.

Dub, *v. t.* नवपदे नियुज् 7 A, 10, नवपदवीं दा 3 U or आरुह् c. (रोपयति).

Dubious, *a.* अस्पष्ट, अव्यक्त, संदिग्धार्थ. 2 संदिग्ध, अनिश्चित; *See* **Doubtful.** **-ly,** *adv.* ससंशयं, साशंकं, अस्पष्टं, अव्यक्तं.

Duck, *s.* कलहंसः, कादंबः, चक्रवाकः, हंसः, प्लवः, वरटः. 2 तिर्यक्क्षिप्तः प्रस्तरः 3 दयितः-ता, प्रियः-या, वत्स-त्सा. **-**v. i. मस्ज् 6 P, अवगाह् 1 A; मस्तकं नम् c. **-**v. t. जले अवगाह् c. or आप्लु c. or मस्ज् c. (मज्जयति). **-**er, *s.* आप्लावकः, मंक्त *m.* **-ing,** *s.* मज्जनं, अवगाहः, आप्लावनं. **-ling,** *s.* हंस-शावकः-शिशुः.

Duct, *s.* प्रणालः-ली, मार्गः, संक्रमः, कुल्या. 2 शिरा, नाडि-डी *f.*, धमनी.

Ductile, *a.* विनेय, विधेय, वश्य. 2 आनम्य, मृदु, कोमल, उद्वर्तनयोग्य. **-Ductility,** *s.* वश्यता; आनम्यता; सुखोद्वर्तनीयता

Dude, *s.* *See* **Fop.**

Dudgeon, *s.* अमर्षः, कोपः; *See* **Anger.** 2 असिपुत्रिका, कृपाणिका.

Due, *a.* देय, दातव्य, परिशोध्य; ex. by pot. pass. part., or अर्ह् 1 P; 'respect is d. to our elders' पूज्या हि गुरवः; 'the debt d.' परिशोध्यं ऋणं. 2 अनुरूप, युक्त, उचित, योग्य, यथार्ह, यथा in comp.; 'in d. time' समये, यथासमयं; यथाविधि, &c. 3 (Owing to) ex. by कारणं, हेतुः; 'your failure is d. to your carelessness alone' प्रमाद एव तवासिद्धेः कारणं-हेतुः, प्रमादात् तवासिद्धिः प्रभूता **-**s. देयं, परिशोध्यं, ऋणं. 2 प्राप्यं, ग्राह्य, प्राप्तव्यं, योग्यांशः. 3 कर्तव्यं, अवश्यं कार्यं. 4 करः, शुल्कः-ल्कं, राजग्राह्यो भागः, राजस्वं. 5 अधिकारः. **-Duly,** *adv.* यथातथं, समुचितं, यथार्हं, उचितं, सम्यक्. 2 यथासमयं, समये, यथावसरं.

Duel, *s.* द्वंद्वं, द्वंद्वयुद्धं, मल्लयुद्धं, नियुद्धं, बाहुयुद्धं. **-**v. i. द्वंद्वयुद्धं कृ 8 U, द्वंद्वं कृ. **-ler, -list,** *s.* द्वंद्व-मल्ल-योद्धृ *m.*, द्वंद्वकृत् *m.*

Duffer, *See* **Dunce.** 2 *See* **Pedlar.**

Dug, *s.* स्तनः, पयोधरः.

Dulcet, *a.* सुरस, स्वादु, मधुर, मिष्ट; 'd. to the ear' सुखश्रव, सुस्वर, श्रुतिमनोहर. **-Dulcify,** *v. t.* मधुरीकृ 8 U, स्वादूकृ.

Dulcimer, *s.* वल्लकी, विपंचिका.

Dull, *a.* मंद, मूढ, जड, मंद-स्थूल बुद्धि-मति; 'd.-witted' दुर्मति, जडमति, मंदधी 2 निष्प्रभ, विषण्ण, निस्तेजस्, निरुत्साह, क्लांत, म्लान, मंदच्छाय, मलिन, मंदद्युति. 3 अतीक्ष्ण, धाराहीन, अतेजस्, कुंठ. 4 अलस, मंथर, जड, मंदगति, मंद अक्षुण्ण, शीतक, तुंदपरिमृज. 5 स्थूल, घन. 6 अरस, अरसिक. 7 कष्टकर (री *f.*), विषम, निरानंद; 'd. of hearing' विकलकर्ण; 'a d. day' दुर्दिनं, तमोवृतं नभः. **-**v. t. जडीकृ 8 U, मुह् c., कुद् 10, अतीक्ष्णीकृ, घनीकृ, निष्प्रभीकृ, तेजो ह्र 1 P, वि-भञ्ज् c., म्लानीकृ, उत्साहं भंज् 7 P. **-ness,** *s.* मांद्यं, जाड्यं, मूढता; अतीक्ष्णता, आलस्यं, तेजोमांद्यं, निष्प्रभता, अतेजस् *n.*, &c.

Dumb, *a.* मूक, जड, जडवाच्, वाग्रहित, वाक्शक्तिहीन, अनालाप, अवाच्. **-ly,** *adv.* मूकवत्, निःशब्दं; तूष्णीं, वाग्व्यतिरेकेण. **-ness,** *s.* मूकता, वाक्स्तंभः, जाड्यं, वाग्राहित्यं.

Dumpish, *a.* विषण्ण, दीन, उद्विग्न.

Dumps, *s.* विषादः, उद्वेगः, म्लानि *f.*

Dumpy, *a.* ह्रस्वस्थूल.

Dun, *a.* कपिश, श्याव-म, पिंगल, कृष्ण. **-**s. सनिर्बंधं ऋणप्रार्थना.

Dunce, *s.* स्थूलबुद्धिः, दुर्मेधस् *m.*, अज्ञः, अनभिज्ञः, मूढः, मूढमतिः, जडः, जडधीः.

Dune, *s.* सैकतवप्रः, वालुकानिचयः.

Dung, *s.* पुरीषं, विष्ठा, शकृत् *n.*, शमलं, विष् *f.*, अप(व)स्करः, गूथं, वर्चस्कः-स्कं, उच्चारः, 'd. hill' शकृन्निचयः, अवकरनिकरः, (*a.*) हीनजाति, अधम, नीच. **-**v. t. पुरीषेण लिप् 6 P or अंज् 7 P.

Dungeon, *s.* कारा, कारागृहं-वेश्मन् *n.*, बंधनागारं, अंधकूपः.

Dupe, *v. t.* वंच् 10; प्रलुभ् c.; *See* **Cheat.** **-**s. सुखप्रतार्यः, सुखेन वंचनीयः.

Duplex, *a.* द्विगुण.

Duplicate, *a.* द्विगुण; 'a d. copy' प्रतिलिपि *f.*; प्रतिरूपं. **-**v. t. द्विगुणीकृ 8 U, पुटीकृ, पुटयति (D). **-ion,** *s.* द्विगुणीकरणं, पुटीकरणं. **-ure,** *s.* पुटः-टं, भंगः; व्यावर्तनं

Duplicity, *s.* कपटं, छलं, माया; द्वैधीभावः; *See* **Fraud.**

Durable, *a.* स्थायिन्, चिरस्थायिन्, दीर्घकाल, अविनाशिन्, स्थिर, ध्रुव, अक्षय, अनपाय. **-Durably,** *adv.* स्थिरं, ध्रुवं, अनपायेन. **-Durability,** *s.* स्थिरता, अक्षयता, चिरस्थायित्वं.

Durance, *s.* आसेधः, निरोधः, बंधनं, कारानिरोधः.

Duration, *s.* स्थायित्वं, अवस्थिति *f.*, स्थिति *f.* 2 ध्रुवता, स्थिरता, अविरामः, अविच्छेदः, सातत्यं. 3 परिमाणं; 'of long d.' दीर्घस्थायिन्, स्थायिन्; 'of short d.' अस्थायिन्, क्षणभंगुर, क्षणिक.

During, *prep.* यावत्, मध्ये, अंतरे in comp.; ex. by loc., or loc. abs.; 'd. youth' यौवनदशायां; 'd. Das'aratha's reign' दशरथे महीं शासति; 'd. life' यावज्जीवं-वन; oft. by आ with abl.

Dusk, *s.* संध्या, प्रदोषः, संध्याकालः-समयः; 'time of d.' सायंतनः समयः, संध्याकालः, सायंकालः. -*a.*, **-y, -ish,** *a.* ईषत्तामस (सी *f.*), ईषत्तिमिरावृत, ईषत्कृष्ण, सतमस्कल्प, आकृष्ण, आनील. **-ily,** *adv.* अस्पष्टं, ईषत्तमसा. **-iness,** *s.* ईषदंधकारः, ईषत्तिमिरं.

Dust, *s.* धूलि-ली *f.*, रजस् *n.*, रेणु *m.*, *f.*, पांशुः *m.*-सुः *m.*, क्षोदः, चूर्णं. **2** संकरः, अवकरः-स्करः, उच्छिष्टं; 'd. of flowers' परागः; 'fragrant d.' पिष्टातः, पटवासः; 'd. of gold' कांचनभूः; 'd. coloured' धूलिधूसर. -*v. t.* रेणुं अपमृज् 2 P, नीरजीकृ 8 U, निर्धूलीकृ; 'd. hole-bin' संकरनिचयस्थानं; 'd.-man' खलपूः, धूलिमार्जकः, रजोवाहकः. **-ed,** *a.* नीरजीकृत, हृतपांशु, संमृष्ट. **-er,** *s.* मार्जनपटः, नक्तकः, रेणुसंमार्जकः. **-y,** *a.* पांशुल, धूलिधूसर, रेणुरूषित-रूक्ष.

Duty, *s.* धर्मः, कर्तव्यं. **2** कर्मन् *n.*, कृत्यं, कार्यं, नियमः, व्रतं. **3** नियोगः, अधिकारः, पदं, आस्पदं; 'one who has done his d.' कृतकृत्यः, कृतिन् *m.*; 'morning duties' प्रातःकृत्यानि; 'having heavy d.' धुर्यः, धूर्वहः, धुरीणः. **4** करः, शुल्कः-ल्कं; तार्यं, तारिकं (for boats). **5** आदरः, भक्ति *f.*, मानः. **-Duteous, -Dutiful,** *a.* भक्त, आज्ञाधारक, अनुविधायिन्, आज्ञापालक, आदृत, धर्मज्ञ, भक्तिमत्, वश्य, ज्ञातधर्मन्; *See* **Obedient. -ly,** *adv.* भक्तवत्, भक्त्या. **-ness,** *s.* भक्ति *f.*, आज्ञानुवर्तनं, वश्यता, सेवा, शुश्रूषा, अनुरोधः.

Dux, *s.* अग्रणी *m.*, छात्रोत्तमः.

Dwarf, *s.* वामनः, खर्वः, ह्रस्वः, ह्रस्वकायः. -*v. t.* ह्रस् *c.*, खर्वीकृ 8 U. **-ish,** *a.* खर्व, वामन, ह्रस्व, अतुंग, खर्वाकार, वामनमूर्ति.

Dwell, *v. i.* वस् 1 P, नि-प्रति-वस्, आ-अधिवस् (with acc.), वृत् 1 A, स्था 1 P. **2** अध्यास् 2 A., आश्रि 1 U, निषेव् 1 A; 'd. upon' विस्तरेण वर्ण् 10; प्रपंचयति (D.), सविस्तरं निरूप् 10; 'd. abroad' प्रवस्; 'd. together' एकत्र-सं-वस्. **-er,** *s.* निवासिन्-वासिन्-वासकृत् *m.*, स्थ-वर्तिन् in comp. **-ing,** *s.* नि-आ-वासः, वसति *f.*, निलयः, आलयः, वसतिस्थानं, गृहं, आयतनं, आगारं, भवनं, आवसथः, ओकस् *n.*; *See* **House**; 'd. house or place' वासगृहं-स्थानं.

Dwindle, *v. i.* *See* **Decrease**; 'the number of members d ed down to four' सभासदां संख्या तथा क्षीणाभूद् यथा चत्वार एव अवशिष्टाः.

Dye, *s.* रंगः, वर्णः, रागः; 'red d.' लाक्षा. -*v. t.* रंज् 10, वर्ण् 10, कुंकुमादिना अञ्ज् 7 P. **-ed,** *a.* रक्त, रंजित, सराग, कषायित, वर्णित; 'd. red' अरुणित. **-er,** *s.* रंजकः, वस्त्ररागकृत् *m.*

Dyke, *See* **Dike.**

Dynasty, *s.* वंशः, कुलं, अन्वयः, आवलि-ली *f.*, श्रेणिः; 'of solar d.' सूर्यवंश्यः.

Dysentery, *s.* प्रवाहिका, अतिसारः, प्रस्कंदिका, आमातिसारः, संग्रहणी.

Dyspepsia, *s.* अजीर्ण-र्णि *f.*, मंदाग्निः, अन्नविकारः, अपाकः.

Dyspnœa, *s.* श्वासावरोधः, श्वासस्तंभः.

E.

Each, *a.* सर्व, सकल; gen. ex. by प्रति-अनु in comp., or by repetition of word; दिने दिने, प्रतिदिनं, &c.; 'all went away, e. to his own house' एकैकः स्वं स्वं गृहं निर्जगाम; 'e. one' एकैक *a.*, एकैकशः, पृथक् पृथक्; 'e. other' अन्योन्यं, इतरेतरं, परस्परं.

Eager, *a.* (Of persons) उत्सुक, लालस, लोलुप, अत्याकांक्षिन्, व्यग्र, सोत्कंठ, आसक्त, रत, सोत्साह. **2** गाढ, प्रबल, उत्कट, प्रचंड, सातिशय; तीव्र, तीक्ष्ण; oft. ex. by उत्तम् 4 P, (उत्ताम्यति मे हृदयं तद्दर्शनाय Ka.349). **-ly,** *adv.* सस्पृहं, सतृष्णं; सोत्कंठं, कुतूहलात्, अतिवांछया, उत्कटं. **-ness,** *s.* लालसा; औत्सुक्यं, उत्साहः, अतिस्पृहा-वांछा, उत्कटता, व्यग्रता, कुतूहलं, कौतुकं.

Eagle, *s.* गरुत्मत् *m.*, उत्क्रोशः; *See* **Garuda**; 'e. eyed' सूक्ष्मदृष्टि.

Ear, *s.* कर्णः, श्रोत्रं, श्रुति *f.*, श्रवणं, श्रवः, शब्दग्रहः, 'outer e.' श्रुतिमंडलं-वेष्टनं; 'lobe of e.' कर्णपालि *f.*; 'root of e.' कर्णमूलं, कर्णजाहं; 'tip of e.' श्रवणपालि-ली *f.*; 'having the e. s pricked' स्तब्धकर्ण; 'give e.' **attend to** q. v.; 'he has his lord's e.' स भर्तुर्विश्रंभस्थानं-विश्वासभूमिः; 'e.-ache' कर्णशूलः-लं; 'e.-drop' कर्णपूरः; 'e.-lap' कर्णपालिः, कर्णशष्कुली; 'e. pick' कर्णकंडूयनकः; 'e.-ring' कर्णावतंसः, कुंडलं; कर्णभूषणं, कर्णिका, उत्तंसः; 'e. shot' कर्ण-श्रवण-गोचरः-विषयः; 'be within e.-shot' श्रवणगोचरे तिष्ठ; 'e.-wax' कर्णमलं, पिंजूषः; 'e.-witness' श्रुतसाक्षिन् *m.*; 'e.-wig' कर्णकीटः-जलूका. **2** शीर्षकं; कणिशं, मंजरी.

Early, *a.* आद्य, प्रथम, पूर्व. **2** अचिर, सद्यस्क, प्रत्यग्र, अभिनव, नूतन. **3** अकाल, अपूर्णकाल, आकालिक (की *f.*), असमवसर-परिणत or पक्व. **4** प्रातःकालीन, पूर्वाह्णतन-प्रगेतन (नी *f.*). प्रि-प्र-भातीय, उषस्य, औषस (सी

f.), प्रभात-प्रातः in comp. -*adv.* प्रातर्, प्रत्युषसि, प्रत्यूषे; विभाते, प्रातःकाले, प्रभाते, व्युष्टे, प्रगे; 'e. in the morning' महति प्रत्यूषे; 'getting up e.' लघुलघूत्थित. 2 सद्यः, शीघ्रं, सत्वरं, आशु, सपदि. 3 पूर्वं, अग्रे, प्राक्. -ness, *s.* पूर्वत्वं, अग्रत्वं. 2 प्रत्यग्रता, अचिरत्वं. 3 अकालता, अकालपरिणति *f.* 4 सुप्रभातं. 5 क्षिप्रता, अविलंबः, शीघ्रता.

Earn, *v. t.* अर्ज् 10, उपार्ज्, उपादा 3 A, आप् 5 P; लभ् 1 A, निर्विश् 6 P; *See* **Get.** 2 अर्ह् 1 P: 'e. livelihood' वृत्तिं क्लृप् c. or सं-पद् c. -ings, *s.* उपार्जितं, वेतनं, लभ्यांशः.

Earnest, *a.* उद्युक्त, कृतोद्यम; *See* **Eager;** 'e. desire' गाढाभिलाषः, अतिस्पृहा, कुतूहलं. 2 निविष्ट, एकाग्र, समाहित, आसक्त, एकतान, एकायन, एकसर्ग, एकाग्र्य, अनन्यासक्त, एकाग्रचित्त, अभिनिविष्ट, अनन्यविषय, उद्योगिन्; आसक्तचित्त, अनन्यवृत्ति, निविष्टमनस् (of persons). 3 अपरिहासशील. -*s.* अपरिहासः, अलाघवं; 'I am in e.' न परिहसामि, नायं परिहासस्य समयः; 'take in e.' परमार्थेन ग्रह् 9 P, (परिहासविजल्पितं वचः परमार्थेन न गृह्यतां S. 2). 2 सत्यंकारः, सत्याकृति *f.*, सत्यापनं-ना. 3 पूर्वभुक्ति *f.* 4 उपन्यासः, निक्षेपः, आधिः. -ly, 'in e.' *adv.* समाहित-निविष्ट-चेतसा, प्रयत्नतः, सोद्योगं, एकाग्रमनसा, अभिनिवेशेन, उत्सुकं, सोत्साहं; 'e. desirous' अत्याभिलाषिन्, गाढाभिलाष. 2 अपरिहासेन, परमार्थतः, अलाघवं. -ness, *s.* एकाग्रता, उत्कटता, औत्सुक्यं, अभिनिवेशः, चित्तासक्ति *f.*, उत्साहः, अभियोगः, उद्योगः.

Earth, *s.* मही, पृथिवी, पृथ्वी, वसुधा, उर्वी, वसुंधरा, धरा, धरित्री, मेदिनी, वसुमती, धरणी, अवनि *f.*-नी, भूः, भूमि *f.*, क्षोणि(क्षौणि) *f.*-णी, क्षिति *f.*, अचला, अनंता, रसा, विश्वंभरा, स्थिरा, काश्यपी, सर्वंसहा, कु *f.*, इला, ज्या, गोत्रा, क्ष्मा, क्षमा, भूतधात्री, रत्नगर्भा, जगती. 2 मृद् *f.*, मृत्तिका. -*v. i.* भूमौ बिलं कृत्वा निवस् 1 P. -*v. t.* भूमौ निविश् c. or निधा 3 U or निक्षिप् 6 P; 'e.-born' भूमिज, महीज; 'e. ling' भूजंतु *m.*, मर्त्यः, पामरः; 'e.-quake' कंपः-चलन in comp. with (*s.*); क्ष्माचितं, भूकंपः, &c.; 'e. worm' भूजंतु *m.*, नीचजनः, अधमः. -en, *a.* मृण्मय (यी *f.*), मार्तिक (की *f.*); 'e. ware' मृद्भांडं, कौलालकं, मार्तिकं. -ly, *a.* पार्थिव (वी *f.*), सांसारिक (की *f.*), ऐहिक (की *f.*), मर्त्य; नश्वर; विनाशधर्मन्; 'e.-minded' संसारासक्तचित्त; विषयोपभोगरत. -y, *a.* पार्थिव, भौम (मी *f.*), मार्तिक.

Ease, *s.* सुखं, सौख्यं, विश्रामः, निर्वृति *f.*, निरुद्वेगता, स्वास्थ्यं, स्वस्थता; 'I am at e.' लब्धं स्वास्थ्यं मया; अहं निर्वृतः, वीतचिंतः; 'this my soul is completely at e.' जातो ममायं विशदः प्रकामं अंतरात्मा (S. 4); 'at one's e.' यथाकामं, पर्याप्तं, यथेच्छं, प्रकामं, सुखेन, सुख in comp., अकुतोभयं, निर्वृत्या; 'sleeping at e.' सुखसुप्त. 2 सौकर्यं, अनायासः, सुकरत्वं, सुखं, लीला. -*v. t.* लघयति (D.), लघूकृ 8 U, प्र उप-शम् c. (शमयति), सां(शां)त्व् 10: ह्व 1 P, अपनी 1 P; 'e. from griefs, burden &c. &c.' दुःखात् &c. मुच् c., दुःखं-भारं-अपनी, उद्धृ, &c. -**Easy,** *a.* सुकर, अयत्नसाध्य, अनायास, सुखसाध्य. 2 सुबोध, सुगम, अविषम; अगहन; gen. ex. by सुख or सु in comp., अज्ञः सुखमाराध्यः; बालानां सुखबोधाय, &c.; 'e. of utterance' सुखोच्चार्य; 'e. style' सुगमा भाषासरणिः; 'e. to get' सुलभ, सुखलभ्य, &c.; 'e. in going' सुखचार; 'e. case' निःशल्योर्थः. 3 निर्वृत, सुस्थ, निश्चिंत, स्वस्थ, सुखिन, निरुद्वेग, शांत, वीतचिंत, निर्वृतिमत्, विशद; 'e. circumstances' सुस्थिति *f.*, द्रव्यानुकूल्यं; 'heart, be not un-e.' हृदय मा उत्ताम्य (S. 1). 4 अनुकूल, अनुरोधिन्, अनुविधायिन्. -ly, *adv.* अनायासेन, सुखं, सुखेन, अयत्नेन, लीलया, अश्रमेण, सुकरं, अक्लेशं, सौकर्येण; सु or सुख in comp. 2 निरुद्वेगं, निश्चिंतं, स्वास्थ्येन. 3 सावकाशं, यथावसरं. -ness, *s.* सौकर्यं, अनायासः, सुखसाध्यता. 2 सुगमत्वं, अवैषम्यं. 3 शांति *f.*, स्वास्थ्यं, अक्लेशः, सुखं. 4 अनुरोधः, आनुकूल्यं, अनुवर्तनशीलता.

Easel, *s.* चित्राधारः, चित्रफलकं.

Easement, *s.* मलविसर्गः. 2 परभूमावधिकारः.

East, *s.* पूर्वदिश् *f.*, पूर्वा, प्राची, पूर्वाशा, ऐंद्री. 2 पूर्वदेशः, पौरस्त्यजनपदः. -*a.*, -erly, -ern, *a.* पूर्व, प्राच् (ची *f.*), पौरस्त्य, प्राच्य, प्राचीन, पूर्वदेशीय, पूर्वदिक्स्थ; प्राङ्मुख; 'the mountain is e. of the sea' समुद्राद् गिरिः पूर्वः; 'the e. mountain' उदयः, उदय-गिरिः-शैलः-अचलः, पूर्वाचलः. -erly, -ward, *adv.* पूर्वेण, पूर्वस्यां दिशि पुरः, पूर्वं, प्राक्, पुरस्तात्, पूर्वदेशे.

Eat, *v. t.* अद् 2 P, जक्ष् 2 P, ग्रस् 1 A, खाद् 1 P, अश् 9 P, भक्ष् 10, भुज् 7 A, घस् 1 P, प्सा 2 P, आस्वाद् 1 A, गॄ 6 P, चर्व् 1 P, अभ्यवहृ 1 P, प्रत्यवसो 4 P; 'e. one's own words' स्ववचनमसत्यं-अवितथं-कृ 8 U, स्ववचनेन विसंवद् 1 P; 'e., drink and, be merry' अश्नीतपिबता, खादतमोदता. -able, *s.* भक्ष्यं, भोज्यं, अभ्यवहार्यं, खाद्यं, भोज्य-वस्तु-द्रव्यं. -er, *s.* खादकः, भक्षकः भोक्तृ *m.*, आशिन् *m.*, अशन-भुज् in comp.; अद्-अद in comp.; 'flesh-e.s' मांसाशिनः, पिशिताशनाः; 'dead-body-e.' कुणप-

भुज्; क्रव्याद्, मांसाद्:, &c. -**ing**, *s.* भक्षणं, खादनं, अशनं, आस्वादनं, भोजनं, &c.; 'e. together' सहभोजनं, जग्धि *f.*; 'e.-house' सिद्धान्नविक्रयशाला

Eaves, *s.* पटलप्रांतः, वलीकः-कं, नीध्रं, वल-(ड) भि-भी *f.* 'e.-dropper' निभृतश्रवणेच्छुः, प्रच्छन्नश्राविन् *m.*

Ebb, *s.* क्षीयमाणा वेला, वेलापरिवर्तनं-परावृत्तः, परावेला. **2** (fig.) क्षयः, हानि *f.*, अपचयः, व्यसनं, नाशः, परिवर्तः; 'e. and flow' व्यसनोदयौ. -*v. i.* क्षि pass., ह्रासं-लयं-गम् 1 P; (वेलावत्) परावृत् 1 A; *See* **Decay.**

Ebony, *s.* कोविदारः, चमरिकः, कुद्दालः, युगपत्रकः.

Ebriety, *s.* मदः, मत्तता, उन्मादः.

Ebriosity, *s.* उन्मादशीलता, क्षीवता.

Ebullition, *s.* उत्सेचनं, उत्सेकः; उद्रेकः, फेनायितं, फेनोद्गमः. **2** अंतःक्षोभः, अंतर्वेगः, चित्तवैक्लव्यं-व्याकुलता, अंतस्तापः.

Eccentric, *a.* सामान्येतर, विषम, विलक्षण, लोकबाह्य, लोकाचारविरुद्ध, विपथगामिन्, व्यभिचारिन्, उत्क्रांतमर्याद, उत्सूत्र. **2** केंद्रभ्रष्ट-च्युत. -**ity**, *s.* वैषम्य, उत्सूत्रता, वैलक्षण्यं, सामान्यविरोधः, लोकाचार-व्यवहार-विरोधः.

Ecclesiastic, *s.* पुरोहितः, आचार्यः, धर्माध्यापकः. -*a.*, -**al**, *a.* धर्मोपदेशविषय, पौरोहित्यसंबंधिन्.

Echo, *s.* प्रतिशब्दः-ध्वनिः-स्वनः-रवः-नादः-वचनं-गर्जनं, अनुरसितं-नादः, प्रतिश्रुत्-ति *f.* -*v. i.* प्रतिस्वन्-ध्वन्-रस्-नद्-स्तन् 1 P, प्रतिरु 2 P, अनुनद्-रस्; कृ 8 U with (*s.*). -*v. t.* Causal of roots above; 'e.-ing the caves' कंदरभुवः प्रतिध्वानयन्-प्रतिध्वनिताः कुर्वन्.

Eclat, *s.* प्रतिष्ठा, शोभा, गौरवं; आडंबरः. **2** स्तुति *f.*, कीर्ति *f.*, ख्याति *f.*, प्रशंसा.

Eclectic, *a.* उद्धारक.

Eclipse, *s.* ग्रहः, ग्रहण, ग्रासः, उपरागः, उपसर्गः, उपप्लवः, ग्रहपीडनं. -*v. t.* ग्रस् 1 A. प्र-आ-च्छद् 10, तिमिरयति (D.), ग्रह् 9 P. उपसृज् 6 P. उप-प्लु 1 A. उपरंज् c. **2** (fig.) प्र-आ-छद्, (गुणवत्तरपात्रेण छाद्यंते गुणिनां गुणाः P. I. 10); प्रत्यादिश् 6 P; 'Urvasi e. s Lakshmi, proud of her beauty' उर्वशी प्रत्यादेशो रूपगर्वितायाः श्रियः (V. 1.). -**ed**, *a.* उपरक्त, उपसृष्ट, ग्रस्त, उपप्लुत, सोपप्लव, ग्रहपीडित. **2** तमोवृत, प्रच्छन्न, मलिनप्रभ. **3** प्रत्यादिष्ट, प्रत्याख्यात.

Ecliptic, *s.* क्रांतिवृत्तं-मंडलं, रविमार्गः.

Economy, *s.* निर्वाहः-हणं, प्रणयनं, नयः, नीति *f.*; 'e. of the house' गृहकार्यनिर्वाहः, गार्हस्थ्यं. **2** परिमित-मित-व्ययः, स्वल्प-विवेक-व्ययः, अमुक्तहस्तत्वं. **3** विन्यासः, विरचनं, प्रकल्पनं, संविधानं. **4** (Political) अर्थशास्त्रं, राजनीतिः-शास्त्रं. -**ic**, -**ical**, *a.* मित-स्वल्प-व्यय, अमुक्तहस्त. **2** कार्यनिर्वाहसंबंधिन् -**ically**, *adv.* मित-स्वल्प-व्ययेन, अमुक्तहस्त. -**ist**, *s.* मितव्ययिन् *m.*, अमुक्तहस्तः. **2** अर्थशास्त्रज्ञः, राजशास्त्रविद् *m.*, नीतिज्ञः. -**ize**, *v. t.* मितं व्यय् 10 (व्यययति); स्वल्पशः विनि-प्र-युज् 7 A, 10. -*v. i.* मितव्ययेन गृहकार्याणि निर्वह् c. or प्रणी 1 P.

Ecstasy, *s.* हर्षोन्मादः, आनंदभरः, प्रहर्षः, प्रमदः, अत्यानंदः, संमोहः, उन्मादः. -**ed**, *a.* हर्षोन्मत्त, -पुलकित, हर्षमूढ-जड. -**Ecstatic** -**al**, *a.* उन्मादिन्, संमोहिन्, परमानंदप्रद मोहक.

Ecumenical, *a.* सर्वसाधारण (णी *f.*).

Eczema, *s.* दद्रु *m.*, पामन् *m.*, पामा.

Edacious, *See* **Greedy.**

Eddy, *s.* आवर्तः, भ्रमः-मि *f.*, भ्रमरकः.

Edentated, *a.* निर्दशन, नीरद.

Edge, *s.* धारा, अग्रं, कोटि-आणि *f.*, पालि-ली *f.*, अश्रि *f.*-श्री. **2** उपांतः, सीमा, प्रांतः, परिसरः, पर्यंतः, उत्संगः; समंतः. **3** अंचलः, दशाः pl. (of garments). **4** तेजस् *n.*, तीक्ष्णता, निशितता; 'e. of a brook' कच्छः, कूलं, तीरं, तटं; 'two or double e.-ed' द्विधार, उभयतस्तीक्ष्ण; कार्यद्वयसाधक; 'setting the teeth on e.' दंतहर्षः. -*v. t.* प्रांतयति (D.), पर्यंतेन सनाथीकृ 8 U. **2** शो 4 P, तिज् c., तीक्ष्णीकृ. -**ed**, *a.* कोटिमत्, धारासनाथ, तीक्ष्ण, सधार; 'sharp e.' तीक्ष्णाग्र, निशितधार. -**less**, *a.* अतीक्ष्ण, धाराहीन.

Edible, *a.* खाद्य, भक्ष्य, भोज्य.

Edict, *s.* शासनं, राजाज्ञा, राजशासनं; 'written e.' आज्ञा-शासन-पत्रं.

Edifice, *s.* भवनं, सदनं, हर्म्यं, मंदिरं, गृहं, प्रासादः, सौधं.

Edify, *v. t.* उत्कृष् 1 P, उन्नी 1 P, उन्नतिं-उत्कर्षं प्राप् c. **2** ज्ञानं वृध् c., शिक्ष् c., उपदिश् 6 P, मोहं-भ्रांतिं-नश् c. or निरस् 4 U. -**ed**, *a.* प्राप्तज्ञान, निरस्तमोह, उपदिष्ट. -**ication**, *s.* ज्ञानप्राप्ति-वृद्धि *f.*, उपदेशः, शिक्षणं. -**ing**, *a.* उपदेशक, ज्ञानवर्धक.

Edit, *v. t.* शोधयित्वा प्रकाश् c., शुध् c. **2** लिख् 6 P. -**ion**, *s.* प्रकाशनं, शोधनं, प्रकटीकरणं. **2** आवृत्ति *f.* -**or**, *s.* प्रकाशकः. **2** लेखकः.

Educate, *v. t.* विनी 1 P, शास् 2 P, अनुशास्, प्रबुध् c., शिक्ष् c., अधि-इ c. (अध्यापयति), संस्कृ 8 U; उपदिश् 6 P, **2** विद्यादानेन पा c. (पालयति) or संवृध् c. or पुष् c. -**ed**, *a.* कृत-गृहीत-उपात्त-लब्ध-विद्य, शिक्षित, प्रबुद्ध; संस्कृतचित्त, विनीत, व्युत्पन्न, कृताभ्यास, लब्धज्ञान. -**ion**, *s.* वि-

नयः, शिक्षा-करणं, अध्यापनं, अनुशासनं, संस्कारः, विद्यादानं-ग्रहणं-प्राप्ति *f.*, व्युत्पत्ति *f.*, उपदेशः. **2** पोषणं, संवर्धनं. **-or,** *s.* विनेतृ *m.*, शिक्षकः, प्रबोधकः.

Educe, *v. t.* निष्कृष् 1 P, निर्ह्वे 1 P.

Eel, *s.* जलव्यालः, अंधाहिः *m.*

Effable, *a.* कथनीय, निर्वचनीय; वाच्य; 'in-e.' अनिर्वचनीय; 'in-e. joy' कोपि आनंदः, किमपि सुखं.

Efface, *v. t.* अप-प्र-व्या-उद्-निर्-मृज् 2 P or c., विनश् c., उच्छिद् 7 P, विलुप् 6 P or c., उद्-हृ 1 P, उन्मूल् 10. **-v. i.** उन्मृज् 2 P. **-ment,** *s.* अपमार्जनं, लोपः, व्यामर्दः; 'e. of colours' वर्णिकोच्छ्वासः (S. 6).

Effect, *s.* कार्यं, नैमित्तिकं; उत्पन्नं, निष्पन्नं, सिद्धि *f.* **2** फलं, परिणामः, फलोदयः, उत्तरफलं, अंतः. **3** अर्थः, प्रयोजनं, गुणः, फलं, प्रभावः. **4** अभिप्रायः, आशयः. **5** निष्पत्तिसिद्धि *-f.*; 'of no e.' निष्फल, निष्प्रयोजन, निर्गुण; 'to take e.' फल् 1 P, मूर्च्छ् 1 P, (छाया न मूर्च्छति मलोपहतप्रसादे दर्पणतले S. 7); 'to take no e.' ex. by कुंठ, (यत्रां तपोवीर्यमहत्सु कुंठं K. III. 12); 'to this e.' इति, एतदभिप्राय *a.*; 'to what e.' किमर्थं, केन हेतुना; 'to destroy the e. of' निष्फली-मोघी-कृ 8 U, 'in e.' अर्थतः, वस्तुतः, तत्त्वतः. **6** (E. s.) विभवः, द्रव्याणि, धनसामग्री, रिक्थं. **-v. t.** कृ 8 U, विधा 3 U, सं-निः-पद् c., साध् 5 P or c., निर्वृत् c., निर्वह् c. **2** जन् c., उत्पद् c. **-ive,** *a.* कार्यसाधक, फलवत्, निष्पादक, संपादक, फलोत्पादक; 'e. speech' हृदयग्राहि वचः. **-ual, -Efficacious,** *a.* फलोत्पादक, गुणावह, अमोघ, अव्यर्थ, गुणवत्, सिद्धिकर (री *f.*), कार्यसाधक, सफल. **2** प्रबल, समर्थ, सप्रभाव, क्षम, अलंतम. **-ually,** *adv.* अमोघं, सफलं, निष्पत्तिपूर्वं, अव्यर्थं. **2** प्रभावेण, सामर्थ्येन. **-uate,** *v. t.* कृ, संपद् c., &c.

Effeminate, *a.* क्लीब, दुर्बल, सुकुमार. **2** स्त्रैण (णी *f.*), स्त्रीधर्मन्, स्त्रीवदाचारिन्, स्त्रीप्रकृति, स्त्रीगुणाविशिष्ट; स्त्रीभाव; 'an e. man' क्लीबः, कापुरुषः, मेहेनुरः. **-v. t.** क्लीबीकृ 8 U, दुर्बली-निष्पुरुषी-कृ. **-ly,** *adv.* क्लीबवत्, नारी-स्त्री-वत्, स्त्रीधर्मानुसारेण. **-Effeminacy,** *s.* क्लीबता, दौर्बल्यं, स्त्रीत्वं, स्त्रैणं, स्त्रीधर्माचरणं, सौकुमार्यं, मृदुता.

Effervesce, *v. i.* बुद्बुदायते (D.), फेनायते (D.), उत्सिच् pass., उच्छूनभिदु, फेनिलीभू. **-ence,** *s.* फेनोद्गमः, उत्सेचनं, बुद्बुदायितं, फेनिलता, उच्छूनीभावः, मंडोद्गमः. **2** उत्तापः, संक्षोभः; आलोडनं. **-ing,** *a.* फेनिल, फेनायमान.

Effete, *a.* जीर्ण, दुर्बल, निःशक्ति, क्षीण, निःसत्त्व, क्षीणशक्ति. **2** वंध्य, निष्फल, मोघ.

Efficacy, *s.* प्रभावः, बलं, सामर्थ्यं, गुणः, शक्ति *f.*, तेजस् *n.*, क्षमता, अमोघता, सफलता, फलोत्पादकत्वं. **-ous,** *a.* प्रबल, समर्थ; *See* **Effectual.**

Efficient, *a.* कार्यसाधक, कार्यसिद्धिक्षम, कार्योपयुक्त, विचक्षण, कर्मक्षम, अलंकर्मीण, निपुण; *See* **Effectual** also. **-ly,** *adv.* अमोघं, सिद्धिपूर्वं, निपुणं, विचक्षणतया. **-Efficiency,** *s.* कार्यक्षमता, कार्यसिद्धिक्षमता, नैपुण्यं, वैचक्षण्यं.

Effigy, *s.* प्रतिमा, मूर्ति-प्रतिकृति *f.*, प्रतिरूपं.

Efflorescence, *s.* पुष्पोत्पादनं, प्रस्फोटनं. **2** वमु *m.*

Effluence, *s.* प्रवाहः, निर्गमः, प्रस्रवः, निःस्रवणं.

Effluvium, Effluvia, *s.* उद्गारः, वासः. **2** दुर्गंधः, पूतिगंधः.

Efflux, Effluxion, *s.* प्रवाहः, निस्रावः, ओघः, निःसारः-सरणं, निर्गमः.

Effort, *s.* प्र,-यत्नः, उद्यमः, व्यवसायः, आयासः, चेष्टा, चेष्टितं; 'to make e. s' उद्यम् 1 P; *See* **Attempt.**

Effrontery, *s.* धार्ष्ट्यं, वैयात्यं, निर्लज्जत्वं, प्रागल्भ्यं, प्रतिभानं.

Effulgent, *a.* दीप्तिमत्, तैजस (सी *f.*), उज्ज्वल, सुप्रभ, तेजस्विन्. **-Effulgence,** *s.* तेजस् *n.*, दीप्ति-कांति *f.*, प्रभा; त्विष् *f.*, शोभा; *See* **Brightness.**

Effuse, *v. t.* प्र-निः-सृ c., प्रसृ 6 P, उत्-वि-सृज् 6 P, वर्ष् c., नि-अव-सिच् 6 P. **-ion,** *s.* उत्सर्गः, निषेकः, स्रावः, मोक्षणं, अवपातनं.

Egg, *s.* अंडं, पेशि-शी *f.*, कोषः-शः; 'lay e. s' अंडमोक्षणं कृ 8 U, अंडानि सू 2 A; 'e. on' *v. t.* प्रोत्सह् c.; *See* **Prompt.**

Eglantine, *s.* अरण्यजपा-वा.

Ego, *s.* जीवात्मन् *m.* **-ism,** *s.* आत्म-हितं-लाभः. **2** अहंप्रत्ययः, अहंभावः. **-ist,** *s.* आत्मश्लाघिन् *m.* **2** अहंप्रत्ययवादिन्.

Egotism, *s.* अहंकारः, आत्मश्लाघा-स्तुति *f.*, आत्माभिमानः, ममता. **-Egotist,** *s.* आत्मश्लाघिन्-अहंकारिन्-आत्माभिमानिन् *-m.*, विकत्थनशीलः. **-ic, -ical,** *a.* अहंकारिन्, दृप्त, गर्वित; *See* **Arrogant.** **-ically,** *adv.* सदर्पं, आत्मश्लाघापूर्वं.

Egregious, *a.* अत्यंत, असाधारण (णी *f.*), विशिष्ट, प्रख्यात, प्रसिद्ध, उत्तम, प्रमुख; oft. by अति pr.; 'an e. rogue' सुप्रसिद्धः शठः; अतिमूर्खः, &c. **-ly,** *adv.* अत्यंतं, अतीव, भृशं, अतिमात्रं, सातिशयं.

Egress, *s.* निर्गमः, निष्क्रमः, निर्याणं, निःसरणं, अपसारः, निर्गति *f.*

Eight, *a.* अष्टन्, अष्टौ; 'in e. ways.' अष्टधा; 'e. times' अष्टकृत्वः; 'e.-fold' अष्टगुण.

Eighteen, *a.* अष्टादशन्.

Eighty, *a.* अशीति *f.*

Either, *pron., a.* अन्यतर; 'on e. side' उभयतः. —*conj.* (-or) वा-वा, or वा singly.

Ejaculate, *v. i.* सहसा उदीर् 10 or उच्चर् c., प्रार्थना उदाहृ 1 P. **2** उद्गॄ 6 P. उत्क्षिप् 6 P. **-ion,** *s.* उद्गारः, आक्रंदनं, सहसा उदीरणं, उद्गारणं.

Eject, *v. t.* निरस् 4 U, निराकृ 8 U, निःसृ c.; *See* **Drive away, Discharge. 2** उत्क्षिप्-उद्गॄ-6 P. **-ion,** *s.* निःसारणं, निराकरणं, निष्कासनं; अधिकाराद् भ्रंशनं.

Ejulation, *s.* विलपनं, परिदेवनं, आर्तनादः, आक्रंदनं.

Eke, *v. t.* वृध् c., विस्तॄ c., प्रसृ c., तन् 8 U. —*adv.* अपिच.

Elaborate, *v. t.* महाश्रमेण साध् c., or निष्पद् c. or निर्मा 3 A or विधा 3 U or प्रकॢप् c. **-ed,** *a.* बहुश्रमसिद्ध, महाप्रयत्नकृत-विरचित-प्रकल्पित. **-ly,** *adv.* महायत्नेन, बहुश्रमेण, महायासेन. **-ion,** *s.* बहुश्रमेण निर्माणं.

Elapse, *v. i.* व्यति-इ 2 P. अतिक्रम् 1 U, 4 P, व्यतिक्रम्, गम् 1 P: 'days having e.-ed' दिनेषु गच्छत्सु.

Elastic, *a.* स्थितिस्थापक, प्रकृतिपाणक. **-ity,** *s.* स्थितिस्थापकता-त्वं.

Elate, *v. t.* उत्सिच् 6 P, दृप् c., आध्मा 1 P. दर्पेण उद्-श्वि c. or उद्-हन् 2 P: *See* **Puff. 2** प्रहृष् c., प्रमुद् c., उल्लस् c. —*a.*, **-ed,** *a.* दर्पाध्मात, उद्धत, गर्वित, उत्सिक्त, मदोद्धत, दृप्त, गर्वोच्छ्रित. **2** प्रहृष्ट, प्रमुदित, सोल्लास, हृष्टचित्त. **-ion,** *s.* गर्वः, दर्पः, औद्धत्यं, प्रहर्षः, चित्तोल्लासः.

Elbow, *s.* कूर्परः, कफ(फो)णि *m. f.* **2** वंकः, पुटभेदः. —*v. t.* कूर्परेण आहत्य बहिष्कृ 8 U.

Elder, *a.* ज्यायस्, वरीयस्, अग्रज, पूर्वज, वर्षीयस्, वयोज्येष्ठ; 'e. brother' अग्रजः, अग्रजन्मा, ज्यायान् भ्राता. —*s.* गुरुः, वृद्धः; 'e. s, elderly persons' गुरुजनः, गुरवः, आर्यजनः, वृद्धाः.

Eldest, *s.* ज्येष्ठ, वर्षिष्ठ, वरिष्ठ, श्रेष्ठ, सर्वज्येष्ठ.

Elect, *v. t.* वृ 5 U or 10 (वरयति), वृ 9 U. **2** ग्रह् 9 P, आदा 3 A, स्वीकृ 8 U. **3** नियुज् 7 A, 10, निरूप् 10. निर्वच् 2, 'self-election' स्वयंवरः; 'self-e. ed bride स्वयंवरवधूः; 'e. ed him as her husband' पतित्वे तं वरयामास. —*a.*, **-ed,** *a.* नियुक्त, निरूपित, वृत, निर्वाचित; स्यावृत्त; 'a person e.' नियोज्यः, नियोगिन् *m.* निर्वाचितः. **-ion,** नियोजनं, वरणं, निर्वाचनं, वृति *f.* **-ive,** *a.* जनोन्नियुक्त; 'e. right' वरणाधिकारः; 'e. municipality' जनानियुक्तसभा ग्रामपालिका **-or,** *s.* नियोजकः, निर्वाचकः, वरणाधिकारविशिष्टः; 'body of e. s, electoral body' नियोजकगणः.

Electer, Electrum, *s.* कांस्यं, मिश्रधातु *m.*

Electric, *a.* वैद्युत (ती *f.*), विद्युन्मय (यी *f.*), विद्युद्विषय. **-ity,** *s.* तडित्-विद्युत्-वैद्युतशक्ति *f.*

Electrobus, *s.* विद्युत्-यानं-वाहनं.

Electrocute, *s.* विद्युन्मरणेन दंड् 10.

Electuary, *v. t.* लेह्यं, अवलेहः.

Eleemosynary, *a.* दरिद्रार्थ, दरिद्रोपकारिन्.

Elegant, *a.* चारु, ललित, सुंदर, सुरूप, लावण्यवत्, श्लील, अग्राम्य, सुभग. **2** (As composition) सुरस, ललित, चारु. **-ly,** *adv.* सविलासं, चारु, ललितं. **-Elegance, -cy,** *s.* चारुता, सौंदर्यं, विलासः, लावण्यं, शोभा, विभ्रमः, लालित्यं; 'e. of words' पदलालित्यं.

Elegy, *s.* करुणरसं गीतं, शोकगाथं-गीति *f.*

Elegiac, *a.* करुणामय (यी *f.*), शोकप्रधान.

Element, *s.* भूतं, बीजं, मूलं, मूलवस्तु *n.* **2** तत्त्वं. **3** अवयवः, भागः, अंशः. **4** आरंभः, उपक्रमः, मूलतत्त्वं, बीजभूतं ज्ञानं. **5** वस्तुमार्गः; 'out of his e.' अस्थाने. **-al,** *a.* भौत (ती *f.*), भौतिक (की *f.*). **-ary,** *a.* अव्याकृत, शुद्ध, निरवयव. **2** मूल in comp. प्रारंभक.

Elephant, *s.* गजः, हस्तिन्-करिन् *m.*, मातंगः, मतंगजः, कुंजरः, नागः, वारणः, इभः, द्विरदः, द्वि-अनेक-पः, दंतिन् *m*, दंतावलः, स्तंबेरमः; 'she-e.' करिणी, करेणु *f.*-णुका, वशा, धेनुका; 'a young e.' कलभः, करिशावकः; 'e. driver' हस्तिपः-पकः, आधोरणः, महामात्रः, निषादिन् *m.*; 'wild e.' वनगजः, वन्यः करी; 'furious or rutting (e.)' मदोत्कटः, मदकलः, प्रभिन्नः, गर्जितः, मत्तः; 'e. out of rut' उद्वांतः; निर्मदः; 'head of a herd of e. s' यूथनाथः, यूथपः; 'herd of e. s' हास्तिकं, गजता, गजयूथं; 'war e.-s' गजघटा; 'e. s of the quarters' दिग्गजाः; 'frontal globe of an e.' कुंभः; 'e.'s fore-head' ललाटं, अवग्रहः; 'his eyeball' इ(ई)षि(षी)का, अक्षिकूटकं 'corner of his eye' निर्याणं; 'root of his ear' चूलिका; 'his withers' आसनं, स्कंधदेशः; 'his side' पार्श्वभागः, पक्षभागः; 'the temple-juice' मदः, दानं; 'water emitted from the trunk' वमथुः, करशीकरः; 'his roaring' बृंहितं, गर्जितं; 'the whip to strike him' तोत्रं, वेणुकं; 'binding-post' आलानं; 'binding chains' शृंखलं, अंकुशः, निगडः; 'caparisoning of an e.' कल्पना, सज्जना; 'coloured housings' प्रवेणी, आस्तरणं, वर्णः, परिस्तो(स्तो)मः, कुथः.

Elephantiasis, *s.* श्लीपदं, शिलीपदं.

Elevate, *v. t.* उन्नम् c. (उन्नमयति), उच्छ्रि c., उद्यम् 1 P, उत्कृष् 1 P; उत्था c., (उत्थापयति), उन्नी 1 P, अधिरुह् c. (रोपयति), उन्नति-उत्कर्ष-नी or कृ 8 U; 'e. to a high office' उन्नतपदे नियुज् 7 A, 10, उत्कृष्टपदं प्राप् c. **-ed,** *a.* अधिरोपित, उन्नीत; उन्नतपदनियुक्त. **2** उच्छ्रित, उत्तुंग, उन्नत, सोच्छ्राय; *See* **High. -ion,** *s.* उन्नति *f.*, उत्कर्षः; उच्छ्रायः, उत्थापनं, अधिरोपणं, उन्नपदप्रापणं, उदयः. **2** उत्सेधः, उत्तुंगता, उच्छ्रायः, उन्नतस्थानं; *See* **Height.**

Eleven, *a.* एकादशन्. **-Eleventh,** *a.* एकादश (शी *f.*); 'what is the use of doing things at the e. hour' प्रोद्दीप्ते भवने तु कूपखननं प्रत्युद्यमः कीदृशः (Bh. II. 88).

Elf, *s.* वेतालः,भूतः, पिशाचः, अपदेवता. **-ish,** *a.* पैशाच (ची *f.*).

Elf-lock, *s.* जटा, सटा.

Elicit, *v. t.* निर्गम् c. (गमयति), निष्कृष् 1 P, उद्धृ c., निःसृ c., प्रकाश् c., अपवह् 1 P or c., आविष्कृ 8 U, निर्णी 1 P, ज्ञा 9 U or c. (ज्ञापयति). **-ation,** *s.* निष्कर्षणं, निर्गमनं, &c.

Elide, *v. t.* लुप् 6 P or c. **-Elision,** *s.* लोपः.

Eligible, *a.* वरणीय, नियोज्य, ग्राह्य, आदेय.

Eliminate, *v. t.* नश् c., निष्कस् c., विलुप् 6 P or c., निराकृ 8 U. **-ion,** *s.* लोपः, नाशः, आहरणं, अपनयनं.

Elite, *s.* शिष्टाः; ex. by सार-विशेष-रत्न in comp.

Elixir, *s.* रसायनं, तेजोवर्धनं.

Ellipse, *s.* अंडवृत्तं, उपवृत्तं-मंडलं. **-Elliptic,** *a.* अंडाकार, अंडाकृति.

Ellipsis, *s.* न्यूनपदं, अध्याहारः, शब्दलोपः. **2** पद-वाक्य-आकांक्षा; 'supplying an e.' आकांक्षापूरणं. **-Elliptical,** *a.* न्यूनपद; अध्याहार्य, अभ्यूहनीय.

Elocution, *s.* वाक्शक्ति *f.*, वक्तृत्वं, वाक्पटुता, वाग्मिता. **2** व्याहारः, वाणी.

Elongate, *v. t.* दीर्घीकृ 8 U, आयम् 1 P; वितन् 8 U. **-ed,** *a.* आयत, आयामवत्, लंबाकृति, वितत. **-ion,** *s.* दीर्घीकरणं, प्रतानं, विततिः *f.*, आयति *f.*

Elope, *v. i.* अलक्षितं पलाय् 1 A or अपसृप् 1 P. **-ment,** *s.* गूढ अपसर्पणं, पलायनं.

Eloquent, *a.* वाग्मिन्, वागीश, वाग्विदग्ध, वक्तृ, वाक्पटु, शब्दचतुर. **-ly,** *adv.* वाग्विभवेन, शब्दचातुर्येण, वाक्पटुतया. **-Eloquence,** *s.* वाक्पाटव-शक्ति *f.*, वाग्मिता, वाग्विभवः, वक्तृत्वं.

Else, *a.* अन्य-इतर-अपर-*pron. a.*, भिन्न, व्यतिरिक्त; 'what e.' किमन्यत्, अथ किं; 'who e.' कोऽपरः. *-conj.* नो (नो) चेत्, अन्यथा, इतरथा; एतद्विना, एतद्व्यतिरेकेण; 'e. where' अन्य-इतर-पर-त्र, स्थानांतरे, भिन्न-अन्य-स्थाने.

Elucidate, *v. t.* व्याख्या 2 P, व्याकृ 8 U, वि-वृ 5 U, स्पष्टी-विशदी-कृ; *See* **Explain. -ion,** *s.* व्याख्यानं, स्पष्टीकरणं, विवरणं. **-or,** *s.* व्याख्यातृ *m.*, प्रकाशकः, विवरणकृत् *m.*

Elude, *v. t.* कौशलेन परिहृ 1 P, वंच् 10, छलेन अपसृप्-निर्गम् 1 P or पलाय् 1 A, (with abl.); 'e. ing the senses' इंद्रियागोचर; 'it e. s grasp' ग्रहीतुं न शक्यते. **-Elusion,** *s.* छलेन परिहरणं; अलक्षितं अपसरणं or निर्गमः. **-Elusive,** *a.* निर्गमपर, परिहारिन्. **-Elusory,** *a.* छलिन्, मायिन्.

Elysium, *s.* वैकुंठं, स्वर्गः, नंदनं, आनंदस्थानं. **-Elysian,** *a.* परमानंदप्रद, स्वर्गीय.

Emaciate, *v. t.* कृशीकृ 8 U, क्षै c. (क्षपयति) क्लिश् 9 P, ग्लै c. (ग्लपयति-ग्लापयति), शुष् c., क्षीण *a.* कृ. *-v. i.* क्षै-ग्लै 1 P, शुष् 4 P, विशृ-क्षि-pass., कृशीभू. **-ed,** *a.* क्षीण, क्षीणशरीर-शक्ति, कृश, क्षाम, ग्लान, क्षीण-शुष्क-मांस; अपचित; 'e. by hunger' क्षुत्क्षामकंठ. **-ion,** *s.* कृशता, क्षामता, क्षीणता कार्श्यं, शरीरशोषणं, मांसक्षयः, अपचयः.

Emanate, *v. i.* उत्पद् 4 A, निर्गम् 1 P, निःसृ 1 P, उत्-प्र-भू 1 P, जन् 4 A, निःसृ 1 P, प्रवृत् 1 A. **-ion,** *s.* उत्पत्ति *f.*, उद्भवः, प्रभवः, उद्गमः, निर्गमः, प्रवृत्ति *f.* **-ive, -Emanant,** *a.* उद्भूत, उत्पन्न, जात, ज, जन्य, प्रभव in comp.

Emancipate, *v. t.* मुच् 6 P or c., वि-निर्; मोक्ष् 10, उद्धृ 1 P, निस्तॄ c., विमुच् 6 P. **-ion,** *s.* विमोचनं, मोक्षः, मुक्ति *f.*, उद्धारः, निस्तारः. **2** मुक्ति *f.*, मोक्षः; *See* **Beatitude. -or,** *s.* मोचकः, मोक्षकः.

Emasculate, *v. t.* वृषणौ छिद् 7 P or कृत् 6 P, पुंस्त्वं हृ 1 P, षंढी-क्लीबी-कृ 8 U. **-ed,** *a.* हतवीर्यः, हृतपुंस्त्वः, छिन्नवृषणः, शुष्कशून्यः, षंढः-ढः, क्लीबः, नपुंसकः. **-ion,** *s.* वृषणच्छेदः, पुंस्त्वहरणं.

Embale, *v. t.* भांडं कृ 8 U, पुटक कृ.

Embalm, *v. t.* रक्ष् 1 P; तैले निषिच् 6 P, क्षयात् रक्ष्. **2** सुरभीकृ 8 U, आमोदेन पूर् 10. वास् 10.

Embank, *v. t.* सेतुना-बंधेन-बंध् 9 P. **-ment,** *s.* सेतु-वप्र-बंधः, मृत्तिकाचयः, वप्रः.

Embar, *v. t.* निरुध् 7 U. निषिध् 1 P.

Embargo, *s.* निषेधः, वाणिज्यकर्मनिषेधः, अवरोधः.

Embark, *v. t.* नौकायां नि-प्र-विश् c. or निधा 3 U. —*v. i.* नावं or पोतं-आ-अधि-रुह् 1 P, or प्रविश् 6 P. **2** व्या-पृ 6 A. अभि-युज् pass. (with loc.) ; प्रारभ् 1 A (with acc.). **-ation,** *s.* नौकारोहणं-रोपणं-प्रवेशनं. **2** व्यापारः, अभियोगः, प्रारंभः, उपक्रमः.

Embarrass, *v. t.* आकुलयति (D.). वि-व्या-मुह् c., व्यग्रीकृ 8 U, संभ्रम् c. (भ्रमयति), आकुलीकृ; 'I am really e. ed' सत्यमाकुलीभूतोस्मि (S 2) **2** बाध् 1 A. क्लिश् 9 P, उपरुध् 7 U, अभिभू. **-ed,** *a.* आ-व्याकुल, व्यग्र, मोहित, संभ्रांत, मूढ. **2** बाधित, उपरुद्ध; क्लिष्ट, अभिभूत; 'in e. circumstances' आपद्गत, दुःस्थ, कृच्छ्रगत, दुर्गत; 'e. smile' विलक्षस्मित. **-ment,** *s.* व्याकुलता, व्यग्रता, संभ्रमः, व्यामोहः, आकुलत्वं, क्लेशः, बाधः-धा, दुःखं, उपरोधः.

Embassy, *s.* दौत्यं, दूतधर्मः-क्रिया; 'sent on an e.' दूतः, दौत्येन प्रस्थापितः.

Embattle, *v. t.* व्यूह् 1 U or c., व्यूहेन रच् 10 or सज्जीकृ 8 U or व्यव-स्था (व्यवस्थापयति), व्यूहरचनां कृ. **-ed,** *a.* सन्नद्ध, सज्जीकृत, व्यूहेन रचित.

Embedded, *a.* निहित, निविष्ट, न्यस्त.

Embellish, *v. t.* भूष् 10, अलंकृ 8 U, मंड् 10, शुभ् c., भ्राज् c., परिष्कृ, प्रसाध् c. **-ment,** *s.* प्रसाधनं, भूषणं; *See* **Ornament. 2** नेपथ्यं, आहार्यं, वेशः, आकल्पः.

Embers, *s.* भासितं, भस्मन् *n.*; अंगारशेषं; अंगारोच्छिष्टं.

Embezzle, *v. t.* छलेन आत्मसात्कृ 8 U, स्वकीयं कृत्वा उप-विनि-युज् 7 A, 10; ग्रस् 1 A. **-ment,** *s.* छलेन अपहारः or उपयोगः or आत्मसात्करणं, ग्रसनं; अप-नि-ह्नवः.

Embitter, *v. t.* तिक्तीकृ 8 U. **2** प्रकुप् c., उद्-दीप् c., कलुषीकृ. **3** क्लिश् 9 P. दु 5 P.

Emblazon, *v. t.* विभूष् 10, मंड् 10.

Emblem, *s.* लक्षणं, लांछनं, केतनं, केतुः, व्यंजनं, संज्ञा, ध्वजः, चिह्नं, लिंगं, पताका. **-atic, -atical** *a.* लाक्षणिक (की *f.*). व्यंजक, बोधक, लिंगिन्, सूचक, द्योतक.

Exalt, *v. t.* उन्नम् c. (नमयति), नी 1 P or प्राप् c., उन्नी 1 P, उच्छ्रि c., उत्कृष् 1 P; उच्चपदं, प्राप् c. or अधिरुह् c. (रोपयति), उत्कृष्टपदे नियुज् 7 A, 10. **–ation**

s. उन्नति f., उच्छ्रायः, उन्नमनं, उत्कर्षः, उच्चपदारोपणं; 'self e.' आत्मोत्कर्षः. -ed, a. उन्नत, उच्छ्रित, उत्कृष्ट, परम, उच्चैः; 'e. place' उच्चैःपदं; 'e. rank' गौरवपदं; See Elevate.

Examine, v. t. परीक्ष् 1 A, निरूप् 10, अनुसंधा 3 U, विचर् c., विमृश् 6 P. अवेक्ष्, आ-पर्या-लोच् 10. 2 निर्णी 1 P, निश्चि 5 U, परिच्छिद् 7 P. 3 अनुयुज् 7 A, प्रच्छ् 6 P: मृग 10 A, अन्विष् 4 P, चर्चा कृ 8 U, ज्ञा desid. (जिज्ञासते). 4 निरीक्ष्, समीक्ष्, परीक्ष्, निरूप्, दृश् 1 P, आ-अव-लोक् 1 A, 10. -ation, s. परीक्षा-क्षणं, विचारः-रणं-णा, निरूपणं, अनुसंधानं, अनुयोगः, प्रश्नः. 2 निरीक्षणं, आलोचनं, संदर्शनं, अवेक्षा; 'judicial e.' व्यवहारदर्शनं. -er, s. परीक्षकः, विचारकः, अनुयोक्तृ m., प्राश्निकः.

Example, s. उदाहरणं, निदर्शनं, दृष्टांतः; 'for e.' यथा, तथाहि. 2 आदर्शः, प्रमाणं; 'follow an e.' अनुकृ 8 U, प्रमाणं मन् 4 A, वर्त्म अनुगम् 1 P, पदमनुविधा 3 U, (पदमनुविधेयं च महतां). -Exemplary, a. प्रमाणी-आदर्शी-भूत, दृष्टांतयोग्य, प्रमाणयोग्य. 2 महत्त्व, श्लाघ्य; अनुकरणीय-करणार्ह. -ly, adv. प्रमाणवत्, प्रमाणमिव, दृष्टांतरूपेण, अनुकरणीयतया. -Exemplify, v. t. उदाहृ 1 P, दृष्टांतेन स्पष्टीकृ 8 U or प्रकाश् c. or प्र-दृश् c. -ication, s. उदाहरणं, निदर्शनं, उदाहरणेन स्पष्टीकरणं.

Exanimate, a. निर्जीव, विचेतन. 2 निरुत्साह, भग्नोत्साह.

Exasperate, v. t. प्रकुप् c., संक्षुभ् c., क्रुध् c., क्रुध् c., सं-रभ् c. (रंभयति), क्रोधं उद्दीप् c. -ed, a. प्रकोपित, संरब्ध, जातामर्ष, इद्धमन्यु, प्रवृद्धक्रोध, संक्षुब्ध, प्रक्षोभित. -ion, s. प्रकोपणं-नं, संरंभः, क्रोधोद्दीपनं.

Excavate, v. t. उत्खन् 1 P, निर्भिद् 7 P or c., विद् 10. -ion, s. विदारणं, उत्खननं. 2 खातं, गर्तः-र्ता, रंध्रं, बिलं, सुषिरं; 'e. underneath the ground' सुरंगा. -or, s. खनकः, खातकृत् m.

Exceed, v. t. अति-इ 2 P, अति-क्रम् 1 U, 4 P; स सत्कारो मनोरथानामप्यभूमिः (S. 7) 'e. ed even my expectations'; अति-चर्-गम् 1 P, लंघ् 1 A, 10; See Beyond also. 2 अति-शी 2 A, अति-भू 1 P; See Excel. -ing, a. अतिशयिन्. अतिरिक्त, अधिक, अतिरेकिन्. 2 अत्यंत, परम, पर, भूरि, सु pr., अति pr.; 'e. man's power' अतिमानुष; 'e. written orders' आज्ञापत्रमुल्लंघयन्. -ingly, adv. अत्यंतं, नितांतं, एकांततः, अत्यर्थं, निर्भरं, प्रगाढं, सुतरां, नितरां, प्र-नि-कामं, सातिशयं, अतिमात्रं, अतीव, अति-सु, pr. -Excess, s. उत्कर्षः, गाढता, बाहुल्यं, प्राचुर्यं, उत्सेकः, अतिशयः, उपचयः, आधिक्यं, अतिरेकः, उद्रेकः. 2 पौष्कल्यं, पुष्कलता. 3 मर्यादातिक्रमः, अतिक्रमः, अत्याचारः, असंयमः, अपरिमितता. -ive, a. अत्यंत, अत्यधिक, अत्यर्थ, अतिमात्र, प्रगाढ, पर, परम, सातिशय, निर्भर, उत्कट, नितांत, अपरिमित, एकांत, अतिरिक्त, अतिगुरु, तीव्र; gen. by सु-अति-pr. -ively, adv. अत्यंतं, सु-अति-pr., तीव्रं, बलवत्; See above.

Excel, v. t. अतिशी 2 A, दूरी-अधः-अधरी-कृ 8 U, विशिष् c.; अतिरिच्-विशिष् pass. (with abl. of person); अतिक्रम् 1 U, 4 P, अति-इ 2 P; oft. by जि 1 P, अभि-परा-भू 1 P, तिरस्कृ, धिक्कृ, प्रत्याख्या 2 P, प्रत्यादिश् 6 P. -lence, s. विशिष्टता, उत्कर्षः, प्रकर्षः, अतिशयः, श्रेष्ठता, उत्तमता, संपद् f., 'e. of beauty' रूपसंपद्. 2 गुणोत्कर्षः, गुणविशिष्टता-प्रकर्षः. 3 गुणः, गुणवत्ता, परभागः, उत्कृष्टगुणः. -lency, s. उत्कर्षः, &c. 2 देवः, महाराजः-भागः. -lent, a. विशिष्ट, उत्कृष्ट, उत्तम, श्रेष्ठ, परम, अग्र, वरेण्य, प्रशस्यतम, प्रवर, गुणवत्, सारवत्, गुणोपेत; oft. by वर-विशेष-in comp., and by words like ऋषभः, पुंगवः, व्याघ्रः, सिंहः, शार्दूलः, इंद्रः, प्रकांडः, उद्धः, तल्लजः, मतल्लिका, मचर्चिका, in comp.; पात्रविशेषः 'e. receptacle'; 'e. cow' गोमतल्लिका, गोतल्लजः, गवोद्धः, गोप्रकांडः, &c.; 'e. man' पुरुषर्षभः, पुरुषसिंहः, &c. -lently, adv. सुष्ठु, उत्तमं, सु pr.

Except, v. t. वृज् 10, परिवृज्, अप-वि-हृ 3 P, त्यज् 1 P, अपास् 4 U, मुच् 6 P. 2 व्यावृत् c. (a rule &c.), संकुच् 1 P or c. -prep., -ing, वर्जयित्वा, विहाय, मुक्त्वा, अंतरा-अंतरेण (with acc.), विना (with acc., instr., or abl.), ऋते (with abl.); oft. by वर्जं, व्यतिरिक्तं in comp.; गौतमीवर्जमितरा निष्क्रांताः (S. 4). 2 यदि न. -ion, s. वर्जनं, विवर्जनं, हानं, त्यागः, अपासनं; 'with the e. of'; See (prep.) above. 2 अपवादः, व्यभिचारः; 'rules have e.-s' उत्सर्गाः सापवादाः; 'as general rules are limited (in scope) by e. s' अपवादैरिवोत्सर्गाः कृतव्यावृत्तयः (K. II. 27); 'that saying has no e. s' अव्यभिचारि तद्वचः (K. V. 36), इति लोकवादः न विसंवादमासादयति (Mallinâtha.); 'counter e.' प्रतिप्रसवः, (सुजकांभ्यां कर्तरीत्यस्य प्रतिप्रसवः S. K.). 3 वर्जनीयं, वर्ज्यं. 4 दोषः, बाधः-धा, अपवादः; 'take e.' दोषं ग्रह् 9 U, (नाम दोषं ग्रहीष्यति कुलपतिः S. 3); See Object.-ionable, a. वाच्य, परिहरणीय, वर्ज्य. -ional, a. असाधारण (णी f.), असामान्य, अपवाद-

भूत, अलौकिक (की *f.*); ' e.-ly sharp ' अनन्यसाधारणं पटुः.

Excerpt, *v. t.* उद्-ह्र 1 P, निर्ह्र, संकल् 10 (कलयति); ' e. passages ' चूर्णीकृ 8 U. **-ion,** *s.* उद्धारः, उद्धृतभावः, निर्हारः, चूर्णि *f.*

Exchange, *v. t.* वि-,नि-मे 1 A, प्रतिदा 1 P, 3 U, (तिलेभ्यः प्रतियच्छति माषान्), प्रतिपण् 1 A, व्यति-ह्र 1 P, परिवृत् c. ; ' e. civilities ' सत्कारविनिमयं कृ ; by e. ing clothes ' वेषपरिवर्तनेन-व्यतिहारेण, अन्योन्यसंभिन्नदृशां (Mal. 1) ' who e. ed glances with each other '. **-s.** विनिमयः, परि(री)वर्तः, परिवृत्ति *f.*, परिवर्तनं, नैमेयः, नि(वि)मयः, परिदानं, प्रति-दानं-पणनं, व्यतिहारः ; oft. by अन्योन्य or प्रति in comp. ; 'e. of favours' अन्योन्योपकारः, ' e. of looks ' अन्योन्यदृष्टिपातः, परस्परालोकनं ; ' e. of blows ' प्रतिघातः ; ' in e. for ' विनिमयेन, व्यतिहारेण, प्रतिदानेन. 2 भांड-द्रव्य-विनिमयः. 3 श्रेष्ठिचत्वरं.

Exchequer, *s.* राजधनागारं, राजस्वकोषः ; ' chancellor of the e. ' कोषाधीशः, कोषावेक्षकः.

Excise, *v. t.* राजदेयकरं-शुल्कं-निरूप् 10 or निर्दृ 10 or स्था c. (स्थापयति), **-s.** राजस्वं, करः, शुल्कं. **-man,** *s.* करनिरूपकः, शुल्काधिकारिन् *m.*, कराध्यक्षः, शुल्कग्राहः.

Excision, *s.* उच्छेदः, कर्तनं, उत्पाटनं, उद्धरणं, विनाशः.

Excite, *v. t.* उत्तिज् c., प्रकुप् c., सं-वि-क्षुभ् c., उत्-सं-तप् c., उद्-दीप् c., उद्युज् 10, उत्था c. (उत्थापयति), प्रोत्सह् c., प्रचुद् 10, वृध् c., प्रवृत् c., संधुक्ष् 10 (feelings &c.). 2 जन् c. (जनयति), उत्पद् c., प्रवृध् c.; 'my curiosity is the more e. ed' इदमधिकतरमुपजनितं मे कौतुकं (Ks. 134) ; ' with anger e. ed ' संजातामर्ष, उद्दीपितकोप ; oft. by dat. with or without भू ; 'his speech e.-ed laughter ' तद्वचो हासाय बभूव, *See* **Lead to.** **-able,** *a.* कोपन, उत्तेजनीय, सुलभकोप, क्रोधिल, क्षीप्रकोपिन्. **-ation, -ment,** *s.* उत्तेजनं, उत्तापः, उत्थापनं, प्रकोपः, उद्दीपनं, संतापः-पनं, सं-,वि-,क्षोभः, संरंभः, चित्तोद्वेगः, चित्तोत्तापः मनस्तापः, कोपोद्दीपनं. **-ed,** *a.* संरब्ध, प्रकोपित, क्षुब्ध, उत्तेजित, जातरोष, इद्धमन्यु, संतप्त; सं-वि-क्षोभित, ' in an e. mood ' क्रोधावेशेन; रोषवशं गत. 2 उत्पन्न, जात, जनित. **-er,** *s.* उद्दीपकः, उत्तेजकः, संक्षोभकः.

Exclaim, *v. i.* आ-उत्-क्रुश् 1 P, उच्चैः घुष् 10, तारस्वरेण वद् 1 P, आ-रट् 1 P, उच्चैः उदीर् c. **-Exclamation,** *s.* उत्क्रोशः, आरटनं, घोषणं-णा, उच्चैः स्वरः, उद्गारः ; ' e. of joy ' हर्षनिस्वनः, हर्षोद्गारः.

Exclude, *v. t.* नि-प्रति-षिध् 1 P, नि-अव-रुध् 7 U, नि-वृ c., व्या-वृत् c., (दृष्टान्तः पूर्वपक्षं व्यावर्तयति S. B.), बाध् 1 A, निरस् 4 U. 2 बहिष्कृ 8 U, निःसृ c., निष्कस् c., निराकृ, अपाकृष् 6 P, व्यतिरिच् 7 P or c. 3 वृज् 10, त्यज् 1 P, वि-अप-हा 3 P, मुच् 6 P, अपास् 4 U. **-Exclusion,** *s.* निषेधः, व्यावर्तनं, व्यावृत्ति *f.*, व्यतिरेकः, बाधः-धा. 2 निराकरणं, निःसारणं. 3 वर्जनं, उत्सर्गः, हानं, 'to the e. of ' विहाय, मुक्त्वा, अतिक्रम्य, उज्झित्वा. **-Exclusive,** *a.* व्यावर्तक, निषेधक, निवारक, बाधक. 2 अनन्यसाधारण (णी *f.*); अनन्यसामान्य, अनन्ययुक्त; ' e. of ' विहाय, वर्जयित्वा, मुक्त्वा, हित्वा, रहित-हीन-in comp.; *See* **Except.** **-ly,** *adv.* अनन्यसाधारणं, केवलं, अन्यव्यतिरेकेण, ' I am e. thy servant ' अहं तवानन्यसाधारणो दासः (M. 4). **-ness,** *s.* अनन्यसामान्या वृत्ति *f.*

Excogitate, *v. t.* चिंत् 10, परिक्लृप् c.; *See* **Consider.** **-ion,** *s.* चिंतनं, परिकल्पनं.

Excommunicate, *v. t.* (समाजात्) बहिष्कृ 8 U, निराकृ, अपास् 4 U, भ्रंश् c., च्यु c., अपांक्तीकृ; ' one e. ed ' अपांक्तेयः, बहिष्कृतः. **-ion,** *s.* बहिष्कारः, अपांक्तेयत्वं.

Excoriate, *v. t.* त्वचं-चर्म-उल्लिख् 6 P or निर्घृष् 1 P or कृत् 6 P or छिद् 7 P, निस्त्वची-कृ 8 U. **-ion,** *s.* त्वक्छेदः-भेदः, चर्मक्षति *f.*-विदारणं-उल्लेखनं-पीडनं.

Excortication, *s.* निस्त्वचीकरणं.

Excrescence, *s.* गंडः, विस्फोटः, शोफः ; ' fleshy e. ' अधिमांसं, मांसगंडः.

Excrete, *v. t.* उत्सृज् 6 P, उच्चर् c., निःसृ c.; मलोत्सर्गं कृ 8 U. **-ion, -Excrement,** *s.* विष्ठा, उच्चारः, शकृत् *n.*, पुरीषं, गूथं; *See* **Dung;** ' e. and urine ' विण्मूत्रं, मूत्रपुरीषं. **-al,** *a.* उच्चारित, अवस्कृत, उत्सृष्ट.

Excruciate, *v. t.* अत्यंतं व्यथ् c. (व्यथयति) or बाध् 1 A or संतप् 1 P or c., प्र-मंथ् 9 P. **-ing,** *a.* मर्मच्छिद्-स्पृश्, अरुंतुद, प्रमाथिन्, अतिव्यथाकर (री *f.*), अतितीव्र, नितांतकठिन. **-ion,** *s.* तीव्र-तिग्म-वेदना, अतियातना.

Exculpate, *v. t.* (दोषात्-अपराधात्) वि-परि-मुच् c.; वि-,मुच् 6 P or c., निर्दोषीकृ 8 U, दोषं परि-प्र-मृज् 2 P or क्षल् 10; ' he e. ed himself ' आत्मानं दोषमुक्तं चकार. **-ed,** *a.* निर्दोष, निरपराध, दोषमुक्त, विशुद्ध. **-ion,** *s.* दोषशोधनं-मुक्ति *f.*, अपराधक्षालनं-मार्जनं, &c. **-ory,** *a.* दोषप्रमार्जकमोचक, दोषक्षालन (नी *f.*).

Excursion, *s.* पर्यटनं, भ्रमणं, विहारः, विहरणं. 2 पथत्यागः-भ्रंशः, मार्गातिक्रमः, विचलनं, उत्क्रमः. 3 अभिद्रवः, आक्रमः, आघातः.

Excursive, *a.* भ्रमणशील, त्यक्तमार्ग. 2 सर्वतो धाविन्.

Excuse, *v. t.* क्षम् 1 A, मृष् 1 P, 10, सह् 1 A, तिज् desid. (तितिक्षते). 2 दोषात् मुच् c. or मुच्; 'e. a person' दोषं-अपराधं-क्षम् (with gen.); 'e. a fine' दंडं अवमुच् 6 P or मुच् 6 P; 'e. oneself' अप-व्यप-दिश् 6 P, उत्तरं दा 3 U, अपदेशं-छल-कृ 8 U, आत्मानं विमुच् c.; 'e. ing myself on the ground of head-ache' शिरःशूलस्पर्शनमपदिशन् (D. K. II. 2); 'e. me' प्रसीदतु भवान्. -*s.* अप-व्यप-देशः, उत्तरं, निमित्तं, छलं, छद्मन् *n.*, विमोचनहेतुः. 2 दोषक्षालनं, पापशोधनं, क्षमाप्रार्थना; oft. by हेतुः; 'under the e. of illness' अस्वास्थ्यहेतोः, अनामयापदेशेन. **-less**, *a.* निरुत्तर. 2 अक्षंतव्य.

Execrate, *v. t.* शप् 1 U, आक्रुश् 1 P, गर्ह् 1, 10 A, अभिशंस् 1 P. **-ion**, *s.* शापः, आक्रोशः, अभिशंसनं. **-Execrable**, *a.* गर्ह्य, गर्हणीय, अधम, नीच; *See* **Accursed.**

Execute, *v. t.* अनुष्ठा 1 P, सं-निः-पद् c., कृ 8 U, वि-धा 3 U, आ-चर् 1 P, निर्वह् c., साध् 5 P or c., निर्वृत् c.; 'e. thy business' स्वनियोगमशून्यं कुरु. 2 हन् 2 P, व्या-पद् c., प्राणदंडं-देहदंडं-आदिश् 6 P, दंड् 10; 'he was ordered to be e. e-d' तस्य :वध-देह-दंड आदिष्टः, वध्यतामसौ इति आदिष्टं. **-ion**, *s.* अनुष्ठानं, आचरणं, विधानं, करणं, संपादनं, निष्पत्ति-सिद्धि *f.*, निर्वाहः-हणं. 2 घातः, हननं, हत्या, व्यापादनं, वधः; 'place of e.' वध्यस्थानं-भूमि *f.*; 'sentence of e.' प्राणदंडः, उत्तमसाहसं. **-ioner**, *s.* घातकः, मातंगः, दंडपाशिकः, वध्यपुरुषः, वधाधिकृतः. **-ive**, *a.* निर्वाहक, निष्पादक विधायक, कार्यक्षम, अनुष्ठाननियुक्त, कार्यनिर्वाहक. **-or**, *s.* मृतलेखाधिकारिन् *m.*, (मृतस्य) उत्तरसाधकः.

Exegesis, *s.* विवरणं, व्याख्यानं; व्याकरणं. **-Exegetical**, *a.* विवरणकृत्, प्रकाशक.

Exempt, *v. t.* मुच् 6 P or c., मोक्ष् 10, वि-अव-सृज् 6 P, वृज् 1 P, 10; 'e. from fine' दंडादानं क्षम् 1 A; 'e. from taxes' करादानं अनुज्ञा 9 U. **-a.**, **-ed**, *a.* मुक्त, वर्जित, हीन, रहित; oft. by अ, निर्, वि, वीत, गत, in comp.; 'e. from pride' गतावलेप, वीतदर्प, अगर्व, &c.; 'e. from avarice' निर्लोभ, वितृष्ण, लोभरहित. &c. 2 अनायत्त, अवश. **-ion**, *s.* मुक्ति *f.*, मोक्षः, वर्जनं, रहितत्वं, मोचनं, अभावः; oft- by अ or अन् in comp.; अनवलेपः 'e. from pride, दंडाभावः 'e. from fine,' &c.

Exequies, *See* **Obsequies.**

Exercise, *s.* प्रयोगः, व्यापारः, अनुष्ठानं, आचरणं. 2 अभ्यासः, निषेवणं, अभ्यस्तता, आवृत्ति *f.*, चर्या. 3 व्यवसायः, श्रमः, चेष्टा, उद्योगः, व्यापारः; 'bodily e.' व्यायामः, परिश्रमः; 'materials for taking e.' व्यायामोपकरणानि; 'military e.' रणशिक्षा, शस्त्राभ्यासः, इष्वभ्यासः; 'shooting e.' शराभ्यासः, उपासनं; 'usual e.' नित्यकृत्यं. **-***v. t.* उप-प्र-युज् 7 A, 10, व्या-पृ c. 2 अभ्यस् 4 U; (सदा) आचर् 1 P, अनुष्ठा 1 P, आ-नि-सेव् 1 A, अनु-परि-शील् 10; आ-वस् c., व्या-यम् c.; 'e. soldiers' शिक्ष् c., रणशिक्षां दा 3 U; 'e. oneself' व्यायम् 1 P, उद्यम्, व्यव-सो 4 P, चेष्ट् 1 A; व्यायामं-शरीरश्रमं-कृ 8 U. **-***v. i.* परिश्रमं-व्यायामं-कृ; 'e ed with an iron club' अयोदंडेन श्रममकरोत् (Ka.76).

Exert, *v. t.* नि-प्र-उप-युज् 7 A, 10, व्या-पृ c., प्रवृत c.; 'e. oneself' प्रयत् 1 A, चेष्ट् 1 A, उद्यम् 1 P, व्यव-सो 4 P, प्रवृत् 1 A; 'e. one's utmost' यावच्छक्यं प्रयत्. **-ion**, *s.* व्यवसायः, उत्साहः, चेष्टा, व्यापारः, चेष्टितं, कर्मयोगः, यत्नः, उद्यमः, उद्योगः; *See* **Attempt.** 2 आयासः, श्रमः, परिश्रमः, कायक्लेशः-आयासः.

Exfoliate, *v. i.* परिपुट् 6 P, विगल् 1 P

Exhale, *v. t.* उद्-गॄ 6 P, उच्छ्वस् 2 P, निश्वस्, उत्क्षिप् 6 P, उद्वम् 1 P, निमुच् 6. P उदीर् c., निर्गम् c. (गमयति), प्र-वा 2 P, निष्कृ 6 P, उद्गम् c. 2 (As water) आ-पा 1 P, उच्छुष् c., आचम् 1 P, बाष्पीकृ 8 U; 'trees e. ing fragrance' परिमलोद्गारिणः वृक्षाः. **-ation**, *s.* उद्गारः, निश्वासः, उच्छ्वासः, उच्छ्वसितं, निर्गमः, उद्वमनं, उत्क्षेपः. 2 बाष्पः, धूमिका, धूमः. 3 बाष्पोद्गमनं, धूमोद्गारः.

Exhaust, *v. t.* उत्-सं-शुष् c., आ-पा 1 P. 2 शून्याकृ 8 U, निःशेषीकृ, सर्वस्वं हृ 1 P, विरिच् 7 P or c. 3 क्षि 1 P, क्षै c. (क्षपयति), नश् c., व्ययं-क्षयं-कृ, अप-चि 5 U; 'his wealth was e. ed in performing meritorious deeds' धर्मकर्माणि कुर्वतस्तस्य धनक्षयः संजातः (P. v. 1.); who had e. ed his whole treasure in gifts (charity)' निःशेषविश्राणितकोषजातं (R. v. 1.). 4 खिद् c., क्लम् c. (क्लमयति), श्रम् c., अव-सद् c., ग्लै c., (ग्ला-ग्लपयति; 'I feel e. ed' क्लांतोस्मि, अवसन्नानि मे गात्राणि. **-ed**, *a.* शोषित, विरिक्त, निःशेषीकृत. 2 क्षीण, अपचित. 3 श्रांत, क्लांत, खिन्न, अवसन्न, ग्लान. **-ion**, *s.* शोषणं. 2 क्षयः, परिक्षयः, नाशः, व्ययः अपचयः. 3 खेदः, श्रमः, क्लमः, ग्लानि *f.*, अवसादः, श्रांति-क्लांति *f.* **-less**, *a.* अक्षय, अनाश्य, अविनाशिन्.

Exhibit, *v. t.* प्र-दृश् c., प्रकाश् c., निर्दिश् 6 P, प्रकटीकृ 8 U, प्रकटयति (D.), व्यंज् 7 P or c., व्यक्तीकृ, आविष्कृ, प्र-सृ c. **2** (On the stage) प्रस्तु 7 A, 10, अभिनी 1 P; *See* **Act. -er,** *s.* प्रदर्शकः, प्रकाशकः. **-ion,** *s.* प्रदर्शनं, व्यंजनं, आविष्करणं, &c. **2** वृत्तिसाधनं, वृत्ति *f.* **3** अभिनयः, आविर्भावः. **-ioner,** *s.* वृत्तिभुज् *m.*

Exhilarate, -ion, *See* **Delight.**

Exhort, *v. t.* सोत्सुकं याच् 1 A or प्रार्थ् 10 A, उप-दिश् 6 P, अनु-शास् 2 P, प्र-सं-बुध् c. **2** आ-समा-श्वस् c., प्रोत्सह् c., प्र-चुद् 10, प्रवृत् c., उत्तुज् 10. **-ation,** *s.* उपदेशः, उपदेशवचनं, सोत्सुकप्रार्थना, प्रबोधनवाक्यं. **2** प्रोत्साहनं, प्रेरणं, प्रचोदनं, उत्तेजनं, प्रबोधनं, समाश्वासनं, प्रवर्तनं. **-ative, -atory,** *a.* प्रबोधक, उपदेशक. **-or,** *s.* उपदेशकः, प्रबोधकः.

Exhume, *v. t.* (शवं) उत्खन् 1 P. **-ation,** *s.* उत्खननं.

Exigence, -cy, *s.* आवश्यकत्वं, अपरिहार्यत्वं, अवश्यप्रयोजनं-कार्यं. **2** अवसरः, प्रस्तावः, समयः, कालः. **3** आपद्-विपद् *f.*, संकट-कष्ट-समयः-कालः, विपत्समयः, कृच्छ्रं-कष्टः-ष्टं, दुर्गति *f.* **-Exigent (eant),** *a.* अपरिहार्य, आवश्यक.

Exiguous, *a.* तनु, अल्प.

Exile, *v. t.* प्र-निर्-वि-वस् c., प्र-व्रज् c., (स्वदेशात्) निः-सृ c., अपाकृ 8 U, बहिष्कृ. *-s.* वि-प्र-वासः-सनं, प्रव्राजनं. **2** प्रव्रजनं, दूरसंस्थिति *f.*, विवासनविधिः; 'to go into e.' प्रव्रज् 1 P.

Exist, *v. i.* भू 1 P, वृत् 1 A, विद् 4 A, अस् 2 P; जन् 4 A, उत्पद् 4 A. **2** जीव् 1 P, प्रण् 2 P. **3** स्था 1 P, प्रवृत्, आस् 2 A. **-ence,** *s.* अस्तित्वं, सत्ता, सत्त्वं, अवस्था, भावः, सद्भावः, संभवः, वर्तनं. **2** जीवितं, जीवनं, वृत्ति *f.*, प्राण-असु-धारणं; 'worldly e.' संसारः, भवः. **-ent,** *a.* सत्, विद्यमान, वर्तमान, जीविन्; 'self-e' आत्मभूः, स्वयंभूः.

Exit, *s.* निष्क्रमः,-मणं, निर्याणं; अपक्रमः, अपगमः, निर्गमः. **2** (In dramas) निष्क्रांत *a.*; 'exeunt omnes' निष्क्रांताः सर्वे.

Exodus, *s.* निर्गमः बहिर्गमनं.

Ex-officio, *adv.* अधिकारवशात्.

Exonerate, *v. t.* **Exculpate,** q. v. **2** भारं अपनी 1 P or अवतॄ c.

Exorable, *a.* अनुनेय, प्रसादनीय, सांत्वनीय; 'not e.' निरनुक्रोश.

Exorbitant, *a.* अमर्याद, अमित, अपरिमित, अतिरिक्त, सातिशय, अतिमात्र, अत्यधिक; *See* **Excessive. -Exhorbitance, -cy,** *s.* अतिरेकः, मर्यादातिक्रमः, उद्रेकः, आधिक्यं.

Exorcise, *v. t.* (भूतं) दूरीकृ 8 U, निःसृ c., भूतावेशात् मुच् c. **-Exorcism,** *s.* भूतापसारणं.

Exordium, *s.* प्रस्तावः, वाङ्मुखं, आमुखं, मुखबंधः, उपोद्घातः.

Exoteric, *a.* साधारण (णी *f.*).

Exotic, *a.* विदेशीय, विदेशज, अन्यदेशोद्भव, वैदेशिक (की *f.*).

Expand, *v. t.* विस्तॄ c., प्र-वृध् c., वि-तन् 8 U, प्र-वि-सृ c., 'e. itself' व्याप् 5 P, व्यश् 5 A. **2** वि-वृ 5 U, प्र-वि-काश् c., प्रपंचयति (D.). **3** (As flowers &c.) विकाश् c., विकस् c., भिद् 7 P or c., स्फुट् c., वि-स्फुर् c. (स्फारयति). *-v. i.* वि-प्र-सृ 1 P, प्र-,वृध् 1 A, pass. of roots above. **2** विकस् 1 P, स्फुट् 6 P, फुल्ल् 1 P, भिद् pass.; *See* **Blossom;** विस्फुर् 6 P; 'whose boyhood gradually e. ed into youth (manhood)' क्रमाद्यौवनभिन्नशैशवः (R. III 32); 'with his eyes e. ed through joy' हर्षोत्फुल्लनयनः. **3** विजृंभ् 1 A **-Expanse,** *s.* प्र-वि-तानः, प्रसरः, विस्तारः, आभोगः, (आभोगस्तपोवनस्य S. 1); 'in the e. of ocean' विस्तीर्णे सागरे; 'in this e. of universe' महति जगज्जाले. **-ion,** *s.* विस्तारः, प्रसारः, विततिः *f.*, प्रसरः, विस्तरः, प्रसरणं, व्याप्ति *f.* **2** प्रपंचः, विवर्धनं. **-ive,** *a.* व्यापक, वि-प्र-सारिन्, विस्तारिन्, विसृत्वर, विसृमर.

Ex parte, *a.* एकपक्षीय.

Expatiate, *v. i.* **Enlarge** (upon), q. v. **2** परिभ्रम् 1, 4 P.

Expatriate, *See.* **Exile.**

Expect, *v. t.* अपेक्ष् 1 A, उद्-दृश् 1 P; आशंस् 1 A, उदीक्ष्; प्रति-पा c. (पालयति), प्रति-इष् 6 P, प्रतीक्ष् (wait for); 'I am e. ing my brother' मम भ्रातुरागमनं प्रतीक्षे; वर्त्म अवलोकयामि (Ka. 220); पक्षी एव त्वां प्रतीच्छति (V. 2). **-ant,** *a.* अपेक्षिन्, अपेक्षक, प्रत्याशिन्, आकांक्षिन्, समप्रत्याश. **-ation,** *s.* अपेक्षा, आशा, प्रत्याशा, उदीक्षणं, आशंसा, प्रतीच्छा, प्रतीक्षणं. **-ed,** *a.* अपेक्षित, आकांक्षित, समर्थित, तर्कित; 'un-e. call' अतर्कितागमनं

Expectorate, *v. t.* (श्लेष्माणं) उद्-गॄ 6 P or निःसृ c., निष्ठिव् 1, 4 P. **-ion,** *s.* निष्ठ्यूति *f.*, निष्ठीवनं, श्लेष्मोद्गारः.

Expedient, *a.* युक्त, उचित, योग्य, उपपन्न, उपयुक्त, हित, हितावह. *-s.* उपायः, कल्पः, साधनं, गति *f.*, उपक्रमः, उपकरणं, योगः, गुणः; षड् गुणाः 'six e. s.' **-ly,** *adv.*

युक्तं, उपपन्नं, यथोचितं. -**Expediency, -ce,** *s.* औचित्यं, युक्तता, उपपत्ति *f.*, उपयोगः, हितावहत्वं.

Expedite, *v. t.* त्वर् c. (त्वरयति), शीघ्रं संपद् c. or प्रवृत् c. or सार् c. or वि-धा 3 U. 2 शीघ्रं प्रेर् c. or प्रेर् c. -**ion,** *s.* त्वरा, शीघ्रता, क्षिप्रता, जवः, वेगः, अविलंबः, शीघ्रनिर्वाहणं, क्षिप्रकारित्वं. 2 यात्रा, प्रयाणं, प्रस्थानं, यानं, अभिषेणनं, अवपातः; 'to send an e.' सैन्यं प्रस्था c. (स्थापयति). 3 **Enterprize,** q. v. -**ious,** *a.* त्वरित, शीघ्र-क्षिप्र-कारिन्, सत्वर, अदीर्घसूत्र, अविलंबित, द्रुत, लघु. -**iously,** *adv.* शीघ्रं, सत्वरं, द्रुतं, &c.

Expel, *v. t.* **Exile,** q. v. 2 निष्कस् c., बहिष्कृ 8 U, अपा-निरा-कृ, निःसृ c., अपध्वंस् c., निर्धू 5, 9 U; *See* **Drive, Dispel.** 3 (From society) अपपात्रयति (D.), अपांक्तीकृ 8 U. -**led,** *a.* निष्कासित, अवकृष्ट, अपध्वस्त, निर्धूत, धिक्कृत. -**Expulsion,** *s.* अपसारणं, निष्कासनं, निराकरणं, विवासनं, प्रव्राजनं.

Expend, *v. t.* व्यय् 10 (व्यययति), उत्-वि-सृज् 6 P, त्यज् 1 P, विनि-युज् 7 A, 10, प्र-उप-युज् 2 क्षि 1 P, क्षै c. (क्षपयति), अप-चि 5 U, क्षयं-व्ययं-कृ 8 U. -**Expense, Expenditure,** *s.* व्ययः, विसर्गः, उत्सर्गः, त्यागः, विनियोगः; धनत्यागः, व्ययः, अर्थोत्सर्गः. 2 क्षयः, अपचयः, अपहारः. -**ive,** *a.* बहुमूल्य, महार्ह-र्घ, बहुव्यय, बहुव्ययसाध्य, महामूल्य. -**ively,** *adv.* बहुव्ययेन, बहुमूल्येन.

Experience, *v. t.* अनुभू 1 P, उप-भुज् 7 U, अश् 5 A, प्राप् 5 P, आसद् c., ज्ञा 9 U, विद् 2 P, परीक्ष् 1 A. 2 **Suffer,** q. v. -*s.* अनुभवः, परीक्षणं, वेदनं, प्रतीति *f.*, ज्ञानं, बोधः, भोगः, भुक्ति *f.* 2 बहुदर्शित्वं, अनुभवजन्यं ज्ञानं, बुद्धिपरिपाकः. 3 अभ्यासः, आचरणं. -**ed,** *a.* बहुदर्शिन्, अनुभविन्, बहुदृश्वन्, परिणतप्रज्ञ, पक्वबुद्धि, बहुदृष्ट, सानुभव; 'I am an e. teacher (of the art)' दृष्टप्रयोगोस्मि (M. 1).

Experiment, *s.* प्रयोगः, परीक्षा-क्षणं, अनुभवः. -*v. t.* परीक्ष् 1 A, अनुभू 1 P; प्रयुज् 7 A, 10. -**al,** *a.* अनुभवलब्ध-प्राप्त, अनुभूतिमूल. 2 परीक्षक, परीक्षार्थं कृत. -**ally,** *adv.* परीक्षणार्थं, अनुभूत्यर्थं. 2 परीक्षापूर्वं, अनुभवेन-भवात्. -**er, -alist,** *s.* परीक्षकः.

Expert, *a.* दक्ष, प्रवीण, पटु, विज्ञ, निपुण, चतुर; विद्-ज्ञ in comp.; विचक्षण, विशारद; *See* **Skilful.** -**ly,** *adv.* सपाटवं, सकौशलं. -**ness,** *s.* पाटवं, कौशलं, नैपुण्यं, दक्षता, चातुर्यं, विज्ञता, विदग्धता, &c.

Expiate, *v. t.* वि-सं-परि-शुध् c., निष्कृ 8 U, निराकृ, शम् c. (शमयति), अपानुद् 6 P, प्रमृज् 2 P or c., प्रायश्चित्तेन पू 9 U or शुध् c. or क्षुध् c., पापनिष्कृतिं कृ. -**ion,** *s.* शोधनं, पावनं; प्रायश्चित्तं, पापनिष्कृति *f.*-प्रक्षालन-विशुद्धि *f.* -क्षालनं-मार्जनं, शुद्धि *f.* -**ory,** *a.* पावन, पापनाशक-शम, अघमर्षण (णी *f.*), विशोधक, पापघ्न (घ्नी *f.*).

Expire, *v. t.* निश्वस् 2 P, श्वासं उत्क्षिप् 6 P, or निर्गम् c. (गमयति). 2 उद्-गॄ 6 P; *See* **Exhale.** -*v. i.* प्राणान् हा 3 P or त्यज् 1 P, मृ 6 A, उत्क्रांतवायु *a.* भू, उपरम् 1 P, संस्था 1 A; *See* **Die.** 2 समाप् pass., अवसो pass., निवृत् 1 A, विरम्, अवसद् 1 P, क्षि pass. -**ation, -y,** *s.* प्राणत्यागः; निश्वासः-सनं, उपरमः. 2 निवृत्ति *f.*, समाप्ति *f.*, विरामः, अत्ययः, क्षयः, अंतः, अवसानं, शेषः, विच्छेदः. -**ing,** *a.* कंठगतप्राण, आसन्नमृत्यु, मुमूर्षु.

Explain, *v. t.* व्या-ख्या 2 P, व्याचक्ष् 2 A, निरूप् 10, विवृ 5 U, द्युत् c., व्यंज् 7 P or c., स्फुटी-विशदी-कृ 8 U, व्या-कृ, प्र-वच् 2 P, प्रकाश् c., स्पष्टीकृ, प्रबुध् c. 2 वर्ण् 10, कथ् 10, प्रवद् 1 P, प्रकृत् 10. -**er,** *s.* व्याख्यातृ *m.*, प्रकाशकः, प्रवक्तृ *m.*, वादिन् *m.* -**Explanation,** *s.* व्याख्यानं, विवरणं, व्याकरणं, प्रकाशनं, स्पष्टीकरणं, विवृत्ति *f.*, निरूपणं. 2 समाधानं, शोधनं. -**Explanatory,** *a.* अर्थव्यंजक-द्योतक-प्रकाशक, वाचक, विवरणकृत्.

Expletive, *s.* पादपूरणं, वाक्यालंकारः.

Explicate, *See* **Explain.**

Explicit, *a.* स्पष्ट, व्यक्त, परिस्फुट, भिन्नार्थ, सुप्रकाश. -**ly,** *adv.* व्यक्तं, स्फुटं, स्पष्टं.

Explode, *v. i.* महाशब्देन विद्-विभिद् pass., महाशब्दपूर्वं स्फुट् 6 P or विदल् 1 P. -*v. t.* कर्कशनिस्वनेन निंद् 1 P or असंतोषं दृश् c. or सूच् 10. 2 निरस् 4 U, खंड् 10, विलुप् c., अपा-कृ 8 U. -**Explosion,** *s.* सशब्दभंगः-स्फोटनं, महाशब्दपूर्वं विदारणं. -**Explosive,** *a.* शीघ्रदाह्य, विदारणशील.

Exploit, *s.* पराक्रमः, अवदातं कर्मन् *n.* आश्चर्य-अद्भुत-कर्मन् *n.*, विक्रमः, विचेष्टितं.

Explore, *v. t.* अन्विष् 4 P, निरूप् 10, मृग् 10 A, निरीक्ष् 1 A, अनुसं-धा 3 U, मार्ग् 10. -**ation,** *s.* अन्वेषणं, निरूपणं, मार्गणं, जिज्ञासा. -**er,** *s.* अन्वेष्टृ *m.*

Exponent, *s.* (In mathematics) घातचिह्नं -*a.* प्रकाशक, द्योतक.

Export, *v. t.* विदेशं नी 1 P or प्र-हि 5 P, बहिर्देशं प्रेर् c. or वह् 1 P or c. -*s.* निर्गतं द्रव्यं-भांडं. -**ation,** *s.* विदेशनयनं, निर्गमनं.

Expose, *v. t.* (lit.) उच्छद् 10, अपा-वृ 5 U, विवृतीकृ 8 U, प्रकाश् c., प्रदृश् c. 2 व्यक्तीकृ, प्रत्यक्षीकृ, आविष्कृ; सर्वस्वरूपं आ-

विवृ; *See* **Explain** also. **3** (Make liable) पदं नी 1 P or कृ 8 U, स्थानं-आस्पदं कृ; 'e. ed yourself to trouble' भवतात्मा क्लेशस्य पदमुपनीतः (S. 1); 'e.-ed to the charge of cowardice' कातर इति वाच्यतां गतः-क्रोशपात्रं जातः; 'e. ed to hundreds of calamities' व्यसनशत-शरण्यतामुपगताः (Ks. 107); 'e. to contempt' तिरस्कारस्थानं कृ; 'e. to the sun' आतपे धा 3 U or शुष् c., आतपाय उज्झ् 6 P; 'e. for sale' क्रयार्थं प्र-सृ c. **-ed,** *a.* अनाच्छादित, अनावृत, &c.; 'e. d for sale' क्रय्य. **-ition,** *s.* विवरणं, व्याख्यानं, प्रकाशनं, स्पष्टीकरणं. **-itor,** *s.* विवृतिकारः, वृत्तिकारः, व्याख्यातृ *m.*, अर्थप्रकाशकः. **-ure,** *s.* विवृति *f.*, प्रदर्शनं, प्रकाशनं, व्यक्तीकरणं, स्वरूपाविष्करणं 'e. to heat' आतपलंघनं; (S. 3).

Expostulate, *v. i.* प्रत्यादिश् 6 P, (अपवात्) व्यावृत् c., निवारयितुं-निर्यंतुं उद्यम् 1 P or प्रयत् 1 A; *See* **Dissuade.** **-ion,** *s.* प्रत्यादेशः, निवर्तनवाक्यं, निषेधः, निवारणं, प्रबोधवचनं.

Expound,-er, *See* **Explain,-er.**

Express, *a.* व्यक्त, स्फुट, परिस्फुट, सुप्रकाश, भिन्नार्थ, असंदिग्ध; 'in e. terms' भिन्नार्थं, स्पष्टं. **2** विशिष्ट. **-s.** (Messenger) जंघाकारिकः, जांघिकः. **2** जंघालः, अतिजवः, प्रजविन्-वेगिन् *m.*, जवनः, त्वरितः, तरस्विन् *m.* **-v. t.** व्यंज् 7 P or c., आविष्कृ 8 U, प्रदृश् c., सूच् 10, द्युत् c., प्रकटीकृ, निर्दिश् 6 P, लक्ष् 10, प्रकटयति (D.). **2** वच् 2 P, उच्चर् c., उदीर् c. कथ् 10, शंस् 1 P, वद् 1 P, उदाहृ 1 P, व्याहृ, आ-नि-विद् c., ख्या 2 P, प्रकाश् c., बुध् c., ज्ञा c. (ज्ञापयति), अभि-धा 3 U; 'e. oneself' मनोगतं शंस्, वाचं उदीर्; 'e. by gesticulation' नट् 10, निरूप् 10, सूच्, अभिनी 1 P. **3** निष्पीड् 10, निष्कृष् 1 P, निर्दुह् 2 U, निर्हृ 1 P. **-ion,** *s.* व्यंजनं, प्रकाशनं, बोधनं, आ-निवेदनं, ज्ञापनं, आविष्करणं, कथनं, उदाहारः-हरणं, ख्यापनं. **2** निष्पीडनं, निष्कर्षणं. **3** वदनं, आस्यं; 'he had a smiling e.' हास्यवदन आसीत्; 'wore an angry e.' कुपित इव बभौ. **4** वचनं, उक्ति *f.*; वाक्यं, पदं, शब्दः, वचस् *n.*, वाच् *f.*; 'authoritative e.' आप्तवचनं, प्रमाणं. **5** रीति *f.*, मार्गः, पद्धति-सरणि *-f.* **-ly,** *adv.* स्पष्टं, व्यक्तं, परिस्फुटं, भिन्नार्थं. **-ive,** *a.* व्यंजक, वाचक, सूचक, द्योतक, अभिधायक, गमक, दर्शक. **2** सार्थ, साकूत, पूर्णार्थ, अर्थवत्. **-ively,** *adv.* सार्थं, साकूतं. **2** स्पष्टं, सुव्यक्तं, भिन्नार्थं, परिस्फुटं, व्यंजकतया. **-iveness,** *s.* व्यंजकत्वं, अर्थवत्ता, साकूतता.

Expropriate, *v. t. See* **Dispossess.**

Expugn, *v. t.* (दुर्गं) लंघ् 1 A, 10, वशीकृ 8 U, आक्रम् 1 U, 4 P, वि-जि 1 A.

Expunge, *v. t.* वि-,लुप् c., व्या-अप-मृज् 2 P or c., व्यामृश् 6 P or c., उच्छिद् 7 P, विनश् c. **-Expunction,** *s.* वि-,लोपः, व्यामर्दः, उच्छेदः, नाशः.

Expurgate, *v. t.* पू 9 U, शुध् c., पवित्रीकृ 8 U. **-ion,** *s.* पावनं, शोधनं. **-ory,** *a.* पावक-न.

Exquisite, *a.* अत्युत्तम; विशिष्ट, उत्कृष्ट, परम; *See* **Choice;** 'e beauty' अतिमनोहरं-अतिरम्यं-लावण्यं, 'e. delight' परमानंदः. **2** सूक्ष्म. **3** तीक्ष्ण, तीव्र, उग्र (of pain). **-ly,** *adv.* परमं, उत्तमं, अति-परम- in comp. **-ness,** *s.* विशिष्टता, उत्तमता, &c.

Exsiccate, *v. t.* शुष् c., उच्छुष् c.; *See* **Dry.** **-ion,** *s.* उच्छोषणं, शोषः. **-ive,** *a.* शोषक.

Extant, *a.* विद्यमान, उपलब्ध, वर्तमान.

Extemporary, -raneous, *a.* तत्क्षणकृत, अचिंतितपूर्व, अयत्नकृत, अकल्पितपूर्व. **2** प्रस्तावोपयुक्त, समयोचित. **-ly, Extempore,** *adv.* पूर्वचिंतां विना, अयत्नपूर्वं, पूर्वकल्पनां विना.

Extend, *v. t.* तन् 8 U, वि-प्र-°; विस्तॄ-स्तृ 5, 9 U or c., प्र-सृ c., आ-यम् 1 P, वृध् c., दीर्घीकृ 8 U, प्रथ् 10. **2** प्रदा 3 U, वितृ 1 P. **-v. i.** वितन्-विस्तॄ pass., व्याप् 5 P; प्र-रुह् 1 P, आयम् pass., प्र-सृ-सृप् 1 P, प्रवृ-वृध् 1 A, वृत् 1 A; 'the age of man e. ed to 10,000 years' दशसहस्रवर्षायुषो नरा आसन्; 'e. as far as' ex. by आ with abl. or in comp.; 'whose sovereignty of the earth e. ed as far as the sea' आसमुद्रक्षितीशानां (R. I. 5). **-Extension,** *s.* विस्तारः, वितति *f.*, विस्तृति *f.*, आयामः, प्रसारणं, प्रसरः, व्याप्ति *f.*, विस्तीर्णता. **2** वृद्धि *f.*, प्रपंचः, विपुलता. **-Extensive,** *a.* विस्तीर्ण, विपुल, प्रचुर, विशाल, पृथु, आयत, असंबाध, महत्. **2** व्यापक, व्यापिन्. **-ly,** *adv.* बहुशः, प्रचुरं, अतीव, अतिमात्रं, बाहुल्येन, भूयसा. **-ness,** *s.* विस्तारः, &c. **-Extent,** *s.* विस्तारः, आयामः, आभोगः, विशालता, आयति *f.*, परिणाहः. **2** परिमाणं, प्रमाणं; 'the city is 100 yojanas in e.' विस्तीर्णा योजनशतं पुरी; 'to a great e.' अतिमात्रं, अतीव; 'to some e.' कियतापंशेन, स्तोकं, ईषत्, मनाक्; 'to such e.' एतावत्, इयत्; 'to the fullest e.' सर्वांशेन, सर्वथा; 'to what e.' कियत्प्रमाणं, कियत्पर्यंतं.

Extenuate, *v. t.* **Emaciate,** q. v. **2** लघयति (D.), कृश् 10, ह्रस् c., अल्पीकृ 8 U, लघूकृ, शम् c. (शमयति); प्रक्षल् 10, मंदम

2 P (a crime &c.). **-ion,** *s.* उपशमः, लघूकरणं. **2** पापमार्जनं-प्रक्षालनं.

Exterior, *a.* बाह्य, बहिःस्थ, बहिर्भव; gen. ex. by बहिः in comp. **-s.** बहिराकारः, बाह्याकारः, बाह्यरूपं. **2** बाह्यभागः, बहिर्देशः-भागः.

Exterminate,-ion, *See* **Eradicate,-ion.**

Extern, *a.* बहिर्वर्तिन्.

External, *a.* बाह्य, बहिर्भव, बहिःस्थित-वर्तिन्, बहिः in comp.; ' without e. aid ' विना बाह्यसाधनं, बाह्योपाधिं विना. **-ly,** *adv.* बहिः, बाह्यतः.

Extinguish, *v. t.* निर्वा c. (वापयति); प्र-उप-शम् c. (शमयति) (as thirst &c.). **2** वि-नश् c., वि-लुप् c., अव-उत्-सद् c., उच्छिद् 7 P. **-ed, -Extinct,** *a.* शांत, निर्वापित, निर्वाण. **2** नष्ट, उच्छिन्न, लुप्त, निर्गत, क्षीण, अवसन्न, निवृत्त; ' his family became e. ' स निर्वंशो जातः; ' almost e.' निर्वाणभूयिष्ठ; ' to become e. ' शम् 4 P, निर्वा 2 P. **-ment, -Extinction,** *s.* निर्वाणं, निर्वापणं. **2** उच्छेदः, विलोपः, विनाशः, संहारः, क्षयः; ' final e. ' निर्वाणं; मोक्षः; ' e. of family ' कुलोच्छेदः, निर्वंशता.

Extirpate, *See* **Eradicate.**

Extol, *v. t.* वर्ण् 10, कृत् 10, प्रशस् 1 P, श्लाघ् 1 A, स्तु 2 U, प्र-वि-ख्या 2 P; *See* **Praise.** **-ler,** *s.* प्रशंसकः, स्तावकः.

Extort, *v. t.* बलात्-अन्यायेन आदा 3 A or ग्रह् 9 U, दा c. (दापयति), आहृ c., निष्कृष् 1 P, बाधित्वा ग्रह्; बाध् 10, उपपीड् 10 **-er, -ioner,** *s.* बलेन परस्वापहारकः, बाधकः, औपधिकः, उपपीडकः, उपद्रविन् *m.* **-ion,** *s.* बलाद्दादानं, अन्यायेन परस्वापहरणं, उपद्रवः, बाधः-धा, बलात्कारः, विप्लवः. **2** हठः, चलं; 'by e.' बलात्, अन्यायेन, प्रसभं, प्रसह्य.

Extra, *a, s.* अधिक, अतिरिक्त, अति pr.; (in comp.) ex. by व्यतिरिक्त, भिन्न, अधिक, अतिरिक्त.

Extract, *v. t.* निष्कृष् 1 P, आकृष्, निः-उद्-हृ 1 P, उद्-ग्रह् 9 P; निर्दुह् 2 U, निष्कुष् 9 P, निः-सं-पीड् 10 (by squeezing); निर्गम् c. (गमयति), उत्पद् c. **-s.** रसः, निर्यासः, निर्यूहः, कषायः, निष्कर्षः, उद्धारः **2** सारः, संग्रहः, संक्षेपः, उद्धृतभागः, निष्कर्षः, पिंडितभागः. **-ion,** *s.* निष्कर्षः-र्षणं, उद्धरणं, निर्हरणं. **2** कुलं, वंशः, उत्पत्ति *f.*, अन्वयः, जन्मन् *n.*, संभवः, उद्भवः; 'of high e.' अभिजात, महाकुल, कुलीन; ' of royal e. ' राजवंश्य, राजकुलप्रसूत.

Extra-judicial, *a.* व्यवहारविषयातिक्रांत.

Extra-mundane, *a.* अतिसंसार, लोकबाह्य

Extra-mural, *a.* दुर्गबहिर्वर्तिन्.

Extraneous, *a.* बाह्य, बहिर्भव. **2** भिन्न असंगत, व्यतिरिक्त, विदेशीय, असंबद्ध.

Extraordinary, *a.* असाधारण (णी *f.*), लोकोत्तर, असामान्य, अलोकसामान्य, अपूर्व, अद्भुत, चित्र, अदृष्टपूर्व, विलक्षण, आश्चर्य. **-ly,** *adv.* अपूर्वं, अद्भुतं, चित्रं. **-ness,** *s.* वैलक्षण्यं, आश्चर्यत्वं, लोकोत्तरता.

Extravagant, *a.* अतिव्ययपर, अतिमुक्तहस्त, व्ययशील, अमितव्यय, अतिव्ययिन्. **2** अनियंत्रण, अमर्याद, अपरिमित, मर्यादातिक्रामिन्, उत्क्रांतमर्याद. **-ly,** *adv.* अतिव्ययेन, मुक्तहस्तेन. **2** अतिमात्रं, सातिशयं, अमितं. **-Extravagance,** *s.* अति-अमित-व्ययः, मुक्तहस्तः, धनोत्सर्गः, व्ययापरिमितता. **2** मर्यादातिक्रमः, अतिक्रमः, अतियशः, अमितता, अत्याचारः, नियमोल्लंघनं

Extravasated, *a.* शिरा-नाडि-बहिर्गत. **-Extravasation,** *s.* (Of blood) रक्तमोक्षणं, रक्तनिर्गमः

Extreme, *a.* पर, परम, निरतिशय, अत्यंत, महत्, अति pr. ; 'e. limit' ; परमावधिः. **2** बाह्य. **3** अंत्य, अंतिम, शेष in comp. **-s., -ity,** *s.* पराकोटि *f.* -काष्ठा, अत्यंतता, अतिभूमि *f.*, परमावधिः, अतिशयः. **2** अंतः-तं, पारः, पर्यंतः, अग्रं, प्रांतः, सीमन् *f.*, अवधिः, उत्तमावधिः ; ' this is the e. of delightful things ' इयं प्रीतिजननानां सीमांतलेखा-परिसमाप्तिः-अवसानभूमिः (Ka. 124); ' e. s are ever bad ' अति सर्वत्र वर्जयेत्. **3** विषमावस्था, अतिकृच्छ्रं, अत्यंतक्लेशः-दुःखं, दुःस्थिति *f.*, दुर्दशा, कष्टावस्था. **-ly,** *adv.* अत्यंतं, अतिभृशं ; *See* **Exceedingly.**

Extricate, *v. t.* उद्धृ 1 P, मुच् 6 P or c., मोक्ष् 10, परि-,त्रै 1 A, रक्ष् 1 P, सं-उत्-निः-तॄ c. **-ion,** *s.* उद्धारः, विमोचनं, मुक्ति *f.*, मोक्षः-क्षणं, निस्तारः, त्राणं, रक्षणं.

Extrinsic,-al, *a.* बाह्य, बहिर्भव, असहज, आगंतुक (की *f.*). **-ally,** *adv.* बाह्यतः, असहजं.

Extrude, *v. t.* उत्सृ c.; *See* **Drive.**

Extuberance, *s.* अधिमांसं, गंडः, स्फोटः, श्वयथुः.

Exuberant, *a.* प्रचुर, बहुल, समृद्ध, स्फीत, परिपूर्ण, उद्रिक्त, अतिरिक्त, भूरि, पुष्कल, उत्सिक्त. **-ly,** *adv.* प्रचुरं, बहुशः, बाहुल्येन.

Exuberate, *v. i.* प्रचुरीभू 1 P, वृध् 1 A, समृध् 5 P **Exuberance,** *s.* प्राचुर्यं, समृद्धि *f.*; स्फीति *f.*; उद्रेकः, उपचयः, वृद्धि *f.*, अतिशयः, आधिक्यं; ' in e. of joy ' हर्षनिर्भरं.

Exude, *v. i.* प्र-स्नु 2 P, स्विद् 1 A, 4 P; स्वेद इव प्र-स्रु 1 P or निस्यंद् 1 A. **-v. t.** (स्वेदं) निःसृ c. or निःस्रु c. **2** उद्-भृ 6 P, उद्वम् 1 P, निष्ठिव् 1, 4 P. **-ation,** *s.* प्र-

स्रवः, स्वेदः, स्वेदस्रावः. 2 स्रवः-वणं, स्यंदनं निर्यासः, स्रावः. 3 निष्ठीवनं, उद्गारः, उद्वमनं.

Exulcerate, *v. t.* व्रणं उत्पद् c., क्षतं कृ 8 U; क्षण् 8 P. **-ion,** *s.* व्रणोत्पत्ति *f.*, क्षतोत्पादनं.

Exult, *v. i.* प्र-मुद् 1 A, उत्सिच् pass, अत्यंतं आनंद् 1 P or हृष् 4 P or उल्लस् 1 P. **-ant,** *a.* उत्सिक्त, प्रमुदित, परमहृष्ट, उल्लसित, सगर्व, उन्मत्त, सदर्प. **-ation,** *s.* प्रमोदः, उत्सेकः, उल्लासः, परमानंदः, परमाह्लादः, परमहर्षः, मदः, गर्वः, अवलेपः. **-ing,-ly,** *adv.* सप्रमोदं, सोल्लासं, सोत्सेकं, सगर्वं, सदर्पं.

Exuviae, *s.* निर्मोकः.

Eye, *s.* चक्षुस् *n.*, वि-,लोचनं, नेत्रं, नयनं, अक्षि *n.*, दृश् *f.*, दृष्टि *f.*, ईक्षणं-णा, दृशा. 2 (View) दृष्टि *f.*; 'in the e. s of the public' लोकदृष्ट्या. 3 रंध्रं, छिद्रं. 4 **Bud,** q. v.; 'corners of the e.' अपांगः-गं, नयनोपांतः. 'mind's e.' ज्ञानचक्षुस् *n.*, मनोमयं ज्ञानं; 'before one's e. s' समक्षं, साक्षात्, प्रत्यक्षं-क्षतः; oft. by पश्यत्; 'before my very e. s' पश्यतोपि मम; 'in my e. s' मम दृष्ट्या, मां प्रति. **-***v. t.* निरीक्ष् 1 A, आ-अव-लोक् 1 A, 10, दृश् 1 P; *See* **See,** 'e. pupil' तारा, कनीनिका, तारका; 'e. beam' नयन-दृष्टि-पातः; 'e.-drop' नेत्रजलं, बाष्पाम्बुः, अश्रु *n.*; 'e.-brow' भ्रूः, भ्रू रु त; 'e.-glass' उपनेत्रं-नयनं; 'e.-lash' पक्ष्मन् *n.*; 'e.-let, e.-hole' गवाक्षः, छिद्रं, रंध्रं; 'e.-lid' नेत्र-नयन-च्छदः; 'e. reach (shot)' चक्षुर्विषयः, नयनगोचरः-रं, दृक्पथः; 'e.-sore' अक्षिशूलं, चक्षुःपीडा; अक्षिगतः, द्वेष्यः; 'I am an e. sore to him' अक्षिगतोहमस्य; 'e.-wink' नयनसंज्ञा-संकेतः, कटाक्षः, 'e. witness' प्रत्यक्षसाक्षिन् *m.*, दर्शिन् *m.*, साक्षाद् द्रष्टृ *m* **-less,** *a.* चक्षुर्हीन, अनयन, दृष्टिविकल. 2 अच्छिद्र.

Eyot, *s.* लघुद्वीपं.

F

Fable, *s.* कथा, आख्यायिका, उपाख्यानं, कल्पितकथा, पुरावृत्ताख्यानं, प्रबंधकल्पना. **-***v. t.* मनसा कल्प् c. or रच् 10 or सृज् 6 P. **-Fabulous,** *a.* ऐतिहासिक (की *f.*), कथानिबद्ध, आख्यानकीर्तित. 2 अलीक मनःकल्पित, मनसा सृष्ट, काल्पनिक (की *f.*) कृत्रिम. **-Fabulist,** *s.* कथारचकः, ऐतिहासिकः.

Fabric, *s.* भवनं, गृहं, हर्म्यं, मंदिरं, प्रासादः, धामन् *n.*, शाला. 2 निर्माणं, रचनं. 3 कृति *f.*, पटाकारः. 4 **Cloth,** q. v. **-Fabricate,** *v. t.* निर्मा 3 A or 2 P or c. (मापयति), विरच् 10, कृ 8 U, कॢप् c., वि-धा 3 U, सृज् 6 P. 2 मनसा सृज् or कॢप् c., कपटेन-मिथ्या कॢप् c.; 'to f. evidence' कूटप्रमाणं निर्मा, कपटसाक्ष्यं कृ; *See* **Counterfeit. -ion,** *s.* कपटरचना, अलीकं, कृत्रिमनिर्माणं मनःकल्पना, कूटं. 2 निर्माणं, कल्पना-नं, रचना. **-or,** *s* [illegible]तृ *m.*, रचकः. 2 कूटकृत् *m.*

Façade, *s.* हर्म्यमुखं.

Face, *s.* मुखं, वदनं, आननं, वक्त्रं, आस्यं, तुंडं. 2 तलं, पीठं, पृष्ठं. 3 अवस्था, स्थिति *f.*, दशा; 'before one's f.' अग्रे, अग्रतः, पुरतः, समक्षं, प्रत्यक्षं, संमुखं-खे. 'long f.' विषण्णवदनं; 'f. to f.' मुखामुखि, संमुखं; 'in the f. of' अनादृत्य, अविगणय्य; *See* 'in spite of; 'in the f. of so many difficulties' एवंविधान्यपि कृच्छ्राण्यविगणय्य; 'turn away the f.' विमुखीभू; 'stand f. to f.' संमुखी-अभिमुखी-भू. **-***v. t.* संमुखयति-अभिमुखयति (D.); प्रतिमुखी-संमुखी-अभिमुखी-भू 1 P, (with gen.), संमुखं स्था 1 P, अभिमुखं गम् 1 P; पर्यव-स्था 1 A. 2 संमुख-अभिमुख-प्रतिमुख. **-***a.* भू 1 P, or by मुख-अभिमुख in comp.; 'a house f-ing the east' पूर्वाभिमुखं गृहं; 'stand f.-ing the east' प्राङ्मुखस्तिष्ठ; 'one who boldly f. s the enemy' अभ्यमित्र्यः; अभ्यमित्रीणः-यः. **-ed,** *a* (*s*) in comp.; 'moon-f.' चंद्रानना, इंदुमुखी. 2 पटाच्छन्न, अधिवस्त्रान्वित. **-less,** *a.* निर्मुख, आननहीन.

Facet, *s.* कणः, मुखं.

Facetious, *a.* विनोदिन्, परिहासशील, नर्मप्राय, सरस, रसवत्, हासोत्पादक, नर्म in comp. **-ly,** *adv.* सरसं, विनोदार्थं, परिहासपूर्वं. **-ness,** *s.* परिहासशीलता.

Facile, *a.* सुकर, सुसाध्य, अनायास; *See* **Easy.** 2 अनुकूल, अनुवर्तिन्. **-ity,** *s.* **Ease,** q. v. 2 लाघवं; 'f. of hand' हस्तलाघवं, क्षिप्रता, सहजता. **-Facilitate,**

v. t. सुकर *a.* कृ 8 U, विघ्नान् अपनी 1 P, or नश् c., निर्विघ्नीकृ; better ex. by words for 'Easy' q. v.; 'this will f. their communication' अनेन तेषामन्योन्यव्यवहारोऽयत्नसाध्यो भवेत्-सुकरो भवेत्. **-ed,** *a.* निर्विघ्न, हृतमत्यूह, सुकरीकृत.

Facsimile, *s.* प्रतिलिपि *f.*, प्रतिरूपं.

Fact, *s.* तथ्यं, यथार्थता, सत्यं, तत्त्वं, भूतार्थः; 'it was a statement of f. s' भूतार्थव्याहृतिः सा (R. x. 33). **2** वृत्तं, वस्तु *n.*, अर्थः, कर्मन् *n.*; 'in fact' वस्तुतः, तत्त्वतः, 'as a matter of f.' वस्तुवृत्तेन, परमार्थतः, तत्त्वतः.

Faction, *s.* दलं, पक्षः, शाखा. **2** भेदः, विरोधः, विप्रतिपत्ति *f.*, द्वंद्वं, द्वैधं, पक्षभेदः. **-Factious,** *a.* कलहप्रिय, भेदकारिन्, उपजापिन्, उपजापक, भेदिन्. **2** पाक्ष (क्षी *f.*). **-ly,** *adv.* सोपजापं. **-ness,** *s.* उपजापः, भेदकारिता.

Factitious, *a.* कृत्रिम, कृतक, कल्पित, रचित, शिल्पनिर्मित.

Factor, *s.* नियोगिन् *m.*, प्रतिनिधिः; 'three is a f. of six' षट् त्रिभिर्भाज्याः.

Factory, *s.* शिल्प-कर्म-शाला-गृहं, पण्यनिर्माणस्थानं.

Factotum, *s.* सर्वकर्मकरः.

Faculty, *s.* शक्ति *f.*, क्षमता, प्रभावः, सामर्थ्यं. **2** अधिकारः. **3** गणः, समाजः.

Fad, *s.* लहरी, छंदः.

Fade, *v. i.* म्लै-ग्लै 1 P, वि-कृ pass., निर्गल् 1 P, विच्छायतां व्रज् 1 P, विवर्णीभू 1 P. **2** अवसद् 1 P, जृ 4 P, नश् 4 P, क्षि pass., ध्वंस् 1 A, प्र-ली 4 A, अप-चि pass **-v. t.** Causal of roots above. **2** तेजो हृ 1 P, वर्णं नश् c. or विलुप् c., विवर्णीकृ 8 U. **-ed,** *a.* नष्ट, क्षीण, अपचित. **2** म्लान, विवर्ण, विच्छाय, गतवर्ण, वीतराग. **-ing,** *s.* म्लानि *f.*, क्षयः, ध्वंसः, अवसादः, हानि *f.*; 'f. of colours' वर्णोच्छेदः, वर्णहानिः, वर्णिकोच्छ्रासः.

Fag, *s.* दासः, निरंतरायासिन् *m.*, व्रातीनः. **-v. i. Drudge,** q. v.

Fag end, *s.* अंतः, अवसानसमयः. **2** शेषः-षं, उच्छिष्टं, अवशेषः.

Fagot, *s.* काष्ठानि (pl.); दारुखंडः, काष्ठभारः, इंधनदारु *n.*

Fail, *v. i* अव-वि-सद् 1 P, ध्वंस् 1 A, नश् 4 P, विलुप् pass., क्षि pass ; 'whose talent f. s not in difficulties' संकटेष्वविषण्णधीः. **2** भग्नाश *a.* भू 1 P; (of efforts) व्या-प्रति-हन् pass., व्यर्थ-मोघ-*a.* भू, न सिध् 4 P, विफलीभू. **3** प्रमद् 4 P (with abl.), (स्वाधिकारात् प्रमत्तः Me. 1); विस्मृ 1 P, उपेक्ष् 1 A, न अनुष्ठा 6 A. **4** न्यूनीभू, क्षि-अपचि pass. **5** विसं-वद् 1 P; 'f. s to give the fruit' फले विसंवदति (V ?); 'a good appointment was made to f. by Fate' रमणीयोऽपि विधिविधिना विसंवादितः (S. 6). **-v. t.** त्यज् 1 P, हा 3 P; 'whose courage does not f. him' यस्य धैर्यं न हीयते, न स्खलति; 'f. ing male issue' पुत्राभावे; 'his memory f.-ed him' तस्य स्मृतिलोपः संजातः. **-s.** उपेक्षा, अननुष्ठानं; 'without f.' अवश्यं, नियतं, नूनं, सुनिश्चितं, असंदेहं. **-ing,** *s.* दोषः; अपराधः, अगुणः, छिद्रं, न्यूनता, वैकल्यं. **-a.** मोघ, व्यर्थ; 'un-f. source' अक्षयः प्रभवः. **-ure,** *s.* अभावः, विरहः, लोपः, हानि *f.*, न्यूनता, वैकल्यं. **2** भंगः, अनिष्पत्ति *f.*, असिद्धि *f.* **3** अवसादः, क्षयः, ध्वंसः, नाशः, भ्रंशः, उच्छेदः, ह्रासः, क्षीणता, लोपः; 'f. of issue' संतत्युच्छेदः. **4** उपेक्षा-क्षणं, अननुष्ठानं, प्रमादः, उपात्ययः, अतिपातः, व्यतिक्रमः, लोपनं

Fain, *adv.* प्रकामं. सकामं, सानंदं; *See* **Gladly.**

Faint, *a.* अवसन्न, दीन, दुर्बल, अशक्त, शिथिलबल, निःसत्त्व, विह्वल, म्लान, ग्लान, क्लांत, खिन्न, तांत, विषण्ण; श्लथांग (गी *f.*), शुष्कगात्र, स्रस्तांग. **2** अस्पष्ट, अस्फुट, मंद. **3** (As colours) पांडु, विवर्ण, मंदप्रभ, मंदच्छाय; oft. by ईषत् or आ pr.; 'f. red' आरक्त, ईषद्रक्त; 'f.-hearted' भीरु, कातर, कापुरुष. **-v. i.** मुर्छ् 1 P, मुह् 4 P, मोहं-मूर्छां-गम् 1 P or प्राप् 5 P, चेतना-संज्ञा-हा 3 P, नष्टचेतन-लुप्तसंज्ञ-*a.* भू 1 P. **2** ग्लै-म्लै 1 P, स्रंस् 1 A, वि-अव-सद् 1 P, क्लम् 1, 4 P, तम् 4 P. **3** प्र-ली 4 A, नश् 4 P, क्षि pass. **-ing,** मूर्छा, मोहः, प्र-सं-मोहः, चैतन्य-संज्ञालोपः-नाशः, प्रलयः, चेतनानाशः. **-ly,** *adv.* स्तोकं, अल्पं, ईषत्, मनाक्; मंदं, अल्पबलेन. **-ness,** *s.* म्ला-ग्ला-नि *f.*, अवसादः, क्षीणता; वैवर्ण्यं, &c

Fair, *a.* चारु, सुंदर (री *f.*), शोभन ; *See* **Beautiful:** ex. by सु in comp.; 'the f. sex' स्त्रीजनः. **2** सम, न्याय्य, युक्त, उचित, धर्म्य, यथान्याय, न्यायवर्तिन्, शुचि, ऋजु, निर्व्याज, निष्कपट; विमलात्मन्, शुद्धधी; 'a f. fight' धर्मयुद्धं. **3** विमल, निर्मल, शुद्ध, विशद, स्वच्छ; गौर, शुभ्र (complexion); अनभ्र, निरभ्र, वितिमिर ; 'f. day or weather' सुदिनं. **4** अनुकूल, प्रसन्न. **5** मध्यम; 'he soon bids f. to prosper' तेनाचिरादभ्युदयभाजा भवितव्यमित्यनुमीयते. **-s.** मेला, मेलकः, यात्रा, समाजः; हट्टः, निपद्या, निगमः. **-adv.**, **-ly,** *adv.* न्यायेन, यथान्यायं, धर्मतः, धर्मेण, निष्कपटं, न्याय्यं, यथार्हं. **-ness,** *s.* सौंदर्यं, चारुता, श्रीः, शोभा. **2** (Fair dealing) सारल्यं, शुचिता, न्याय्यता आर्जवं, अपक्षपातः, समता, [handwritten: ...] 3 [handwritten: ...] *f.* [handwritten: ...]

Fairy, *s.* विद्याधरी, पिशाची, योगिनी, राक्षसी.

Faith, *s.* विश्वासः, प्रत्ययः, विश्रंभः 2 श्रद्धा, भक्ति *f.*, निष्ठा. आस्तिक्यबुद्धि *f.* 3 अव्याजः, ऋजुता, सत्यता, विश्वास्यता. **-ful,** *a.* विश्वास्य विश्वसनीय, विश्रब्ध. 2 सत्यसंध, सत्यप्रतिज्ञ-व्रत; 'f. to promise' पालितसंगर, प्रतिज्ञापालक. 3 अनुरक्त, भक्त, दृढभक्ति, भक्तिमत्; 'a f. wife' साध्वी, एकपत्नी, पतिव्रता, सती, सुचरित्रा; 'a f. friend' दृढसौहृदं-दृढप्रेम-मित्रं. 4 यथार्थ, सत्य. 5 श्रद्धालु, श्रद्दधान, प्रत्ययिन्, विश्वासिन्. **-fully,** *adv.* दृढभक्त्या, भक्तिपूर्वं, सानुरागं, निष्ठया; अव्याजं, ऋजुभावेन, निष्कपटं. **-fulness,** *s.* विश्वास्यता. 2 भक्ति *f.*, दृढा भक्तिः, अनुरक्ति-आसक्ति-*f.*; आर्जवं, निष्कापट्यं. 3 प्रतिज्ञापालनं, सत्यसंधता. 4 सत्यता. **-less,** *a.* अविश्वास्य. 2 अभक्त, विश्वासघातक, भक्तिहीन, अननुरक्त. 3 असत्यसंध, भग्नप्रतिज्ञ, विसंवादिन्. 4 अविश्वासिन्, अप्रत्ययिन्, अश्रद्दधान. 5 व्यभिचारिन्; असती, असाध्वी, भ्रष्टचारित्र्या (as a woman). **-lessness,** *s.* अविश्वासः, अप्रत्ययः, अश्रद्धा. 2 विश्वासभंगः-घातः, अभक्ति *f.* 3 प्रतिज्ञाभंगः, समयव्यतिक्रमः, असत्यसंधता, व्रतलोपनं.

Falcated, *a.* वक्र, दात्राकृति.

Falchion, *s.* वक्रखड्गः, निस्त्रिंशः, चंद्रहासः, कृपाणः.

Falcon, *s.* श्येनः, शशादनः, पत्रिन् *m.*, खगांतकः. **-er,** *s.* श्येनपालकः-पोषकः, श्येनाजीवः. **-ry,** *s.* श्येनपालनं-शिक्षा-पोषणं.

Fall, *v. i.* च्यु 1 A, गल् 1 P, स्रंस् 1 A, पत् 1 P, नि-अव°, भ्रंश् 1 A, 4 P; 'fell under his displeasure' तस्याकृपापात्रं-कोपास्पदं-बभूव. 2 मृ 6 A, नश् 4 P, वि-प्र-ध्वंस् 1 A, प्र-ली 4 A, प्राणैः वियुज् pass. 3 अवसद् 1 P, क्षि-अपचि pass., न्यूनीभू 1 P, ह्रस् 1 P; 'a cow f.s beneath his paw' गौस्तस्य नखपंजरे पतति, नखराक्रांता भवति; 'when the wind fell' शांते पवने. 4 द्रु 1 P, प्रविश् 6 P, अवतॄ 1 P, (गंगा सागरं प्रविशति-अवतरति); 'f. foul of' संघट्ट 1 A, आक्रम् 1 U, 4 P; वि-वद् 1 A; 'f. to the ground' ध्वंस्, (ध्वंसितस्ते उत्साहवृत्तांतः S. 2), विनश् **-s.** पातः, पतनं, च्युति *f.*; ध्वंसः, भ्रंशः, स्रंसनं, अधः-नि-पतनं, अव-नि-पातः; 'in rapid f. descend' जवेन निपतंति. 2 स्थानभ्रंशः-च्युतिः, अपकर्षः, पदनाशः-भ्रंशः-च्युतिः. 3 प्र-वि-ध्वंसः, सं-उपरि-क्षयः, अवसादः; 'rise and f.' पातोत्पाताः. 4 ह्रासः, अपचयः, न्यूनीभावः. 5 निर्झरः, प्रस्रवणं, प्रपातः, वारिप्रवाहः. 6 पातुकप्रवण-भूमि *f.*; 'f. of snow' तुषारवर्षः, हिमवृष्टि *f.*, 'f. of rain' धारासंपातः, धारासारः, आसारः. **-away,** म्लै ग्लै 1 P. निर्गल्, प्र-ली, नश्. 2 स्वधर्मात् भ्रंश् or च्यु. **-back,** परावृत् 1 A, अप-सृ-सृप् 1 P, अवस्था 1 A. **-in with,** संपद् 4 A, अभ्युपगम् 1 P; *See* Agree. 2 आसद् *c.*, सहसा दृश् 1 P. **-into,** नि-अंतः-पत्; 'f. into vice' कुमार्गगामिनो भवंति; 'f. into misfortune' विपद्ग्रस्ता भवंति **-off,** च्यु भ्रंश्. 2 अपसृ 1 P, पलाय् 1 A, वियुज् pass. 3 स्वधर्मं त्यज् 1 P, पत्. 4 ह्रासं गम् 1 P, क्षि-अपचि-संहृ -pass., ह्रस्. **-on, -upon,** आक्रम्, अभिद्रु, आपत्, अवस्कंद् 1 P. **-out,** विवद् 1 A, विप्रति-पद् 4 A, कलहं कृ 8 U. **-short,** न्यूनीभू, ह्रस्, क्षि-संहृ pass.; 'his arrow fell short of its aim' स लक्ष्यच्युतसायकोभूत्; 'words f. short in describing your greatness' तव महिमानमुत्कीर्त्य वचः संह्रियते (R. x. 32). **-to,** प्र-उप-क्रम् 1 A, प्रारभ् 1 A; 'they fell to blows' परस्परप्रहारमारेभिरे. **-under,** (power) वशं इ 2 P, अधीन *a.* भू. 2 अंतर्भू, अंतर्गण् pass.

Fallacy, *s.* वंचना, भ्रमः, मोहः, भ्रांति *f.*, मिथ्याज्ञानं, हेत्वाभासः, पक्षाभासः, मिथ्याहेतुः. **-ous,** *a.* भ्रमजनक, भ्रांतिमत्, मोहिन्, मायिन्; असत्य, अविश्वास्य, मिथ्या in comp.; 'a f. argument' हेत्वाभासः. **-ously,** *adv.* मिथ्या, सव्याजं, मायया.

Fallible, *a.* पतन-स्खलन-शील, भ्रमशील, भ्रमाधीन, मोहशील, भ्रम-स्खलन-पात्रं. 2 भ्रमकारिन्, मोहिन्, मोहजनक. **-Fallibility,** *s.* भ्रमपात्रता, मोहशीलता, स्खलनशीलं

Fallow, *a.* अकृष्ट, अहल्य, अप्रहत, खिल. 2 वंध्य, निष्फल, विफल, असूतशस्य 3 ईषद्रक्त, आरक्त, श्वेतरक्त.

False, *a.* असत्य, अनृत, वितथ, अतथ्य, अयथार्थ, अलीक, मृषा-मिथ्या- in comp.; 'f. speech' मृषोद्यं. 2 कृत्रिम, कृतक, कल्पित, कूट-कपट-छद्म- in comp.; 'f. balance' कूटतुलामानं; 'f. ascetic' छद्मतापसः, बकव्रतः; 'f. witness' कूट-मिथ्या-साक्षिन् *m.*; 'f. accusation' मिथ्याभियोगः, अभिशापः, अभ्याख्यानं, मिथ्याभिशंसनं. 3 कापटिक (की *f.*), विश्वासघातिन्, मंत्र-रहस्य-भेदिन्; 'f. to one's promise' लुप्तप्रतिज्ञ, असत्य-संध, भग्नप्रतिज्ञ-व्रत. 4 मायिन्, दंभिन्, दांभिक-छाद्मिक (की *f.*). 5 मोघ, व्यर्थ, निरर्थक, वृथा-मिथ्या- in comp. **-hood,** *s.* अनृतं, असत्यं, वितथं, अलीकं, मृषोद्यं, कैतवं. 2 असत्यभाषणं, मिथ्या-मृषावादः, कैतवोक्ति *f.*, मिथ्याभिधानं, अनृतवादः. 3 असत्यता, अलीकता, अयथार्थता, अनृतता. **-ly,** *adv.* मृषा, मिथ्या, अन्यथा, असत्यं, अनृतं; 'speaking f.' अनृतवादिन्. **-ness,** *s.* असत्यता, &c. 2 कूटता, कापट्यं, व्याजः, छद्मन् *n.*, कैतवं. 3 विश्वासभंगः-घातः. **-Falsify,** *v. t.* मिथ्या कृ 8 U, कूट-कपटं-कृ

'a f. ed document' कूट-कृत्रिम-लेख:. 2 खंड् 10, मिथ्या-अन्यथा-कृ, अयथीकृ, वितथीकृ, मन्या-ख्या 2 P, विरुद् 4 U. 3 अतिक्रम् 1 U, 4 P, अतिचर् 1 P, भिद् 7 P, उल्लंघ् 1 A. 10, वि-,लुप् 6 P, or c. —v. i. असत्यं-अनृतं-वद् 1 P. —er, s. कूटकृत् m., कूटक: 2 मृषावादिन्-अनृत-असत्यवादिन् m. —ication, s. कूटकरणं-रचना, मिथ्याकरणं.

Falter, v. i. (स्वरेण) स्खल् 1 P, स्वरभंगेन or सगद्गदं-वद् 1 P; 'makes thy words f.' स्खलयति वचनं ते (Mal. 3); 'f. ing with tears' बाष्पगद्गदं; 'a f. ing step' स्खलिता गति:; प्रस्थानविक्लवगते: (S. 5); 'whose step f. s &c.' 2 प्रचल् 1 P, कंप् 1 A. वेप् 1 A. प्रस्खल्. —ing, s. स्खलनं, स्वरभंग:-भेद:, गद्गदवाच् f., स्खलद्वाक्यं. —ingly, adv. गद्गदगिरा, स्खलद्वाचा, स्वरभंगेन, सगद्गदं.

Fame, s. यशस् n., कीर्ति f., ख्याति f., विश्रुति प्रसिद्धि f., प्रतिष्ठा, प्रति-विख्याति:, संप्रथा. —ed, —ous, a. ख्यात, प्रथित, विश्रुत, प्र-वि-ख्यात, प्रसिद्ध, यशस्विन्, यशस्वत्, कीर्तिमत्, कीर्तित, लोकविश्रुत, महायशस्क, लब्धप्रतिष्ठ-वर्ण.

Familiar, a. परिचित, संस्तुत, अभिज्ञ; प्रविद्-कुशल-in comp.; अभ्यंतर, (अनभ्यंतरे आवां मदनगतस्य वृत्तांतस्य S. 3.). 2 सुविदित, सुज्ञात, लोकसिद्ध, प्राकृत, लौकिक (की f.), सुप्रसिद्ध, सुप्रकाश. 3 विस्रब्ध, विश्रंभ in comp. 4 निरादर, निर्गौरव, आदरहीन, निःप्रश्रय. —ity, s. सु-, परिचय:; परिज्ञानं, संस्तव:; 'long f.' चिरपरिचय:; 2 सुहृद्-संसर्ग:, आसंग:, संसक्ति f. 3 अतिपरिचय:, अनादर:; 'f. breeds contempt' अतिपरिचयादवज्ञा (भवति). —ize, v. t. परिचय कृ 8 U., or c., अभ्यस् 4 U or c.; often ex. by (a.), परिचितविविक्तेन मनसा (S. 5) 'with a mind f. ed to seclusion.' —ly, adv. सुपरिचितवत्, सुविश्रब्ध. 2 प्राय:, प्रायश:, लौकिकतया. 3 अनादरेण, निर्गौरवं.

Family, s. कुलं, वंश:, जाति f., गोत्रं. 2 कुटुंबं, पुत्रकलत्रादि, गृहजन:. 3 अन्वय:, संतान:-नं, संतति f.; 'members of a f.' कुटुंबिन:; 'head of a f.' कुटुंबिन् m., कुलपति:; 'of a good f.' कुलीन, महाकुल, अभिजात, कुल in comp.; 'his wife is in the f. way' आपन्नसत्त्वा-गर्भवती-जाया; 'of royal f.' राजवंश्य, राजकुलप्रसूत; 'f. dispute' गृहच्छिद्रं, अंतर्भेद:; 'a f. man (diligently caring for the f.)' अभ्यागारिक:, कुटुंबव्यापृत:.

Famine, s. दुर्भिक्षं, अनशनं, दुष्काल:, मन्वंतर:, अन्नाभाव:, अनाहारसमय:; 'f.-stricken' दुर्भिक्षपीडित.

Famish, v. t. (क्षुधया) पीड् 10, अवसद् c., क्षीणी-कृशी-कृ 8 U; 'f. ed with hunger' क्षुत्क्षाम, क्षुत्क्षामकंठ. —v. i. अनशनात् अवसद् 1 P or क्षि pass., क्षाम-कृशांग -a. भू. —ed, a. क्षुत्क्षाम, क्षुधार्त, क्षुत्पीडित, बुभुक्षित. —ment, s. बुभुक्षा, अनाहार:, अन्नाभाव:, क्षुत्पीडा, क्षुत्क्षामता.

Fan, s. तालवृंत:-वृंतकं, व्यजनं, वीजनं, व्यजन:. —v. t. वीज् 10, उप-अनु-वी; व्यजनेन विधू 9 U. (fig.) उद्-दीप् c., संधुक्ष् 10.

Fanatic, —al, a., s. धर्मोन्मत्त, अतिश्रद्धान्ध; उन्मत्त, भ्रांतबुद्धि. —ally, adv. उन्मत्तवत्, अतिश्रद्धया. —ism, s. धर्मोन्माद:, मतोत्कर्ष:, अतिभाक्तिव्यग्रता. 2 उन्माद:, उन्मत्तता.

Fancy, s. वासना, भावना, कल्पना, भावना-कल्पना-शक्ति f. 2 बुद्धि f., मति f., संकल्प:. 3 मनोलौल्यं, कामचार:, बुद्धिचापल्यं, चापलं, लहरी, तरंग:, छंद:. 4 रुचि f.; अभिरुचि:, काम:; 'to have or take a f. for' स्पृह् 10 (with dat.) or ex. by कामं मन: with inf.; स्पृहयामि खलु दुर्ललितायास्मै (S. 7), 'took a f. to hunt' मृगयां कर्तुमना बभूव. —v. t. मन् 4 A, तर्क् 10, संभू-विभू c.; चिंत् 10, मनसा कल्प् c.; विभेमनसि-कृ, आलोच् 10. 2 रुच् 1 A, अभिनंद् 1 P; 'f. ing oneself to be learned' पंडितंमन्य, पंडितमानिन्; 'doing what one f. es' कामचारिन्. —Fanciful, a. मानस (सी f.), काल्पनिक-भावनिक (की f.), मन:कल्पित, भावित, मनोरथसृष्ट-कल्पित, भावनोत्पादित, वासनाकल्पित, संकल्पज, मायामय (यी f.) 2 (Of persons) चलचित्त, लोलमति, कामचारिन्, चपलबुद्धि, मनोलौल्यवत्, स्वैरिन्, स्वैरवृत्त. 3 अनर्थकवासनाकृत्, असंभवकल्पक. —ly, adv. कामचारेण, मनोलौल्यात्, स्वैरं, चापल्येन. —ness, s. चलचित्तता, लोलमति f., कामचारिता, मनोलौल्यं, बुद्धिचापल्यं, स्वैरिता.

Fane, See **Temple**.

Fang, s. दंष्ट्रा, दशन:-नं, रद:, रदन:, दंत:; 'f. of a serpent' विषदंत:, आशी f. —ed, a. दंष्ट्रिन्, दंतिन्. —less, a. भग्नदंष्ट्र, निर्दशन, निर्दंत.

Fantasm, s. आभास:, माया, मनोरथसृष्टि f. —Fantastic, a. Fanciful, q. v. 2 विषम, असंगत, अपरूप, विलक्षण.

Fantasy, s. See **Fancy**.

Far, a. दूर (with abl. or gen.), विप्रकृष्ट; See **Distant**; 'f. from comfort' सुखाद्दूरगत. —adv. दूरं-रे, आरात् (with abl.), विदूरत:, अत्यंतं, भृशं, अतीव, सु-अति 'pr.; f. away' दूरे, सुदूरं, 'from f.' दूरात्, दूरत: (गतो),

'how f.' कियद्दूरं, कियत्पर्यन्तं, कियत्प्रमाणं, किंपर्यंतं, कियत्कालीन; 'f. off' दूर, दूरस्थ, दूरवर्तिन्, दूरस्थायिन्; 'as f. as' ex. by आ with abl. or in comp.; 'as f. as the sea' आसमुद्रात् or आसमुद्रं; oft. by यावत् (with acc.) or पर्यंत in comp; 'so far as' 'as f. as' इति; *See* under **As** 'not f. from the tree' तस्य वृक्षस्य नातिदूरे; 'by f.' भूयसा; 'your statement is not f. from the truth' भूतार्थकल्पं तव वचः; 'f. gone in love' दूरगतमन्मथा (S. 3). In comp. ex. by अति, बहु, दूर; 'f.-extended' बहुविस्तीर्ण; 'f.-famed' प्रथितयशस्, उरुकीर्ति; 'f.-fetched' क्लिष्ट, यत्नकृत, असुगम, असुकर; 'f.-reaching' दूराधिरूढ; 'f.-seeing', 'f.-sighted' दूरदर्शिन्, दीर्घदृष्टि, दूरदृष्टि.

Farce, *s.* प्रहसनं, दुर्मल्लिका. **–Farcical,** *a.* उपहास्य, हास्य (र्या *f.*), हास्योत्पादक; असंगत, अपरूप, हासजनक.

Fardel, *s.* कूर्चः, गुच्छः, स्तबकः, पोटलिका, भारः.

Fare, *s.* अन्नं, आहारः, भक्ष्यं, भोजनं. **2** तार्य, आतार(त)रः, तारिकं, तरपण्यं-मूल्यं. **–**v. *i.* भू 1 P, वृत् 1 A अस् 2 P, स्था 1 P; 'को वृत्तांतस्तत्रभवत्याः (M. 4) 'how f.s it with her ladyship'; 'f. ing well' सुस्थ, सुस्थित; 'f. ing ill' दुःस्थित, दुर्गत. **–Farewell,** *inter.* स्वस्ति, भद्रं (भूयात्) with dat.; 'bid f.' आमंत्र् 10 A, आप्रच्छ् 6 A.

Farina, *s.* परागः, रजस् *n.*, पुष्परेणु.

Farinaceous, *a.* धान्यमय, गोधूमचूर्णमय (यी *f.*).

Flute, *s.* वेणुः, मुरली, वंशः -*v. i.* 'Blow a f.' (वेणुं) मुखमारुतेन पूर् 10 or वद् c., ध्मा 1 P: 'f.-player' वैणविकः, वेणुध्माः, वांशिकः.

Flutter, -*v. i.* पक्षौ वि-धू 5, 9 U, 6 P or आस्फल् c. or उत्क्षिप् 6 P or विचल् c. 2 इतस्ततः चल् 1 P or धाव् 1 P or प्र-सृ 1 P. 3 कंप् 1 A, स्फुर् 6 P, उल्लस् 2 P, स्पंद् 1 A, क्षुभ् 4 P. -*v. t.* संक्षुभ् c., आकुलीकृ 8 U, स्पंद् c., कंप् c., स्फुर् c. -*s.* विधूननं, आस्फालनं, उत्क्षेपणं. 2 विकंपः, स्फुरणं, स्पंदनं, उल्लसनं. 3 सं-,क्षोभः, संभ्रमः, सं-आ-वेगः, चित्तवेगः- भ्रमः. -ing, *s.* पक्षास्फालनं, पक्षचालनं. -*a.* विचल, कंपमान; 'f. in the breeze' अनिलोद्धत, पवनाक्षिप्त, पवनाधूत.

Fluvial, *a* नदीसंबंधिन्.

Flux, *s.* (Fluxion) प्रवाहः, प्र-,स्रवः, क्षरणं. गलनं, स्पंदनं. -*v. t.* वि-द्रु c., वि-ली c. -ible, *a.* द्राव्य, गलनीय.

Fly, *s.* मक्षिका, वर्वणा, नीला; 'f.-flap' अवचूलकः, रोमगुच्छः, 'f. leaf' मलपृष्ठं. -*v. i.* उद्-,डी 1, 4 A, उत्-पत् 1 P, खे विसृप् 1 P, आकाशेन या 2 P or गम् 1 P. 2 अप-या 2 P, वि-प्र-द्रु 1 P, पलाय् 1 A; *See* **Flee.** 3 त्वरितं-शीघ्रं गम् or चल् 1 P or विसृप् or अतिक्रम् 1 U, 4 P. -*v. t.* त्यज् 1 P, परिहृ 1 P, वृज् 10. 2 आकाशे निक्षिप् 6 P or विसृप् c. or विसृ c.; 'f. at' आ-अभि-पत्, आ-अभि-द्रु, आ-अभि-प्र-धाव् 1 P; 'let f.' मुच् 6 P, उत्पत् c., विसृज् 6 P. -ing, *s.* डयनं, विसर्पणं, उत्पतनं; 'f. up and down' डीनावडीनं. -*a.* खविसर्पिन्, आकाशगति, आकाशगामिन्, डयमान, नभोगति; f. bridge' चलसेतुः, जंगमसेतुः, -**Flight,** *s.* पलायनं, विद्रावः, अपयानं, अपक्रमः-मणं, अपगमः; 'to put to f.' विद्रु c.; 'put to f.' विद्रुत, विद्रावित, कांदिशीक. 2 (Of birds) डयनं, डीनं, उड्डयनं, उत्पतनं, उद्गमनं; 'downward f.' अवडीनं. 3 पक्षि-माला-श्रेणी. 4 मति-बुद्धि-विलासः; 'f. of steps' सोपानपंक्ति-श्रेणि -णी *f.*, सोपानपरंपरा; 'f. of an arrow' शरपातः. -y, *a.* चलबुद्धि, भ्रांत-लोल-मति; अस्थिर, लोल; *See* **Fickle.**

Foal, *s.* किशोरः, अश्वशावः-वकः, बालघोटकः, अंबरीषः.

Foam, *s.* फेनः-णः. 2 मंडः, उत्सेकः; 'snowy f.' हिमधवलं, फेनपटलं. -*v. i.* फेनायते-मंडायते (D.), फेनं उत्पद् c. or निर्गम् c. (गमयति), उत्सिच्-उत्पीड्-pass. -y, *a.* फेनिल, फेनल, फेनयुक्त, फेनिन्.

Fob, *s.* घटीपिधानं-कोशः. -*v. t.* **Cheat,** q. v.

Focus, *s.* केंद्रं. -*v. t.* एकत्रीकृ 8 U.

Fodder, *s.* घासः, यवसं, पशुभोजनं, तृणादि *n.*

Foe, *s.* शत्रुः, अरिः, रिपुः; *See* **Enemy.**

Foetus, *See* **Fetus.**

Fog, *s.* कुहेडिका, कुहा, धूमि(पि-लि)का, कुज्झटिका, कुज्झटि-टी *f.* -gy, *a.* कुहावृत, धूमल, सधूमिक, कुज्झटिकाच्छन्न, धूमिकावृतमय (यी *f*).

Foible, *s.* छिद्रं, दोषः, अपराधः, न्यूनता, हीनता, वैकल्यं, अगुणः.

Foil, *v. t.* परा-भू 1 P, परा-जि 1 A; भंज् 7 P; व्या-प्रति-हन् 2 P, खंड् 10, परास् 4 U, मोघी-विफली-कृ 8 U. **2 Blunt,** q. v. —*s.* भंगः; व्याघातः; पराभवः. **2** मिथ्याखड्गः, निर्धार खड्गः. **3** पत्रं; 'golden f.' स्वर्णपत्रं. **4** प्रभा-वर्धकं, कांति-शोभा-वर्धकं. **—ed,** *a.* (Of persons) भग्नोद्यम, खंडिताश, हताश, अकृतार्थ; *See* **Disappointed. 2** (Of efforts &c.) भग्न, प्रतिहत, मोघीभूत, खंडित.

Foin, *s.* यष्टि-खड्ग-आघातः. —*v. t.* यष्टिना प्रहृ 1 P or तड् 10.

Foist, *v. t.* कपटेन लिख् 6 P or निविश् c., मिथ्या क्लृप् c., कृत्रिम *a.* कृ 8 U.

Foistiness, *s.* पूतिगंधिता.

Fold, *v. t.* पुटी-गुणी-कृ 8 U, व्यावृत् c., संपीड् 10, पुटयति (D.); 'f. ed thrice' त्रिगुणीकृत; 'f. ing his hands together' हस्तौ समानीय (R. II. 64), अंजलिं बद्ध्वा, कृतांजलिः, सां(प्रां)जलिः. **2** संवृ 5 U, पि-धा 3 U, आ-वेष्ट् c., आच्छद् 10. **3 Embrace,** q. v.; 'f. ing her in his arms' भुजाभ्यां तामापीड्य. **4** व्रजे निरुध् 7 U or निविश् c. —*s.* पुटः-टं, भंगः, व्यावृत्ति *f.* व्यावर्तनं; चूणः, वस्त्रभंगः-पुटः, ऊर्मि *f.* **2** व्रजः, अवरोधः, शाला, गोष्ठं; 'cattle-f.' गोव्रजः; 'sheep-f.' मेषगोष्ठः -गोस्थानं, व्रजाजिरं. **3** (In comp.) ex. by गुण; 'eight-f.' अष्टगुण; 'f. ing doors' द्विपक्षद्वारं.

Foliage, *s.* पल्लवः-वं, किसलयः-यं, पर्णं, दलं, पत्रं (gen. used in pl.); पल्लवगुच्छः-चयः.

Foliate, *a.* पर्णावृत, सदल.

Folio, *s.* पुस्तकपत्र, पृथु-विशाल-पत्रं.

Folk, *s.* जनः, जनसमूहः, जनता, लोकः; 'old f.' वृद्धजनः, वृद्धाः.

Follow, *v. t.* अनु-गम्-व्रज्-सृ 1 P, अनुबंध् 9 P, अनु-इ-या 2 P, अनुचर् 1 P, अनुक्रम् 1 U, 4 P. **3** सेव् 1 A, अनुष्ठा 1 P, आ-स्था 1 A; अनुवृत् 1 A, आश्रि 1 U, पुरस्कृ 8 U, अनुवि-धा 3 U, अनुरुध् 4 A, अनुसृ; 'f. (in) the footsteps of the great' महतां पदमनुविधेयं; 'f. ing the path' पदवीं प्रतिपद्य; 'f. ing a middle course' पुरस्कृतमध्यमक्रमः (R. VIII. 9); 'one misfortune f. s another' दुःखं दुःखानुबंधि (V. 4), विपद्विपदमनुबध्नाति (Ka. 73.) **3** उपास् 2 A, भज् 1 U, आश्रि, परिचर्; शुश्रूषति, (शुश्रूषते). —*v. i.* उत्पद् 4 A, प्राप्-आपद्-सिध्-अनुमा-pass. ; परिच्छिन्नस्तावज्जीव इति प्राप्नोति (S. B. 651) it f. s therefore &c.'; 'what f. ed is understood' परस्तादवगम्यते (S. 1); (in conversations) ततस्ततः; 'what f. ed next'; 'as f. s' तद्यथा, तद्यथानुश्रूयते, or merely एवं, इति, उक्तप्रकारेण, इत्थं. **—er,** *s.* अनुयायिन्-गामिन्-वर्तिन्-सारिन् *m.* **2** परिजनः, सेवकः, अनु-उप-जीविन् *m.*, अनुगः, अनुचरः, अनुयातृकः, अनुगतिकः, परिवारः, सहचरः, सहायः. **3** आश्रितः, भक्तः, अनुषंगिन् *m.* **—ing,** *a.* इदं-एतद् *pron. a.*; 'the f. story' एषा-इयं-कथा; पश्चात् कीर्त्यमान, अनुग, अनुयायिन्. —*s.* अनुसरणं-यानं-गमनं-वृत्ति *f.*-रोधः-वर्तनं.

Folly, *s. See* under **Fool.**

Foment, *v. t.* (उष्णोदकादिना) सं-सिच् 6 P, लिप् 6 P, अंज् 7 P, दिह् 2 U; स्विद् c. **2** उद्दीप् c., प्र-सं-वृध् c., उत्तिज् c., प्रोत्सह् c., उत्तप् c., प्रकुप् c., प्रवृत् c.; 'f. disputes' उप-जप् 1 P, भेद वृध् c., भेदबीजं वप् 1 P. **—ation,** *s.* प्र-,स्वेदनं, घर्मानुलेपनं, द्रवस्वेदः. **2** उद्दीपनं, संवर्धनं, उत्तेजनं, प्रवर्तनं. **—er,** *s.* उपजापकः, भेदकरः.

Fond, *a.* वत्सल, अनुरागवत्, सानुराग, अनुरक्त, प्रणयिन्, अनुरागिन्. **2** सेविन्, अभिलाषिन्, आसक्त, रक्त, रत, पर, तत्पर, gen. in comp. **3** मूढ, मुग्ध, अत्यनुरक्त; 'f. of' ex. by शील, लालस, काम, प्रिय, in comp.; oft. by इष् 1 A, कांक्ष् 1 U, अभिलष् 1, 4 P, भज् 1 U, सेव्-रुच् 1 A; 'f. of sport' क्रीडाप्रिय; 'f. of chase' मृगयाशील; 'f. of change' अवस्थांतरमीहमान; 'f. of drinking' पानासक्त, पानव्यसनिन्. **—ly,** *adv.* सानुरागं, सप्रेम-मं; अतिस्नेहेन, अतिवात्सल्येन. **—ness,** *s.* अनुरागः, आसक्ति *f.*, रति *f.*, प्रीति *f.*, प्रणयः, स्नेहः; 'ingenious f. for the mate' कांतानुवृत्तिचातुर्यं; प्रेमन् *m.*, *n.*, वात्सल्यं; अभिरुचि *f.*, कामः, इच्छा, ईहा.

Fondle, *v. t.* उप-लल् 10, अंके-पा c. (पालयति), क्रोडीकृ 8 U, आलिंग् 1 P, परिष्वंज् 1 A, आ-सं-पीड् 10; 'f. ed too much' दुर्ललित. **—ing,** *s.* उप-,लालनं, आलिंगनं, भुजापीडनं, परिष्वंगः. **2** प्रेम-स्नेह-पात्रं-भाजनं, स्नेहभूमि *f.*

Food, *s.* अन्नं, आहारः, भोजनं, भोज्यं, भक्ष्यं, खाद्यं, खादनं, भक्षणं, अभ्यवहार्यं; भक्तं, विघसः, ग्रासः, अशनं, अंधस् *n.*; cooked f.' ओदनः-नं; 'f. and raiment' ग्रासाच्छादनं, अन्नवस्त्रं; 'forbidden f.' अभक्ष्य.

Fool, *s.* मूर्खः, मूढः, निर्बुद्धिः, अज्ञः, जडः, मंदः, अबुधः, अप्राज्ञः, प्रज्ञाहीनः, स्थूल-जड-धीः, अल्प-धीः-मतिः, मंद-धीः-मतिः, अनात्मज्ञः, बर्बरः; 'make a f. of' उपहासास्पदं कृ 8 U, विडंब् 10, (एवं प्रार्थयिता विडंब्यते S. 2). —*v. t.* मुह् c., वि-प्र-लुभ् c., वंच् 10; *See* **Cheat;** 'f.-hardy' अतिसाहसिक, व्यामूढ, अविमृश्यकारिन्, अविमृश्य प्रगल्भ, प्रमत्तवीर, प्रमत्त. **—ery,** *s.* प्रहसनं,

विडंबना. 2 बालिश्यं, मूर्खक्रिया, बालिशता, मूर्खता, व्यामोहः. **-ish**, *a.* मूर्ख, मूढ, बालिश, अनात्मज्ञ, दुर्मति, दुर्मेधस्, वैधेय, बालिशमति, निर्बुद्धि, जड, स्थूलधी, प्रज्ञा-बुद्धि-हीन; *See* (*s.*). 2 निरर्थक, अविमृश्यकृत-वृत्त. **-ishly,** *adv.* मूढतया, अज्ञानेन, मूर्खवत्, मूढवत् मौर्ख्येण **-ishness, -Folly,** *s.* मौर्ख्यं, आड्यं, मोहः, मंदमतिता, मूर्खता, मूढता, बालिश्यं, बालिशता, दुर्बुद्धिता, अज्ञानं, निर्बुद्धित्वं, ज्ञानाभावः, अनात्मज्ञत्वं.

Foot, *s.* पादः, पदं, चरणः-णं, अंघ्रिः. 2 तलं, अधोभागः, मूलं; उपस्थः. 3 (In metre) चरणः, पदं. 4 पत्ति-पदाति-समूहः-गणः. —*v. t.* पादेन प्रहृ 1 P or तड् 10 or आहन् 2 U ; 'f. of a mountain' उपत्यका, पादः; 'set one's f. in' पदं कृ 8 U (lit. and fig.); आश्रमे पदं करिष्यसि (S. 4), कुतूहलेन प्रश्नाश्रया हृदि पदं कृतं (Ka. 133); 'walk on f.' पद्भ्यां चर्-व्रज् 1 P, पादचारी भू; 'walking on f.' पादगः, पादचारः; पदातिः; 'water for the feet' पाद्यं; पादोदकं; 'set on f.' प्रवृत् c., उपक्रम् 1 A; प्रारभ् 1 A; 'f.-board' चरणफलकः, 'f.-boy' चेटः, भृत्यः, बालसेवकः, युवप्रेष्यः; 'f.-bridge' संक्रमः, संक्रमसेतुः; 'f.-fall' चरणपातः, पादन्यासः, स्खलनं; 'f.-fight' पदातिपादग-युद्धं; 'f.-licker' पीठमर्दः, चरणसेवक, 'f.-man' चेटः, सेवकः, प्रेष्यः, परिचरः, किंकरः, 'f.-mark-print' पाद-पद-चिह्नं, पदपंक्ति *f.*, पदवी, पद्धति *f.*, पादमुद्रा; f.-pace' पादन्यासः, चरणक्रमः-पातः; 'f-path' संसरणं, चरणवीथि *f.*, पथिकमार्गः, पद्या, 'f.-soldier' पदातिः, पत्तिः, पादातिः-तिकः, प(पा)दातः, पादचारः, प(पा)दगः, पदाजिः, पदूः, पदिकः; 'f.-step' पादन्यासः, पद-चरण-निक्षेपः-पातः, पदं, पदपंक्ति *f.* (f.-print) ; पद्धतिः, मार्गः, वर्त्मन् *n.*, पदवि-वी *f.*, लक्षणं; 'f.-stool' पाद-पीठं, चरणपीठं, पादासनं. **-ing,** *s.* पदं, स्थानं, भूमि *f.*, स्थलं, आस्पदं, पदवि-वी, सरणि *f.* 2 वास्तु *m.*, *n.*, मूल, उपष्टंभः. 3 आश्रयः, अवलंबनं, आधारः. 4 स्थिति *f.*, वृत्ति *f.*, अवस्था, भावः, दशा; 'f. of equality' समता, तुल्यभावः. **-less,** *a.* पादहीन, अचरण.

Fop, *s.* दर्शनीयमानिन् *m.*, वेषाभिमानिन् *m.*, दंभिन् *m.*, सुवेशमानिन् *m.* छेकः, रूपगर्वितः. **-pish,** *a.* दंभिन्.

For, *prep.* (On account of) ex. by instr. or abl.; अर्थे-र्थं, हेतुना, हेतोः, कृते, कारणात्, निमित्तात्, निमित्तं, in comp.; 'for his deliverance' मोक्षनिमित्तं, मुक्तिहेतोः, &c. 2 (Purpose) by dat. or by अर्थं-अर्थं in comp. 3 (For the sake of) अर्थं, कृते (with gen.) or by dat. 4 (In exchange for) प्रति, स्थाने, विनिमयेन; तिलेभ्यः प्रतियच्छति माषान्, or तिलविनिमयेन &c. 5 (Considering) अपेक्ष्य, प्रतीक्ष्य, आलोच्य, इति कृत्वा, अपेक्षया in comp. 6 (Towards) प्रति, उद्दिश्य, (with acc.); संमुखं, अभिमुखं, in comp. 7 (Regarding) तावत्, उद्दिश्य; कृते; 'f. myself, rest secure' मद्विषये तावद्गीतार्चितो भव, मामुद्दिश्य न चिंता कार्या. 8 (Showing price) by instr., त्रिरूपकेण क्रीतः 'bought f. 3 Rs.' 9 (Duration) by acc.; 'for 10 days' दशदिवसं; 'f. how many years' कियंति वर्षाणि; oft. by यावत् or पर्यंतं, आ with abl.; 'f. life' यावज्जीवं, आजीवितांतात्. 10 (on the side of) पक्षे; 'they are f. war' विग्रहमनुमोदंते, विग्रहमुपदिशंति. 11 (As if) वत् or इव. 12 (According to) यथा, अनुरूपं, अनुसारेण, in comp.; 'f. all' ex. by अनादृत्य (with acc.) or loc. abs. 'f. all his wealth' विद्यमानेपि महाकोशे, महाकोशमनादृत्य; 'f. a long time' चिरं, चिरकालं, चिराय; 'out of love f. me' मद्गतप्रीत्या; 'f. the most part' भूयिष्ठ in comp., प्रायः, प्रायेण; 'f once' सकृदेव. —*conj.* हि (not at beginning of assertions); यतः, यस्मात्कारणात्, यत्, यस्मात्, इति हेतोः, अनेन हेतुना.

Forage, *s.* यवसं, घासः, तृणादि. 2 पाथेयं, भोजनसंभारः, खाद्यसामग्री. 3 खाद्यान्वेषणं, खाद्यार्थं परिभ्रमणं; प्रसरणं. —*v. i.* बलात् खाद्यद्रव्यं आ-हृ 1 P, भोजनार्थं परिभ्रम् 1, 4 P. **-ing**, *s.* भोजनान्वेषणार्थं परिभ्रमणं-प्रसरणं.

Foray, *s.* उपद्रवः, अवस्कंदः, विप्लवः.

Forbear, *v.* विरम् 1 P; निवृत् 1 A, (with abl.). परिहृ 1 P, वृज् 10. त्यज् 1 P. 2 विलंब् 1 A. 3 सह् 1 A, क्षम् 1 A, मृष् 4 P, 10, तिज् desid. (तितिक्षते). 4 सं-नि-यम् 1 P, निग्रह् 9 P, आ-वृ 5 U; निरुध् 7 U ; 'he could not f. expressing his joy, or laughter' संतोषं-हासं-निग्रहीतुं न पारयामास. **-ance,** *s.* क्षमा, तितिक्षा, क्षांति *f.*, सहनं, सहिष्णुता, मर्षणं, सहनशीलता. 2 निवृत्ति *f.*, विरामः, विरति *f.*, वर्जनं, त्यागः, परिहारः. 3 संयमः, दमः, यमः, निग्रहः. **-ing,** *s.* तितिक्षु, सहिष्णु, सहनशील, क्षमिन्, सहन, क्षंतृ, क्षमितृ.

Forbid, *v. t.* प्रति-नि षिध् 1 P or c., प्रत्या-ख्या 2 P, प्रत्यादिश् 6 P, निरा-अपा-कृ 8 U. 2 निरुध् 7 U, नि-वृ c. or वार् 10; 'God f.' शांतं पापं or (इति) शांतं, प्रतिहतं अमंगलं. **-ding, -dance,** *s.* नि-प्रतिषेधः, प्रत्याख्यानं, प्रत्यादेशः. 2 निवारणं, निरोधः. **-ding,** *a.* घृणावह, बीभत्सजनक, अप्रिय.

Force, *s.* बलं, शक्ति *f.*, सामर्थ्यं (fig. also); 'the f. of this word' अस्य शब्दस्य शक्तिः &c. 2 प्रभावः, वीर्यं, शौर्यं, विक्रमः, पराक्रमः, ऊर्जस् *n.*, प्रतापः, प्राबल्यं, ओजस्. 3 बलात्कारः, प्रसभः, साहसं, बलं, प्रमाथः, आवेशः; 'f. of passion' रागावेशः. 4 अभिघातः, आपातः, अभिभवः. 5 सिद्धि *f.*, फलं, निष्पत्ति *f.*; 'put or bring into f.' प्रवृत् c. 6 सैन्यं, बलं, सेना, अनीकः-कं, पृतना, अनीकिनी, चमूः, वाहिनी, ध्वजिनी, चक्रं, वरूथिनी. —*v. t.* Ex. by causal of verbs, with बलात् or बलेन, or प्रवृत् c.; *See* **Compel;** 'he was f. ed to admit that &c.' इति अभ्युपगमनं अवश्यकं मेन. 2 भिद् c., प्रणुद् 6 P, समाकृष् 1 P, प्रचुद् 10, प्रोत्सह् c., 3 धृष् c., बलात् अभिगम् 1 P, बलात्कारं कृ 8 U; 'f. an entrance' बलेन प्रविश् 6 P; 'f. a town' पुरं लंघ् 1 A, 10 or भंज् 7 P or बलात् प्रविश्. —**ed,** *a.* यत्नकृत, यत्नपूर्व, असहज, कृत्रिम, क्लिष्ट (as meaning). —**Forcible,** *a.* प्रबल, समर्थ, क्षम, शक्तिमत्, बलवत्, सप्रभाव, अमोघ, अनिष्फल, प्रभविष्णु. 2 गौरवेण उक्त or प्रतिपादित, दृढ, तीक्ष्ण. 3 बलेन कृत, बलात्कृत, साहसिक (की *f.*), बल in comp.; 'f. consent' बलात्अनुमोदनं. —**Forcibly,** *adv.* (by force) बलेन, बलात्, प्रसभं, प्रसह्य, बलात्कारेण, हठात्. 2 सगौरवं, दृढतया.

Force-meat, *s.* मिष्टान्नं, उपस्कारः, व्यंजनं.

Forceps, *s.* संदंशकः-शिका.

Ford, *s.* तीर्थं, तरणस्थानं-स्थलं, घट्टः. —*v. t.* पद्भ्यां तॄ 1 P or पारं गम् 1 P. —**able,** *a.* अल्पजल, सुतर, सुप्रतर; 'the rivers having become f.' सुखोत्तारतामापन्नास्वापगासु (Ks. 326).

Fore, *a.* अग्र, पूर्व, अग्रगामिन्; gen. ex. by अग्र, पूर्व in comp.; 'f.-fathers' पूर्वजाः, पितरः, पूर्वे-पूर्वाः, वृद्धाः; 'f.-finger' प्रदेशिनी, तर्जनी; 'f.-foot' अग्रपादः; 'f.-head' ललाटं, भालं, ललाट-भाल-पट्टं, अलिक (ली)कं, गोधिः; 'f.-land' अंतरीपः-पं, उदग्रभूः-भूमिः; 'fore leg' *s.* पूर्व-अग्र-पादः; 'f.-lock' ललाटकेशाः-कचः; 'f.-man' अध्यक्षः, अधिष्ठातृ *m.*, अधीशः; 'f.-mentioned-named-said-spoken' प्रागुक्त, पूर्वोक्त, पूर्वकथित; 'f. mast' अग्रकूपकः; 'f.-most' प्रधान, उत्कृष्ट, परम; 'f.-noon' पूर्वाह्णः-कालः; 'f.-part' अग्रभागः, पूर्व-आदि-प्रथम-भागः; 'f.-rank' अग्र-प्रधान-पंक्तिः; 'f.-tooth' अग्रदंतः, राजदंतः, 'f.-ward' सेनामुखं, रणशिरस् *n.*; 'foreward', *s.* *See* **Preface.**

Forearm, *s.* प्रकोष्ठः, अग्रभुजः-हस्तः-बाहुः. —*v. t.* पूर्वं सनह् 4 P or c. or सज्जीकृ 8 U.

Forebode, *v. t.* आ-,सूच् 10, प्राक् आ-दिश् c., पूर्वं कथ् 10; (अनिष्टं) पूर्वं ज्ञा 9 U or अव-गम् 1 P, अनु-मा 3 A; *See* **Bode;** 'the tawny lightning f. s a hurricane' वाताय कपिला विद्युत् (S. K.). —**er,** *s.* अनिष्टावेदकः, अनिष्टसूचकः. —**ing,** *s.* अनिष्टसूचनं-ज्ञानं-दर्शनं.

Forecast, *v. t.* पूर्व-अग्रे चिंत् 10 or निरूप् 10 or निर्दिश् 6 P or अनुसं-धा 3 U. —**s.** पूर्वकल्पना-विवेकः, अग्रनिरूपणं, पूर्वचिंतनं, दीर्घदृष्टि *f.*

Foreclose, *v. t.* प्रतिबंध् 9 P, प्रति-नि-षिध् 1 P. —**ure,** *s.* प्रतिबंधः, प्रतिषेधः.

Fore-determine, *v. t.* अग्रे-पूर्वं-निर्णी 1 P or निश्चि 5 U.

Foredoom, *v. t.* पूर्वं निर्दिश् 6 P or वि-धा c.

Fore-fend, *See* **Forbid.**

Forego, *v. t.* त्यज् 1 P, हा 3 P, उत्-सृज् 6 P; 'I shall f. my name' स्वनामत्यागं करोमि (P. 1); 'a foregone conclusion' पूर्वनिर्णीतः-प्रागेवसिद्धः-सिद्धांतः.

Foreign, *a.* विदेशीय, वैदेशिक-पारदेशिक (की *f.*), विदेशज, विदेशिन, अन्य-भिन्न-देशज-देशीय-देशोद्भव, पारदेश्य, विदेशागत, बहिर्देशोद्भव; 'a f. country' विदेशः, परदेशः, देशांतरं. 2 बाह्य, बहिर्भव, अप्रस्तुत, अप्रकृत; 'this is f. to our present inquiry' अप्रकृतमेतदस्मिन् विषये. —**er,** *s.* वैदेशिकः, पारदेशिकः, अन्यदेशीयः-देशजः; *See* (*a.*). —**ness,** *s.* बाह्यता, भिन्नता; अप्रकृतता, असंबंधः.

Fore-imagine, *v. t.* पूर्व-अग्रे-चिंत 10 or मन् 4 A.

Fore-judge, *v. t.* पूर्वं अवेक्ष् 1 A, विचार् c or निर्णी 1 P.

Fore-know, *v. t.* पूर्वं ज्ञा 9 U or बुध् 1 P or विद् 2 P; **Know,** q. v., प्रबुध् 1 P. अग्रे निरूप् 10. —**ledge,** *s.* अग्र-पूर्व-ज्ञानं, भविष्यज्ज्ञानं, अग्रनिरूपणं, अग्र-पूर्व-दृष्टि

Forensic, *a.* व्यावहारिक (की *f.*) व्यवहारानुगत.

Fore ordain, *v. t.* अग्रे-पूर्वं-निर्दिश् 6 P. or नियुज् 7 A, 10 or वि-धा 3 U.

Forerun, *v. i.* पूर्व-पुरः-अग्रे-सृ or धाव् or गम् 1 P or वृत् 1 A or या-इ 2 P. —**ner,** *s* अग्रेसरः, पुरो-गः-गामिन् *m*, अग्र-गः-गामिन् *m.*, अग्रवर्तिन् *m.*, अग्रगतः, पूर्वदूतः.

Fore-say,-speak, प्राक्-पूर्वं-वद् 1 P, or कथ् 10.

Foresee, *v. t.* पूर्वं-दृश् 1 P or ज्ञा 9 U भावि-अनागतं-दृश् or अवेक्ष् 1 A, अग्रे निरूप् 10; gen. ex. by भाविन्; 'I f. my ruin' जानामि भाविनं नाशं. —**Foresight** *s.* दूरदर्शित्वं-ता, दूरदृष्टि-दृष्टिः *f.*, अग्रनिरूपणं, दूरदर्शनं.

Foreshow, *See* **Forebode.**

Forest, *s.* वन, अरण्यं, काननं, विपिनं, अटवि-वी *f.*, गहनं, कांतारः-रं; 'a large f.' अरण्यानी; 'growing in f.' वन्य, आरण्य,-क, वनोद्भव, अरण्यज-जात, वन or अरण्य in comp. **-er,** *s.* वनेचरः, वनवासिन् *m.*, आरण्यकः, आटविकः, वनस्थः, वनचारिन् *m.*, वनचरः-वर्तिन् *m.*, वनौकस् *m.*, अरण्यसद् *m.*. **2** अरण्यरक्षकः, वनपालकः.

Forestall, *v. t.* पूर्वं ग्रह् 9 P or आदा 3 A, पूर्वग्रहणेन मोघीकृ 8 U; *See* **Anticipate. 2** पूर्वं क्री 9 U.

Foretaste, *v. t.* पूर्वं अनुभू 1 P or आस्वाद् 1 A or भुज् 7 A. **-s.** पूर्वानुभवः, पूर्व-अग्र-ज्ञानं, पूर्वास्वादः, पूर्व-अग्र-भुक्ति *f.*

Foretell, *v. t.* पूर्वं कथ् 10, भावि-भविष्यद् वद् 1 P or वच् 2 P; प्रदृश् c.,अनागतं निविद् c.; *See* **Predict. -er,** *s.* भविष्यद्वादिन् *m.*, भाविदर्शकः, अनागतनिवेदक., दैवज्ञः.

Forethink, *v. t.* पूर्वं चिंत् 10 or विमृश् 6 P. **-Forethought,** *s.* अग्र-पूर्व-चिंता, पूर्वविमर्शः-विवेकः, प्रसमीक्षा-क्षणं, दूर-दीर्घ-दृष्टि *f.*, पूर्वविचारणं-णा.

Foretoken, *v. t.* पूर्वं सूच् 10. **-s.** पूर्वलक्षणं-चिह्नं-लिंगं, भाविलक्षण

Forewarn, *v. t.* पूर्वं सूच् 10 or प्रबुध् c., अग्रे उपादिश् 6 P or ज्ञा c. (ज्ञापयति); 'to be f. ed is to be fore-armed' पूर्वप्रबोधनं पूर्वसन्नाहतुल्यं. **-ing,** *s.* पूर्वप्रबोधः-धनं. पूर्वोपदेशः.

Forfeit, *v. t.* दंड् pass., भ्रंश् 1 A. 4 P, च्यु 1 A, परि-हा pass., (with abl.); 'f. s his kingdom' राज्यात्परिभ्रंशते; 'f. s his right' स्वत्वं तस्मान्निवर्तते; oft. ex. by हीन-हृत in comp.; 'you will f. all your wealth' हृतसर्वस्वो भवेः, सर्वस्वं दंड्येथाः. **-s.** दंडः, धन-अर्थ-दंडः. **-ed,** *a.* दंडित, भ्रष्ट, च्युत, हीन; 'who has f. ed his right' स्वत्वभ्रष्टः, च्युताधिकारः; हृतसर्वस्वः, &c. **-ure,** *s.* हानि *f.*, च्युति *f.*, भ्रंशः, अपहारः, अपवर्तनं, नाशः, दंडदानं.

Forge, *v. t.* घट् c. (घटयति), रच् 10, निर्मा 3 A, वि-धा 3 U, कॢप् c. **2** मिथ्या-कूटं-कृ 8 U, कपटकूट in comp.; 'f. s a letter' कूट-कपट-लेखं प्रयुंक्ते; *See* **Counterfeit. -s** निर्माणस्थानं; अग्निकुंडं, उष्मानं. **-er,** *s.* कूट-कारः-कृत् *m.*, कपटलेखकारिन् *m.* **-ry,** *s.* कूट-कपट-लेखकरणं, कूट-कपट-करणं, कूटरचना. **-ing,** *s.* घटना. घटनं, रचना-नं; कूटनिर्माण, &c.

Forget, *v. t.* विस्मृ 1 P, न स्मृ; स्मृतेः-स्मरणाद्भ्रंश् 1 A, 4 P or अप-इ 2 P, (of what is forgotten). **-ful,** *a.* विस्मरणशील. लुप्त-नष्ट-स्मृति; अनवहित, प्रमत्त **-fulness,** *s.* विस्मृति *f.*, विस्मरणं, स्मृतिलोपः, स्मृतिनाशः-भ्रंशः-हानि *f.*, विस्मरणशीलता, अनवधानं.

Forgive, *v. t.* क्षम् 1 A, (with acc. of person also), मृष् 4 P, 10, सह् 1 A, तिज् desid. (तितिक्षते). (with acc. of fault). **2** मुच् 6 P, अव-सृज् 6 P, त्यज् 1 P, (as a debt). **-ness,** *s.* क्षमा, तितिक्षा, क्षांति *f.*, सहिष्णुता, मर्षणं; 'f. of sin' पाप-दोष-मुक्ति *f.* -मार्जनं. **-ing,** *a.* क्षमिन्, सहिष्णु, क्षमावत्, क्षमाशील, तितिक्षु, क्षमायुक्त, क्षंतृ, क्षमितृ.

Fork, *s.* कंटकः, शूलं. **-v. i.** विभिद् pass., द्विशिखीभू 1 P, द्विधा भिद् pass. **-ed,-y,** *a.* द्विशिख, द्व्यग्र; 'having a f. tongue' द्विजिह्व; 'f. lightning' विद्युल्लता.

Forlorn, *a.* त्यक्त, दीन, विधुर, अनाथ, अनाश्रय, गति-शरण-हीन, अ-निः-शरण, अ-निः-सहाय, निरवलंब, निराधार, निराश्रय, अगतिक.

Form, *s.* रूपं, आकारः, आकृति *f.*; संस्थानं; वपुस् *n.*, मूर्ति *f.*, (**Body,** q. v.) **2** तंत्रं, मार्गः, पद्धति *f.*, प्रकारः, रीति *f.*, विधा-धः, विधिः, भेदः; 'f. of government' राज्यतंत्रं-पद्धतिः. **3** विधिः, नियमः, स्थिति *f.*, व्यवस्था, आचारः, क्रमः, मर्यादा, व्यवहारः, संस्कारः; 'in due f.' यथाविधि, विध्यनुसारेण, विधिवत्. **4** रचना-नं, विन्यासः. **5** सहाध्यायिवर्गः, छात्रपंक्ति *f.*, गणः. **6** दीर्घपीठं-आसनं. **-v. t.** निर्मा 2 P, 3 A, रच् 10, कृ 8 U, वि-धा 3 U, उत्पद् c., घट् c (घटयति), कॢप् c.; 'f. plans' उपायान् चिंत् 10 or मनसा कॢप् c.; 'the cords that f. ed the net' याभिः रज्जुभिर्जालं निर्मितं. **-al,** *a.* अत्याचारसेविन्, नियमनिष्ठ, अत्यादरयुक्त, सभ्याचारविशिष्ट. **2** नैयमिक-वैधिक (-की *f.*), नियमानुसारिन्, व्यवहारानुरूप, आचारानुगत, आचारानुसारिन्, विध्यनुरूप; आचार in comp.; 'just perform the f. salutation' आचार मात्रमवसितमस्तु. **3** यथार्थ, विशिष्ट. **-alist,** *s.* नियममात्रसेविन् *m.* **-ality,** *s.* आचारः, उपचारः, यथाविधि वर्तनं; अत्यादरः; 'a title of f.' उपचारपदं; 'enough of f.' अलमत्यादरेण. **-ally,** *adv.* सोपचारं, अत्यादरेण, सभ्याचारपूर्वं, अत्यादरपूर्वं. **2** यथाविधि, विधिवत्, नियमानुसारेण. **-ation,** *s.* घटना-नं, निर्माणं, विधानं, रचना, कल्पना-नं, उत्पादनं, उद्भवः; सृष्टि *f.* **-ed,** *a.* घटित, निर्मित, कृत, रचित, कॢप्त, मय in comp.; 'f. of gold' हेमघटित, सुवर्णमय, &c.; *See* **Composed. 2** रूप-आकार-आकृति in comp.; 'f. like a conch' शंखाकृति; 'well-f.' सुरूप **-less,** *a.* निराकार, अरूप.

Former, *a.* पूर्व, प्रथम, अग्रिम, आद्य, आदिम, पूर्वकालीन, प्राक्कालीन, प्राचीन, गतकालीन, पुराण, पुरातन. **-ly,** *adv.* प्राक्, प्राक्काले, भूत-गत-काले, पुरा, पूर्वं, पुराकल्पे, पूर्वकाले; 'as f.' यथापूर्वं, पूर्ववत्; 'f. stated' प्रागुक्त, पूर्वोक्त; 'f. heard' श्रुतपूर्व.

Formic, *a.* पिपीलिका-शुचिका-संबंधिन्.

Formidable, *a.* दारुण, भयावह, भीषण, भयानक, भयजनक, भयप्रद, भैरव (वी *f.*), घोर, उग्र, प्रतिभय, रौद्र (द्री *f.*). **2** (Great) प्रबल, महत्, अतिघोर. **-ness,** *a.* भयानकत्वं, भीषणता, भैरवं.

Formula, *s.* सूत्रं, विधिः, नियमः, व्यवस्था, स्थिति *f.* **-Formulate,** *v. t.* विधि-सूत्र-रूपेण रच् 10, or व्यव-स्था c. (स्थापयति).

Fornicate, *v. i.* व्यभि-चर् 1 P, वेश्यां सेव् 1 A or अभिगम् 1 P. **-ion,** *s.* व्यभिचारः, जारकर्मन् *n.*, वेश्यागमनं-सेवा, वेश्यासंभोगः. **-or,** *s.* व्यभिचारिन् *m.*, जारः. **-Fornicatress,** *s.* **Harlot,** q. v.

Forsake, *v. t.* त्यज् 1 P, हा 3 P, उत-वि-अप-सृज् 6 P, उज्झ् 6 P, रह् 10 (रहयति). **-er,** *s.* त्यागिन् *m.*, त्यक्तृ *m.* **-ing,** *s.* त्यागः, उत्सर्गः.

Forsooth, *adv.* नूनं, नाम, किल, खलु, यत्सत्यं, सत्यमेव.

Forswear, *v. t.* सशपथं त्यज् 1 P or प्रत्या-ख्या 2 P or अप-नि-ह्नु 2 A. **-v. i.** मिथ्या-शप् 1 U, कूटं-मिथ्या-शप्. **-er,** *s.* असत्यशपथः, मिथ्याशपथकारिन् *m.*

Fort, Fortress, *s.* दुर्गं, कोटः, कोटि *f.*; 'governor of a f.' दुर्गाध्यक्षः, कोटिपालः.

Forte, *s.* विशिष्ट-श्रेष्ठ-गुणः, प्रधानगुणः.

Forth, *adv.* बहिः, अग्रे, पुरतः; with verbs, ex. by निर्, उत्, प्र pr. **2** प्रभृति, आरभ्य; 'from this time f.' अद्य-अतः-प्रभृति, अद्यारभ्य; 'f.-coming' आगामिन्, आसन्न, उपस्थित. **-Forthwith,** *adv.* सपदि, झटिति, द्रागेव, सद्यः, अचिरात्-वेग, आशु, अविलंबितं, तत्क्षणात्.

Fortify, *v. t.* दृढीकृ, स्थिरीकृ 8 U, दृढयति (D.). सं-स्तंभ् 9 P or c. **2** सुगुप्त-सुरक्षित-*a.* कृ, परिखया आ-परि-वृ 5 U or परिवेष्ट् c. **-ication,** *s.* गुप्ति *f.*, परिखा, प्राचीरं, दुर्ग-कूटः, कोटः, प्राकारपरिखादि.

Fortitude, *s.* धैर्यं, सत्त्वं, धीरता, मनःस्थैर्यं. **2** वीर्यं, शौर्यं, विक्रमः, साहसं, पौरुषं.

Fortnight, *s.* पक्षः, मासार्धं, अर्धमासः.

Fortuity, *s.* दैवयोगः-घटना, दैवं, समापत्ति *f.* **-ous,** *a.* दैवायत्त, दैवाधीन, अचिंतित, अतर्कितोपनत, आकस्मिक (की *f.*). **-ously,** *adv.* **Accidentally,** q. v.

Fortune, *s.* दैवं, भाग्यं, भागधेयं, विधिः, अदृष्टं, भवितव्यता; *See* **Fate. 2** ऋद्धि *f.*, श्रीः, लक्ष्मीः, ऐश्वर्यं, संपद् *f.*, संपत्ति *f.*, धनं. **3** शुभं, कल्याणं, भद्रं, शिवं, सौभाग्यं, मंगलं, पुण्योदयः; 'bad f.' दुर्दैवं, दुर्-मंद्-भाग्यं, दैवदुर्विपाकः; 'tell f.' शुभाशुभं कथ् 10 or चिंत् 10 or निरूप् 10 or आलोच् 10; 'f.-teller' दैवज्ञः, गणकः, कार्तांतिकः, दैवचिंतकः; 'a female f.-teller' विप्रश्निका, ईक्षणिका, दैवज्ञा; 'f.-telling' शुभाशुभदर्शनं. **-ate,** *a.* भाग्यवत्, महाभाग, सुभाग्य, सुभग, सौभाग्यवत्, दैवशालिन्, धन्य, पुण्यवत्, कृतिन्, श्रीमत्, पुण्यभाज्. **3** शुभ, कल्याण, शिव, मंगल, भद्र. **-ately,** *adv.* दैवात्, दैवभोगात्, दिष्ट्या, सौभाग्येन, भाग्य-दैव-वशात्.

Forty, *a.* चत्वारिंशत् *f.* **-Fortieth,** *a.* चत्वारिंश (शी *f.*)-शत्तम (मी *f.*).

Forward, *a.* अग्रिम, आदिम, अग्रस्थ, पुरोगामिन्. **2** अपूर्णकाल, अकालिक (की *f.*). **3** धृष्ट, प्रगल्भ, निर्लज्ज, प्रतिभानवत्, सप्रतिभ, अविनीत. **4** उद्यत, व्यग्र, उद्युक्त, प्रत्युत्पन्न, अविलंबित. **-v. t.** सं-प्र-वृध् c., उपकृ 8 U, पुरस्कृ, प्र-वृत् c., समुत्सृज् 10, साहाय्यं कृ, उन्नतिं नी 1 P, अनुग्रह् 9 P. **2** प्रेर् c., प्र-चुद् 10, प्र-हि 5 P. **3** **Accelerate,** q. v. **-adv.** (f. s) अग्रतः, पुरतः; पुरः, अग्रे, पुरस्तात्, सं-अभि-मुखं; 'this day f.' अद्य प्रभृति; 'to go backward and f.' गतागतं कृ; *See* **Forth. -ness,** *s.* उत्साहः, अविलंबः, उद्योगः. **2** प्रागल्भ्यं, निर्लज्जता, धाष्ट्यं, अतिप्रसंगः, अविनयः, प्रतिभानं.

Fosse, *s.* खातं, परिखा.

Fossick, *v. t.* लाभाय, अन्विष् 1 P.

Fossil, *a.* शिलाजात. **-s.** धातुः; शिलाभवं, धातुद्रव्यं; उत्खातद्रव्यं. **-ist,** *s.* धातुविद्याज्ञः

Foster, *v. t.* पुष् 1, 9 P; पा c. (पालयति), प्र-सं-वृध् c., भृ 3 U, लल् 10. **2** (Love, hatred, &c.) धृ 10, वह् 1 P, बंध् 9 P; 'f.-brother' धात्रेयः, धात्रीपुत्रः; 'f.-child' पोष्यपुत्रः (त्री *f.*), पराचितः; परिस्कं(ष्कं)दः, परिस्क(ष्क)न्नः; परजातः, परैधितः; 'f. father' पालकपितृ *m.*, प्रतिपालकः, धर्मतातः; 'f.-mother' धात्री, उपमातृ *f.*, प्रतिपालिका; अंकपालिका, मातृका, धात्रेयी.

Foul, *a.* मलिन, समल, अशुचि, कलुष, मलदूषित, मलीमस, आविल, अशुद्ध, अपवित्र, अमेध्य, पंकिल. **2** कुत्सित, कश्मल, गर्ह्य, निंद्य, दुष्ट. **3** अवाच्य, अशिष्ट, अश्लील (language). **4** कूट, कपट, पाप, in comp.; 'f. means' कपटप्रबंधः; 'even by f. means' दुरितैरपि (R viii. 2); 'f. play' दुरितं, पापं; 'f. weather' दुर्दिनं; 'f. quality' रजोगुणः; 'f. smell' पूतिगंधः, दुर्गंधः; 'fall f. of' उपरि पत् 1 P, परस्परं आ-हन् 2 P or संघट्ट् 1 A. 'f.-mouthed' दुर्मुख, वाग्दुष्ट, कटुवाच्, मुखर, परिवादिन्. **-v. t.** मलिनयति-कलुषयति-आ

पिलयति (D.); मुष् c. (मूषयति.) -ly, *adv.* अतिदुष्टं, घोरं, मलिनं. -ness, *s.* मालिन्यं, मलिनता, &c.

Found, *v. t.* स्था c.(स्थापयति), प्रति-सं-अव-स्तृ c. (रोपयति), निर्मा 3 A or c. (मापयति), बंध् 9 P, प्रभू c., आरभ् 1 A; मूल, निबंधन, निष्ठ, in comp.; 'attachment f. ed on love' प्रेममूला-भावनिबंधना-रतिः; 'f. ed on ignorance' अज्ञानज, अज्ञान-मूल-लक, अविद्याकल्पित. -ation, *s.* प्रतिष्ठापनं, संस्थापनं; निर्माणं. 2 वास्तु *m.*, *n.*, पोटः, ग्रहप्रतिष्ठा, गृहमूलं, भित्तिमूलं, वेश्मभूः. 3 (Fig.) मूलं, आधारः, उपष्टंभः. -er, *s.* संस्थापकः, प्रवर्तकः, आरंभकः, आविष्कर्तृ *m.*, प्रतिष्ठापकः, कर्तृ *m.* प्रयोजकः. -v. *i.* जलमज्जनेन नश् 4 P, जले मस्ज् 6 P. -ling, *s.* अपविद्धबालकः, उत्सृष्टापत्यं.

Foundery, *s.* संधानी, कुप्यशाला.

Fount, Fountain, *s.* निर्झरः, उत्सः, प्रस्रवणं, वारिप्रवाहः. 2 मूलं, योनि *f.*, प्रभवः, हेतुः, आदिहेतुः. 3 धारायंत्रं (artificial f.).

Four, *a.* चतुर्, चतुष्टय; 'f. times' चतुः; 'in f. ways' चतुर्धा; 'f.-cornered' चतुरस्र-श्र; 'f.-fold' चतुर्गुण; 'f.-footed' चतुष्पाद्, चतुष्पाद्; 'f. score' अशीति *f.* -Fourth, *a.* चतुर्थ (र्थी *f.*), तुर्य, तुरीय. -*s.* चतुर्थभागः, पादः, चतुर्थांशः; तुरीयः, तुर्यः, तुर्यांशः; 'a rupee and one f.' सपादरूपकः. -ly, *adv.* चतुर्थस्थाने. -Fourteen, *a.* चतुर्दशन्. -th, *a.* चतुर्दश (शी *f.*).

Fowl, *s.* खगः, पक्षिन् *m.*, शकुनः; *See* **Bird.** 2 कुक्कुटः, ताम्रचूडः, चरणायुधः. -*v. i.* पक्षिणो ग्रह् or बंध् 9 P or धृ 1 P. -er, *s.* शाकुनिकः, व्याधः. शकुनिलुब्धः, जालिकः, लुब्धकः, पक्षिग्राहकः, जीवांतकः. -ing, *s.* पक्षिग्रहणं-वधः-घातः.

Fox, *s.* शृगालः, कि(खि)खिः, खिंकिरः, भूरिमायः, गोमायुः; *See* **Jackal**; 'f.-hunt' शृगालानुसरणं; 'f.-like' विदग्ध, धूर्त, बहुमाय.

Fracas, *s* कलहः.

Fraction, *s* भेदः, भागः, अपूर्णांकः, राशिभागः. -al, *a.* अपूर्ण, भागिक (की *f.*), भागिन्.

Fractious, *a.* कलहकारिन्, शीघ्रकोप; वामशील.

Fracture, *s.* भंगः, भेदः, विदारणं, त्रोटनं, विभंगः, विभेदः. -*v. t.* भंज् 7 P, भिद् 7 P छिद् 10; *See* **Break.**

Fragile, *a.* भंगुर, भंगशील, भिदुर, छिद्रिलिम, सुखभेद्य, सुभंग; विनश्वर, क्षयिन्. -ity, *s.* भंगुरता, क्षयिता, भिदुरता.

Fragment, *s.* खंडः-डं, शकलः-लं, भागः, अंशः, दलं, भिन्नं; 'in a thousand f. s' सहस्रधा. -ary, *a.* अपूर्ण, भागिन्, खंडयुक्त.

Fragrant, *a.* सुरभि, सुगंधि, सुवास, आमोद-परिमल-वत्, सुवासिक, सामोद, परिमलोद्गारिन्, गंधयुक्त, गंधवत्; तिक्त, कषाय. -ly, *adv.* सवासं, सामोदं, सुगंधं. -Fragrance, *s.* आमोदः, परिमलः, सौरभं, सौरभ्यं; गंधः, वासः, सुवासः, सुगंधः.

Frail, *a.* भंगुर, नश्वर, ध्वंसिन्, अनित्य, अस्थायिन्, क्षयिन्, सद्यःपातिन्, क्षण-भंगुर-विध्वंसिन्. -ness,-ty, *s.* भंगुरता, नश्वरत्वं, क्षयिता, &c. 2 दोषः, स्खलितं, प्रमादः.

Frame, *v. t.* वि-,रच् 10, वि-धा 3 U, क्लृप् c., कृ 8 U, घट् c. (घटयति), संवि-धा, समा-धा, निर्मा 2 P, 3 A. 2 निबंध् 9 P. 3 सदृशीकृ; 'f. in the mind' मनसा चिंत् 10 or कल्प् c., चित्ते कृ. -*s.* निर्माणं, रचनं-ना, घटनं-ना. 2 आधारः, उपष्टंभः; आवरणं, कोशः, आवेष्टनं. 3 शरीरं, देहः, गात्रं, वपुस् *n.*, कायः, अंगं; 'f. of body' देहबंधः; 'of a hardy f.' वज्रदेहिन्, सिंहसंहनन. 4 भावः, वृत्ति *f.*, स्थिति *f.*, दशा, अवस्था; 'joyous f. of mind' आनंदवृत्तिः. 5 आकारः, रूपं, आकृति *f.*, रीति *f.*, संस्थानं.

Franchise, *s.* पौरजनाधिकारः. 2 मुक्ति *f.*, मोचनं, स्वाधीनता. -*v. t.* मुच् 6 P.

Frangible, *See* **Fragile.**

Frank, *a.* निष्कपट, सरल, ऋजुमति-बुद्धि, उदार, निर्व्याज, स्पष्ट-स्फुट-वादिन्, असंवृत, अवक्र, अमाय, निर्व्यलीक, दक्षिण, अगूढभाव; अकपट, अव्याज, अनायिन्; 'f.-hearted' विमलात्मन्, उदारधी; शुद्धांतःकरण. -ly, *adv.* निर्व्याजं, निष्कपटं, अमायया, सरलं. -ness, *s.* अमाया, ऋजुता, निष्कापट्यं, औदार्यं, दाक्षिण्यं, सारल्यं, अकापट्यं, &c.

Frank-incense, *s.* कुंदुरुः-रुः, कुंदुः-दुः, मुकुंदः, पालंकी.

Frantic, *a.* उन्मत्त, मदविक्षिप्त, व्यस्तचित्त, संरब्ध; 'f. with rage' क्रोधोन्मत्त, कोपोन्मादिन्. -ally, *adv.* उन्मत्तवत्, सोन्मादं, ससंरंभं. -ness, *s.* उन्मादः, व्यामोहः, चित्तविप्लवः, उन्मत्तता, वातुलता, चित्तविभ्रमः.

Frater, *s.* परिव्राज् *m.* यति *m.*, 2 बंधु *m.*, बांधवः.

Fraternal, *a.* भ्रात्रीय, भ्रातृसंनिभ, भ्रात्रनुरूप. -ly, *adv.* भ्रातृवत्, सोदरवत्.

Fraternity, *s.* भ्रातृत्वं, सौभ्रात्रं. 2 समाजः, संसर्गः, साहित्यं, बंधुता. -Fraternize, *v. i.* भ्रातृवत् संमिल् 6 P or संयुज् pass. or एकीभू or संमिपत् 1 P.

Fratricide, *s.* भ्रातृघातकः, भ्रातृघातिन् *m.* 2 भ्रातृवधः-हत्या-घातः.

Fraud, *s.* कपटः-टं, छलं, कैतवं, माया, व्याजः, कूटं, वंचनं-ना, उपधिः, प्रतारणं-णा, विप्रलंभः, छद्मन् *n.*, दंभः, कुसृति *f.*, निकृति *f.* -**Fraudulent,** *a.* कपटिन्, सव्याज, शठ, धूर्त, मायिन्, वंचक, प्रतारक, विप्रलंभक, कापटिक-छाद्मिक (की *f.*), कपट in comp.; 'a f. plan' कपटप्रबंधः. -**ly,** *adv.* छलेन, सकपटं, सव्याजं, मायया, धूर्तवत्, समायं, सकैतवं.

Fraught, *a.* धुर्य, धुरीण, भाराक्रांत. 2 आ-सं-परिपूर्ण, आकीर्ण, आ-सं-कुल, गर्भ-आवह- in comp.; 'f. with danger' अनर्थावह.

Fray, *s.* कलहः, कलिः, युद्धं, द्वंद्वं.

Freak, *s.* कामचारः, चापल्यं-लं, मनोलौल्यं, छंदः-दस् *n.*, लहरी, तरंगः, विलासः, विभ्रमः, लीला, स्वैरिता. -*v. t.* चित्रीकृ 8 U, चित्र् 10 -**ish,** *a.* चपल, लोल, चलचित्त, लोलमति, स्वैरिन्, कामचारिन्.

Freckle, *s.* जडुलः, कालकः, पिप्लुः.

Free, *a.* अमर्याद, मर्यादातिक्रांत, विनय-हीन-शून्य, प्रगल्भ, धृष्ट, अविनीत. 2 आत्म-स्व-तंत्र, स्वाधीन, अनधीन, अनायत्त, अपराधीन, स्वेच्छाचारिन्, स्वच्छंद, स्वैरिन्, निरवग्रह, अपावृत, अ-वि-वश. 3 मुक्त, विमुक्त, निर्मुक्त, विमोचित. 4 निर्यंत्रण, अबद्ध, अनिरुद्ध, वि-उत्-शृंखल, अनर्गल, निरर्गल. 5 निर्विघ्न, निष्प्रत्यूह, अप्रतिहत, निरवरोध, असंबाध. 6 निश्चिंत, वीतचिंत, विशद, स्वस्थ. 7 मुक्तहस्त, त्यागशील, व्ययपर. 8 अयतवाच्, असंवृत, अनियंत्रितकथ. 9 मूल्यं विना. 10 सर्वसाधारण-सामान्य; 'f. from' ex. by निर्-अ in comp. or by गत, वीत, हीन, रहित, वर्जित, शून्य, मुक्त, mostly in comp.; 'f. from pride' निरवलेप, अनुद्धत, वीतस्पृह, चिंताहीन, &c., 'f. choice' स्वेच्छा, स्वरुचि *f.*; 'f. course' प्रसरः. -*v. t.* मुच् 6 P or c., वि-निर्°, वि-मुच् 6 P or c., मोक्ष् 10; gen. ex. by निर् or अ pr. to nouns; 'f. from obstacle' विघ्नान् अपनी or हृ 1 P, निर्विघ्नीकृ 8 U; 'f. from debt' अनृण *a.* कृ, ऋणं अपाकृ or निस्तॄ c.; 'I f. ed him from doubt' तं निर्मुक्तसंदेहमकरवं, तस्य संदेहमपानयम्, 'f.-agency,' 'f.will' स्वेच्छा, यदृच्छा, स्वातंत्र्यं, स्वाच्छंद्यं, स्वैरता, स्वकामः; 'f.-booter' दस्युः, साहसिकः, प्रसह्यचौरः; 'f.-booting' प्रसभं अपहारः, साहसं; 'f.-born' जात-जन्म-स्वतंत्र, जात्या स्वायत्त, जन्मनैव अपरायत्त, कुलीन-जाति, अदासज; 'f.-hearted, -minded' *See* **Frank**; f.-hold' निष्करभूमि *f.*, स्वाधीना भूः; 'f.-holder' स्वाधीनक्षेत्रस्वामिन् *m.*; 'f. liver' कुक्षिंभरिः, औदरिकः; 'f.-man' स्वतंत्रः, अपरायत्तः, स्वाधीनः, अदासः; 'f.-spoken' स्फुटवादिन्, स्पष्टवाच्, अगूढभाव; 'f.-thinker' नास्तिकः अनीश्वरवादिन् *m.*; 'f.-woman' स्वाधीना, स्वैरिणी, स्वैरचारिणी. -**dom,** *s.* स्वतंत्रता, अवशता, स्वातंत्र्यं. 2 मोक्षः-क्षणं, वि-मुक्ति *f.*, मोचनं. 3 निर्यंत्रणं-णता, निर्विघ्नता. 4 अविनयः, मर्यादातिक्रमः, प्रागल्भ्यं. 5 विरहः, अभावः, राहित्यं, हानि *f.*, मुक्ति *f.*; 'f. of will or thought' स्वेच्छा, स्वच्छंदप्रवर्तनं, कामचारः, स्वाच्छंद्यं. -**ly,** *adv.* स्वेच्छया, स्वैरं, स्वच्छंदतः, कामतः अयाचितं. 2 बहुशः, बाहुल्येन, मुक्तहस्तं, भूयसा. 3 यथेच्छं, नि-प्र-कामं, पर्याप्तं, यथेप्सितं, आतृप्ति. 4 निर्विघ्नं, निर्यंत्रणं, अनिवारितं. 5 मूल्यं विना. -**ness,** *s.* निर्विघ्नता, निष्कापट्यं, वाग्यतत्वं, त्यागशीलता, &c.

Freeze, *v. i.* शिलीभू 1 P, घनीभू, संहन् pass., श्यै 1 A, संहतीभू, श्यानीभू, पिंडं बंध् 9 P. -*v. t.* शिली-घनी-कृ 8 U, संहन् 2 P, जडयति (D.), जडीकृ, श्यै c., शिलीकृ; 'a frozen mass of ice' शिलीभूतं हिमं, हिमपिंडः.

Freight, *s.* नौभांडं, नौभारः, पोतद्रव्याणि, नाविकं. 2 तरः, आतरः, तरपण्यं, तारिकं, तार्यं. -*v. i.* (द्रव्याणि) नावि निविश् c. or नि-धा 3 U, द्रव्यैः पूर् 10.

Frenetic, *See* **Frantic.**

Frenzy, *s.* उन्मादः, चित्तविभ्रमः-विप्लवः, उन्मत्तता, आवेशः. -**ed,** *a.* उन्मत्त, भ्रांतचित्त, आविष्ट.

Frequent, *a.* नित्य, अनवरत, सतत, अभीक्ष्ण, बहुशः घटमान or वर्तमान; better ex by 'f.-ly.' -*v. t.* सेव् 1 A, नित्यं आश्रि 1 U, सततं भज् 1 U or अभिगम् 1 P, जुष् 6 A; सततं गम् &c.; *See* below. -**ative,** *s.* यङ्लुगंतं, यङंतं. -**ly,** *adv.* पुनः पुनः, मुहुर्मुहुः, भूयोभूयः, नित्यं, असकृत्, वारंवारं, अभीक्ष्णं, सततं, बहुशः, अनेकशः, बहुवारं, प्रायः, प्रायेण, प्रायशः, शश्वत्. -**Frequence, -cy,** *s.* पौनःपुन्यं, सातत्यं, अभीक्ष्णता, नित्यता, अविरामः, समभिहारः, अविच्छेदः.

Fresco, *s.* शीतता. 2 भित्तिचित्रं.

Fresh, *a.* नव, अभिनव, नूतन, नवीन; प्रत्यग्र, अविशीर्ण, अम्लान, अशुष्क (of flowers only); 'f. age' नवं-प्रथमं-वयः; 'f. wound' आर्द्रक्षतं. 2 पेय, आस्वाद्य, अलवण. 3 शीतल, शिव, सुख (of breezes). 4 सरस, अश्रांत, अक्षतवीर्य, अक्लांत, अक्षीणतेजस्; 'a f. man' नवशिष्यः-छात्रः, प्राथमकल्पिकः, शैक्षः (just initiated). -**en,** *v. t.* नवीकृ 8 U, सरसीकृ, (पुनर्नवीकृताः स्मः S. 5). -**ly,** *adv.* सद्यः, नवं, प्रत्यग्रं. 2 शीतलं, सुखं. -**ness,** *s.* नवता, नूतनता, अम्लानता, अक्षीणता. 2 तेजस् *n.*, वीर्यं, सरसत्वं, अक्लांति-अश्रांति *f.* 3 अलवणता. 4 नवरूपवर्णः.

Fret, *v. i.* क्षुभ् 4 P, पीड् pass., व्यथ् 1 A, दुर्मनायते (D.), अंतः सं-परि-आ-तप् 4 A, क्षुभ् 1 P, क्लिश् pass., उद्विज् 6 A, आत्मानं तप् c. or क्षुभ् c. 2 घर्षणेन क्षि pass., संघृष् pass. **-v.** *t.* संतप् c., क्षुभ् c.; व्यथ् c. (व्यथयति), पीड् 10, बाध् 1 A, क्लिश् 9 P. 2 घृष् 1 P, घर्षणेन तप् c. **-s.** (Of sea) क्षोभः, वीचिविपर्यस्तं. 2 (F.-fulness) चित्तव्यथा, आत्मपीडाक्लेशः, उद्वेगः, मनस्तापः, मनःक्षोभः, अशांति *f.*, दुर्मनायितं. 3 प्रतीपता, वक्रभावः. 4 जालं. **-ful,** *a.* आत्मतापिन्, शीघ्रकोपिन्, दुर्मनस्, चंड, शीघ्रक्षुब्ध-संतप्त. 2 वक्रप्रकृति, प्रतीप, वक्रभाव, दुष्प्रकृति, वामशील, जिह्मस्वभाव. **-fully,** *adv.* सचित्तक्षोभं, मनस्तापेन.

Fretty, *a.* व्यत्यस्तरेखारूपेण तष्ट.

Friable, *See* **Fragile.**

Friar, *s.* योगिन् *m.*, मुनिः, यतिः, संन्यासिन् *n.* तपस्विन् *m.* **-y,** *s.* मठः, आश्रमः, विहारः.

Fribble, *v. i. See* **Trifle.**

Friction, *s.* घर्षणं, संघर्षः, आ-अभि-घर्षः-र्षणं, आ-वि-घट्टनं, परस्परघर्षणं-मर्दनं.

Friday, *s.* शुक्र-भृगु-वारः-वासरः.

Friend, *s.* मित्रं, सखि *m.*, सुहृद् *m.*, स्निग्धः, प्रणयिन् *m.*, हितः, सहायः, सजुस् *m.*, संगिन् *m.* वयस्यः, बंधुः; (term of address) भद्रः-द्रा; 'an old f.' चिरमित्रं; 'a true f.' सन्मित्रं. **-v.** *t.* उपकृ 8 U, अनुग्रह् 9 P. **-less,** *a.* मित्र-बंधु-हीन, असहाय, अनाथ, अशरण; *See* **Forlorn.** **-ship,** *s.* सख्यं, मित्रत्वं; मैत्री, मैत्र्यं, बंधुता, सौहृदं, सौहार्दं, स्नेहः, प्रणयः, प्रीति *f.*, प्रेमन् *m.*, *n.*, अनुरागः. 2 साहाय्यं. **-Friendly,** *a.* स्निग्ध, सदय, हितकाम, हितैषिन्, स्नेहशील, सानुराग, सुहृदय, सप्रणय. 2 हित, अनुकूल, अनुग्राहिन्, उपकारक, हितकर; सुखावह, कल्याणकर (री *f.*); 'on f. terms' स्नेहवृत्त्या, मित्रभावेन; 'f. disposed' हितबुद्धि; 'f. dispute' प्रणयकलहः, प्रीतिकलहः. **-adv.** मित्रवत्, हितवत्, स्निग्धं, प्रियं. **-ness,** *s.* हितेच्छा, हितकामता, हितबुद्धि *f.*. अनुकूलता, मित्रत्वं, प्रणयः, स्नेहशीलता.

Frieze, *s.* स्थूलपट्टं-शाटकः, वराशिः.

Frigate, *s.* महायुद्धनौका.

Fright, *s.* भयं, त्रासः, संत्रासः, शंका, साध्वसं, भीति *f.*, उद्वेगः, दरं; 'take f.' सं-उत्-त्रस् 1, 4 P, उत्त्रस्त-चकित-*a.* भू. **-v.** *t.*, **-en,** *v. t.* भी c. (भापयते-भीषयते), सं-उत्-त्रस् c., उद्विज् c. **-ed,** *a.* भीत, त्रस्त, भयार्त, भयाकुल, चकित, ससाध्वस, जातशंक, शंकित, भयाविष्ट. **-ful,** *a.* भीम, विकट, कराल, दारुण, भीषण, घोर, भैरव (वी *f.*), रौद्र (द्री *f.*), भयानक, भयावह, उग्र, भयंकर; 'f. in appearance' करालवदन, भीमरौद्र-दर्शन, उग्रदर्शन. **-fully,** *adv.* दारुणं, घोरं, उग्रं.

Frigid, *a.* शीत, शिशिर, हिम, जड. 2 निरुत्साह, निःस्नेह; *See* **Cold.** **-ity,** *s.* हिमं, शैत्यं, जडता. 2 विरागः, स्नेहाभावः. **-ly,** *adv.* शीतलं, शिशिरं, निःस्नेहं.

Fringe, *s.* अंचलः-लं, दशाः (*f.* pl.), वस्त्रयः (*m. f.*); 'like a f. rent from the robe of heaven' छिन्ना इवांबरपटस्य दशाः (Mr. 5). **-v.** *t.* प्रांतयति (D.); 'f.-ed with gold' सुवर्णमंडितप्रांतं (वस्त्रं).

Frippery, *s.* चीराणि (pl.), जीर्ण-चीर-वस्त्रं, वस्त्रखंडाः, कर्पटाः. 2 निष्प्रयोजनद्रव्यं, उच्छिष्टं.

Frisk, *v. i.* क्रीड् 1 U, इतस्ततः रम् 1 A or नृत् 4 P or प्लु 1 A, खेल् 1 P, वि-हृ 1 P. **-y,** *a.* हृष्ट, प्रहृष्ट, प्रफुल्ल, सानंद.

Frith, *s.* संकटं, संभेदः.

Fritter, *v. t.* खंडशः कृत् 6 P; खंड् 10, शकलीकृ 8 U. 'f. away' खंडशः-अल्पशः-न्यूनीकृ or क्षीणीकृ or क्षै c. (क्षपयति); 'f. away time' अल्पशः (मुधा) वेलां क्षै c. **-s.** खंडः-डं, शकलः-लं.

Frivol, *v. i. See* **Trifle.**

Frivolous, *a.* लघु, अगुरु, अनर्थक, तुच्छ, यत्किंचन, चपल, चपल-लघु-वृत्ति, लघुकर्मन्. **-ness, -Frivolity,** *s.* लाघवं, लघुवृत्तिता-त्वं, लघुता, यत्किंचनकारिता, चापलं, चपलं कर्म, निरर्थकव्यापारः.

Friz, Frizzle, *v. t.* कुंच् c., व्यावृत् c.

Fro, *adv.* (In 'to and f.') इतस्ततः; 'going to and f.' गमनागमनं.

Frock, *s.* उत्तरीयं, कंचुकः.

Frog, *s.* भेकः, दर्दुरः, मंडूकः, वर्षाभूः, शा(सा)लूरः, प्लवः, प्लवगः, प्लवंगमः, वर्षायोषः; 'she-f.' मंडूकी.

Frolic, *v. i.* क्रीड् 1 U, विलस् 1 P, विहृ 1 P, खेल् 1 P, रम् 1 A, विभ्रम् 1, 4 P. **-s.** केलि *f.*, विलासः, क्रीडा, विहारः, वि-भ्रमः, ललिा, खेला, क्रीडाकौतुकं. **-some,** *a.* केलि-विलास-प्रिय, विलासिन्, क्रीडा-खेला-पर, उल्लासिन्, विहारिन्, केलिकर; परिहासशील.

From, *prep.* Gen. ex. by abl., when denoting source or place. 2 (Of cause) by abl. or instr., (only by instr., the noun being *f.*); 'f. curiosity' कुतूहलात्-लेन; 'f. its fragrance' सुरभितया. 3 (Of persons) by abl., or सकाशात् with gen.; रामस्य सकाशात् 'f. Râma' 4 (Of time) by आ with abl. or in comp.; 'f. the beginning' आमूलात्; आजन्मनः, आजन्म; gen. by आरभ्य or प्रभृति, with abl.; तद्दर्शनादारभ्य or प्रभृति; 'f. this day' अद्यप्रभृति, अद्यारभ्य; 'f. above' उपरिष्टात्, ऊर्ध्वात् 'f. day to day' दिनेदिने, दिनादिनं; 'f. below' अधस्तात्, अधोभागात्; अधःस्थानात्;

'f. behind' पश्चाद्देश, पृष्ठतः, पृष्ठत आगत्य; f. hence' अतः, इतः; 'f. afar' दूरतः, दूरात्; 'f. without' बहिर्देशात्; 'f. within' अभ्यंतरात्, अंतःप्रदेशात्.

Front, *s.* अग्रं, अग्रभागः-देशः, मुखं, मूर्धन् *m.*; 'f. door or gate' मुखं, निःसरणं. **2** वदनं, आस्यं, मुखं, आननं. **3** शिरस् *n.*, ललाटं; 'in f. of.' पुरः, पुरतः, अग्रे, अग्रतः, पुरस्तात्, प्रत्यक्षं, समक्षं, साक्षात्, अभि-सं-मुखं-खे, (with gen.); 'f. of war' रणधुरा, रणशिरस् *n.*, मूर्धन् *m.n.*, 'f. of army' सेनामुखं, सेनाग्रं, अग्रानीकं (*f.* ranks); 'in the f.' अग्रे, मूर्धनि, धुरि, शिरसि; 'to place in the f.' पुरस्कृ, अग्रगीकृ, अग्रेसरीकृ. *-v.* संमुखं-खे स्था 1 P or वृत् 1 A, संमुखी-अभिमुखी-भू; oft. by मुख or अभिमुख in comp.; 'a house f. ing the east' प्राङ्मुखं-प्राच्यभिमुखं गृहं. **-age,** *s.* अग्र-पूर्व-भागः, मुखं. **-al,** *a.* लालाटिक (की *f.*), ललाट in comp. *-s.* ललाटपट्टं; 'f. of an elephant' कुंभः, गंडः. **-less,** *a.* धृष्ट, निर्लज्ज, निस्त्रप. **-let,** *s.* ललाटपट्टं.

Frontier, *s.* सीमा-मन् *f.*, उपांत, पर्यंतः, प्रांतः, समंतः, सामंतः-तं. *-a.* 'Dwelling on the f.' सामंत (ती *f.*), सीमावर्तिन्, पर्यंतस्थ, प्रांतनिवासिन्; *See* **Border.**

Frontispiece, *s.* मुखप्रतिमा-चित्रं; 'f. of a house' गृहमुखं, गृहाग्रभागः.

Frost, *s.* तुषारः, तुहिनं, हिमं, अवश्यायः, नीहारः, प्रालेयं, मिहिका; 'f.-bitten' हिमासिक्त, तुषार-शीत-उपहत. **-y,** *a.* हिम, तुषार, हिम-तुषार-वत्.

Froth, *s.* फेनः-नः, मंडः-डं, उत्सेचनं; *See* **Ferment.** *-v. i.* फेनायते-मंडायते (D.), उत्सिच् pass. **-y,** *a.* फेनिल, फेनमय (यी *f.*), फेनिन्. **2** असार, लघु, निःसार, निःसत्व, अंतःशून्य.

Frouzy, *a.* पूतिगंधि, उग्रगंध.

Froward, *a.* अवश्य, अविनेय, अतिलालित, दुर्ललित, उच्छृंखल, दुर्वांत. **2** प्रतीप, प्रतिकूल, वक्रस्वभाव, विलोम, वामशील, प्रतीपाचार. **-ly,** *adv* वक्रभावेन, प्रतिकूलं. **-ness,** *s.* प्रतीपता, वामता, वक्रभावः, अवश्यता.

Frown, *s.* भ्रूभंगः, भ्रू(भ्रु)कुटि-टी *f.*, भ्रूभेदः-क्षेपः-संकोचः. *-v. i.* भ्रुकुटिं बंधू 9 P or रच् 10 or कृ 8 U, भ्रूभंगेन दृश् 1 P, भ्रुवौ संकुच् 1 P; 'Oh he just f. s at myself' अये मय्येव भ्रुकुटीधरः संवृत्तः(U. 5). **-ing,** *a.* नत-आकुंचित-भ्रू, सभ्रूभंग. **-ingly,** *adv.* सभ्रूभंगं, भ्रूक्षेपेण, भ्रूकुटिं बद्ध्वा, सभ्रूक्षेपं.

Fructify, *v. t.* बहुफलवत्कृ 8 U, सफलीकृ, स्फीतीकृ, सफलयति (D.). **-Fructuous, -Fructiferous,** *a.* (बहु) फलवत्, फलिन्, फलदायिन्.

Frugal, *a.* मित-अल्प-व्यय-व्ययिन्, स्वल्प-परिमित-व्यय, अमुक्तहस्त, कृपण, व्ययविमुख. **-ity,** *s.* मितव्ययिता, मित-स्वल्प-व्ययः, अमुक्तहस्तत्वं, कृपणत्वं. **-ly,** *adv.* अमुक्तहस्तं; मित-स्वल्प-व्ययेन, अल्पव्ययपूर्वं, कृपणं.

Fruit, *s.* फलं (lit. and fig.); श(स)स्यं, प्रसवः, उत्पन्नं. **2** परिणामः, उत्तरफलं, कर्मफलं. **3** (Progeny) अपत्यं, संतानः-नं, संतति *f.*, प्रजा, प्रसूति *f.*; फलं. **4** अर्थः, लाभः, फलागमः, फलप्राप्ति *f.*, 'dry f.' वानं; 'unripe f.' शलाटु; 'bear f.' फल् 1 P, फलं बंध् 9 P or धृ 3 U, सफलीभू, पच् pass., (सद्य एव सुकृतां हि पच्यते कांक्षितं R. xi. 50); 'f.-bearer' फलदातृ *m.*, फलदः; 'f.-bearing' फलद, फलेग्रहि, फलभृत्, फलदायिन्, फलिन्, फलशालिन्; 'f.-garden' फलवाटः-टिका; 'f.-season or time' फलकालः-समयः, फलावचयकालः; 'f.-stalk or stem' शस्यमंजरी, प्रसवबंधनं, वृंतं; 'f.-tree' फलदः वृक्षः or वनस्पतिः, फलग्राहिन् *m.* **-age,** *s.* फलोच्चयः, फलभारः-गुच्छः, फलागमः. **-erer,** *s.* फलविक्रयिन् *m.* **-ery,** *s.* फलानि (pl.). **2** फलस्थानं. **-ful,** *a.* फलवत्, फलद, फलिन्, सफल, फलित, अवंध्य, अमोघ, बहुफलद, फालिन, फलेग्रहि. **2** बहुप्रज, प्रजनिष्णु, बह्वपत्य, बहुप्रजोपेत. **3** उत्पादक, जनक; आवह-प्रभवः-मूलं-कारणं in comp. **-less,** *a.* निष्फल, वि-अ-फल, निरर्थक, व्यर्थ, मोघ, वंध्य, अनर्थक, निष्प्रयोजन, निर्गुण, अनुपयुक्त, फलहीन, अवकेशिन्. **-lessly,** *adv.* व्यर्थं, निरर्थकं, मुधा, वृथा, मोघं, निष्फलं. **-lessness,** *s.* वैयर्थ्यं, अनुपयोगः, व्यर्थता, वैफल्यं. **-Fruition,** *s.* उप-,भोगः, भुक्ति *f.*, अनुभवः, आस्वादः; सुखोपभोगः, फलास्वादः, सुखानुभवः, सुखास्वादः.

Frumentaceous, *a.* गोधूममय (यी *f.*).

Frump, *s.* कर्कशा, कैकेयी

Frustrate, *v. t.* विफली-निष्फली-मोघी-कृ 8 U, प्रति-व्या-हन् 2 P, भंज् 7 P, खंड् 10, वृथा-मुधा-कृ; *See* **Baffle.** *-a.* **Fruitless,** q. v. **-ed,** *a.* प्रति-व्या-हत, मोघीकृत, वृथाभूत; 'f. in attempts or hopes' भग्नोद्यम, व्यर्थप्रयत्न, भग्नसंकल्प; भग्नाश, अकृतार्थ, मोघाश, खंडिताश, प्रतिहत, प्रतिबद्ध. **-ion,** *s.* भंगः, व्याघातः, विफलीकरणं, खंडनं. **-ive, -ory,** *a.* व्याघातिन्, भंजक, वृथाकारिन्.

Frutescent, *a.* गुल्मावृत.

Fry, *s.* क्षुद्रमत्स्यसंघः, मत्स्यसंघातः, पोताधानं. **2** मीनांडं. *-v. t.* भ्रस्ज् 6 P or c. (भर्जयति), पच् 1 P, भृज्ज् 1 A. **-ing,** *s.* भर्जनं, पचनं; 'f.-pan' पिठरः-रं, भृज्जनं, भ्राष्ट्रः, भर्जनपात्रं, अंबरीषं; ऋजीषं, पिष्टपचनं; (for liquor) स्वेदनी, कंदु-दू *m.-f.* **-ed,** *a.* भ्रष्ट, भर्जित, कंदुपक्व; 'f. grain' धानाः (*f.*, pl.), भ्रष्टयवाः, लाजाः (*m.* pl.).

Fuddle, *v. t.* मद् c., मद्येन मुह् c. –*v. i.* मद् 4 P. **–er,** *s.* पानासक्त:, पानरत:.

Fudge, *s.* असर्थकं, असंबद्धं. –*v. i.* असंबद्धं जल्प् 1 P.

Fuel, *s.* इंधनं, एधस् *n.*, एध:, इध्मं, समिध् *f.*, समिंधनं; 'add f. to the flames' क्षते क्षारं प्रक्षिप् 6 P.

Fugacious, *a.* पलायनशील, पलायनपर; अस्थिर, चपल, लोल.

Fugitive, *s.* कृतपलायन:, पलायिन् *m.*, कांदिशीक:. –*a.* पलायिन्, पलायनपर-शील. **2** चपल, तरल, चंचल, अस्थिर.

Fulcrum, *s.* आधार:, उपस्तं(ष्टं)भ:, आलंब:, आश्रय:.

Fulfil, *v. t.* सं-परि-पूर् 10, साध् 5 P or c., निर्वह् c., निः-सं-पद् c., समाप् c., निर्वृत् c., सफलीकृ 8 U, निस्तृ c., तीर् 10; 'f. a promise' प्रतिज्ञां निर्वह् c. or तीर् or क्षुभ् c. or पा c. (पालयति) or अप-वृज् 10; gen. in pass. constr. ex. by पूर्ण, कृत, आप्त, लब्ध, in comp.; 'whose desires are f. ed' समवाप्त-लब्ध-मनोरथ:-काम:, कृतार्थ:, पूर्णमनोरथ:-काम:, कृतिन् *m.*; 'who has f.ed his promise' पूर्णप्रतिज्ञ:, पालितसंगर:, सत्यप्रतिज्ञ:, सत्यव्रत:-संध:. **–ler,** *s.* निर्वाहक:, साधक:, पूरयितृ *m.* **–ment,** *s.* पूरणं, सिद्धि *f.*, निष्पत्ति *f.*, साधनं, निर्वाह:; 'f. of desires' कृतार्थता, कामसिद्धि:, इच्छापूरणं, इष्टावाप्ति:.

Fulgent, *a.* उज्ज्वल, दीप्ति-द्युति-मत्; *See* **Bright.** **–Fulgency,** *s.* तेजस् *n.*, प्रभा, कांति-दीप्ति-द्युति *f.*

Fulgurate, *v. i.* विद्युत् 1 A; स्फुर् 6 P.

Full, *a.* (of) सं-परि-पूर्ण, आ-सं-कीर्ण, आ-सं-कुल, संभृत, व्याप्त, निर्भर, पूरित, मय (यी *f.*) in comp. **2** अशेष, अन्यून, सकल, निखिल, कृत्स्न, समग्र, अविकल, अखंड, संपूर्ण; 'f. year' पूर्णं वर्षं; 'f. speed' पूर्णवेग:; 'f.8 months old' पूर्णाष्टमास. **3** परिणत, परिपक्व, पक्व, कठोर, प्रौढ, संपन्न. –*s.* पूर्णता, साकल्यं; 'in f.' सविस्तरं, साकल्येन. –*adv.* कृत्स्नश:, सर्वथा, साकल्येन, अशेषत:-षेण, पूर्णं; 'f.-blown' प्रफुल्ल, विकच, विकसित, प्रस्फुट, प्रस्फुटित; 'f.-bodied' स्थूलकाय, सबलांग, पुष्टदेह; 'f.-bosomed' पीनस्तन (नी *f.*), पीनकुचकुड्मल; 'f.-fed,' पुष्टांग, हृष्टपुष्ट; 'f.-grown' प्रवृद्ध, प्रौढ, कठोर, परिणत, प्ररूढ; गतशैशव, प्राप्तयौवन, यौवनारूढ, समारूढयौवनारंभ (of men); 'f.-growth' प्रौढि *f.*, प्रौढता, प्रवृद्धि *f.*; 'f.-laden' पूर्णभार, सुभाराक्रांत; 'f. moon' पूर्णेन्दु:, सकलेंदु:; 'f. moon day' पौर्णिमा, पूर्णिमा, राका. –*v. t.* वस्त्रं निर्णिज् 3 U. **2** घनीकृ 8 U. **–er,** *s.* रजक:, निर्णेजक:. **–y,** *adv.* अशेषेण, सविस्तरं, अशेषत:, सर्वश:-था, साकल्येन, कृत्स्नश:, निरवशेषं, विस्तरेण-रत:, पूर्णतया. **–ness,** *s.* पूर्णता, निर्भरता, पूर्ति *f.*, संभार:. **2** बाहुल्यं, प्राचुर्यं. **3** परिणाम:, परिपाक:, सिद्धि *f.*, प्रौढि *f.*, संपद् *f.*

Fulminate, *v. i.* विकटं रस् or स्तन् 1 P, स्फूर्ज् 1 P. –*v. t.* वज्रनिर्घोषेण इव भ्रंश् c. or उद्गीर् c. **–ion,** *s.* स्फूर्जनं, वज्र-मेघ-निर्घोष:, स्तनित.

Fulsome, *a.* गर्हित, कुत्सित, गर्ह्य, बीभत्सजनक, विरस. **–ness,** *s.* विरसता, गर्ह्यता.

Fulvous, *a.* आपीत, पिंगल, कपिल.

Fumble, *v. i.* परामृश् 6 P, समालभ् 1 A, अदक्षं कार्यं वि-धा 3 U. **–ing,** *a.* संभ्रांत परामृशत्, अदक्षतया कार्यविधायिन्. –*s.* अदक्षं कार्यविधानं

Fume, *s.* धूम:-मिका, बाष्प:, धूप:. **2** धूमोद्गार:. **3** क्रोध:, संरंभ:. –*v. t.* धूमयति (D.), धूप् 1 P (धूपायति). **–Fumigate,** *v. t.* धूप् 10, धूप् 1 P (धूपायति), धूपेन वास् 10 or धू c.; 'a thing f. ed' वासितं, भावितं. –*v. i.* धूमायते (D.), बाष्पं उद्गृ 6 P. **2** Angry, (to be) q. v. **–ion,** *s.* वासनं, भावनं, अधिवासनं. **–Fumy,** *a.* सधूम, सधूप.

Fun, *s.* परि(री)हास:, नर्मन् *n.*, क्रीडा, खेला, केलि *f.*, प्रहसनं, क्रीडाकौतुकं; 'said in f.' नर्मभाषितं, नर्मालाप:. **–Funny,** *a.* हासजनक, विनोदनशील, रसिक, कौतुककारिन्, नर्म-परिहास- in comp. **2** उपहास्य, अपरूप.

Funambulist, *s.* रज्जु-चारिन् *m.*-नर्तक:.

Function, *s.* व्यापार:, कर्मन् *n.*, कार्यं, कृत्यं, चेष्टा, क्रिया, चेष्टितं, व्यवसाय:, व्यवहार:, वृत्ति *f.*, प्रवृत्ति *f.* **2** नियोग:, अधिकार:, पदं. **3** आचरणं, अनुष्ठानं, करणं. **4** गुण:, धर्म:, स्वभाव:. **5** इंद्रियं, शक्ति *f.*, कर्मेंद्रियं. **–ary,** *s.* नियोगिन् *m.*, अधिकारिन् *m.* कार्यनिर्वाहक:, नियुक्त:, आधिकृत:.

Fund, *s.* संचय:, पुंज:, राशि:, समुदाय:, निचय:, संयोग:, संनिपात:; *See* **Collection.** **2** मूलधनं, नीवि-वी *f.* –*v. t.* सं-चि 5 U, संग्रह् 9 P, पुंजीकृ 8 U, राशीकृ.

Fundament, *s.* गुदं, पायु:, अपानं, मलद्वारं. **2** अधोभाग:, तलं.

Fundamental, *a.* प्रधान, सार, सारभूत, मुख्य, मौलिक, मूल in comp.; 'f. cause' मूलकारणं; 'f. principle' मूलतत्वं. –*s.* प्रधान-मूल-तत्वं, मूलं, तत्वं, सार:.

Funeral, *s.* और्ध्वदेहिकक्रिया, अंत्येष्टि *f.*, प्रेतकार्य-कृत्यं, प्रेतनिर्हार:, अंत्यक्रिया, उत्तरक्रिया-कर्मन् *n.*, और्ध्वदेहिकं, श्राद्धादि कर्म. –*a.* और्ध्वदेहिक, और्ध्वदैहिक(की *f.*), better by (*s.*); 'f. pile' चिता, चिति-ती *f.*, चित्या.

Fungus, *s.* विड्जं, गोमयजं, शिलीध्रं, शा-(सा)लेयः, शीतशिवः, छत्रा, मधुरिका, मिसि-शि-सी-शी- *f.*, मिश्रया.
Funicle, *s.* क्षुद्ररज्जु *f.*, क्षुद्रगुणः, सूत्रं.
Funk, *s.* महद्भयं, संत्रासः. **-y,** *a.* भीत, संत्रस्त.
Funnel, *s.* धूममार्गः-पथः-द्वारं. **2** नाली, प्रणाली-लिका, नाडि-डी *f.*
Fur, *s.* रो (लो) मन् *n.*, तनुरुहः-हं, पशु-लोमन् *n.*; 'f. on the tongue' कुलुकं, मलं. **-red,** *a.* लोमावृत, लोमान्वित. **2** समल.
Furbish, *v. t.* तिज् c., निः-तप् c., प्रमृज् 2 P or c., धाव् 10, परिष्कृ 8 U. **-ed,** *a.* निर्धौत, प्रमृष्ट, निष्टप्त. **-er,** *s.* तेजकः, मार्जकः, निर्णेजकः; 'f. of weapons' शस्त्रमार्जः, असिधावकः. **-ing,** *s.* धावनं, परिष्कारः, तेजनं.
Furcated, *a.* द्व्यग्र.
Furl, *v. t.* सं-वेष्ट् c., सं-वृ 5 U, संपुटीकृ 8 U, सं-हृ 1 P.
Furlong, *s.* नल्वः.
Furlough, *s.* कर्मत्याग-कर्मविराम-अनुज्ञा. **2** कर्मनिवृत्ति *f.*
Furmenty, *s.* क्षीरान्नं, परमान्नं, पायसं.
Furnace, *s.* अग्निकुंडं, अधिश्रयणी, अंति (दि)का, उद्मानं; 'a portable f.' *See* **Hearth.**
Furnish, *v. t.* (उपकरणैः) संयुज् 10 or सनाथीकृ 8 U; (उपस्करं) उप-कृप् c., उप-पद् c., सं-भृ 3 U, वि-धा 3 U; gen. ex. by स or सनाथ in comp.; 'f. ed with arrows' सशरं (धनुः); मणिशिलापट्टसनाथं लतागृहं (V. ?) 'f. ed with a marble slab'; 'to f. with arms' शस्त्रैः संनह् 4 P or सज्जीकृ. **-ed,** *a.* सं-, युक्त, समन्वित, उपेत, उप-परि-कृप्त, सनाथ, संभृत, स in comp. **2** सोपस्कर, सोपकरण, उपस्करादियुक्त. **3** सन्नद्ध, सज्जीकृत. **-Furniture,** *s.* उपस्करः, उपकरणं, परिच्छदः, सामग्री, सज्जा, संभारः, उपचारः, परिबर्हः; 'on sofas with all f.' उपचारवत्सु मंचेषु (R. vi. 1.); परिबर्हवंति वेश्मानि (R. xiv. 15); 'household. f.' गृहोपस्करः, पारिणाह्यं.
Furor, *s. See* **Fury.**
Furore, *s.* अत्याश्चर्यं, महद्विस्मयः,
Furrow, *s.* सीता, हलिः, लांगलमार्गः-पद्धति *f.*, हलरेखा. **2** रे (ले) खा, सुषिरं. **3** वदनरेखा, वलि-ली *f.* **-v. t.** (हलेन) कृष् 1 P, (लांगलेन) लिख् 6 P or रेखाः कृ 8 U. **-ed,** *a.* सीत्य, कृष्ट, हल्यवत्.
Further, *a.* दूरतर, दूरस्थ, दवीयस्. **2** अधिक, अपर, अधिकतर, पर. **-adv.** दूरतरं, अधिकदूरं, अग्रे-ग्रतः, पुरतः, अग्रेतरां, पुरस्तात्; 'a little f. on' स्तोकांतरं, अग्रतः, किंचिदग्रे, 'f. and f.' अधिकाधिकं, उत्तरोत्तरं. **2** अपरं, अन्यच्च, अपरं च, किं च, अपि च, अपरं तु. **-v. t.** प्र-सं-वृध् c., अनुग्रह् 9 P, उपकृ 8 U, त्वर् c., (त्वरयति) पुरस्कृ, प्रवृत् c., साहाय्यं दा 3 U, उत्कृष् 1 P, उन्नतिं-उत्कर्षं-नी 1 P. **-ance,** *s.* स-प्र-वर्धनं, प्रवर्तनं, अभि-प्र-वृद्धि *f.*, अनुग्रहः, उपकारः, साहाय्यं, उत्कर्षः. **-er,** *s.* उपकारकः, प्रवर्धकः. **-more,** *See* (*adv.*).
Furthest, *a.* दविष्ठ, दूरतम. **-adv.** सुदूरं, दविष्ठं.
Furtive, *a.* चौर्येण गृहीत, अपहृत, छलापहृत, निभृतं कृत. **-ly,** *adv.* चौरवत्, उपांशु, रहसि, निभृतं, छलेन.
Fury, *s.* मत्तता, उन्मत्तता, चंडता, उग्रता, औत्कट्यं. **2** संरंभः, कोपः, क्रोधः, रोषः, आवेशः, अमर्षः. **3** महावेगः, अत्यंतवेगः-जवः, बलं, आ... **4** चंडी, दुर्गा. **-Furious,** *a* प्र-, चंड, तीव्र, उग्र, प्रबल, महावेगवत्. **2** उन्मत्त, मत्त, मदोत्कट, मदकल, समद, उद्ग्रमद, उन्मादसंरब्ध, उत्कट. **3** कोपाकुल, संरब्ध, क्रोधाविष्ट, कोपपरीत, रोषण, क्रुद्धकोप, जातामर्ष. **-ly,** *adv.* उग्रं, चंडं महावेगेन, संरंभेण. **-ness,** *s.* संरंभः, उग्रता, उन्मादः, कोपाकुलत्व.
Fuscous, *a.* आकृष्ण, आनलि.
Fuse, *v. t.* वि-द्रु c., विली c., जलसात् कृ 8 U. **2** एकरूप *a.* कृ, संमिश्र् 10, सायुज्य कृ, संयुज् 10, सदृशीकृ **-v. i.** वि-द्रु 1 P, वि-ली 4 A, द्रवीभू, गल्-स्रु- 1 P. **2** सदृशीभू, सायुज्यं प्राप् 5 P, एकरूप *a.* भू. **-ible,** *a.* द्राव्य, विलयनीय, द्रवशील, क्षरणशील. **-ion,** *s.* द्रावः, विलयनं, विलयः, द्रवत्वं, क्षरणं. **2** एकरूपता, सदृशीभावः, एकभावः, संमिश्रणं, संकरः, संयोगः.
Fuss, *s.* आडंबरः, तुमुलं, कोलाहलः, संभ्रमः. **-y,** *a.* संभ्रमकारिन्.
Fust, *s.* स्तंभः, स्तंभदंडः. **2** उग्र-पूति-गंधः, दुर्गंधः. **-Fusty,** *a.* पूति, पूतिगंधि, उग्रगंध. **-ness,** *s.* पूति *f.*, दुर्गंधः.
Fustian, *s.* स्थूलशाटकः, वराशिः, स्थूलपट्टवस्त्रं-कार्पासं. **2** अतिशयोक्ति *f.*, गर्वोक्तिः, दर्पवचनं, सदर्पावाच्-उक्ति *f.* **-a.** स्थूलकार्पासिक (की *f.*). **2** अतिगर्वित, दर्पाध्मात, सगर्व.
Futile, *a.* निरर्थक, मोघ, व्यर्थ, निर्गुण. **2** असार, लघ्वर्थ, निःसार, निःसत्त्व, फल्गु, तृणप्राय, तुच्छ. **-ity,** *s.* मोघता, लाघवं, असारता, &c.
Future, *a.* भविष्यत्, उत्तर, अनागत, आगामिन्, भाविन्, उत्तरकालीन, श्वस्तन (नी *f.*); 'f. time' अनागतवेला, उत्तरकालः, आयति

f. 2 पारलौकिक-पारत्रिक-आमुष्मिक (की *f.*), अमुत्रत्य, परलोकगत. -*s.*, -ity, *s.* भावि-उत्तर-कालः, भविष्यत्-आगामि-कालः, भाविन् *n.*, अनागतं, अनागतकालः, आयति *f.*, उदर्कः; 'past, present and f.' समतीतं च भवच्च भावि च (R. VIII. 78); 'ignorant of the f.' अश्वस्तनविद्, उदर्कानभिज्ञ.

— —

G.

Gaberdine, *s.* चराशिः, स्थूलशाटकः.

Gabble,-er, *See* **Babble,-er.**

Gabel, *s.* करः, राजस्वं, शुल्कः-ल्कं, बलिः.

Gable, *s.* गृह-प्रासाद-शिखरं.

Gad, *s.* बाणाग्रं, शूलाग्रं; अग्रं, कणः. 2 कीलः, लोहकीलः. -*v. i.* अट् 1 P, परिभ्रम् 1, 4 P. -ding, *s.* परि-, अटन-भ्रमणं.

Gad-fly, *s.* दंशकः, गोमक्षिका, दंशः-शी, वनमक्षिका.

Gaffer, *s.* वृद्धजनः; अशिष्टाचारः.

Gag, *s.* मुखबंधनी-पिधानं, रोधनं. -*v. t.* मुखं बंध् 9 P or निरुध् 7 U or पि-धा 3 U.

Gage, *s.* पणः, आधिः, परिपणनं. 2 मानं, प-परि-माणं. 3 मापनयंत्रं. 4 आह्वानं. -*v. i.* पण् 1 A, प्रति-ज्ञा 9 U, अंगीकृ 8 U, प्रति-पद् 4 A, सशपथं प्रतिज्ञा.

Gaggle, *v. i.* कलं कृ 2 P; कूज् 1 P.

Gain, *v. i.* लभ् 1 A, अर्ज् 1 P or *c.*, आप् 5 P, आ-सम-सद् *c.*; *See* **Get;** 'g. ground' उप-चि *pass.*, प्रवृध् 1 A; प्रसृ 1 P; 'g. over' भाव् *c.*, वशं नी 1 P (धनदानादिना); अनुरंज् *c.*, ग्रह् 9 U; 'g. over to one's side' स्वपक्षं ग्रह् *c.*; 'g. a battle' युद्धे जयं लभ्; 'g. the day' जयं प्राप्, विजयिन् *a.* भू; 'g. upon one's steps' समासद् *c.*; *See* **Overtake.** -*v. t.* क्रमशः प्रसृप् or प्रगम् 1 P. -*s.* लाभः, प्राप्ति *f.*, फलं, आयः, अर्थः, उत्पन्नं, फलोदयः, अर्जनं. -er, *s.* अर्जकः; प्राप्तलाभः; फलप्रापकः. -ful, *a.* फलद; लाभजनक, अर्थोत्पादक. -ly, *adv.* दक्षं, चतुरं, सपाटवं.

Gainsay, *v. t.* विरुध् 7 U; नि-प्रति-षिध् 1 P, प्रत्या ख्या 2 P, प्रत्यादिश् 6 P, अपवद् 1 U, अपलप् 1 P, अधरीकृ 8 U, निरा-कृ, बाध् 1 A, निरस् 4 U. -er, *s.* अपवादकः, निषेधकः.

Gairish, *a.* अतिशोभन, रूपगर्वित. -ness, *s.* अतिशोभा, रूपगर्वः, दंभः.

Gait, *s.* गति *f.* गमनं, : यानं, चारः; 'graceful in g.' हंसगति, चारुगामिन्.

Gala, *s.* उत्सवः, उत्सवदिवसः, पर्वदिनं.

Galaxy, *s.* सुरनदी, आकाशगंगा, स्वर्गंगा, वियद्गंगा. 2 सुवस्तुमंडलं.

Gale, *s.* वातः, वायुः, पवनः; 'strong g.' वात्या, वातालो, चंडवातः, जवानिलः, वेगा-निलः, प्रकंपनः, झाजि *f.*

Gall, *s.* क्षतं, विषं; दंशः,(fig.) पीडा, दुष्टभावः, संबाधा. 2 पित्तं, मायुः. 3 कटुता, तिग्मता, कठोरता, अरुंतुदत्वं. -*v. t.* क्षतं घृष् 1 P or कृष् 1 P. 2 सं-परि-तप् *c.*, पीड् 10, बाध् 1 A, क्लिश् 9 P, अर्द् 1 P, मर्माणि कृत् 6 P or भिद् 7 P. -*v. i.* आत्मानं तप् *c.* -ing, *a.* परुष, मर्मच्छिद्-भिद्, अरुंतुद.

Gallant, *a.* शोभन, सुभगदर्शन; सभ्य, सभ्या-चार, सुशील; दक्षिण; कुयुपचारपर-दक्ष. 2 वीर, शूर, विक्रांत, महावीर्य; *See* **Brave.**-*s.* वल्लभः, रमणः, कामुकः, कामिजनः, कामिन् *m.*, नायकः, दयितः. 2 जारः, विटः, उप-पतिः. 3 सभ्याचारः,सुजनः; कुयुपचारशीलः-परः. -ry, *s.* दाक्षिण्यं; कामचेष्टा, शृंगार-विलसितं, कुयुपासना, कुयुपचारः. 2 वीर्यं, शौर्यं, धामन् *n.*, विक्रमः, पौरुषं. 3 उदारता, माहात्म्यं. -ly, *adv.* सविक्रमं, सवीर्यं, शूर-वीर-वत्. 2 रमणवत्.

Gallery, *s.* मंचाः (pl.), मंचसनाथः कोष्ठः. 2 छन्नपथः-मार्गः. 3 अलिंदः-दकः.

Gallinaceous (fowl), *s.* कुक्कुटः, ताम्र-चूडः, चरणायुधः.

Gallinule, *s.* दात्यूहः, कालकंठकः.

Gallop, *v. i.* वल्ग् 1 P, द्रुतगत्या चल् or धाव् 1 A, द्रु 1 A. -*s.* द्रुतं, वल्गितं, द्रवनं.

Gallows, *s.* वधस्तंभः, वध्यशिला-काष्ठं; वध-घातस्थानं, वध्यस्थलं. 'met his death on the g.' शूलमारोपितः.

Galoche, *s.* काष्ठपादुका, पादुका.

Galvanize, *v. t.* विद्युच्छक्त्या आकृष् 1 P or उपहन् 2 P.

Gamble, *v. i.* दिव् 4 P (अक्षैः अक्षान् वा); अक्षैःक्रीड् 1 P. -er, *s.* द्यूतकारः, देविन् *m.*, धूतकृत् *m.*, धूर्तः, अक्षदेविन् *m.*, कितवः, अक्षधूर्तः. -ing, *s.* द्यूतं, दुरोदरं, पणः, अक्ष-वती, अक्षक्रीडा-द्यूतं, कैतवं, देवनं, द्यूतसेवा, 'g.-house' द्यूतशाला-सभा; 'he who keeps a g.-house' सभिकः, द्यूतकारकः.

Gambol, *v. i.* क्रीड् 1 P, नृत् 4 P, इतस्ततः वल्ग् 1 P, प्लु 1 A. -*s.* नृत्यं, क्रीडा, लास्यं लीला, केलि *f.*, खेला.

Game, *s.* क्रीडा, खेला, केलि *f.*, लीला, वि-लासः, परि(री)हासः. 2 वन्यपश्वादि, जांगलः, वन्यपक्षिन् *m.* 3 मृगया. 4 संकल्पः, व्यवसायः, कल्पना, संदिग्धव्यवसायः. -*v. i.* क्रीड् 1 P, दिव् 4 P; 'G.-cock' चरणा-युधः, योधकुक्कुटः; 'g.-keeper' वन्यपक्षि-पालकः; 'g.-leg' पंगुपादः. -ing, *s.* द्यूतं. -ster, *s.* धूर्तः; *See* under **Gamble.**

-some, *a.* क्रीडा-लीला-पर, विलासशील, विलासिन्, परिहासशील, उल्लासिन्, परिहासिन्, विनोदिन्, नर्मालापिन्.
Gammer, *s.* वृद्धा स्त्री.
Gammon, *s.* वल्लूरं, उत्तरं, सूकरशुष्कमांसं. 2 चर्मपट्ट-शारि-क्रीडा. 3 **Deceit,** q. v. —*v. t.* सूकरमांसं लवणीकृ 8 U. 2 **Cheat,** q. v.
Gamut, *s.* ग्रामः.
Gander, *s.* हंसः, चक्रांगः, चक्रवाकः, चक्रः; श्वेतगरुत् *m.*, मानसौकस् *m.*, राजहंसः (white).
Ganesh, *s.* गणेशः, गणपतिः, विनायकः, विघ्नेशः, विघ्नराजः, द्वैमातुरः, गणाधिपः, एकदन्तः, हेरंबः, लंबोदरः, गजाननः, गजास्यः, गजवक्त्रः.
Gang, *s.* गणः, संघः, निवहः; *See* **Collection.**
Ganges, *s.* गंगा, मंदाकिनी, त्रिपथगा, स्वर्णदी, सुरदीर्घिका, जाह्नवी, जह्नुतनया-कन्या, भागीरथी, अमरापगा, सुरनदी, त्रिस्रोतस् *f.*, त्रिपथगा.
Ganglion, *s.* शिरास्फोटः.
Gangrene, *s.* पूतिमांसं; मांसपाकः; कोथः. —*v. i.* कोथीभू 1 P, पूतीभू.
Gangway, *s.* आरोहावरोहपथः.
Gaol,-er, *See* **Jail,-er.**
Gap, *s.* छिद्रं, भंगः, विच्छेदः, भेदः, रंध्रं, छेदः, विवरं, गर्तः-र्ता.
Gape, *v. i.* वि-प्र-जृंभ् 1 A; जभ्-जंभ् 1 A, मुखं व्यादा 3 A. 2 वि-,दल् 1 P, स्फुट् 1 P. —*s.*, -ing, *s.* जृंभः-भा, जृंभणं, जृंभिका, जृंभितं, हर्मन् *n.*, हाफिका, मुखव्यादानं. -ing, *a.* जृंभिन्, जृंभित, व्यात्तमुख.
Garb, *s.* वेशः-षः, वस्त्रं, वसनं, वासस् *n.*, परिधानं, प्रसाधनं; 'putting on the g. of virtue' धर्मकंचुकप्रवेशिन: (S. 5).
Garbage, *s.* उच्छिष्टं, मलं.
Garble, *v. t.* साचीकृ 8 U; सत्यं गुह् 1 U, विकृ, वक्रीकृ.
Garden, *s.* उद्यानं, उपवनं; 'g. near a house' गृहारामः, निष्कुटः, गृहवाटिका; 'pleasure-g.' क्रीडोपवनं, आरामः, प्रमदवनं, आक्रीडः; 'flower-g.' पुष्पवनं-वाटः-वाटिका, कुसुमाकरः; 'fruit-g.' फलवृक्षवाटिका; 'vegetable g.' शाकवाटिका, शाकशाकटं, शाकशाकिनं; 'g.-wall' उद्यानपरिसरः-प्राकारः. -er, *s.* उद्यानपालकः-रक्षकः, मालाकारः, मालिकः, मालिन् *m.* -ing, *s.* उद्यानकर्मन् *n.*, उद्यानसेवनं-कर्षणं, फलोत्पत्तिकर्मन् *n.*
Gargle, *v. i.* (जलं) आचम् 1 P, उप-स्पृश् 6 P, जलेन मुखं मृज् 2 P or धाव् 1 P. —*s.* आचमनीयं, आचार्यं.
Garish, *a.* *See* **Gairish.**
Garland, *s.* माला, स्रज् *f.*, माल्यं, आपीडः; शेखरः, हारः; 'g. worn in the hair' प्रभ्रंशकः; 'g. hanging from the crest' प्रालंबकं,शिखालंबि माल्यं; 'g. worn straight' प्रालंबः-बिका; 'g. worn sideways' वैकक्षिकं; 'g. of pearls' हारः, मुक्तावली, मौक्तिकसरः.
Garlic, *s.* ल(र)शुनं, रसोनः-नकः, महौषधं-गृंजनं, अरिष्टः, महाकंदः, सोनहः.
Garment, *s.* वस्त्रं, वासस् *n.*, वसनं, पटः, परिधानं, परिच्छदः, अंबरं, प्रच्छादनं; वेशः-षः; 'under or lower g.' अंतरीयं, अधोंशुकं, उपसंव्यानं, परिधानं, अधोवासस् *n.*-वसनं; 'upper g.' उत्तरीयं, प्रावा(व)रः, उत्तरासंगः, बृहतिका, संव्यानं; 'g. as a protection from wind and cold' नीशारः.
Garner, *s.* कुसू(सू)लः, धान्यागारं, धान्यकोष्ठः, कंडोलः-लकः; पिटः. —*v. t.* कंडोले निविश् c. or नि-धा 3 U.
Garnet, *s.* रक्तमणि *m.*
Garnish, *v. t.* भूष् 10, मंड् 10, अलंकृ 8 U, परिष्कृ, शुभ् c. —*s.*, —ment,—**Garniture,** *s.* प्रसाधनं, भूषणं, अलंकारः, मंडनं, आभरणं; उपकरणानि (pl.), सज्जा.
Garret, *s.* शिरोगृहं, चंद्रशाला, अट्टः, अट्टालः.
Garrison, *s.* दुर्गरक्षकाः (pl.); दुर्गसैन्यं-बलं. राक्षिणः-रक्षकाः (pl.); रक्षिवर्गः. —*v. t.* रक्ष्; पुरुषैः युज् 10, (दुर्गे) रक्षिणः निविश् c. or स्था c. (स्थापयति).
Garrulous, *a.* अतिवक्तृ, वावदूक,बहुभाषिन्-वादिन्, वाचाल, वाचाट, जल्पाक, मुखर. -ness,**Garrulity,** *s.* वाचालता, वावदूकता, अतिवादः, बहुभाषित्वं, अतिजल्पनं.
Garter, *s.* पादावरणबंधनी, जंघाबंधनी.
Garth, *s.* अंगणं, प्रांगणं. 2 उपवनं. 3 धरणः.
Garuda, *s.* गरुडः, गरुत्मत् *m.*, तार्क्ष्यः, वैनतेयः, खगेश्वरः, नागांतकः, विष्णुरथः, सुपर्णः, पन्नगाशनः, भुजगदारणः, भुजगरिपुः.
Gas, *s.* वायुः. -eous, *a.* वायुरूप.
Gash, *s.* दीर्घच्छेदः, दीर्घ गंभीर-क्षतं.
Gasometer, *s.* वायुमापनयंत्रं.
Gasp, *v. i.* कृच्छ्रेण श्वस् or अन् 2 P, कृच्छ्रेण श्वस्, स्थूलस्थूलं निश्वस्. —*s.* उच्छ्वासः, निश्वासः, कृच्छ्रोच्छ्वासः, कष्टश्वासः.
Gastric, *a.* जाठर (री *f.*), उदरीय, जठरीय, उदर-जठर in comp.; 'g. juice' जठराग्निः.
Gastronome, *s.* औदरिकः, उदरंभरिः, कुक्षिंभरिः, उदरपरायणः; *See* **Glutton.** —**Gastronomy,** *s.* उदरपरायणता, उदरसेवा.
Gate, *s.* द्वारं, प्रतिहारः, द्वार् *f.*; 'g.-way' तोरणः-णं, गोपुरं, निर्गमः, द्वारपथः; for other comps. : *See* **Door.**

Gather, *v. t.* चि 5 U, सं-अव-प्र-आ-°; समाहृ 1 P, समा-नी 1 P, संग्रह् 9 P, सं-भृ 1, 3 U, एकीकृ 8 U; *See* **Collect**; 'g. flowers' पुष्पाणि चि or लू 9 U. **2** ज्ञा 9 U; अनु-मा 3 A, 2 P, ऊह् 1 A, अवगम् 1 P. **3** उद्-धृ 5 U, उद्धृ 1 P. **–***v. i.* संगम् 1 A, सं-इ 2 P, संमिल् 6 P, सन्नि-पत् 1 P, एकत्र मिल्, एकस्थ *a.* भू 1 P, एकीभू **2** उपचि pass., प्र-वि-वृध् 1 A, एध् 1A. **3** पूयं बंध् 9 P. पूय् 1 A. **–***s.* पुटः, चूणः. **–er,** *s.* अवचायिन् *m.*, संग्राहकः; 'g. of taxes' शौल्किकः, करग्राहकः. **–ing,** *s.* चयः, अवस-चयः, संग्रहणं. **2** समूहः, गणः, संघः, समागमः, निवहः, संघातः; जनसमूहः, लोकनिवहः-संघः.

Gaud, *s.* बाह्यशोभा. **–y,** *a.* उज्ज्वल, शोभन, नानावर्ण, चित्र; 'having a g. dress' उज्ज्वलवेशधारिन्, आर्य उदार-नेपथ्यभृत् **–***s.* **Festival,** q. v. **–ness,** *s.* अतिशोभा, औज्ज्वल्यं, चित्रता, नानावर्णता.

Gauge, *See* **Measure.**

Gaunt, *a.* क्षाम, कृश, क्षीण, शुष्कमांस, सुक्षाम, कृश-क्षीण-देह.

Gauntlet. हस्तत्राणं; 'throw down the g.' युद्धार्थे आह्वे 1 A, 'take up the g.' युद्धाह्वानं स्वीकृ or उररीकृ 8 U.

Gawk, *s* मूर्खः; *See* **Fool. 2 Cuckoo,** q. v.

Gawky, *a.* स्थूल-दीर्घ-देह, स्थूल.

Gay, *a.* प्रमोदिन्, प्रहृष्ट, आनंदित, उल्लासित, प्रमुदित, सानंद, प्रफुल्ल, अनुत्सुक, सोल्लास. **2** विलासिन्, परिहासशील, विनोदन-शील-पर, केलिपर. **3 Gaudy,** q. v. **–Gaiety,** *s.* प्रमोदः, उल्लासः, प्रहर्षः, आनंदः, आह्लादः **2** उत्सवः; *See* **Festival. –Gaily,** *adv.* सहर्षं, सोल्लासं, सानंदं, प्रफुल्लतया. **2** उज्ज्वलं, शोभनं.

Gaze, *v. i.* निर्-ईक्ष् 1 A, निर्वर्ण् 10, निध्यै 1 P. बद्ध-स्थिर-दृष्ट्या दृश् 1 P or आलोक् 1 A, 10; दृष्टिं or लक्ष्यं बंध् 9 P. (loc.): 'g. ing up to heaven' नभोदत्तदृष्टिः; 'g. ing in all directions' दिक्षु दृष्टिं क्षिप्त्वा. **–***s.* निरीक्षणं, निर्वर्णनं. आ-अव-लोकनं; दृष्टि *f.*, प्रेक्षणं, दर्शनं; बद्ध-स्थिर-अनिमेष-दृष्टिः; 'with a fixed g.' अनिमेषनयन, बद्धदृष्टि *a.*

Gazelle, *s.* मृगः, हरिणः.

Gazette, *s* वार्ताहरः. वार्तापत्रं.

Gear, *s.* उपकरणं, सामग्री, सज्जा, प्रसाधनं. **2** कार्यं, व्यापारः; 'out of g.' विलग्न, असंगत, असंबद्ध.

Gelatinous, *a.* सांद्र, श्लेष्म श्यान, संलग्नशील.

Geld, *v. t.* वृषणौ छिद् 7 P or कृत् 6 P or उत्पट् 10. **–ing,** *s.* छिन्नमुष्कः (अश्वः).

Gelid, *a.* अतिशीत, हिम, शिशिर.

Gem, *s.* रत्नं, मणि *m. f.* **2 Bud,** q. v. **–***v. t.* रत्नैः शुभ् c. **–med,** *a.* रत्नखचित, मणिभूषित, रत्नानुविद्ध. **–my,** *a.* मणिमय (यी *f.*), रत्नभासिन्, रत्नोज्ज्वल.

Gemmate, *a.* मुकुलित, बद्धपल्लव.

Gemini, *s.* मिथुनं, द्वंद्वं, युगं, युगलं, युग्मं, द्वयं, यमकं-लं; यमौ, यमजौ-लौ. **–Geminate, –Geminous,** *a.* द्विगुण, द्विरावृत्त, द्विक; यम, यमज-ल.

Gender, *s.* लिंगं, प्रकृति *f.* **–***v. t.* **Beget,** q. v. **–***v. i.* **Copulate,** q. v.

Geneology, *s.* वंशावलि-ली *f.*, वंशक्रमः, वंशश्रेणी परंपरा-वृक्षः; oft. ex. by वंशः, अन्वयः. **–ical,** *a.* (*s.*) in comp. **–ist,** *s.* अन्वयज्ञः, वंशक्रमज्ञः, वंशावलिरचकः.

General, *a.* सामान्य, साधारण, सर्वजनीन-न, सार्वत्रिक-सार्वलौकिक-औत्सर्गिक- (की *f.*), सर्व-बहु-सामान्य, व्यापक, सर्वव्यापिन्, अविशेषक, प्रायिक, सर्वत्र प्रचलित; 'a g. rule' उत्सर्गः; 'a g. practice' लोकाचारः, जनरूढि *f.*, जनव्यवहारः, लोकः; 'against g. practice' लोकविरुद्धं; 'g. opinion' बहुमतं; 'g. reader' चुंबकः. **–***s* सेनापतिः, सेनाध्यक्षः, चमूपतिः, सेनानीः, बलाध्यक्षः-नायकः. **–ity,** *s.* बहुतरभागः, मुख्यांशः, प्रधानभागः; better by 'g. ly' 'the g. of beasts' प्रायः सर्वे पशवः **2** सामान्यता, साधारण्यं. **–ize,** *v. t.* जातीः निर्दिश् 6 P, जातिशः गणीकृ 8 U, साधारणधर्मं प्रदृश् c., वर्गीकृ. **2** सामान्यतः वद् 1 P, उत्सर्गरूपेण कथ् or निरूप् 10. **–ization,** *s.* जातिनिर्देशः, गणीकरणं, सामान्यधर्मकथनं, सामान्यवादः. **–ly,** *adv.* 'in g.' प्रायः, प्रायेण, प्रायशः, सामान्यतः, बहुशः, भूयसा, भूयिष्ठं, साधारण्येन; oft. ex by हि. **–ness,** *s.* व्यापकत्वं, सामान्यता. **–ship,** *s.* सैनापत्यं, सेनाध्यक्षत्वं. **2** रणकौशलं, युद्धनैपुण्यं, बलविन्यासकौशलं.

Generate, *v. t.* उत्पद् c, प्र-सू 2, 4 A, आवह् 1 P, सं-उद्-भू c., जन् c. (जनयति); *See* **Cause** also. **–ion,** *s.* उत्पादनं, प्रसवः, जननं, जन्मन् *n.*, उत्पत्ति *f.*, प्रसूति *f.*, संभवः, उद्भवः. **2** अन्वयः, कुलं, वंशः, जाति *f*, संतानः, संतति *f.* **3** पुरुषाः, पुरुषपरंपरा, वंशश्रेणी; 'former g. s' पूर्वे पुरुषाः; 'a pair, one g. removed from the creator' स्रष्टुरेकांतरं द्वंद्व (S. 7). **4** समकालीनपुरुषाः. **–ive,** *a.* उत्पादक, जनक; 'g. organ' उपस्थः योनि *f.* **–or,** *s.* जनयितृ *m.*, जनकः उत्पादकः, जन्मप्रदः-दातृ *m.*

Generic, –al, *a.* जातिगत, सामान्य, साधारण, व्यापक, वर्गीय; 'g. property' जातिधर्मः;

-लक्षणं-स्वभावः, जातित्वं, सामान्यधर्मः-लक्षणं. -ally, *adv.* जातिमुद्दिश्य, सामान्यतः.

Generous, *a.* उदार, वदा(द)न्य, त्यागशील, अवदात, दानशील, दानरत, दानशौंड, स्थूललक्ष्य, बहुप्रद. 2 महात्मन्, उदारधी-चेतस्, महामनस्, उदारचरित, महेच्छ, महाशय. 3 कुलीन, महाकुल, अभिजात. -ness, -Generosity, *s.* औदार्यं, त्यागिता, त्यागः, दानशीलं, वदान्यता. 2 उदारात्मता, महात्मता, माहात्म्यं.

Genesis, *s.* उत्पत्ति *f.*, आदि *m*

Genial, *a.* सुखप्रद, आनंदद, सुखावह, रम्य, रमणीय, मनोहर-रम, रुचिर, प्रसन्न, सुखकर (री *f.*), उत्साहवर्धक, जीवद. 2 प्रसवकारिन, जनक. 3 प्रसन्नचित, सोल्लास, उदार. -ly, *adv.* प्रसन्नं, सानंदं, महर्षं, सोल्लासं, प्रफुल्लं. -ness, *s.* रम्यता, उल्लासः, प्रसादः, प्रसन्नता.

Geniculated, *a.* ग्रंथिल

Genie, *s.* भूतः, पिशाचः.

Genital, *a.* जननसंबंधिन, जनन in comp.; 'g. organ' जननेंद्रियं, उपस्थः, योनि *f.*, शिश्नं.

Genitive, *s.* षष्ठी विभक्तिः.

Genitor, *See* **Generator.**

Genius, *s.* धीशक्ति *f.*, मति *f.*, बुद्धि *f.*, धीः, मति-बुद्धि-प्रभावः-सामर्थ्यं, मतिप्रकर्षः. 2 धीसंपन्नः, धीमत् *m.*, धीशक्तियुतः, गुणवत् *m.* 3 कल्पना-निर्माण-शक्तिः. 4 प्रकृति *f.*, स्वभावः, शीलं. 5 लक्षणं, विशेषचिह्नं, वृत्ति *f.*, स्वधर्मः. 6 भूतः, पिशाचः, वेतालः; *See* **Demon;** 'dramatic g' नाट्यशक्तिः-कल्पना; 'good g.' सुदैवं; 'evil g.' दुर्दैवं.

Genteel, *a.* विनीत, दक्षिण, सभ्य, सुजन, सुशील, आर्य, आर्य-साधु-वृत्त, शिष्टाचार, आर्यचरित, सदाचार. 2 कुलीन, अभिजात, कुलोत्पन्न. 3 चारु, ललित, सुभग. -ly, *adv.* आर्यवत्, सुजनवत् -ness, -Gentility, *s.* विनयः, दाक्षिण्यं, आर्यता, सौजन्यं, सुशीलता, सभ्यता, साधुता. 2 आभिजात्यं, कुलोत्कर्षः. 3 लालित्यं, चारुता.

Gentian, *s.* किरातः, चिर(रा)तिक्तः, भूनिंबः, हिमकः, किराततिक्तः, अनार्यतिक्तः.

Gentile, *a.*, *s.* अन्य-भिन्न-देशीय, देवार्चक. 2 सगोत्र, गोत्रज, ज्ञातीय.

Gentle, *a.* भद्र, कल्याण (णी *f.*), शिव, सुख. 2 कोमल, मृदु, मसृण, अपरुष, सुकुमार, अचंड, मृदुल, मंद, सौम्य; 'a g. laugh' मंदस्मितं, ईषद्धासः; 'g. breeze' मंदानिलः, मृदुपवनः; 'g. means' सामोपचारः, सामन् *n.*, मृदूपायः; 'g. words' प्रिय-मृदु-वचनं. 3 महाकुल, कुलीन, अभिजात, सुजन्मन्, साधु-आर्य-वंशज, कुल in comp.; 'a girl of g. blood' कुलकन्यका कुलप्रसूता. 4 (In addressing) अयि, भद्र, सौम्य, आर्य; 'g. lightning' अयि विद्युत्; 'g. folk' आर्यमिश्राः, आर्याः, साधुजनाः. 5 शांत, दांत. -ness, *s.* मृदुता, कोमलता, सौम्यता, सौकुमार्यं, मंदता; 'g. of manners' आचारसौजन्यं, आर्यवृत्तिः. -Gently, *adv.* मृदु, मदयं, अजातव्यथं, यथासुखं; 'shall rub g.' यथासुखं संवाहयामि (S. 3). 2 मंदं मंदं, शनैः शनैः, शनैः, अपरुषं, अचंडं. 3 निभृतं, अलक्षितं, मंदं -Gentleman, *s.* आर्यः, सुजनः, साधुजनः, आर्यवृत्तः, कुलीनः; सुविनीतः, महाजनः, आर्य-कुलीन-जनः, भद्रः, महानुभावः; oft. by श्री in comp. -like, -ly, *a.* सभ्य, विनीत, शिष्ट, सुशील, आर्य; 'g. manner' आर्यवृत्तिः, सौजन्यं; 'in a g. manner' नागरिकवृत्त्या (S. 5).

Gentry, *s.* विशिष्टजनाः, आर्याः, आर्यलोकाः-जनाः, कुलीनवर्गः-जनाः, सुजनता.

Genuflect, *v. i.* जानुं नम् *c.* -ion, *s.* जानुभ्यां आनतिः *f.*, जानुनतिः.

Genuine, *a.* अकृतक, अकृत्रिम, अकाल्पित, निर्व्याज, निर्व्यलीक, अकपट, निष्कपट, अवितथ, सत्य, यथार्थ. -ly, *adv.* सत्यं, निष्कपटं, निर्व्याजं. -ness, *s.* सत्यता, यथार्थता, निर्व्याजत्वं, अकृत्रिमता.

Genus, *s.* जाति *f.*, गणः, वर्गः.

Geography, *s.* भूगोलविद्या-शास्त्रं, भूपृष्ठविद्या. -er, *s.* भूगोलशास्त्रज्ञः, भूपृष्ठविद्याज्ञः. -ical, *a.* भूगोलशास्त्रविषयक.

Geology, *s.* भूतत्त्वं, भूगर्भशास्त्रं, भूतत्त्वविद्या. -ical, *a.* भूतत्त्वविषयक. -ist, *s.* भूतत्त्वज्ञः.

Geometry, *s.* ज्यामिति *f.*, रेखागणना-गणितं, भूमितिः. -ic, -ical, *a.* (*s.*) in comp.; 'g. proof' रेखागणितेन उपपत्तिः. -ician, *s.* भूमितिज्ञः.

Georgic, *s.* कृषि-कार्य-गीतं.

Germ, *s.* अंकुरः, अभिनवोद्भिद् *m.* 2 बीजं, मूलं, योनि *f.*, आदिः, प्रभवः, बीजकारणं. -Germinate, *v. i.* उद्भिद् pass., प्ररुह् 1 P, स्फुट् 6 P, विकस् 1 P. -ing, *a.* उद्भिद्-द्-ज्ज, अंकुरित -ion, *s.* उद्भेदः, स्फुटनं.

Germane, *a.* सनाभि, संपर्किन्, संपृक्त.

Gestation, *s.* गर्भ-धारणं-वहनं-पोषणं; गर्भिणीभावः.

Gesticulate, *v. i.* अंगानि विक्षिप् 6 P or मंचल् *c.* -*v. t.* अभि-नी 1 P, नि-,रूप् 10, सूच् 10, नट् 10: *See* **Act.** -ion, *s.* अभिनयः; अंगविक्षेपः, चेष्टा, सूचना, अंगहारः, हावः, संकेतसूचनं. -or, *s.* अंगविक्षेपकः.

Gesture, *s.* चेष्टा, व्यापारः, इंगितं, भावः, अभिनयः, विलासः, विभ्रमः, अंगविक्षेपः, हावः; हस्तादिचालनं

Get, *v. t.* लभ् 1 A, आप् 5 P, अर्ज् 1 P or c., आ-समा-सद् c., विद् 6 U, प्रति-आ-पद् 4 A, अश् 5 A, अधिगम् 1 P, ग्रह् 9 U, आ-दा 3 A. **2** (To be produced) जन् 4 A, उत्पद् 4 A, सं-उद्- भू 1 P, प्र-सू 2, 4 A, (with genitive of person); 'I have got a pain in my teeth ' दंतपीडा मे उत्पन्ना-जाता. **3** भृ 1 P, 10, भृ 3 U; धा 3 U; 'I have got that book with me ' तत्पुस्तकं मत्सकाशे वर्तते; *See* **Bear** also. **4** (Cause) ex. by causal; 'g. it done by him ', तं तत्कारय; oft. by अनुनी 1 P, प्रोत्सह् c., प्रवृत् c.; 'g ahead ' अग्रेसरीभू. 'g. clear of ' मुच् pass.; 'g. rid of' आत्मानं मुच् c., (with abl.) by निर् in comp. ; 'g. abroad ' प्रसृ-प्रसृप्- 1 P. बहुलीभू 1 P: *See* under **Abroad. -among,** मध्ये प्रविश् 6 P or गम्. **-at.** प्राप्, आगम्, आ-या 2 P, उप-स्था 1 U. **-away,** अपसृ 1 P, अप-इ 2 P, अपक्रम् 1 U, 4 P; चल् 1 P. अप-या गम्; 'g. away, you fool ' अपेहि रे मूर्ख. **-back,** प्रतिलभ्, प्रत्या-दा, &c. **-beyond,** तॄ 1 P, अति-इ, अतिक्रम्. **-down,** अवतॄ, अवरुह् 1 P, अधो गम्, नि-अव-पत् 1 P, (*v. t.*) अवतॄ c., अवरुह् c.. &c. **-in,** प्रविश् 6 P. **-into,** पत्; संकटे पतितः 'got into troubles' ; आरुह् 1 P (a car &c.); 'he got into debt' ऋणग्रस्तो बभूव; 'g. ing into deep mud ' पंकपूरमासाद्य. **-off,** (*v. i.*) निः-सृ, निर्गम्, अप-या, अप-क्रम्, निस्तॄ. **2** अवतॄ, अवरुह्; (*v. t.*) निरस् 4 U, अप-नी 1 P. **-on,** प्रवृत् 1 A, प्रचल्, प्र-सृ; 'they long got on well ' चिर ते सुखेन अवर्तत or कालं निन्युः. **-out,** निर्गम्, अप-इ, निः-सृ. **2** त्यज् 1 P, मुच् 6 P; 'g. out of bed now ' अधुना मुंच शय्यां. **-over, -through,** संतॄ; पारं-अंतं-गम्, अतिक्रम्, निस्तॄ, तीर् 10; आरुह्. **2** समाप् c.; *See* **Complete. -together,** संचि 5 U; समा-नी, संग्रह्; *See* **Collect. -up,** उत्-स्था, प्रबुध् 4 A, शयनं त्यज् 1 P or मुच्; (*v. t.*) सज्जीकृ 8 U, विरच् 10; उपक्लृप् c. **-upon,** अधि-आ-रुह्. **-ter,** *s.* प्रापकः, लब्धृ *m.*, अर्जकः. **-ting,** *s.* लाभः, अवाप्ति *f.*, अर्जनं, अधिगमः-मनं, आगमः, आसादनं.

Gewgaw, *s.* क्रीडनकं, अल्पमूल्यं द्रव्यं or आभरणं. **-a.** निःसार, बहिरेव मनोहर.

Geyser, *s.* उष्णोदक-निर्झरः-स्रोतस् *n.*

Ghastly, *a.* प्रेत-शव-तुल्य, विवर्ण, शवसरूप-सवर्ण. **2** कराल, विकट, भीम, उग्र, दारुण, भयानक, भीमदर्शन, करालवदन, घोराकृति. **-ness,** *s.* प्रेतसारूप्यं, वैवर्ण्यं, विकटत्वं, दारुणत्वं.

Ghee, *s.* घृतं, आज्यं, हविस् *n.*, सर्पिस् *n.*, नवनीतं.

Ghost, *s.* भूतः, पिशाचः, वेतालः, निशाचरः, प्रेतनरः. **2** आत्मन् *m.*; 'give up the g.' मृ 6 A; *See* **Die. -like,** *a.* प्रेत-भूत-सरूप, प्रेततुल्य. **-ly,** *a.* भूतविषयक-संबंधिन्. **2** पारत्रिक (की *f.*), आत्मविषय, पारमार्थिक (की *f.*).

Giant, *s.* महापुरुषः, विकटविग्रहः, बृहच्छरीरः, भीमविग्रहः, बृहत्कायः, अतिशक्त्युपेतः, राक्षसः. **2** दैत्यः, दानवः; *See* **Demon. -a., -like,** *a.* अतिस्थूल, प्रकांडदेह, स्थूल-प्रमाण, अतिमहत्, बृहत्काय, महाशरीर, विकट. **-ess,** *s.* राक्षसी, बृहच्छरीरा. **-Gigantic,** *a.* अतिमानुष (षी *f.*), राक्षस-परिमाण, भीमविग्रह, अतिमहत्-बृहत्, स्थूलकाय, विकट.

Gibber, *v. i.* *See* **Babble. -ish,** *s.* असंबद्धवचनं, प्रलापः, प्रजल्पितं, मृषार्थक वाक्य. **-a.** मृषार्थकं, अनर्थकं.

Gibbet, *s.* वध्यकाष्ठं-शिला, वध-घात-स्थानं. **-v. t.** वधं आदिश् 6 P, उद्-बंध् 9 P.

Gibbous, *a.* न्युब्ज, वक्र, आभोगवत्, बिंबा-कार.

Gibe, *See* **Abuse.**

Giddy, *a.* भ्रमिन्, भ्रामररोगिन्, विभ्रांत, भ्रमणशील; better ex. by भ्रम् 1, 4 P. **2** भ्रमकारिन्, मत्त, उन्मादिन्. **3** (Fig.) चपल, चंचल, लोल, अस्थिर; *See* **Fickle. 4** उद्धत, उन्मत्त, उत्सिक्त, गर्वित. **-ly,** *adv.* अविचार्य, लौल्यात्, चापल्येन. **-ness,** *s.* भ्र(भ्रा)मरं, भ्रमः-मि *f.*, घूर्णनं, घूर्णि *f.* **2** चापल्यं, लौल्यं, अस्थैर्यं, &c.

Gift, *See* under **Give.**

Gig, *s.* भ्रमरं. **2** लघुयानं-रथः. **3** क्षुद्र-लघु-नौका.

Giggle, *v. i.* मूर्खवत् हस् 1 P.

Gild, *v. t.* स्वर्णेन रंज् c., हेमरसेन-द्रवेण लिप् 6 P, सुवर्णयति (D.); बाह्यतेजसा रंज् c. **2** प्रकाश् c., विद्युत् c., विराज् c. **-ing,** *s.* स्वर्णरंजनं, स्वर्णच्छदः. **-ed,-Gilt,** *a.* सुवर्णित, हेमरसखचित, स्वर्ण-मंडित, स्वर्णप्रतिबद्ध. **2** रंजित, विराजित.

Gill, *s.* श्वासेंद्रियं, अधोगंडः.

Gimcrack, *s.* क्रीडनकं, क्रीडावस्तु *n.*

Gimlet, *s.* वेधनिका, आस्फोटनी.

Gin, *s.* **Liquor,** q. v. **2** पाशः, उन्माथः, कूटयंत्रं, बंधनं, वागुरा.

Ginger, *s.* आर्द्रकं, शृंगवेरं, गुल्ममूलं; 'dry g.' शुंठि-ठी *f.*, विश्वं-श्वा *f.*, नागरं, विश्वभेषजं, महौषधं; 'g. beer or wine ' आर्द्रकासवं-आर्द्रकमद्यं-पानं; 'g.-bread ' आर्द्रकापिष्टक

Gingerly, *adv.* असहसा, सावधानं, शनैः.
Gingle, *See* **Jingle.**
Gipsy, *s.* यक्षिणी, विमश्रिका, ईक्षणिका.
Giraffe, *s.* चित्रोष्ट्रः.
Gird, *v. t.* परि-अधि-वेष्ट् c., परि-वृ 5 U or c. **2** आ-बंध् 9 P, परि-धा 3 U, सं-पि-नह् 4 P; 'g. round the body' शरीरं माह् or आ-च्छद् 10, परि-बंध् or परि-धा; 'g. up one's loins' परिकरं बंध्; 'girt by the (golden) lightning, as by a yellow garb' विद्युत्प्रभारचितपीतपटोत्तरीयः(Mr. 5). —*s. See* **Cramp.** **—ed, —Girt,** *a.* बद्ध, आनद्ध, परिवेष्टित, परिवृत; वलय-मेखला-रसना in comp.; 'sea-g. earth' समुद्र-रसना-उदधिवलया-पृथ्वी.
Girdle, *s.* मेखला, रश(स)ना, कांचि-ची *f.*, ससकी, सारसनं (of women); कटिसूत्रं, कटिवलयं, कक्ष्या-क्षा, परिकरः, कटिबंधनी, शृंखलः-ला-लं (of men). **2** वेष्टनं, परि-आ-वेष्टनं, मंडलं, वलयः-यं, चक्रवालं. **3** राशिचक्रं. —*v. t.* परि-वेष्ट् c., परि-वृ 5 U, मेखलया बंध् 9 P, *See* **Gird.**
Girl, *s.* कन्या, बाला, बालिका, कुमारी, दारिका, वासूः, *See* **Daughter** also; one born from a g.' कानीनः, कन्यकाजातः. **—hood,** *s.* बालभावः, बाल्यं, कुमारीत्वं. **—ish,** *s.* कन्यानुरूप, बालेय.
Girth, *s.* वरत्रा, नध्री, वध्री; दू(चू)ष्या, कक्षा-क्ष्या.
Gist, *s.* फलितार्थः, निष्कर्षः, भावः, फलितं, परमार्थः, पिंडितार्थः.
Give, *v. t.* दा 1 P, 3 U, ऋ c. (अर्पयति), प्रतिपद् c., वद् 1 A, विश्रण् 10, उत्-वि-सृज् 6 P, (with dat. of person); निक्षिप् 6 P, संक्रम् c. (with loc.); त्यज् 1 P, दिश् 6 P. **2** (Produce) ex by भू 1 P, संपद् 4 A, जन् 4 A; '3 repeated 2 times g. s 6' त्रिरावृत्तास्त्रयः षट् भवंति-संपद्यंते 'g. chase' अनुसृ-अनुधाव् 1 P; 'g. ear' अव-धा 3 U, कर्णं दा, श्रु 5 P; 'g. ground' अपक्रम् 1 U, 4 P; अपसृ, परा-नि-वृत् 1 A; त्यक्त्वा गम् 1 P; 'g. one's self up to' सेव् 1 A, भज् 1 A; आसंज् pass., आसक्त-निरत-निविष्ट-*a.* भू, (with loc.); 'g. offence' अपराध् 4, 5 P, विप्रियं-प्रतिकूलं-कृ 8 U or आचर् 1 P; 'g. utterance' उदीर् 10, उच्चर् c., उदाहृ 1 P. **—away,** (in marriage) प्रतिपद् c., उत्सृज्, प्र-दा. **2** विश्रण्, दानेन क्षे c. (क्षपयति). **—back,** प्रतिदा, प्रति-अर्प् c., निर्यत् 10. **—forth,** प्रथ् 10, प्रकाश् c., निविद् c., ख्या c. (ख्यापयति). **—in,** अनुमन् 4 A, अनुरुध् 1 A; स्वाग्रहं त्यज्. **—off, Abandon,** q. v. **—out,** निविद् c., प्रकाश् c., घुष् 10, प्रच्-10, प्र-ख्या c. **2** मुच् 6 P, विसृज्, उद्वम् 1 P उद्-गॄ 6 P, निःसृ c. **—over,** त्यज्, उत्सृज्, निवृत् 1 A, विरम् 1 P, (with abl.). **2** असाध्य *a.* इति मत्वा त्यज्; आशां त्यज्; (*v. i.*) शम् 4 P, पत् 1 P; 'when the winds g. over' शांते पवने. **—up,** त्यज्, हा 3 P, उत्-वि-सृज्. **2** निवृत्, विरम्; 'g. up for lost' नष्टमाप *a.* मन् 4 A. **—way,** शम् 4 P, निवृत्, विरम्, शिथिलीभू. **2** भंज् pass., अवसद् 1 P; 'the cord gave way' रज्जुर्भग्ना; 'the wall gave way' भित्तिरवसन्ना. **3** अव(प)सृ, अप-कृ, मार्गं दा or त्यज्, अपक्रम्, अप-या. **4** वशं गम्-कृ-या, अधीन-वश-आयत्त *a.* भू; 'do not g. way to grief' दुःखो वशं मा गमः, शोका-धीनो मा भूः, वैक्लव्यं मावलंबस्व. **—er,** *s.* दातृ *m.*, त्यागिन् *m.*; gen. ex. by दायक, द, प्रद, दायिन्, in comp.; 'g. of milk' पयोदायिनी, दुग्धप्रदा, &c. **—ing,** *s.* दानं, विसर्जनं, उत्सर्गः, त्यागः, वितरणं, अर्पणं, प्रति-पादनं, विश्राणनं. **—Gift,** *s.* दानं, प्रतिपादनं; *See* above. **2** दानं, उपहारः, उपायनं, उपदा, प्रीतिदानं, प्राभृतं, प्रदेशनं, उपग्राह्यं; 'one deserving a g.' दक्षिणीय, दक्षि-णार्ह, दक्षिण्य; 'marriage-g.' यौतकं, सुदायः. **3** गुणः, शक्ति *f.* **—ed,** *a.* उपेत, सं-उप-पन्न, विशिष्ट, युक्त, अन्वित, शालिन् in comp. **2** गुणोपेत, गुणसंपन्न, गुणिन्, गुणवत्.
Glacial, *a.* हिमरूप, हैम (मी *f.*), हिम.
Glacier, *s.* हिमानी, हिमसंहति *f.*
Glacis, *s.* प्रवण निम्न-भूमि *f.*
Glad, *a.* प्र-,सं-,हृष्ट, आनंदित, प्रीत, सानंद, प्रमुदित, तुष्ट, सोल्लास, उल्लसित, प्रसन्न. **2** हर्षजनक, हर्ष-आनंद-कर (री *f.*); नंदक, रमणीय, प्रमोदिन्; 'I am g.' हंत, दिष्ट्या. **—den,** *v. t.* आ,नंद् c., प्री 9 P, 10; *See* **Delight.** **—dening,** *a.* हर्षद, प्रीतिप्रद, हर्षकर, प्रमोदिन्. **—ly,** *adv.* सहर्षं, सानंदं, सप्रमोदं, हृष्टमनसा, संतोषेण, प्रीत्या, साह्लादं. **—ness,** *s.* हर्षः, प्रमोदः, आह्लादः, संतोषः, प्रीति *f.*, उल्लासः, चित्तप्रसादः, तुष्टि *f.* **—some,** *See* (*a.*).
Glade, *s.* वन-गुल्मः-पथः-मार्गः, तरुगहनमार्गः.
Gladiator, *s.* असिक्रीडकः, आसिकः, मल्लः. **—Gladiature,** असिक्रीडा-युद्धं.
Glair, *s.* अंडशुक्लं.
Glamour, *a.* *See* 'Enchantment.'
Glance, *s.* दृष्टिपातः, ईक्षणं, वीक्षितं, नयनपातः-विक्षेपः, दृक्पातः, आलोकितं; 'side-long g.' नयनोपांतविलोकितं, सा-चिविलोकितं, अपांग-दर्शनं-दृष्टि *f.*, कटाक्षः; 'at the very first g.' सकृद्दृष्टिपातेन, प्रथममेव; 'good at the first g.' आपा-तमात्रे रमणीय, आपातरमणीय. **2** अर्धवीक्षणं,

ईषद्दृष्टिः. 3 स्फुरितं, स्फुरणं, द्युति *f.* —*v. i.* दृष्टिं क्षिप् 6 P, चक्षुः-दृष्टिं *f.*-दा 3U or पत् *c.* (with loc.); 'g.-ing at the antelope' कृष्णसारे ददच्चक्षुः (S. 1). 2 लघु निर्घृष् 1 P, लघु हत्वा अति-इ 2 P. 3 (जवेन) परिस्फुर् 6 P or विलस् 1 P. **-ingly,** *adv.* लघु, ईषत्, अल्पमात्रं, स्तोकं. 2 दृक्पातेन, तिर्यक्, साचि, कटाक्षेण.

Gland, *s* अधिमांसं, मांसपिंडः, पिंडः.

Glanders, *s.* क्षयथुः.

Glare, *s.* तेजस् *n.*, दीप्ति *f.*, द्युति *f.*, प्रखर-अति-तेजः, अतिप्रभा-द्युतिः-दीप्तिः, नेत्रप्रतिघातिनी प्रभा. 2 उग्रदृष्टि *f.*, क्रोधदृष्टिः. —*v. i.* संदीप् 4 A, प्रद्युत् 1 A, उज्ज्वल् 1 P, अतितेजसा स्फुर् 6 P or दृष्टिं प्रतिहन् 2 P or संतप् c.; दीप् freq. (देदीप्यते). 2 उग्रदृष्टिं पत् c., कोपेन दृश् 1 P or ईक्ष् 1 A. **-ing,** *a.* संदीप्त, उज्ज्वल, अतिभास्वत्, देदीप्यमान. 2 सुस्पष्ट, सुप्रकाश, प्रत्यक्ष, पुरःस्फुरत्. **-ingly,** *adv.* सुस्पष्टं, सुप्रकाशं.

Glass, *s.* काचः, स्फटिकः, क्षारः. 2 (Cup) चषकः-कं, काचपात्रं-भाजनं. 3 आदर्शः, दर्पणः, मुकुरः. —*a.* काचमय (यी *f.*), काचनिर्मित, काच in comp.; 'g.-blower' काचधमकः; 'g.-grinder' काचपरिष्कारकः; 'g. house,' काचनिर्माणशाला-स्थानं; 'g.-man' काचविक्रयिन् *m.*; 'g.-work' काचनिर्माणं-कर्मन् *n.* **-like,** *a.* काचोपम, काचतुल्य. **-y,** *a.* स्फटिकोपम, काचवत्स्वच्छ, काचविमल, स्फटिकप्रभ, स्फाटिक (की *f.*), सुप्रसन्न. 2 श्लक्ष्ण, स्निग्ध. **-Glaze,** *v. t.* काचयति (D.), काचेन आच्छद् 10. 2 श्लक्ष्णीकृ 8 U, स्निग्धीकृ, श्लक्ष्णयति (D.), **-s.** स्निग्धता, श्लक्ष्णता, **-Glazier,** *a* काचसंधातृ *m.*, काचबंधकः.

Glaucous, *a.* घनश्याम, मेघनील, समुद्रवर्ण.

Glaze, *v. t. See* under **Glass.**

Gleam, *v. i* परि-,स्फुर् 6 P, विलस् 1 P, क्षणमात्रं प्रकाश् 1 A or उज्ज्वल् 1 P; *See* **Shine** also. —*s.* प्रभा, कांति *f.*, तेजस् *n.*, औज्ज्वल्यं. 2 स्फुरणं, स्फुरितं, क्षणप्रभा-कांतिः, अचिरप्रभा, क्षणज्योतिस् *n.* 3 रश्मिः, करः, किरणः, अंशुः; 'not a g. of hope' न आशालवोऽपि. **-y,** *a.* क्षण-अचिर-प्रभ, चलद्युति, कंपितप्रभ, क्षणद्योतिन्.

Glean, *v. t* (bits &c.) उंछ् 6 P, शिल् 6 P, उद्-ग्रस् 9 P or c., अवशेषं चि 5 U or संग्रह् 9 P. 2 संकल् 10 संग्रह्, उद्धृ 1 P. **-s.** धान्यशेषः, शेषधान्यसंचयः. **-er,** *s.* उंछशीलः-वृत्तिः, उंछनकृत् *m.* 2 संग्रहीतृ *m.* **-ing,** *s.* उंछः, शिलं, उंछशिलं, ऋतं. 2 संग्रहः, संकलनं, उद्धारः.

Glebe, *s.* मृद् *f.*, मृत्तिका; स्थलं-ली, भूमि *f.*

Glee, *See* **Delight.**

Gleet, *s.* इक्षु-मधु-मेहः, मेहविकारः.

Glen, *s.* दरी, कंदरः-रा; अद्रिद्रोणी, उपत्यका.

Glib, *a.* वाक्चपल, त्वरित-द्रुत-वाच्; चपल, लोल. 2 पिच्छिल, मसृण, स्निग्ध, श्लक्ष्ण, चिक्कण. —*v. t* **Castrate,** q. v. 2 श्लक्ष्णीकृ 8 U. **-ly,** *adv* चपलतया, वाक्चापल्येन. 2 श्लक्ष्णं. **-ness,** *s.* वाक्चापल्यं, चापल्यं. 2 श्लक्ष्णता, मसृणता.

Glide, *v. t.* सृप् 1 P, सं-वि-प्र°, प्र-वि-सृ 1 P; मंदं इ-या 2 P or गम् 1 P, शनैः प्रसृ or चल् 1 P: अलक्षितं-निभृतं गम् or या or अति-इ; *See* **Steal.** 2 वह् 1 P, स्रु 1 P; स्यंद् 1 A, री 4 A. **-ing,** *s.* संसर्पः-र्पणं, सरणं, निस्यंदः-दनं.

Glimmer, *v. i.* मंदं मंदं ज्वल् 1 P or दीप् 4 A; मंदप्रभया-अचिरप्रभया प्रकाश् 1 A or द्युत् 1 A or स्फुर् 6 P. —*s.*, **Glim,** *s.* मंदप्रभा-तेजस् *n.*, मंद-अचिर-द्युति *f.*, -दीप्ति *f.*, स्फुरणं, स्फुरितं. **-ing,** *a.* मंदप्रभ द्युति, तेजस्, ईषत्स्फुरित, पांडुद्युति-किरण, मंदच्छाय. 2 मंद, असुप्रकाश, अव्यक्त, अस्पष्ट.

Glimpse, *s.* क्षण-मुहूर्त-दर्शनं; ईषद्दृष्टि *f.*, अर्धवीक्षणं, अल्पो दृक्पातः. 2 क्षण-अचिर-प्रभा; *See* **Gleam.**

Glint, *v. i.* प्रकाश् 1 A. —*v. t.* द्युत् c.

Glisten, Glister, *v. i.* स्फुर् 6 P, प्रकाश् 1 A, द्युत् 1 A. **-ing,** *a.* मसृण, चिक्कण, श्लक्ष्ण, स्निग्ध.

Glitter, *v. i.* द्युत्-प्रकाश् 1 A; भास् 1 A, भा 2 P; स्फुर् 6 P, *See* **Shine.** **-s.** दीप्ति-द्युति-रुचि-कांति-*f.*, प्रभा, तेजस् *n.*; ज्योतिस् *n.*, वर्चस् *n*, आभा. **-ing,** *a.* प्रभावत्, उज्ज्वल, भासमान, विद्योतिन्, भासुर.

Gloaming, *s.* संध्या; संध्यासमयः.

Gloat, *v. i.* संतृप् 4 P, संतुष् 4 P: आत्मानं संतृप् c. or संतुष् c., लोभाद् निरीक्ष् 1 A or निर्वर्ण् 10.

Globe, *s.* गोलः-लं; वर्तुलः-लं; मंडलं; चक्रं. 2 भूमंडलं, भूगोलः, क्षितिमंडलं-तलं. **-Globate, -Globular,** *a.* वर्तुल, गोलाकार, गोलाकृति, वृत्त, निस्तल, मंडलाकार, गोल. **-ly,** *adv.* मंडलरूपेण, मंडलवत्, गोलाकारेण. **-Globule,** *s.* बिंदुः, लघुगोलः, गोलकः.

Glomerate, *v. t.* मंडलीकृ 8 U, गोलीकृ, पिंडीकृ.

Gloom, *s.* अंधकारः, तमस् *n.*, तमिस्रं-स्रा, तिमिरं, ध्वांतं; अवतमसं, ईषत्तमः (partial g.). 2 निष्प्रभत्वं, विषादः, छाया. —*v. t.* **Darken,** q. v. **-Gloomy,** *a.* सतिमिर, तमोवृत, सांधकार, तिमिरावगुंठित. 2 दुर्दर्शन, मलिनप्रभ, अप्रभ, निष्प्रभ, निरालोक, मलिन. 3 विषण्ण, दीन, अवसन्न, सविषाद, निरानंद, म्लान, खिन्न, उद्विग्न. **-ly** *adv.* निष्प्रभं, सांधकारं. 2 सविषादं, सखेदं, सोद्वेगं. **-ness,** *s.* निष्प्रभत्वं, &c. 2 विषादः, दैन्यं, अवसादः, चित्तोद्वेगः, खेदः, म्लानता, उद्वेगः.

Glory, *s.* कीर्तिः *f.*, यशस् *n.*, ख्याति *f.*, विश्रुति *f.* महिमन् *m.*, प्रतापः, ओजस्विता. **2** श्रीः, तेजस् *n.* शोभा, द्युति *f.*; 'g. of youth' यौवनश्रीः. **3** माहात्म्यं, गौरवं, प्रतिष्ठा, पूजा, मानः. **4** प्रशंसा, स्तुति *f.*, श्लाघा, स्तवः, स्तुतिवाक्यं **5** रत्नं, अवतंसः, तिलकः, ललामं. **6 Absolution,** q. v.; 'vain g' अहंकारः, विकत्थनं-ना, दर्पः, गर्वः, आत्मश्लाघा; 'g. to you, Oh king' जयतु जयतु देवः; 'g. of victory' जयोद्धरणं. **–**v. *i.* अत्यंतं प्रमुद् 1 A or आनंद् 1 P, उल्लस् 1 P; 'you g. in disobeying your father' पितुरवज्ञानं आत्मगौरवं मन्यसे. **2** विकत्थ् 1 A, दृप् 4 P, आत्मानं श्लाघ् 1 A; 'I do g. in that name' तन्नामधारी कृतिनमात्मानं मन्ये खलु. **–Glorify,** *v. t.* उत्-सं-कृत् 10, प्रशंस् 1 P, श्लाघ्, स्तु 2 U; गुणान् वर्ण् 10 or कृत् or प्रकाश् c., कीर्तिं गै 1 P. **2** स्वर्गं आरुह् c., परमपदं प्राप् c. **–ication,** *s.* गुणवर्णनं-ना, प्रशंसा, स्तुतिवादः, गुणकीर्तनं, यशःख्यापनं. **–Glorious,** *a.* यशस्वत्, कीर्तिमत्, महायशस्, प्रथित, विश्रुत, ख्यात, यशस्विन्, उदग्रयशस्. **2** कीर्तिकर-यशस्कर (री *f.*), श्लाघावह, प्रशस्य. **3** तेजस्विन्, महत्, महोज्ज्वल, श्रीमत्, प्रतापवत्, महोदय, अतिशोभन, ओजस्विन्, सुप्रभ, वर्चस्विन्. **4** विशिष्ट, परम, उत्तम, उत्कृष्ट, प्रशस्ततम, श्रेष्ठ. **–ly,** *adv.* सप्रतापं, कीर्तियुक्त, परमं, उत्कृष्टं.

Gloss, *s.* टीका, टिप्पनी, भाष्यं, व्याख्यानं, वृत्ति *f.*, विवरण. **2** बाह्यशोभा-कांति-रुचि *f.*, बाहिराभा, कृत्रिमच्छवि *f.*, कल्पितशोभा. **–**v. *t.* टीकया व्या-ख्या 2 P or वि-वृ 5 U; भाष्यं लिख् 6 P. **2** बाह्यतः शुभ् c.; स्निग्धी-मसृणी-कृ 8 U; बाह्यशोभां दा 3 U or उत्पद् c. **–y,** *a.* स्निग्ध, चिक्कण, श्लक्ष्ण, मसृण. **2** बाह्यप्रभ, बाह्यतः शोभित, आपातरुचिर, बहीरमणीय.

Glossary, *s.* कोशः-षः. शब्दसंग्रहः-कोशः, निघंटुः, अभिधानं, समाम्नायः; पशुसमाम्नायः 'g. of words relating to beasts.' **–ist,** *s.* कोशलेखकः; संकलयितृ *m.*

Glottis, *s.* प्रति-अलि-उप-जिह्वा.

Glove, *s* करच्छदः, हस्तत्राणं-परिधानं, हस्ताच्छादनं.

Glow, *s.* तापः, आतपः, दाहः, उष्मन् *m.*, दीप्ति-द्युति *f*, तेजस् *n.*, उत्तापः. **2** रक्तता, रक्तिमन् *m.*, रागः, अरुणिमन् *m.* **–**v. *i.* दीप् 4 A, प्रकाश् 1 A, ज्वल् 1 P, तप् 1 P, 4 A, दह् pass.; अरुणीभू 1 P, रंज् pass., रक्तीभू; 'g. ing with rage' क्रोधेद्ध, रोषसंतप्त, प्रदीप्तक्रोध; ज्वलन्निव ब्रह्ममयेन तेजसा (K. v. 30) 'as if g. ing with Brahmanic lustre.' **–ing,** *a.* सं-,प्र-, दीप्त, ज्वलित, उत्तप्त, देदीप्यमान, उज्ज्वल, चंड; रक्त अरुण; 'in g. colours' उज्ज्वलरूपेण, हृदयहारितया, हृदयंगम, मनोरम; 'with g. eyes' दीप्ताक्ष *a.* **–ingly,** *adv.* तेजसा, उत्तापेन, चंडं, दीप्त्या. **–worm,** *s.* खद्योतः, ज्योतिरिंगणः, प्रभाकीटः

Glower, *v. t.* सभ्रूभंगं प्रेक्ष् 1 A.

Gloze, *See* **Flatter.**

Glue, *s.* संश्लेषणद्रव्यं, लेपः. **–**v. *t.* सं-धा 3 U, संश्लिष् c., संयुज् 7 U, 10, संलग्नीकृ 8 U. **–y,** *a.* श्यान, सांद्र, चिक्कण.

Glum, *a.* प्रतीप-वाम-वक्र-शील.

Glut, *v. t.* भक्ष् 10, ग्रस् 1 A, निगृ 6 P, अतिमात्रं तृप् c , अत्यंतं पूर् 10, सौहित्यं जन् c. (जनयति). **–**s. अतितृप्ति *f.*, अतिसौहित्यं, निर्वेदः. **2** अतिरेकः, उद्रेकः. अतिबाहुल्यं, प्राचुर्यं.

Glutinate, *v t.* लेपेन संश्लिष् c or संयुज् 7 U, 10

Glutinous, *a.* श्यान, सांद्र, चिक्कण, स्निग्ध, संलग्नशील.

Glutton, *s.* औदरिकः, उदरंभरिः, घस्मरः, आद्यूनः, कुक्षिंभरिः, अत्याहारिन् *m.*: *See* below. **–ous,–ish,** *a.* औदरिक (की *f.*), अत्याहारिन्, बहुभोजिन्, अत्याहारप्रिय, भक्षक, घस्मर, अद्मर, आद्यून, कुक्षिंभरि, उदरंभरि, गृध्नु, लोलुप-भ, अतिलुब्ध, अतृप्त. **–ously,** *adv.* अत्याहारेण, लोलुपतया. **–y,** *s.* अत्याहारः, घस्मरता, गृध्नुता, जिह्वालौल्यं, अतृप्ति *f.*, औदरिकता.

Gnarl, *v. i.* गर्ज् 1 P.

Gnarled, *a.* ग्रंथिल, ग्रंथि-पर्व-विशिष्ट.

Gnash, *v. t.* (The teeth) दंतैर्दंतान् निष्पीड् 10 or विघट्ट् c. or घृष् 1 P, निष्पिष् 7 P, or सं-दंश् 1 P, क्ष्विड् 1 P. **–i**[illegible] दंतनिष्पेषः-घर्षण, क्ष्वेडनं.

Gnat, *s.* मशकः, दंशः, माचिका, वनमक्षिका.

Gnaw, *v t* दंश् 1 P, चर्व् 1 P or c., अल्पशः भक्ष् 10 or खाद् 1 P; चर्वणेन कृत् 6 P **–ing,** *s.* चर्वणं, दंशनं.

Gnome, *s.* सूक्तिः. **2** भूतः, पिशाचः.

Gnomon, *s.* शंकुः; कीलः-लकः.

Go, *v. i.* गम् 1 P, या-इ 2 P, व्रज् 1 P, चल्-चर् 1 P, पद् 4 A, ऋ 1, 3 P; सृ 1, 3 P; क्रम् 1 U, 4 P; (as water) वह् 1 P, स्रु 1 P, स्यंद् 1 A. **2** (Fare) वृत् 1 A, स्था 1 P; 'how g. es it with her' कस्तस्या वृत्तांतः. **3** (As prospective future) ex. by fut. part., मनः or काम with inf. or desid. forms; *See* **About;** 'g. astray' भ्रम् 1, 4 P; उत्पथं या, सन्मार्गात् च्यु 1 A or भ्रंश् 1 A, 4 P; उत्क्रम्, अति-व्यभि-चर्; 'g. on foot' पद्भ्यां व्रज्; 'g. on horse-back' अश्वेन संचर्; 'as the story g. es' किल,

'g. for nothing' (go to dogs) विफलीभू; 'g. to bed' शय्यां भज्-सेव् 1 A; 'she is far gone in love' दूरगतमन्मथा सा (S. 3), अतिभूमिं गतोस्या अनुरागः; 'g.- between' मध्यस्थः, मध्यपुरुषः; (female g.) शंभली, कुट्टनी; सुरतदूती; 'g. by' निर्गमः, पलायनं, व्यपदेशः; 'g.-cart' क्रीडाशकटः. **-about.** परिगम्-इ &c. 2 यत् 1 A, उद्यम् 1 A, व्यव-सो 4 P. आरभ् 1 A, उपक्रम् 1 A. 3 अनुष्ठा, वि- धा 3 U, *See* **Execute. -away,** अप-इ-सृ-क्रम्-गम्-या-सृप्, प्र-इ, स्था 1 A. **-between,** मध्ये स्था or वृत्, अंतः-इ. **-by,** अति-इ, समीपतः गम्. 2 अनुगम्, अनुवृत्, अनुरुध् 4 A, अनु-सृ; 'he g.-es by the name of' इति ख्यातः or ज्ञातः; उमाख्यां सुमुखी जगाम (K. I. 26) 'went by the name of' &c. **-down,** अधो गम्. 2 अस्तं गम्-या; (fig.) नाशं-क्षयं-या; प्र-ली 4 A, ध्वंस् 1 A. **-forth,-forward,** निर्गम्, निःसृ-क्रम्, प्र-सृ, प्र-स्था, प्र-या. **-in,** प्र-आ-विश् 6 P, अंतर्गम्-या. 2 (for) समन् 4 A, उरी-अंगी-कृ 8 U, प्रति-पद् 4 A. **-off,** अपगम् &c. 2 प्र-इ, मृ 6 A; परलोकं या. **-on,** प्र-वृत्, प्रगम्-या-सृप्. 2 प्र-स्तु 2 U, प्रारभ् 1 A; 'g. on with your study' प्रवर्ततां-प्रस्तूयतां-अध्ययनं. **-out,** निर्गम्, निःसृ, &c., बहिर्गम्. 2 (Of light) निर्वा 2 P or c. pass.; शम् 4 P. **-over,** वच् c., अधि-इ 2 A: (to one's self) अनुवच् c. 2 परि-ईक्ष् 1 A. 3 आक्रम्, लंघ् 1 A, 10. 4 अन्यपक्षं सं-आ-श्रि 1 U: स्वपक्षात् भ्रंश् 1 A, 4 P. **-round,** परि-इ गम्; प्रदक्षिणीकृ. **-through,** अनुभू, उपागम्, वि-धा, अनु-ष्ठा, कृ, निर्वह् c.; सेव् 1 A, आचर्. 2 पारं गम्, समाप् c.: अव-सो 4 P. 3 प्र-निर्-विश्, निर्भिद् 7 P; भित्त्वा निर्गम्; व्यध् 4 P. **-to, up to,** उप-सृ-इ-गम्-या, उप-स्था, प्रति-पद् &c. 2 (*Interj.*) धिक्, अपेहि, अपसर. **-up,** उद्-इ, उत्पद्, ऊर्ध्वं गम्. **-er,** *s.* गामिन्-गंतृ *m.*, चरः, यायिन् *m.* in comp. **-ing,** *s.* गमनं, यानं, सरणं, चलनं, व्रजनं, गति *f.*, अयनं, &c.

Goad, *s.* अंकुशः, सृ(शृ)णि *f.* **-***v. t.* अंकुशेन तुद् 6 P or प्रचुद् 10. 2 प्रचुद्, प्रणुद् c., प्रोत्सह् c., प्रेर् c., प्रवृत् c., उद्युज् 10, उत्तिज् c.

Goal, *s.* अंतः, अंतस्थानं, अवधिः, अवसानभूमि *f.*; 'g. of ambition' आशावधिः. 2 आशयः, अभिप्रायः, उद्देशः.

Goat, *s.* अजः, छागः, छगलकः, बस्तः, शुभः; 'she-g.' अजा, छागी; 'g.-herd' अजाजीवः, जाबालः, अजपालः-लकः, छागपोषकः; 'a flock of g.s' आजकं. **-ish,** *a.* अजगंध.

Gobbet, *s.* कवलः, ग्रासः.

Gobble, *v. t.* सत्वरं ग्रस् 1 A or भक्ष् 10.

Goblet, *s.* चषकः-कं, पानपात्रं-भाजनं, कंसः-सं.

Goblin, *s.* भूतः, वेतालः, पिशाचः, राक्षसः, निशाचरः, रात्रि(त्रिं)चरः.

God, *s.* देवः, सुरः, अमरः, निर्जरः, विबुधः, सुपर्वन् *m.*, सुमनस् *m.* त्रिदिवेशः, दिवौकस् *m.*, आदितेयः, दिविषद् *m.*, लेखः, अदितिनंदनः, आदित्यः, ऋभुः, अस्वप्नः, अमर्त्यः, अमृतांधस् *m.* बर्हिर्मुखः, क्रतुभुज् *m.*, गीर्वाणः, दानवारिः, वृंदारकः, दैवतः-तं; 'great g.' परमेश्वरः, परमात्मन्; *m.* 'god-dess' देवी, भगवती, सुरांगना, देवपत्नी; in comp. words ex. by धर्म; 'g.-father' धर्मपितृ *m.*, so धर्ममातृ *f.* धर्मपुत्रः-त्री, धर्मकन्या-सुता, &c **-less,** *a.* निरीश्वर, नास्तिक, अनीश्वरवादिन्. **-lessness,** *s.* मिथ्यादृष्टि *f.*, नास्तिकता. **-like,** *a.* देवतुल्य-रूप, देवोपम, दिव्य. **-ly,** *a.* धार्मिक (की *f.*), धर्मनिष्ठ-परायण, पुण्यशील, पुण्यात्मन्, ईश्वरभक्त-पूजक. **-liness,** *s.* धर्मसेवा, पुण्यशीलता, ईश्वरभक्ति *f.*, श्रद्धा, &c. **-ship,** *s.* देवत्वं, देवभावः. **-Godsend,** *s.* ईश्वरप्रेरित *a.* द्रव्य, ईश्वरप्रसादः, सौभाग्यं, लक्ष्मीदत्तं.

Goggle, *v. i.* नयने विक्षिप् 6 P or लुल् c.; 'g eye' लोलनयनं; 'g.-eyed' लोलनयन, वक्र-तिर्यक्-दृष्टि.

Goitre, *s.* गडुः.

Gold, *s.* सुवर्णं, स्वर्णं, कनकं, कांचनं, हेमन् *n.*, चामीकरं, जातरूपं, हिरण्यं, हाटकं, तपनीयं, शातकुंभं, गांगेयं, भर्मन् *n.*, कर्बुरं, महारजतं, रुक्मं, कार्तस्वरं, जांबूनदं, अष्टापदः-दं; 'g. for ornaments' शृंगिः, शृंगिकनकं; 'g.-beater or drawer' सुवर्णोद्वर्तनकृत् *m.*; 'g.-dust' कांचनभूः, कनकरागः; 'g.-smith' स्वर्ण-सुवर्ण-कारः, कलादः, नाडिंधमः, रुक्मकारकः; 'g.-thread' कनकसूत्रं. **-a., -en,** *a.* हैम (मी *f.*), सौवर्ण (र्णी *f.*), (*s.*) in comp., or by मय (यी *f.*) affixed to (*s.*).

Golf, *s.* कंदुकक्रीडा-लीला.

Gong, *s.* घनं, कांस्यं.

Gonorrhœa, *s.* शुक्रदोषः.

Good, *a.* भद्र, साधु, प्रशस्त, प्रशस्य, शुभ, कल्याण (णी *f.*), सत्, वर, शोभन, गुणवत्, निर्दोष; oft. by सु or सत् in comp. 2 धर्मशील, साधु-आर्य-वृत्त, सदाचार, सच्चरित, सुकृतिन्, पुण्य, पुण्यात्मन्, पुण्यशील, धार्मिक (की *f.*). 3 योग्य, उचित, युक्त, उपयुक्त, हित; gen. ex. by pot. pass. part. 4 सुजन, हितकाम, प्रियकारिन्, उपकारक, हित, प्रियकर. 5 अन्यून, अदूषित, अक्षत, संपूर्ण. 6 बहु, प्रचुर, महत्, अमल्प, भूरि, सु or अति pr.; 'a g. fellow' भद्रः, सौम्यः; 'my g. sir,' भद्र, सौम्य; 'g. quality' गुणः, स-

द्गुण:; 'g. wishes' आशिस् f., आशीर्वादः-वचनं; 'g. and bad' शुभाशुभ; 'so g. as' अनुग्रह-पूर्वकं, कृपया; 'for g.' अत्यंतं, असनिवृत्त्यै; 'a g. deal' भृशं, अतीव, सु or अति pr.; 'g. morning to you' शुभस्ते प्रभातकालः; 'it will be g. for you' तव कल्याणाय भवेत्, कल्याणमावहेत्; 'is g. unto weariness' आयासजनकमेव, श्रममात्रदायकं; g. for nothing' निष्प्रयोग, निर्गुण, निष्फल; 'as g. as' समं. -s. उपकारः, उपकृति f. 2 हितं, भूति f., भद्रं, शुभं, कल्याणं, कुशलं, श्रेयस् n., क्षेमं; oft. by अर्थं; 'for the g. of the people' प्रजार्थं, लोकहिताय, प्रजाभूतये, &c. 3 उपयोगः, लाभः, फलं; oft. ex by किं, अर्थ, अलं, with inst.; 'what is the g. of seeing her' किं तया दृष्टया (S. 2), कोऽर्थस्तस्या दर्शनेन; 'what g. do you get by weeping' अलं परिदेवनेन. 4 सुकृतं, पुण्यं, धर्मः, सुचरितं, साधुवृत्तं, सदाचारः; 'to do g.' उपकृ 8 U; हितं-कल्याणं-कृ; क्षेमं आवह् 1 P; 'g. and evil (bad)' शुभाशुभं, हिताहितं. -*interj.* साधु, सुष्ठु, सम्यक्, बाढं, कामं, भवतु, तथास्तु, तथेति; युज्यते, अनुमतं मम (V. 2). 'G.-breeding' साधुता, सौजन्यं, विनयः, सभ्यता, 'possessed of g.-breeding' सुशील, सुविनीत, सुजन, अभिजात; 'g-conditioned' सुस्थ, सुस्थित; 'g. fortune or luck' *See* **Fortune**; 'g.-humour' सद्भावः, उल्लासः, चित्तप्रसादः, उल्लासवृत्ति f., आनंदः, प्रमोदः; 'g.-nature' सद्भावः, सुस्वभावः, सौजन्यं, सुशीलता; सुप्रकृति f.; 'g.-humoured or g.-natured' हृष्टचित्त, प्रसन्नचित्त, सोल्लस, सानंद, सुस्वभाव, सुशील, सुप्रकृति, सुजन, सद्भाववत्, साधुशील, धर्मात्मन्, पुण्यात्मन्, सुहृदय; 'g.-looking' दर्शनीय, सुरूप, सुदर्शन, सुभग, प्रियदर्शन, प्रेक्षणीय, रम्याकार, सुवदन; 'g.-manners' विनयः, विनीतता, मर्यादा, सुनीति-रीति f.; सभ्यता, शिष्टाचारः, सुशीलता, सौजन्यं, सुसत्-चरित्रं, सदाचारः, साधुवृत्तं; 'g.-sense' विवेकः, ज्ञानं, प्रज्ञता, प्रबुद्धता, प्रबोधः. सौजन्यं, सद्भावः, सुशीलता; 'g.-will' हितेच्छा, हितकाम्या, प्रीति f., प्रियता, अनुकूलता, भक्ति f., अनुरागः. -ly, *a.* चारु, सुंदर (री f.), सुरूप, सुदृश्य, प्रेक्षणीय, लावण्यवत्, रम्य, रमणीय, मनोरम-हर, रुचिर. 2 अनल्प, महत्, प्रचुर, बहु, अल्पेतर. -ness, *s.* साधुता, प्रशस्तता, गुणवत्ता, श्रेष्ठता, विशिष्टता. 2 साधुशीलता, सदाचारता, धार्मिकत्वं. 3 सुशीलता, दया, कृपालुत्वं, सद्भावः, सौजन्यं, सुजनता; 'tendency to g.' सत्त्वगुणः.

Goods, *s.* द्रव्यं, द्रव्यराशिः, विभवः, सामग्री, वस्तुजातं, द्रव्याणि-वस्तूनि (pl.). 2 भांडकं, भांडसमुदायः, पण्यं, भांडानि (pl.); 'household g.' गृहोपस्करः, गृहोपकरणानि.

Goose, *s.* हंसः (सी f.), चक्रांगः (गी f.), वरटः-टा; कलहंसः (सी f.); *See* **Gander;** 'ruddy g.' चक्रवाकः (की f.), चक्रः रथांगः, कोकः, द्वंद्वचरः. 2 **Fool,** q. v.

Gorbellied, *a.* महोदर, बृहत्कुक्षि, तुंदिल, स्थूलोदर; *See* **Corpulent.**

Gore, *s.* रक्तं, शोणितं, रुधिरं, असृज् n., लोहितं. 2 रक्तगुल्मः, रक्तपिंडः. 3 संचितरक्तखंडः. -v. t. व्यध् 4 P, निर्भिद् 7 P, छिद् 7 P, वि-दृ 10, क्षण् 5 P, उल्लिख् 6 P.-ed, *a.* छिन्नत्वच्, क्षतचर्मन्. -y, *a.* रक्ताक्त, असृग्दिग्ध. 2 रुधिरप्रिय, मारात्मक.

Gorge, *s.* कंठः, गलः. 2 रंध्रं, दुर्गमार्गः, संकटसंबाध-पथः, संचारः, संकटं, गिरिकंदरः.-v. t. उद्-ग्रस् 1 A, गॄ 6 P. 2 (One's self) कुक्षिं पूर् 10, अत्यंतं तृप् c., अन्नादिना परिपॄ 3 P.

Gorgeous, *a.* शोभन, उज्ज्वल, अतिशोभन, विभ्राजमान, तेजस्विन्, सुप्रभ, एकांतरमणीयचारु, महाप्रभ-दीप्ति, विचित्र. -ly, *adv.* अतितेजसा, उज्ज्वलं. -ness, *s.* औज्ज्वल्यं, अति-प्रभा-तेजस् n., सुप्रभा.

Gorget, *s.* ग्रीवा-गल-त्राणं.

Gormand, *See* **Glutton.** -ize, *v. i.* अत्याहारं or अतिभोजनं कृ 8 U. -izer, *s.* *See* **Glutton.**

Gosling, *s.* हंसशिशुः-शावकः.

Gospel, *s.* सुवार्ता, शुभवार्ता.

Gossamer, *s.* ऊर्णनाभजालतंतु m.

Gossip, *s.* वावदूकः, प्रलापिन् m., जल्पकः. 2 पानमित्रं, सहपायिन् m. 3 वार्ता, जनप्रवादः, जल्पः, जल्पितं, प्रलापः, प्रजल्पः, वृथाकथासंलापः. -v. i. प्रजल्प् 1 P, प्रलप् 1 P.

Gouge, *v. t.* (नयनं) उत्पट् 10, उद्धृ 1 P.

Gourd, *s.* अ(आ)लाबु-बू f., तुंबि-बी f., लाबु-बू f., तुंबा. 2 (Vessel of g.) कमंडलुः; 'bitter g.' इक्ष्वाकु f., कटुतुंबी.

Gourmand, *See* **Gormand.**

Gourmet. *s.* आस्वादपरायणः.

Gout, *s.* वातरक्तं, वातशोणितं. -y, *a.* वातग्रस्त, वातरोगोपहत, वातरोगिन्, वातकिन्.

Govern, *v. t.* प्र-शास् 2 P, परि-पा c. (पालयति), ईश् 2 A (with gen.); गुप् 1 P, तंत्र् 10 A, नियम् 1 P; *See* **Rule. 2** वि-धा 3 U, वि-नी 1 P, निग्रह् 9 P, सं-नि-यम्, आ-वृ 5 U, वशीकृ 8 U, दम् c. (दमयति), सं-वृ 1 P, नि-यंत्र् 10; *See* **Control. 3** (In grammar) अनु-वृ 2 P, वि-धा; 'g.-ed by another' परायत्त, पराधीन, परतंत्र, विधेय. -ment, *s.* नियमनं, सं-नि-यमः, निग्रहः. 2 शासनं, परिपालनं, 'during the g. of Rama' रामे महीं शासति. 3 प्रभुत्वं,

ईशत्वं, ऐश्वर्यं, आधिपत्यं, स्वामित्वं. 4 राज्यं. 5 (Rulers) राजन् *m*., प्रभुः, ईशः, राजमंत्रिगणः-सचिवाः; 'g. affairs' राज्यकार्याणि; 'form of g.' राज्यरीति-पद्धति *f*. **-or**, *s*. शासितृ *m*., शासकः, ईशः, अधिपतिः, अधिष्ठातृ *m*., अधिपः, अधिकृतः. 2 (Of a province) भोगपतिः. **-orship**, *s*. आधिपत्यं, प्रभुत्वं.

Gown, *s*. शाटः-टी, शाटकः, कटिवस्त्रं; 'girl's g.' अर्धोरुकं, चंडातकः-कं

Grab, *s*. ग्रहः,धरणं, संग्रहः. -*v*. *See*. **Snatch.**

Grabble, *v*. स्पृश्-परामृश् 6 P. 2 भूमौ देहं क्षिप् 6 P.

Grace, *s*. प्रसादः, अनुग्रहः, दया, कृपा, अनुकंपा, आनुकूल्यं. 2 सौंदर्यं, श्रीः, चारुता, शोभा, लावण्यं; *See* **Beauty.** 3 गुणः, भूषणं. 4 क्षमा, पापमार्जनं-निष्कृति *f*. 5 (As a title) देवः-वी, अत्र-तत्र-भवान्-भवती. -*v*. *t*. अलंकृ 8 U, शुभ् c., भूष् 10, उद्-द्युत् c. (जाते पुनरप्युद्द्योतयोत्संगं U. 4); संमन् c. सं-भू c.; 'g. the ceremony with your presence' संनिधानेन इमं विधिं संमानयतु-अलंकरोतु-भवान्. **-ful**, *a*. ललित, चारु, सुंदर (री *f*.), सुभग, लावण्यवत्, मुग्ध, सविलास; 'g. movement' मुग्धचेष्टा, विलासः, विभ्रमः, ललितं, हेला, लीला, हावः, बिब्बोकः, शृंगारचेष्टा-क्रिया; 'g. speech' वाग्विलासः; 'g. gait' खेलगति *f*., विलासगतं. **-fully**, *adv*. सविलासं, ललितं, सुंदरं, चारुतया. **-fulness**, *s*. लावण्यं, श्रीः, शोभा, लालित्यं, मुग्धता; *See* **Beauty. -less**, *a* रूपहीन. 2 निर्लज्ज, दुराचार, दुर्वृत्त, अतिदुष्ट, दुष्टभाव. **-Gracious**, *a*. प्रसन्न, सदय, दयाशील. अनुकूल, अनुकंपिन्, दयालु, अनुकंपाशील, अनुग्राहिन्, कृपालु, सानुक्रोश, हितबुद्धि, सानुकंप; 'to be g.' प्रसद् 1 P, अनु-कंप् 1 A. **-ly**, *adv*. सानुग्रहं, सदयं, सानुकंपं, दयया, कृपया, प्रसन्नतया, सप्रसादं. **-ness**, *s*. प्रसादः, अनुकंपा, दयालुत्वं, अनुग्रहः, दया, कृपा &c.

Gradation, *s*. क्रमः, आनुपूर्व्यं, पर्यायः, अनुक्रमः, परंपरा, समन्वयः, परिपाटि-टी *f*., 'in regular g.' यथाक्रमं, क्रमशः, अनुपूर्वशः, पर्यायेण.

Grade, *s*. श्रेणि-णी *f*, प्रकारः, वर्गः, परिपाटि-टी *f*., क्रमः, परंपरा, आनुपूर्व्यं. 2 पदं, अवस्था, आस्पदं, पदवि-वी *f*., कोटि *f*., काष्ठा (highest g.). **-Gradual**, *a*. क्रमिक, आनुक्रमिक, अनुपूर्व, उत्तरोत्तर; better ex. by 'g. ly.' **-ly**. *adv*. क्रमशः, शनैः शनैः, क्रमतः, क्रमेण, यथाक्रमं, अनुक्रमं, अल्पाल्पशः, उत्तरोत्तरं, प्रति-अनु-पदं, पदे पदे, अनुपूर्वशः, आनुपूर्व्येण. **-Graduate**, *v*. *t*. क्रमचिह्नैः अंकृ 10. 2 उपपदं प्राप् 5 P. -*s*. उपपद-उपाधि-पद-युक्तः. **-ion**, *s*. क्रमाचिह्नांकनं. 2 **Gradation**, q. v.

Graft, *v*. *t*. (fig.) निविश् c., नि-धा 3 U.

Grain, *s*. धान्यं, शस्यं, व्रीहिः, स्तंबकरिः, बीजरुहः, जीवसाधनं. 2 बीजं. 3 कणः-णिका, लवः, लेशः, अणुः. 4 काष्ठरेखा-शिरा, 'fried g.' लाजाः, भ्रष्टयवाः; पृथुकः, चिपिटकः; 'against the g.' प्रतिलोमं, विरुद्धं, विप्रतीपं, निरुत्साहं, कथमपि; 'with the g.' अनुलोमं; 'chaffless g.' धान्यास्थि *n*. **-y**, *a*. धान्य-शस्य-मय (यी *f*.).

Gram, *s*. चणकः.

Gramarie (y) (ye), *s*. माया, इंद्रजालं.

Gramineous, *a*. तृणमय (यी *f*.), शाद्वल.

Graminivorous, *a*. तृण-शष्प-भोजिन्, तृणभुज्.

Grammar, *s* व्याकरणं, व्याकरणशास्त्रं-विद्या, शब्दशास्त्रं. **-ian**, *s*. वैयाकरणः, व्याकरणज्ञः, शब्दशास्त्रविद् *m*. **-Grammatical**, *a*. व्याकरणविषय, व्याकरणानुसारिन्, gen. (*s*.) in comp.

Granary, *s*. कुशूलः, धान्यकोष्ठः; धान्यागारं, कैडोलः, पिटः.

Grand, *a*. महत्, बृहत्, गुरु. 2 उत्तम, प्रधान, मुख्य, अग्र, अग्र्य, विशिष्ट. 3 सुप्रभ, भव्य, प्रतापवत्, तेजस्विन्, उज्ज्वल; 'g.-child' पौत्रः-त्री; 'g-daughter' पौत्री, पुत्रसुता, दौहित्री; 'great g.-daughter' प्रपौत्री; 'g.father' पितामहः, मातामहः (maternal); 'great g.-father' प्रपितामहः, प्रमातामहः; 'g.-mother,' पितामही, मातामही; वृद्धा, स्थविरा; 'g-nephew' भ्रातृपौत्रः, स्वसृपौत्रः (त्री *f*.); 'g.-son' पौत्रः, पुत्रसुतः, नप्तृ *m*., दौहित्रः, पुत्रिकासुतः; 'great g.-son' प्रपौत्रः, &c.; 'great great g-son' परप्रपौत्रः. **-ly**, *adv*. वैभवेन, तेजसा; ऐश्वर्येण, महाप्रतापेन. उज्ज्वलं, सुप्रभं, उत्कृष्टं, परमं, श्रेष्ठतया **-ness,-Grandeur,** *s*. महत्त्वं, महिमन् *m* 2 माहात्म्यं, औदार्यं, उत्कर्षः; श्रेष्ठता, प्राधान्यं. 3 वैभवं, तेजस् *n*., विभूति *f*., प्रतापः, शोभा, उज्ज्वलता, प्रभावः, ऐश्वर्यं, संपद् *f* **-Grandee,** *s*. कुलीनः, कुलीनजनः, आभिजनः, महाजनः.

Grandiloquent, *a*. गर्वितवाच्, सदर्पवादिन्. **-Grandiloquence,** *s*. अतिशयोक्ति *f*., दर्पवाक्यं, सालंकारं वचनं, दर्पाध्मातं वचनं.

Grange, *s*. क्षेत्रं क्षेत्रभूमि *f*.

Granivorous, *a*. शस्याद, शस्यभक्षक.

Grant, *v*. *t*. दिश् 1 P, दा 3 U, 1 P, प्रतिपद् c.; *See* **Give. 2** अनुमन् 4 A, अनु-ज्ञा 9 U, अनु-मुद् 1 A. 3 ग्रह् 9 U, अंगीकृ 8 U, उरीकृ, स्वीकृ, प्रतिपद् 4 A, अभ्युपगम् 1 P, अभ्युप-इ 2 P, 'I g.,' 'g. ed' gen. ex. by कामं followed by तु, तथापि or पुनः; or by imp.; 'well it is g. ed' भवतु,

Heat, *v. t.* तप् c., परि-प्र-सं°; उद्-,दीप् c., ज्वल् c., संधुक्ष् 10; वृह् 1 P. **-s.** तापः, संउत्-परि-तापः, दाहः; उष्णता, उष्मः, तिग्मता, प्रखरत्वं, ऊ-उष्मन् *m.*, चंडता. 2 आतपः, घर्मः, निदाघः; 'affected by h.' उष्णालु; 'expose to the sun's h.' सूर्यातपे दा 3 U. 3 (Summer) ग्रीष्मः, निदाघः, घर्मकालः, उष्णकालः, निदाघसमयः. 4 उत्तापः, संक्षोभः, चंडता, तीक्ष्णता, तीव्रता, उग्रता, व्यग्रता. 5 संरंभः, मदः, क्रोधः, उद्दीपनं, संधुक्षणं; आवेशः, आक्रमः; 'in the h. of excitement' रोषावेशेन. 6 कपोलरागः; 'h. of youth' यौवनगर्वः-दर्पः, यौवनोन्मादः. तारुण्यमदः. **-ing,** *s.* तापनं, दीपनं. **-a.** तापक, दीपन.

Heath, *s.* जंगलभूमि *f.* वनभूमिः. 2 प्रचारः.

Heathen, *s.* मूर्ति-प्रतिमा-पूजकः-उपासकः-अर्चकः. **-a.**, **-ish,** *a.* प्रतिमापूजकानुरूप. 2 **Barbarous,** q. v. **-ism,** *s.* मूर्तिपूजा-अर्चनं-उपासना.

Heave, *v. t.* उन्नम् c. (नमयति), उन्नी 1 P उच्छ्रि 1 U, उद्-हृ-धृ 1 P, उद्यम् 1 A, उत्था c. (उत्थापयति), उत्क्षिप् 6 P, उत्तुल् 10 'h. a sigh' निश्वस् 2 P, दीर्घं निश्वस्; 'h.ing deeply' दीर्घ-स्थूलस्थूलं-निश्वस्य. **-v. i.** स्पंद् 1 A, स्फुर् 6 P, कंप् 1 A वेप् 1 A. 2 निश्वस्, कृच्छ्रेण उच्छ्वस्. 3 उत्सृ 1 P, प्र-लुठ् 6 P, 1 A, लुल् 1 P, तरंगायते (D.), उन्नम् 1 P. **-s.** उन्नमनं, उत्क्षेपः, उत्तोलनं, उद्धरणं. **-ing,** *s.* स्पंदनं, स्फुरणं कंपनं, वेपथुः. 2 निश्वासः, कृच्छ्रेण उच्छ्वासः दीर्घनिश्वासः. 3 उत्सर्पणं, प्रलोठनं, लोलनं उन्नमनं. **-a.** स्पंदमान, उत्सर्पिन्, लोल.

Heaven, *s.* दिव् *f.*, द्यो *f.*, स्वर्गः, त्रिदिवः-वं सुरलोकः, त्रिदशालयः, त्रिविष्टपं, नाकः, स्वर् *ind.*; 'h. of Vishnu' वैकुंठं; 'this is a h. on earth' भूस्वर्गायमाणमेतत्स्थलं, स्थानांतरगतः स्वर्गः (V. 2). 2 आकाशः-शं, नभस् *n.*, गगनं-णं; *See* **Sky.** 3 **God,** q. v.; परमेश्वरः, विधिः, ईश्वरः; 'h. and earth' द्यावापृथिव्यौ, द्यावाभूमी, रोदसी-स्यौ, द्यावाक्षमे; 'h.-born' दिविज, स्वर्गीय, स्वर्गोत्पन्न. **-ly,** *a.* दिव्य, स्वर्गीय, अपार्थिव (वी *f.*), स्वर्ग्य, त्रिदिवस्थ, दिविष्ठ, 'h. body' नक्षत्रं; 'h. voice' आकाशवाणी, अशरीरिणी वाक्; 'h. nymph' सुरांगना, स्वर्योषित्, दिव्यांगना. 2 परम, उत्तम. **-wards,** *adv.* स्वर्गाभिमुखं, अभिगगनं.

Heavy, *a.* गुरु, भारवत्. 2 गाढ, दीर्घ, गुरु, तीक्ष्ण, महत् तीव्र, अत्यंत, उग्र, दारुण, उच्चंड, महा-सु-अति- in comp.; 'h. shower' महासारः, अतिवृष्टि *f.* 3 आकुल, क्षुब्ध; 'h. sea' सागरक्षोभः, क्षुब्धसागरः, ऊर्मिमालाकुलः सागरः. 4 अवसन्न, खिन्न, दीन, चिंताकुल, विषण्ण. 5 मंद, स्थूल, जड, मंथर, अलस, मंदधी-मति, जड-स्थूल-बुद्धि-धी; 'h.-headed' मंद-स्थूल-धी; 'h.-laden' गुरुभाराक्रांत, सुभारवत्. **-ly,** *adv.* गुरुभारेण, गुरुतया. 2 भृशं, तीव्रं, बलवत्, अत्यंतं, सु-अति pr.; *See* **Exceedingly.** 3 सविषादं, मंदं, शनैःशनैः. **-ness,** *s.* गुरुता, गुरुत्वं, भारः, गरिमन् *m.*, विषादः, दैन्यं, मांद्यं, स्थूलता, &c.

Hebetate, *v. t.* *See* **Blunt, Dull.**

Hecatomb, *s.* शतबलिदानं.

Hectic, *a.* संतत, अविरत. 2 ज्वरसूचक, अंतर्दाहसूचक.

Hector, *s.* विकत्थिन् *m.*, आत्मश्लाघिन् *m.*, पिंडीशूरः, शूरंमन्यः. 2 कलहकारः, भर्त्सकः. **-v. i.** विकत्थ् 1 A, प्रगल्भ् 1 A; *See* **Boast.** 2 तर्ज्-भर्त्स् 10 A.

Hedge, *s.* वृति *f.*, प्राचीरं, प्राकारः, आवरणं, वेष्टनं, आवारः, क्षेत्रावरोधकं, क्षेत्रवेष्टनं; 'h.-born' अंत्यज, हीन-जाति-वर्ण, अधम-नीच-जातीय; 'h.-hog' शल्यः, शल्यकंठः; 'h.-

sparrow ' कलविंकः, चटकः. -v. t. वृत्या परिवेष्ट् c. or आवृ 5 U or अवरुध् 7 U.

Hedonic, a. सुखपर-विषयक.

Heed, v. t. आदृ 6 A, अवेक्ष् 1 A, गण् 10, मन् c., अभिनंद् 1 P; सेव् 1 A. **2** अव-धा 3 U, मनो दा 3 U, सावधान a. भू, श्रु 5 P; *See* **Hear.** -s. अवधानं, अवेक्षा, सावधानता, मनोयोगः; 'take h.' सावधानो भव. **-ful, -less,** a. *See* **Careful,-less.**

Heel, s. पार्ष्णि m. f., पादतलं-मूलं; 'to be at one's h.s' पार्ष्णिं ग्रह् 9 U, अनुसृ, पदं अनु-गम् 1 P; 'I shall be close upon your h. s' अहमनुपदमागत एव (S. 3) 'to take to or show h. s' पलाय् 1 A, अपक्रम् 1 U, 4 P; 'betake to h. s' जंघाबलमव-लंब् 1 A; 'h. s over head' अवाक्-शिरस् a., ऊर्ध्वपाद् a. -v. i. एकपार्श्वे पत् 1 P or परिवृत् 1 A or प्र-लंब् 1 A.

Heft, s. उद्योगः, यत्नः, उत्साहः. **2** मुष्टि m. f., स्तवः.

Hegemony, s. नायकत्वं, आधिपत्यं.

Heifer, s. वत्सतरी, वत्सा; 'h. one year old' एकहायनी; so द्विहायनी, त्रिहायणी.

Heigh-ho, *interj.* हंहो, अहो, भो भोः, रे रे.

Height, *See* under **High.**

Heinous, a. घोर, दारुण, अतिनिंद्य, गर्ह्यतम, अतिदुष्ट, महत्, अतिपापिन्, अतिघोर, पापिष्ठ. **-ly,** *adv.* घोरं, दारुणं. **-ness,** s. घोरता, दारुणत्वं.

Heir, s. दायादः, रिक्थहरः, अंशहरः-हारिन् m., रिक्थभागिन् m., रिक्थिन् m., धनाधिकारिन् m., उत्तराधिकारिन् m., अंशभाक्, अंशिन् m.; 'sole h.' समग्रधनभाक्; 'h.-apparent' युवराजः; 'h.-loom' क्रमायातं जंगमद्रव्यं. **-ess,** s. धनाधिकारिणी, &c. **-less,** a. दायादशून्य-हीन. **-ship,** s. धनाधिकारित्वं.

Heliolatry, s. सूर्योपासना.

Heliotrope, s. सूर्यकमलं, श्रीहस्तिनी.

Hell, s. नरकः, निरयः, नारकः, दुर्गति f. **2** पातालं, रसातलं, अधोलोकः, अधोभुवनं; 'h.-tortures' कारणा, यातना, तीव्रवेदना; 'river of h.' वैतरणी. **-ish,** a. नारक (की f.), नरकीय, नारकीय (यी f.), नरक-स्थ. **2 Cruel,** q. v. **3** अतिनिंद्य, दुष्टतम.

Helm, s. कर्णः, कर्णिपातः-तकः, अरित्रं **2 Helmet,** q. v., 'placed at the h. of (royal) affairs' राज्यधुरायां स्थापित. **-Helmsman,** s. कर्णधारः, नाविकः.

Helmet, s. शिरस्त्रं, शिरस्कं, शिरोभूषणं, शिर-स्त्राणं, शीर्षकं पर्यं.

Help, s. साहाय्यं, उपकारः, उपकृतं-कृति f., साहित्यं, अनुग्रहः, आनुकूल्यं. **2** गति f., आ-श्रयः, शरणं; 'help! help!' परित्रायध्वं, परित्रायध्वं. -v. t. साहाय्यं कृ 8 U, सहायः भू, अनुग्रह् 9 P, उपकृ (gen.); न हि दीपौ परस्परस्योपकुरुतः (S. B. 420); तान्य-पि तत्त्वज्ञानायोपकुर्वंति (S. B. 447) 'h. a right understanding'. **2** संवृध् c., प्रवृत् c., पुरस्कृ, उपबृंह् 10; 'h. ed him on his legs' उत्थातुं तस्य साहाय्यं चकार; 'God h. s those who h. themselves' दैवमुप-मायत्तं, विना पुरुषकारेण दैवं न सिध्यति; दैवं पुरुषकारेण साध्यसिद्धिनिबंधनं; न स्वयं दैवमादत्ते पुरुषार्थमपेक्षते (S. R. 104); 'can't h.' का गतिः, किमन्यच्छरणं; 'to h. himself to a mouthful' ग्रासग्रहणेन आत्मानं तर्पयितुं; 'a h. ing hand' ह-स्तावलंबः-बनं; दैवेनेत्थं दत्तहस्तावलंबे प्रारंभे (Rat. 1); 'he could not h. laughing' हासं निग्रहीतुं न शशाक; 'I cannot h. going' मयावश्यं गंतव्यं; 'to h. at table' परिविष् 10. **-er,** s. उपकारकः, उपकर्तृ m., सहायः. **-ful,** a. उपयोगिन्, सहाय, उप-कारक, साहाय्यकारिन्. **-less,** a. अनाथ, निराश्रय, अप्रतिक, अशरण, गतिहीन, निरव-लंब, असहाय. **2** अप्रतिकार्य, अपरिहार्य, अप्र-तिविधेय, निरुपाय; 'we are simply h. in that matter' तस्मिन्विषये अस्माक-मन्या गतिरेव नास्ति. **-Helpmate,** s. सह-धर्मिणी. **2** सहायः, सहकारिन् m.

Helve, s. दंडः, मुष्टि m. f.

Hem, s. अंचलः, वसनप्रांतः, वस्त्रयः-दशाः (pl.). **2** उत्कासनं. -v. t. अंचलं सिव् 4 P. **2** (in) परिवेष्ट् 1 A or c., परि-वृ 5 U or c., निरुध् 7 U.

Hemicrania, s. अर्धावभेदकः.

Hemicycle, s. गोलार्धं.

Hemiplegy, s. पक्षाघातः, पक्षवायुः.

Hemisphere, s. गोलार्धं, अर्धगोलः.

Hemistich, s. श्लोकार्धं, अर्धश्लोकः.

Hemorrhage, s. रक्त-रुधिर-स्रावः, रक्तक्षरणं.

Hemorrhoids, s. अर्शस् n., गुदकीलः.

Hemp, s. शाणं, भंगा, मातुलानी. **-en,** a. शाण (णी f.), शाण in comp.

Hen, s. कुक्कुटी; 'h.-hearted' भीरु, भीरु-हृदय, कातर, कापुरुष; 'h.-house' कुक्कुटपालिका; 'h.-pecked' स्त्रीवश, स्त्री-विधेय, स्त्रीजित, स्त्रीवश्य, स्त्रीवशवर्तिन्, भा-र्याटिक; 'h.-roost' कुक्कुटालयः.

Hence, *adv.* इतः, अस्मात् स्थानात्. **2** अतः, एतस्मात् कारणात्, तस्मात्; अत एव. **3** (From h.) अतः परं, अतः or इतः-परं or ऊर्ध्वं; अद्य-प्रभृति; 'hence!' अपेहि, अपयाहि, अपसर; 'h.-forth,-forward' अतः or इतः-परं or ऊर्ध्वं; अद्यप्रभृति, अद्यारभ्य, अद्यावधि.

Hepatic, a. यकृत्संबंधिन्.

Heptagon, s. सप्तभुजा-सप्तकोणा-आकृतिः.

Herald, s. घोषकः, बंदिन् m., राजदूतः. **2** (fig.) अग्रदूतः, प्रथमवार्ताहरः, अग्रेसरः. **-Heraldry,** s. वंशावलीज्ञानं.

Herb, *s.* ओषधि-धी *f.*, शाकः, शाकलता, हरितकं. **-Herbage,** *s.* तृणं, शस्यं, घासः, यवसं. **-Herbal,** *s.* वृक्षायुर्वेदः.

Herculean, *a.* भगीरथ in comp.; 'h. efforts' भगीरथप्रयत्नाः. 2 अतिप्रबल, अतिशक्तिमत्.

Herd, *s.* यूथं, गणः, संघः, वृंदं, कदंबः, कुलं, समूहः, व्रजः, निवहः; 'h. of cattle' गोकुलं, पाशवं, गोवृंदं, गोत्रा; 'h. of oxen' औक्षकं; 'h. of calves' वात्सकं; 'h. of elephants' हास्तिकं. **-v. i.** यूथेन चर् 1 P, यूथशः संमिल् 6 P or संगम् 1 A, एकीभू, एकत्र भू or मिल्. **-Herdsman,** *s.* गोरक्षकः, गोपालः, गोपः, गोधुक्, आभीरः, गोसंख्यः, पशुपः.

Here, *adv.* अत्र, इह (gen. in this world). 2 इह लोके; ex. by demon. pron.; 'h. comes your mother' एषागच्छति ते माता; 'h. am I' अयमस्मि. **-Interj.** भो भोः; 'h. and there' इतस्ततः; अंतरांतरा, असमग्रं, असंपूर्णं; 'h. about' इतो नातिदूरे, इह समीपे; 'h.-after' इतः परं-ऊर्ध्वं, अतः, परतः, परस्तात्, अनंतरं, पश्चात्, उत्तरतः, उत्तरत्र, अग्रे, उपरिष्टात्, अतः परं; (in the next world) परत्र, अमुत्र, परलोके; (*s.*) उत्तरकालः, पर-भावि-आगामि-कालः; 'h.-at' अत्रांतरे, अथ; 'h.-by' अनेन, तस्मात्, 'h.-in' अत्र, अत्र-स्थाने-विषये; 'h.-before' इतः पूर्वं, पूर्वकाले, पुरा, प्राक्, अतीत-गत-काले; 'h.-upon' ततः, अनंतरं, तदुपरि, तच्छ्रुत्वा.

Hereditary, *a.* पितृपैतामह (ही *f.*), पित्र्य, पैतृक (की *f.*), परंपरीण-य, परंपरागत, परंपराप्राप्त, क्रमायात, क्रमागत, कुलक्रमागत, अन्वयागत; 'h. disease' संचारि रोगः; 'h. servant' मूलभृत्यः, मौलः; 'h. succession' क्रमागतत्वं. **-ly,** *adv.* कुलक्रमेण, वंशक्रमेण, परंपरया, पारंपर्येण.

Hereditament, *s.* दायः, रिक्थाधिकारः.

Heredity, *s.* पैतृक *a.* गुणः.

Heresy, *s.* पाषंडमार्गः, नास्तिकता, मिथ्यादृष्टि *f.*, विधर्मः, विधर्मसेवा, परधर्माश्रयः, अपथं, मिथ्यामतं. **-Heretic,** *s.* पाषं(खं)डः, नास्तिकः, विधर्मसेविन् *m.*, परधर्मावलंबिन् *m.*, वेदनिंदकः, उपधर्मसेविन् *m.*, स्वधर्मभ्रष्टः-च्युतः, पतितः. **-al,** *a.* धर्मविरुद्ध, विपथ-विधर्मगामिन्. **-ally,** *adv.* पाषंडवत्, नास्तिकवत्.

Heritable, *a.* पितृप्राप्य, दायप्राप्य.

Heritage, *s.* दायः, पैतृकं धनं, रिक्थं, पैतृकद्रव्याधिकारः.

Hermaphrodite, *s.* स्त्रीपुरुषलक्षणान्वितः.

Hermetic,-al, *a.* रसायनीय, रसायनज. 2 सुदृढ. **-ly,** *adv.* सुदृढं, गाढं.

Hermit, *s.* यतिः, तापसः, तपस्विन् *m.*, मुनिः, आरण्यकः, वन-अरण्य-वासिन् *m.*, वानप्रस्थः, वैखानसः. **-age,** *s.* आश्रमः, उटजः-जं, पर्णशाला.

Hernia, *s.* अंत्रवृद्धि *f.*; अंत्रभ्रंशः.

Hero, *s.* वीरः, शूरः, भटः, विक्रांतपुरुषः, प्र-महा-वीरः, जेतृ *m.*, रथिन् *m.*, अतिरथः, शौंडीरः. 2 (In dramas &c.) नायकः, कथापुरुषः; 'h. es of Râmâyana' रामायणकथापुरुषाः or-नायकाः. **-ic,-ical,** *a.* वीर, शूर, प्रवीर, विक्रांत, वीर्यवत्, अमितौजस्, महावीर्य; 'a h. deed' पराक्रमः, विक्रमः, अवदातं कर्म. 2 वीरचरित्रविषयक, वीररसप्रधान. **-ically,** *adv.* सविक्रमं, सवीर्यं, शूरवत्. **-ism,** *s.* वीर्यं, शूरत्वं, शौर्यं, परा-वि-क्रमः, धामन् *n.*, ओजस् *n.*, रणोत्साहः, पौरुषं, साहस, वीर्यवत्त्वं, शौटीर्यं. **-Heroine,** *s.* नायिका.

Heron, *s.* बकः, सारसः, लोहपृष्ठः, क्रौंचः.

Herpes, *s.* See **Itch.**

Hesitate, *v. i.* वि-आ-शंक् 1 A, दोलायते (D.), विचर् c., विकल्प् 1 A or c., विलंब् 1 A, चिर(रा)यति-आंदोलयति (D.); See **Doubt** also. 2 **Falter,** q. v. **-ingly,** *adv.* संशय्य, सविकल्पं, ससंशयं, साशंकं. 2 स्खलनपूर्वकं. **-ion,** *s.* शंका, संशयः, विकल्पः, आ-वि-परि-शंका, विचारः, संदेहः, वितर्कः, द्वापरः, अनिर्णयः, विचिकित्सा. 2 (In speaking) स्खलनं, स्वरभेदः-भंगः, स्खलद्वचनं, गद्गदवाच् *f.*

Hesperian, *a.* See **Western.**

Hest, *s.* See **Command.**

Heteroclite, *a.* विधिविरुद्ध, निपातित.

Heterodox, *a.* भिन्न-मत-धर्मन्, धर्मविरुद्ध, विपरीत, विधर्मिन्, वैधर्मिक (की *f.*), अपथवर्तिन्-गामिन्. **-y,** *s.* विधर्मः, भिन्नमतं-धर्मः,

Heterogeneous, *a.* भिन्न, विजातीय, पृथग्विध, भिन्नजातीय, विरुद्ध; See **Different.**

Hew, *v. t.* छिद् 7 P, कृत् 6 P, लू 9 U, See **Cut.** **-er,** *s.* छेदकः, छेदिन् *m.*, छिद् in comp. **-Hewn,** *a.* छिन्न, दात, वृक्ण, लून कृत्त, दित, छात.

Hexagon, *s.* षट्कोणः, षडस्रः.

Hexametre, *s.* षट्पदी-चरणः.

Hexapod, *s.* षट्पदः.

Hey, *interj.* अहो, ननु, हाहा.

Heyday, *interj.* नमः, स्वस्ति (with dat.); अहो, भोः, **-s.** उल्लासः, प्रमोदः, हर्षः, मुदा, परिहासः; 'h. of youth' नव-प्रथम-यौवनं.

Hiatus, *s.* भंगः, भेदः, छेदः, विच्छेदः.

Hibernal, *a.* हेमंत (ती *f.*), हैमंतिक (की *f.*). **-Hibernate,** *v. i.* शीतकालं or हेमंतं नी 1 P.

Hiccough, Hiccup, *s.* हिक्का, हिध्मा. **-v. i.** हिक्क् 1 U.

Hide, *s.* चर्मन् *n.*, अजिनं, दृतिः, कृत्ति *f.*, पशु-चर्मन् *n.*-त्वच् *f.*; 'h.-bound' दृढमुष्टि, कृपण; अवश्य, अविनय, कठोर, कठिन. –*v. t.* प्रच्छद् 10, गुह् 1 U, गुप् 1 P, अंतर्धा 3 U, तिरोधा, स्थग् 10, अपह्नु c.: *See* **Conceal.** –*v. i.* गुह्-गुप् pass., गुप्त-निलीन-*a.* भू 1 P, नि-ली 4 A, तिरोभू, तिरोधा pass.: 'h. s behind the bushes' विटपांतरितस्तिष्ठति-भवति. **–Hid,–Hidden,** *a.* गूढ, गुप्त, प्रच्छन्न, छादित, अंतर्हित, तिरोहित, अंतरित, अपवारित, निभृत, स्थगित, लीन, निलीन. **–ing,** *s.* गोपनं, गुप्ति *f.*, प्रच्छादनं, स्थगनं, तिरोधानं; 'h.-place' निभृत-गूढ-स्थानं, गुप्तिः, निभृतं.

Hideous, *a.* बीभत्स, विकृत, घोर, भीषण, कराल, उग्रदर्शन, कराल-मुख-वदन, कदाकार, भीम-घोर-दर्शन-आकृति, उग्र-घोर-रूप, दुर्दर्शन; 'Oh ! this is indeed a h. spectacle' हंत बीभत्समेवाग्रतो वर्तते (Mal. 5). **–ly,** *adv.* उग्रं, घोररूपेण, बीभत्सं. **–ness,** *s.* घोरता, करालता, उग्रता.

Hie, *v. i.* त्वर् 1 A, सत्वरं गम् 1 P.

Hiemal, *a. See* **Hibernal.**

Hiemate, *v. i. See* **Hibernate.**

Hierarch, *s.* पुरोहितेश्वरः, आचार्येश्वरः. **–y,** *s.* आचार्याधिपत्यं, धर्माध्यापकप्रमुखत्वं.

Hieroglyph,-ic, *s.* गूढाक्षरं, बीजाक्षरं.

Hierophant, *s.* मंत्रव्याख्यातृ *m.*, आचार्यः.

Higgle, *v. i.* पण् 1 A, व्यव-हृ 1 P. 2 **Haggle,** q. v.

High, *a.* उच्च, उन्नत, उच्छ्रित, समुच्छ्रित, सोच्छ्राय, तुंग, प्रांशु, उदग्र, उत्तुंग, उद्गत, उन्नम्र, ऊर्ध्व. 2 उत्तम, विशिष्ट, मुख्य, श्रेष्ठ, परम, अग्र्य, महा-प्रधान- in comp.; *See* **Principal.** 3 प्रचंड, तीक्ष्ण, तीव्र, बलवत्, तरस्विन्, प्रबल; *See* **Strong.** 4 उदात्त, उत्ताल; 'a h. tone' उदात्तः, उच्च-तार-स्वरः, तारः. 5 (Of h. rank) विशिष्ट, उत्कृष्ट, उत्कृष्ट-विशिष्ट-पदस्थ, उत्तम-परम-पदभाज्, लब्धप्रतिष्ठ, प्रतिपत्तिमत्, सगौरव. 6 (Of h. family) कुलीन, महाकुल, अभिजात, आभिजनवत्, कुलज, महाकुलप्रसूत. 7 गर्वोद्धत, दर्पाध्मात, सावलेप, गर्वित, अवलिप्त, उत्सिक्त. 8 गहन; 'h. water' प्रवृद्धा वेला; 'it is h. noon' (नभसः) मध्यमलंकरोति भानुः; 'h. and low' उच्चावच, अधरोत्तर, उत्तमाधम, उन्नतानत, नतोन्नत, निम्नोन्नत; 'h.-er and h.-er' अधिकाधिकं, उत्तरोत्तरं; 'h. price' महामूल्य; 'h.ground' उन्नतभूः; 'as h. as' मात्र (त्री *f.*), द्वयस (सी *f.*), दघ्न (घ्नी *f.*) in comp.; 'he has a h. opinion of you' स त्वां बहु मन्यते. –*adv.* उच्चैः, उच्चं, अति-सु pr.; ऊर्ध्वं, उपरि, उत्तमं, परमं; 'on h.' ऊर्ध्वं, उपरि; 'from on h.' उपरिष्टात्; 'the sea runs h.' बलवत्क्षुब्धः सागरः. 'H.-birth कुलीनता, कुलोत्कर्षः, आभिजात्यं; 'h.-blest' अतिपुण्यवत्, महाभाग, अतिधन्य, परमसुखभाज्; 'h.-blown' अत्युच्छून, अतिस्फीत; 'h.-born' कुलीन, महाकुल-जात-प्रसूत, अभिजात, सुजात, अभिजनवत्, सद्वंश्य, श्रेष्ठ-उत्तम-कुलोद्भव; 'h.-bred' कुलीन, शिष्टाचार, सुजन, सुशील, सद्भावविशिष्ट, सौजन्योपेत, सदाचार, साधुवृत्त; 'h.-built' सोच्छ्राय, उच्च; 'h.-day' उत्सवदिनं, उद्धर्षदिवसः; 'h.-fed' अतिपुष्ट, हृष्टपुष्ट; 'h.-flying' अपरिमित; 'h.-hand' औद्धत्यं, गर्वः, उद्दामत्वं, निर्यंत्रणत्वं; 'h.-handed' उद्धत, सगर्व, उद्दाम, अनियंत्रण, उच्छृंखल, स्वैरिन्; 'h.-hung' ऊर्ध्वबद्ध; 'h.-land' अधित्यका, उन्नतभूमि *f.*; (*a.*) पर्वतीय, उन्नत; 'h.-lander' पर्वतीयः, पर्वतवासिन् *m.*; 'h.-mettled' महासत्त्व, उरुसत्त्व, ओजस्विन्, अदीनचित्त, तेजस्विन्; गर्वित, अतिमदान्वित; 'h.-minded' महात्मन्, महामनस्क, उदार-धी-चेतस्-चरित, महेच्छ, महाशय; 'h.–principled' साधुचरित्र, पुण्यात्मन्, पुण्यशील; 'h.-priest' पुरोहिताध्यक्षः; 'h.-prized' महामूल्य, महार्घ, बहुमत; 'h.-red' घनारुण, अतिरक्त; 'h.-road,-street,-way' राजमार्गः-पथः, महापथः-मार्गः, घंटापथः, संसरणं, रथ्या, विशिखा, प्रतोली; 'h.-seasoned' सुवासित; 'h.-spirited' महा-उरु-सत्त्व, अकुण्ठितवृत्ति, ओजस्विन्, ऊर्जित, महेच्छ; 'a h.-spirited speech' ऊर्जितार्थं वचनं (Ki. II. 1); 'h. -treason राजद्रोहः, राजापथ्यकारित्वं; 'h.-wrought' यत्न-संस्कृत, प्रयत्नपरिष्कृत; 'h.-wayman' परिपंथिन् *m.*, दस्युः, वाटपाटच्चरः, पादविकः. **–est,** *a.* उच्चैस्तम, तुंगतम, उत्तम, परम. **–ly,** *adv.* उच्चैः. 2 भृशं, अत्यंतं, नितांतं, परमं, परं, अतीव, अति-सु pr.; *See* **Exceedingly,** 'h. pleased' परमानंद-भाज्, हर्षकाष्ठां गत. **–ness,** *s.* देवः (वी *f.*), अत्र-तत्र-भवत् (ती *f.*). **–Height,** *s.* उच्छ्रायः, उच्छ्रयः, उत्सेधः, आरोहः, उन्नयः, तुंगता, उच्चता; उत्कर्षः, उन्नति *f.* 2 उच्चस्थानं, उत्सेधः, उन्नतभूभागः, गिरिः, पर्वतः. 3 शिखरं, अग्रं, शृंगं, शिखा, चूडा. 4 (परा) काष्ठा, कोटिः; अतिभूमिः; परमावधिः, उत्तमावधिः; 'being in the h. of joy' आनंदकोटिमधिगत. 5 कुलोत्कर्षः, परमपदं, श्रेष्ठत्वं, विशिष्टता; 'the h. of winter' शिशिरमध्यं, कठोरीभूतः शिशिरः. **–en,** *v. t.* उन्नी 1 P, उत्कृष् 1 P. 2 वृध् c., उपचि 5 U, चि c., स्फाय् c (स्फावयति); *See* **Add to.**

Hilarity, *s.* आनंदः, उल्लासः, प्रमोदः, कौतुकं, आह्लादः, उत्सवः; *See* **Delight. Hilarious,** *a.* कौतुकवत्, आनंद.

Hill, *s.* गिरिः, पर्वतः, अद्रिः, शैलपादः; 'h. near a mountain' पादः, प्रत्यंतपर्वतः. **-ock,** *s.* वप्रः, उन्नतभूभागः; वामलूरः, वल्मीकः-कं, वाकुः, वृश्चिकावयः. **-y,** *a.* पर्वतमय (यी *f.*), सपर्वत, पर्वतीय, उन्नतानत, विषम.

Hilt, *s.* त्सरुः, मुष्टि *m.f.*, खड्गमुष्टिः.

Hind, *s.* मृगी, हरिणी, कुरंगी, एणी, पृषती. **2** ग्राम्यजनः, ग्रामिकः, वृषलः

Hind, Hinder, *a.* पश्चिम, जघन्य, पश्चात् in comp., चरम, अपर, अवर; 'h. part' पश्चाद्भागः, पृष्ठदेशः- भागः, पृष्ठं, नितंबः, पश्चिमभागः.

Hinder, *v. t.* नि-विनि-वार् 10 or वृ c., नि-प्रति-षिध् 1 P, रुध् 7 U, नि उप-अव-सं-प्रति°, स्तंभ् 9 P, बाध् 1 A, वि-प्रति-हन् 2 P, प्रतिबंध् 9 P. **-ance,** *s.* प्रतिषेधः, निवारणं, प्रतिबंधः, विघ्नः, अंतरायः, प्रत्यूहः, प्रतिरोधः, व्याघातः, बाधा, विष्टंभः. **-er,** *s.* निवारकः, प्रतिबंधकः, विघ्नकृत् *m.*

Hinge, *s.* केंद्रं, द्वारसंधिः-ग्रंथिः. *-v. i.* (upon) अवलंब् 1 A, अपेक्ष् 1 A; *See* **Depend.**

Hint, *s.* इंगितं, आकूतं, सूचना, संज्ञा, भावः, संकेतः, आशयः. **2** उपन्यासः, उपक्षेपः. *-v. t.* इंगितेन सूच् 10, उपन्यस् 4 U, सूच्, उपक्षिप् 6 P, उद्दिश् 6 P, साकूतं निर्दिश् or उपन्यस्.

Hip, *s.* कटि-टी *f.*, नितंबः, श्रोणि-णी *f.*, ककुद्मः, प्रोथः, जघनं, श्रोणिफलकं. **-ped,** *a.* विषण्ण, खिन्न.

Hippopotamus, *s.* करियादस् *n.*

Hire, *v. t.* वेतनेन-मूल्यदानेन नि-प्र-युज् 7 A, 10 or व्या-पृ c. or उप-भुज् 7 P or सेव् 1 A or ग्रह् 9 U, परिक्री 9 A, भट् 1 P or c., भृतिं दा 3 U; 'h. labourers' कर्मकरान् उपनी 1 A, or कर्मणि व्यापृ c.; 'a h. ed labourer' भृतिभुज् *m.*, भरण्यभुज् *m.*, भृतकः; 'a person h. ed' कृत-कल्पित-वेतनः. *-s.* वेतनेन ग्रहणं or व्यापारणं, वेतनदानं. **2** भृति *f.*, भृत्या, भरण्यं, वेतनं, भाटकं, मूल्यं, कर्मण्या, विधा, भर्मन् *n.*, निर्वेशः, पणः, निष्क्रयः; 'for h.' पण्य, वेतनेन ग्राह्य, साधारण; 'a woman for h.' पण्यांगना, पण्यस्त्री; 'a teacher for h.' भृतकाध्यापकः. **-ling,** *s.* 'worker for h.' भृतकः, भृतिभुज् *m.*, भरण्यभुज् *m.*, वैतनिकः; कर्मकरः, भृत्यः.

Hirple, *v. i.* *See* **Limp.** *-s.* खंजवत्-लंग-गति *f.*

Hirsute, *a.* लोमश, प्रचुरलोमन्.

Hiss, *v. i.* फूत्कारं कृ 8 U or उद्-गॄ 6 P, सीत्कारं कृ, सर्पवत् श्वस् 2 P; 'h. off' सीत्कारेण असंतोषं सूच् 10 or दूष् c. *-s.*, **-ing,** *s.* फूत्कारः, सीत्कारः, सर्प-श्वासः-नादः.

Hist, *adv.* तूष्णीं भव, वाचंयम *a.* भव.

History, *s.* इतिहासः, पुरावृत्तं, पुराख्यं, पुराणोपाख्यानं, उपाख्यानं, चरित्रवर्णनं. **2** वृत्तांतः, उदंतः, समाचारः, वार्ता. **-ic, -ical,** *a.* ऐतिहासिक (की *f.*), पुरावृत्त-विषयक, पौराणिक (की *f.*). **-ically,** *adv.* इतिहासानुसारेण. **-Historian, -Historiographer,** *s.* इतिहास-पुरावृत्त-लेखकः-रचकः, पुराणरचकः, चरित्रलेखकः, ऐतिहासिकः.

Histrionic,-al, *a.* नाटकीय, रंग-नाट्य-योग्य, रंगानुरूप.

Hit, *v. t.* प्र-हृ 1 P, तड् 10; अभि-नि-आ-हन् 2 P, तुद् 6 P, व्यध् 4 P. **2** (Upon) (दैवात्) आ-सद् c., प्राप् 5 P, अधिगम् 1 P, लभ् 1 A; 'arrows h. a moving mark' इषवः सिध्यंति लक्ष्ये चले (S. 2). *-v. i.* संघट्ट् 1 A, समा-प्रति-हन्, अभिसं-पत् 1 P. *-s.* प्रहारः, आघातः, ताडनं, घातः. **2** दैव-घटना, संगति *f.*, दैवं.

Hitch, *v. t.* ग्रह् 9 U, धृ 1 U, 10, आकृष् 1 P. *-v. i.* ग्रह्-धृ-pass. **2** **Hop,** q. v. *-s.* अंतरायः, प्रत्यूहः; *See* **Obstacle.**

Hithe, *s.* घट्टः, तरस्थानं.

Hither, *adv.* अत्र, इह, इतः. **-most,** *a.* आसन्नतम, नेदिष्ठ, अत्यंतिक. **-ward,** *adv.* इतः, अत्र. **-Hitherto,** *adv.* अद्ययावत्, आवर्तमानकालात्, अद्यावधि, एतत्कालपर्यंतं.

Hive, *s.* मधुकोषः, करंडः, छत्रकः, चषालः. *-v. t.* मधुकोषे निधा 3 U or निविश् c.

Hoar, *a.* धवल, शुभ्र, सित, श्वेत, शुक्ल; *See* **White;** 'h.-frost' तुषारः, अवश्यायः; *See* **Frost.**

Hoard, *s.* संचयः, निचयः, निवहः, पुंजः, राशिः, गणः, संघः, संग्रहः, निधिः; *See* **Multitude.** *-v. t.* संचि 5 U, संग्रह् 9 U, समा-हृ 1 P, राशीकृ 8 U, पुंजीकृ.

Hoarse, *a.* रूक्ष, परुष, कर्कश; भग्न, सगद्गद. **-ly,** *adv.* रूक्षस्वरेण, स्वरभंगेन, सगद्गदं **-ness,** *s.* भंगः, भेदः, रूक्षता; स्वरभंगः-रूक्षता.

Hoary, *a.* सित, धवल, श्वेत, शुक्ल, गौर (री *f.*), शुभ्र. **2** पलित, पक्व-पलित-केश.

Hoax, *s.* वंचनं-ना, प्रतारणं-णा, छलं, कपटं, विप्रलंभः. *-v. t.* वंच् 10, प्र-तॄ c., विप्र-लभ् 1 A.

Hob, *s.* वृषलः, ग्राम्यः, जानपदः.

Hobble, *v. i.* *See* **Limp.**

Hobbledehoy, *s.* युवन् *m.*

Hobby, *s.* प्रियवस्तु-द्रव्यं, चिरकाम्यं, निर्बंधः, अभीष्टमनोरथः, लहरी, छंदः, अभिरुचि *f.*; 'h.-horse' क्रीडाश्वः, क्रीडाद्रव्यं, क्रीडनकं.

Hobgoblin, *s.* भूतः, पिशाचः. वेतालः, राक्षसः; *See* **Demon, Devil.**

Hocus, *v. t.* *See* **Hoax. -pocus,** *s.* मंत्रतंत्रं, कुहकः, इंद्रजालं.

Hod, *s.* लेपाधारः, सुधाभाजनं.
Hodge-podge, *s.* संकरः, सन्निपातः, नानाद्रव्यसमूहः, प्रकीर्णकं.
Hoe, *s.* खनित्रं, अवदारणः, स्तंबघ्नः. —*v. t.* खनित्रेण खन् 1 P, भूमिं भिद् 7 P, अवदृ 10.
Hog, *s.* वराहः, किरिः, शू(सू)करः; *See* **Boar;** 'village h.' विड्वराहः, ग्राम्यः; 'h.-herd' शूकरपालः-पोषकः; 'h.-sty' शूकरस्थानं-वासः. **-gish,** *a.* शूकरोपम, शूकरीय, वाराह (ही *f.*), शूकरगुणविशिष्ट.
Hogo, *s.* अति-तीक्ष्ण-स्वादः.
Hog-weed, *s.* शोथघ्नी, पुनर्नवा, शोथजित *f.*
Hoiden, *s.* प्रगल्भा, निर्लज्जा.
Hoist, *v. t.* उन्नम् c. (नमयति), उद्गम् c., उच्छ्रि c., उद्यम् 1 A, उन्नी 1 P, उद्-धृ-ह 1 P, उत्तुल् 10, उत्था c. (उत्थापयति.)
Hold, *v. t.* धृ 1 P, 10, अव-लंब् 1 A, आ-दृ 3 A, ग्रह् 9 U, परामृश् 6 P, हस्तेन धृ or अवलंब्. **2** स्तंभ् 9 P, नि-अव-रुध् 7 U, बलात् धृ. **3** (possess) भृ 3 U, आ-धा 3 U; *See* **Have. 4** (Contain) धृ, परिग्रह्, आ-धा, समाविश् c., भृ, आ-दा. **5** पा c. (पालयति), रक्ष् 1 P, न त्यज् 1 P. **6** (As a festival) अनुष्ठा 1 P, सेव् 1 A, पा c. (पालयति), कृ 8 U, सं-पद् c., निर्वह् c., वि-धा, यथाविधि कृ, अभिनंद् c. **7** मन् 4 A, गण् 10; *See* **Consider,** 'I h. them of no account' का-कियती-मात्रा तेषां मत्पुरतः, तानहं तृणाय मन्ये or तृणीकरोमि; 'h. an opinion' मतं अवलंब् or आश्रि 1 U, मन्; 'h. one's tongue' जिह्वां धृ or रक्ष्, 'h. your tongue' वाचंयमो भव, वाचं नियच्छ, तूष्णीं-जोषं-आस्स्व; 'h. a meeting' सभां मिल् c. or सभा-ह्वे 1 P; 'a meeting was held' परिषद् मिलिता; 'h. in esteem' बहु मन्; 'h. in contempt' अवगण्, अवमन्, तृणीकृ, तृणाय मन्; 'h. a council' सभां निमंत्र् 10 A or आह्वे; 'h. a consultation' संमंत्र्, मंत्रणां कृ; 'I h. you responsible' for this act' अस्य त्वयोत्तरं दातव्यं. —*v. i.* स्था 1 P, स्थिरीभू, सं-स्था 1 A; चिरस्थायीभू, स्थायीभू. **2** अनुबंध् 9 P or pass.; सं-संज् pass., संलग्नीभू, आलंब् 1 A. **3** विरम् 1 P, निवृत् 1 A (with abl.); आत्मानं संयम् 1 A or निग्रह्, परिह् 1 P, त्यज्; 'hold hold !' विरम विरम, मा मा एवं, मा तावत्. **4** अधीन *a*, भू, आश्रि, अव-आ-लंब्. **5** (As a rule) गम्, न व्यभिचर् 1 P; 'this rule h. s everywhere' सर्वगामी-अव्यभिचारी-अयं नियमः. —*s.* धरणं, धृति *f.*, ग्रहः-हणं, अवलंबः-बनं, हस्तेन ग्रहणं-धरणं; 'letting go the b.' मुक्त-त्यक्त-हस्त, मुक्तग्रह. **2** कारा, कारागृहं, कारागारं, बंधनस्थानं, गुप्ति *f.* **3** आधारः, आ-अव-लंबः-बनं, उपस्तंभः, आश्रयः. **4** मुष्टि, कोशः. **5** मुष्टि *m. f.*, वारंगः. **6** आस्पदं, पदं, अधिकारः, वशः-शं; 'red colour takes a firm h. on a white cloth' रागः शुक्लपटे स्थायीभवति (P. I. 1); 'had a h. on the mind of the people' स लोकस्य मनः आववृद्रे (R. IV. 8); 'the advice took no h. on (her) mind' लेभेऽन्तरं चेतसि नोपदेशः (R. VI. 66). **-back,** नि- वृ c., वारि 10, सेह् 1 P, निग्रह्, विकल्प् 1 A, विचर् c.; *See* **Hesitate. -forth,** दृश् c., पुरो निधा. **-in,** निग्रह्, प्रति-संह्, नि-सं-यम्. **-off,** विलंब् 1 A, विकल्प्. **-on,** प्रवृत् c., न विरम्, न मुच् 6 P, न त्यज्, उद्वह् 1 P, निर्वह् c. **-out,** प्रसृ c., वितन् 8 U, दीर्घीकृ. **2** दृश् c., उपन्यस् 4 U, उपक्षिप् 6 P, उप-स्था c. (स्थापयति); (*v. i.*) चिरं यावत्सह् 1 A or युध् 4 A or प्रतिकृ. **-together,** संबंध् pass., संश्लिष् 4 P, संलग् 1 P **-up,** उन्नम् c. (नमयति), उद्यम्, उच्छ्रि 1 U or c., ऊर्ध्वीकृ. **2** उत्तंभ्, अवष्टंभ्, आ-अव-लंब्, भृ, धृ. **-er,** *s.* धारकः, धारयितृ *m.*, ग्राहकः, धरः-आधारः- in comp. **-ing,** *s.* धरणं, ग्रहणं, &c. **-a.** धारिन्, धर in comp.; oft. by हस्त in comp.; 'h. a sword' कृपाणपाणिः. **-Holdfast,** *s.* ग्राहकः, ग्रहणी, बंधनी, कुडुपः. **2** दृढ-बद्ध-मुष्टिः, अमुक्तहस्तः.

Hole, *s.* विवरं, बिलं, छिद्रं, रंध्रं, सुषि(षि)रं, कुहरं, निर्व्यथनं, रोकं, वपा, सुषि *f.*; श्वभ्रं, गर्तः-र्ता, अवटः (in the ground). **2** कंदरः-रं-रा, गुहा, गह्वरं, दरी, खातं (of mountains). **3** (Of garments &c. or fig.) रंध्रं, छिद्रं; 'a rat digs a h. and a snake uses it' एकः परिश्रमं करोति, अन्यस्तत्फलमुपभुंक्ते; 'picking h. s (in the character &c.) of others' छिद्रान्वेषिन्, दोषैकदृश्, पुरोभागिन्, रंध्रानुसारिन्; 'full of h. s' अनेकरंध्र, बहुविवर.

Hollow, *a.* रिक्त-शून्य-गर्भ, अंतःशून्य, शून्यमध्य-उदर; उदराकृति, सुषिर, गुहाकार. **2** असार, निःसत्व, निःसार, फल्गु, शून्य. **3** मोघ, निरर्थक, निष्फल. **4** असत्य, वितथ, मिथ्या, in comp. **5** म(मं)भीर, मंद्र, मंद्. —*s.* (Of trees) कोटरः-रं, कोलः, निष्कुहः. **2** विवरं, गुहा, बिलं, कुहरं, अवटः; *See* **Hole. 3** गर्भः, उदरं, अभ्यंतरं, कोशं. **4** खातं, खातभूः, गर्तः-र्ता. **5** दरी, कंदरः, अद्रिद्रोणी, कंदरधुः. **6** कुल्या, प्रणाली; 'h. of the hand' पुटः, करपुटः-कोषः

'h. of the navel' नाभिगर्तो, नाभ्यावर्तः; 'ground full of h. s' उत्खातिनी भूमिः (S. 1); 'natural h.' देवखातं; 'h. of the ear' ऋषभः, 'h.s in the buttocks' जघनकूपकौ, गर्तौ. -v. t. उत्खन् 1 P, पुटीकृ 8 U. -ness, s. शून्यता, असारता, असत्यता, &c.

Holocaust, s. होमः.

Holy, a. पुण्य, पवित्र, परिपूत, साधु, शुचि, विमल; पुण्यात्मन्, शुचिव्रत, धार्मिक (की f.), धर्म-पुण्य-शील, धर्मात्मन्, शुद्धमति; 'h. study' वेदाध्ययनं; 'h. wisdom' ब्रह्मज्ञानं; 'h. writing' श्रुतिः, वेदाः, निगमः; 'h. land' पुण्यभूमिः; 'h. place of pilgrimage' तीर्थं, क्षेत्रं, पुण्यस्थानं-तीर्थं. -ly, adv. पुण्यं, पवित्रतया, शुचिवत्. -ness, s. पवित्रता, पुण्यता, शुचिता, वैमल्यं, पुण्यशीलता, धार्मिकत्वं; 'his or her h.' भगवान्, भगवती. -**Holiday,** s. पुण्याहं, पुण्यदिनं. 2 अनध्यायः, अनध्याय-दिवसः-महोत्सवः. 3 उत्सवः, पर्वन् n., उद्धर्षः, उत्सव-उद्धर्ष-दिनं; 'h. people' यात्राजनः.

Homage, s. नमस्कारः, अभिवंदनं, प्रणामः, प्रणति f., पूजा, अर्चनं, उपासना, प्रणिपातः, सेवांजलिः; सेवा, आदरः, प्रभुभक्ति f.; 'pay or do h.' प्रणम् 1 P, वंद् 1 A, प्रणिपत् 1 P; *See* **Bow.**

Home, s. गृहं, वासः, वासस्थानं-भूमि f., स्वगृहं, स्व or निज-गेहं-देशः-वासः-स्थानं-भवनं; *See* **House**; 'devoted to h.' गृहासक्तचित्त. -adv. गृहं, गृहं प्रति; 'the words went h. to his heart' तद्वचः तस्य हृदयमर्मास्पृशत्; 'touching h.' मर्मस्पृश्-भिद्; 'goes h. to me' मामेव लक्षीकरोति (S. 7); 'h.-born' गृहजात; 'h.-bound' गृहगामिन्; 'h.-bred' गृहज-जात, गृह्य; 'h.-made' गृहनिर्मित, गृहोत्पन्न; 'h.-sick' गृहविरहार्त; 'h.-stall,' '-stead' गृहं, वासः; वेश्मभूः, वास्तु m. n. -less, a. निरालय, निराश्रय, निर्गृह. -ly, a. गृह्य, गृहज. 2 ग्राम्य, ग्रामीण-य, अशिष्ट, प्राकृत, असभ्य, अश्लील, असंस्कृत. -adv. ग्राम्यवत्, असभ्यतया, अशिष्टप्रकारेण. -ward, adv. गृहाभिमुखं, अभिगृहं.

Homicide, s. नृहत्या, मनुष्यवधः. 2 (Person) मनुष्यघातिन् m., नृहंतृ m., मनुष्यघातकः. -al, a नृघातिन्.

Homily, s. धर्मवाक्यं.

Homogeneal, Homogeneous, a. समान-जाति-जातीय, स-एक-जाति, सवर्ण, एक-स-धर्मन्, समान-भाव, एक-स-जातीय; 'h. vowels' सवर्णाः.

Homologous, a. तुल्य-सम-परिमाण.

Homonym, भिन्नार्थः शब्दः; 'a collection of h. s' भिन्नार्थवर्गः. -ous, a. भिन्नार्थ, अनेकार्थ

Hone, s. शाणः, शाणाश्मन् m.

Honest, a. शुचि, ऋजु, सरल, अमायिन्, दक्षिण, अकुटिल, अजिह्म, शुद्धमति-भाव, शुद्धात्मन्, अकपट, निष्कपट, निर्व्याज, निर्व्यलीक, अव्याज, विमलात्मन्, दंभहीन, न्याय्य, न्याय्याचार, सच्चरित, न्यायवर्तिन्, साधुवृत्त-शील, साधु, प्रांजल, सत्यवृत्त, सत्यशील, सत्यवादिन्. 2 अवितथ, सत्य, अकृत्रिम, अकृतक; *See* **Frank** also; 'h. gains' न्यायार्जित; 'h. statement' निर्व्याजं वचनं. -ly, adv. सरलं, न्यायेन, न्यायतः, शुचितया, निष्कपटं, निर्व्याजं, अमायया, निर्व्यलीकं. -y, s. शुचिता, आर्जवं, निष्कापट्यं, सारल्यं, अकौटिल्यं, दाक्षिण्यं, अमाया, अकपट, अव्याजः, शुद्धभावः, वैमल्यं, निर्व्यलीकता, अजिह्मता, सत्यता, अकृतकता; 'h. is the best policy' भावशुद्धिः एव साधिष्ठा आचार-सरणिः, सारल्यं सत्तमो मार्गः.

Honey, s. मधु n., क्षौद्रं, माक्षिकं, सारघं; 'h. of flowers' पुष्पासवं, पुष्परसः-सारः, कुसुममधु; 'h.-bee' मधुमक्षिका, सरघा; 'h.-comb' मधुकोशः, करंडः; 'h.-moon' आनंदमासः; 'h.-tongued' मधुरभाषिन्, मधुरवाच्. -v. t. मधुरीकृ 8 U. -v. i. उपलल् 10; *See* **Fawn.** -ed, a. मधुमधुर, सुधास्यंदिन्, मधुर.

Honor, v. t. पूज् 10 अर्च् 1 P, 10, मन् c., संभू c., सत्कृ 8 U, पुरस्कृ, मह् 1 P, 10, आदृ 6 A. 2 सेव् 1 A, शु desid. (शुश्रूषते), आराध् c; 'h. ed the invitation' निमंत्रणमाद्रियत, सगौरवं स्वीचकार. 3 अनुग्रह् 9 P, प्रसद् 1 P (with loc). -s. मानः, संमानः, पूजा, अर्चनं, अर्हणा, संभावना, आदरः, सत्कारः. 2 सेवा, शुश्रूषा, आराधनं. 3 ख्याति f., कीर्ति f., यशस् n., प्रतिष्ठा, गौरवं, प्रतिपत्ति f., उत्कर्षः, उत्कृष्ट-प्रधान-पदं, उन्नति f.; कुलीनता, आभिजात्यं, प्राधान्यं, श्रेष्ठत्वं; 'your or his h.' अत्र-तत्र-भवान्; भवत्. -able, a. पूज्य, मान्य, माननीय, पूजार्ह, आदरणीय. 2 सु-प्र-वि-ख्यात, विश्रुत, सुप्रसिद्ध, प्रतिपत्तिमत्, महायशस्. 3 यशस्कर-कीर्तिकर (री f.), प्रतिष्ठावह, श्लाघ्य, प्रशस्य, मानद, गौरवान्वित. 4 कुलीन, अभिजात, महाकुल, उदारचित्त-चरित; *See* **Noble.** 5 शुचि, न्याय्याचार, सच्चरित, साधुवृत्त, पुण्यात्मन्, शुचिव्रत; *See* **Honest.** -ary, a. मानद, कीर्तिकर, यशस्कर, प्रशस्य. 2 अलाभकर, मानमात्रदायिन्. -**Honorably,** adv. समानं, सगौरवं, श्लाघ्यप्रकारेण, प्रशंसापूर्वं, सयशसा, प्रतिष्ठापूर्वं. 2 शुचिवत्, धार्मिकतया, ऋजुतया, सरलतया, न्यायतः.

Honorarium, s. दक्षिणा.

Hood, s. फणा-णः, फटा, स्फोटा; 'expands the h.' फणां कुरुते (S. 6); 'expanded

h.' भोगः. 2 फणाकृति शिरस्कं. -*v. t.* शिरस्त्राणेन पिधा 3 U or आवृ 5 U.

Hoodwink, *v. t.* (नयने) वस्त्रेण पिधा 3 U or आच्छद् 10 or आवृ 5 U.

Hoof, *s.* खुरः, शफः-फं, क्षुरः, पिंडः, निघृष्वः. **-ed,** *a.* खुरिन्, खुरयुक्त, शफयुक्त.

Hook, *s.* आकर्षणी, ग्रहणी, धरणी; ' fish-h. ' बडिशं-शा-शी, मत्स्यवेधनी; ' h. for elephants ' अंकुशः, सृ(सृ)णि *f.* -*v. t.* बडिशेन धृ 1 P or ग्रह् 9 U. **-ed,** *a.* वक्र, कुटिल, कुंचित, अंकुशाकार, जिह्म; *See* **Crooked.**

Hoop, *s.* चक्रं, वलयः-यं. 2 क्रीडाचक्रं. -*v. t.* लोहवलयैः युज् 10. 2 उच्चैः घुष् 10.

Hoot, *s.* घु(घू)त्कारः. 2 धिक्कारः, उच्चैः अप्रशंसा-सूचनं, दीर्घघोषः. -*v. i.* घूत्काररवं कृ 8 U, उच्चैः आरट् 1 P or घुष् 10, दीर्घं रु 2 P; ' h. at ' उच्चैः अवज्ञा-धिक्कारं-सूच् 10.

Hop, *v. i.* प्लु 1 A, वल्ग् 1 U, एकपादेन नृत् 4 P. -*s.* प्लुतं, वाल्गितं, प्लवः, एकपादेन नृत्यं.

Hope, *v. t.* आशंस् 1 A, उत्-प्रति-अप-ईक्ष् 1 A, स्पृह् 10, प्रत्याकांक्ष् 1 P, वांछ् 1 P, आशां धृ or वह् 1 P; in implied questions, gen. ex. by अपि, कच्चित् or अपि नाम; ' I h. this lotus-leaf breeze pleases you ' अपि सुखयति ते नलिनीपत्रवातः (S. 3); अपि नाम रामभद्रः पुनरपीदं वनमलंकुर्यात् (U. 2), कच्चिन्मृगीणामनघा प्रसूतिः (R. v. 7); ' I h. not ' न खलु; न खलु तामभिक्रुद्धो गुरुः (V. 3) ' I h. the preceptor did not get angry with her'; ' I scarcely h. ed to see you here ' न खलु मे आसीदाशंसा यदत्र भवंतं प्रेक्षिष्ये. -*s.* आशा प्रत्याशा, आशंसा, आकांक्षा, अपेक्षा, प्रतीक्षा, उदीक्षणं; स्पृहा, मनोरथः, वांछा, इच्छा, आशाबंधः. 2 (Giving h.) आश्वासनं, आश्वासः ; ' having h. s fulfilled ' पूर्णाश; ' a vain h. ' वृथाभिलाषः, मोघाशा, ' h.-ing against h. ' अतीव दूरापेतं. **-ful,** *a.* आशान्वित, आशावत्, आशायुक्त, आशाबद्ध, स्पृहयालु, अपेक्षिन् सप्रत्याश, आशाविष्ट. 2 (Giving hopes) आशाजनन (नी *f.*), आशाकारिन्. **-fully,** *adv.* साशंसं, सप्रत्याशं. **-less,** *a.* निराश, आशातीत, आशाहीन, हताश, त्यक्ताश, निरपेक्ष. **-lessly,** *adv.* नैराश्यात्, सनैराश्य.

Hora, *s.* मुहूर्तः, घटिका. **-al,-ary,** *a.* मौहूर्तिक (की *f.*).

Horde, *s.* महान् गणः, बृहत्संघः, महौघः, स्तोमः; *See* **Multitude.**

Horizon, *s.* क्षितिजं, दिङ्मंडलं, दिक्चक्रं, अंबरांतः; चक्रं, मंडलं; ' the eastern h. ' प्राची-ऐंद्री-दिक्, प्राचीमूलं. **-Horizontal,** *a.* सम, क्षितिसम, अनुप्रस्थ; ' h. plane ' समभूभागः, समा भूमिः. **-ly,** *adv.* समं, अनुप्रस्थं.

Horn, *s.* शृंगं, विषाणः-णं, कूणिका; ' h. of a buffalo ' गवलं. 2 काहलः-ला, शंखः. 3 चंद्राग्रं, चंद्रशिखा. **-ed,** *a.* शृंगिन्, विषाणिन्, शृंगयुक्त-विशिष्ट. 2 शृंगाकार, शृंगाकृति. **-y,** *a.* शार्ङ्ग (र्ङ्गी *f.*). 2 कठिन; *See* **hard.**

Hornet, *s.* वरटा, बृहद्वोलः.

Horologue, *s.* घटी, कालमापनयंत्रं.

Horoscope, *s.* जन्मपत्रिका, जन्मपत्रं, जन्मयोगपत्रं.

Horror, *s.* त्रासः, संत्रासः, साध्वसं, भयकंपः, भयसंहर्षः. 2 बीभत्सता, रौद्रता, घोरता, भैरवं, भयानक, भीष्मं, भीषणं. **-Horrific,** *a.* भीषण, उग्र, भयानक, भयावह. **-Horrid, Horrible,** *a.* घोर, दारुण, भीम, भयानक उग्र, भीषण, कराल, विकट; *See* **Fearful -ly,** *adv.* घोरं, दारुणं, रौद्रं, उग्रतया; बीभत्सतया. **-Horrify,** *v. t.* **Frighten,** q. v. **-ed,** *a.* साध्वसोपहत, भीत, संत्रस्त, भयसंहृष्ट.

Horripilate, *v. t.* पुलकयति-कंटकयति-रोमांचयति (D), रोमाणि उद्गम् c. or उद्धृष् c. **-ed,** *a.* पुलकित, कंटकित, सपुलक, रोमांचित. **-ion,** *s.* पुलकः, रोमांचः, रोमहर्षः-र्षणं, रोमोद्गमः-द्गतत्वं, पुलकोद्भेदः, उद्धर्षणं.

Horse, *s.* अश्वः, तुरगः, तुरंगः-गमः, हयः, सप्तिः, वाजिन् *m.*, वाहः, अर्वन् *m.*, घोटकः, वीतिः; गंधर्वः, सैंधवः; ' a well-bred h. ' आजानेयः, कुलीनः, भूमिरक्षकः, सिंधुवारः; ' a well-trained h.' साधुवाहिन् *m.*, विनीतः; ' a white h. ' कर्कः; ' a bay h. ' उकनाहः, कियाहः; 'a fleet h.' जवनः, जवाधिकः; 'a pack h.' पृष्ठ्यः, स्थौरिन् *m.*, स्थोरिन् *m.*; 'a h. for a sacrifice' ययुः, अश्वमेधीयः; ' a chariot-h. ' रथ्यः; ' h.'s pace ' गतिः, धारा; (namely) आस्कंदितं ' full gallop '; धो(धौ)रितकं, धोरितं ' trot or ambling '; रेचितं ' cantering '; वल्गितं ' vaulting'; प्लुतं 'bounding or capering'; 'h.'s nose' घोणा, प्रोथः-थं; ' h.s' tail' पुच्छः-च्छं, लूमं, लांगूलं; 'h.'s tail hair ' बालधिः, बालहस्तः; ' a number of h. s ' आश्वं, अश्वीयं; ' relating to a h. ' अश्वीय, आश्विक (की *f.*); ' h.-soldiers ' आश्वं, आश्विकं, अश्वारोहगणः; ' h.-back ' अश्वपृष्ठं; ' go on h.-back ' अश्वेन गम् or चर् 1 P; ' going on h.-back ' तुरंगयायिन्, सादिन्; ' h.-bean ' मुद्गः, माषः, शिंबा; ' h.-breaking ' अश्वशिक्षा-दमनं-विनयः; ' h.-breaker ' अश्वविनेतृ *m.*-शिक्षकः; 'h.-

dealer' अश्वव्यापारिन् *m.*, हयज्ञः; 'h.-driving' अश्वसारथ्यं, रथवाहनकौशलं; 'h.-laugh' अट्टहासः, अतिहासः, अतिहसितं, आच्छुरितं; 'h.-man' अश्वारोहः, तुरंगस्थः, सादिन् *m.*, तुरागिन् *m.*, हयारूढः, अश्वारूढः, 'h.-manship' अश्वारोहणकौशलं-विद्या, अश्वविद्या, अश्वहृदयं; 'h.-shoe' अश्वपादत्रं; 'h.-trappings' आदानं, अश्वपरिष्टोमः, अश्वास्तरणं; 'h.-whip' कशा, अश्वताडनी, प्रतिष्कषः-शः, चर्मदंडः; (*v. t.*) कशया तड् 10 or प्र-हृ 1 P.

Hortation, *See* **Exhortation.**

Horticulture, *s.* उद्यानविद्या, उद्यानपालनं. **-ist,** *s.* उद्यानविद्याज्ञः.

Hose, *s.* और्णं पादत्राणं **-Hosier,** *s.* और्णपादत्रविक्रयिन् *m.*

Hospitable, *a.* आतिथेय (यी *f.*), सत्कारशील, अतिथिपूजक, आतिथ्यकारिन्. **-Hospitably,** *adv.* सादरं, सप्रश्रयं, सबहुमानं, आतिथेयसत्कारेण, सत्कार-आतिथ्यपूर्वं; 'to receive h.' सत्कृ 8 U, पूज् 10, स-भू *c.*

Hospital, *s.* आतुरशाला, रुग्णागारं, आरोग्यचिकित्सा-शाला, रुजोपायशाला.

Hospitality, *s.* आतिथ्यं, आतिथ्यकर्मन् *n.*, अतिथिसत्कारः-पूजा-सेवा-क्रिया; सत्कारः, सत्क्रिया, सत्कृति *f.*, उपचारः, पूजा, सेवनं.

Host, *s.* गणः, संघः, समूहः, ओघः, निवहः; *See* **Multitude.** 2 चमूः, सेना, अनीकं, वरूथिनी. 3 गृहिन् *m.*, भोजनदायिन् *m.*, निमंत्रणकृत्, निमंत्रकः, आतिथ्यकृत्. **-age,** *s.* विश्वासस्थानं, शरीरबंधकः; 'retaining 4 hares as h. s' चतुरः शशकान् विश्वासस्थाने धृत्वा (P. I. 8). **-ess,** *s.* गृहिणी, भोजनदात्री, आतिथ्यकारिणी.

Hostel, Hostelry, *s.* पथिकाश्रमः, उत्तरणगृहं-शाला.

Hostile, *a.* विपक्ष, विरुद्ध, वैरिन्, प्रत्यर्थिन्, प्रतिकूल, विपरीत, विद्वेषिन्, अहित, प्रतिरोधिन् 'a h. invasion' शत्रुविग्रहः, शत्रुयानं; 'to be h.' विरुध् 7 U, द्विष् 2 U, पर्यवस्था 1 A, प्रतिकूलयति-वैरायते (D.), विपक्षी-प्रत्यर्थी-भू. **-ly,** *adv.* शत्रुवत्, विपक्षवत्. **-ity,** *s.* विपक्षता, वैरं, शत्रुता, वैरभावः, विरोधः, प्रतिद्वंद्वं, विद्वेषः; 'in a state of constant h.' सदाबद्धवैर *a.*; 'natural h.' स्वभाव-जाति-वैरं, शाश्वतिकः विरोधः. 2 विग्रहः, युद्धं, संग्रामः, युद्धभावः.

Hostler, *s.* अश्वपालकः.

Hot, *a.* उष्ण, आतपाक्रांत, आतपवत्, तप्त, संतप्त-तप्त, सोष्ण; प्रखर, उग्र, तिग्म, चंड, खर, तीव्र, तीक्ष्ण. 2 ग्रैष्म, नैदाघ (घी *f.*), घर्म in comp. 3 शीघ्र-सुलभ-कोपिन्, क्रोधिन्, संरंभिन्. 4 साहसिन्, तीक्ष्णकर्मन्; 'h. weather or season' ग्रीष्मः, निदाघः, घर्म-ग्रीष्म-उष्णकालः; 'to make h.' तप् *c.*; 'to be h.' तप् 1 P, 4 A, उष्णीभू; 'h.-bed' उष्णस्थलं, (fig.) क्षेत्रं; h.-blooded or -headed' चंडप्रकृति-शील, संरंभिन्, शीघ्रकोपिन्, उद्धत, उच्चंड, तीक्ष्णकर्मन्, साहसिक, साहसिन्. **-ly,** *adv.* तीक्ष्णं, तीव्रं, उच्चंडं, उग्रं, उष्णं; सोत्तापं; व्यग्रं, सोत्साहं, सोत्कटं. **-ness,** *s.* उष्णता, तापः, प्रखरता, उग्रता, चंडता, तिग्मता, औष्ण्यं, निदाघः, घर्मता. 2 उत्तापः, तीक्ष्णता, संरंभः, व्यग्रता; 'h. of temper' शीघ्रकोपित्वं, चंडता.

Hotch-potch, *s.* प्रकीर्णकं, नानाशाकादिसंमिश्रणं.

Hotel, *s.* पथिकाश्रमः, भोजनगृहं.

Hotspur, *s.* संरंभिन् *m.*, साहसिकः.

Hough, *s.* जंघास्थिशिरा.

Hound, *s.* विश्वकद्रुः, मृगदंशकः, आखेटिकः, मृगयाकुक्कुरः.

Hour, *s.* घटी, घटिका, नाडिका; 'h.-drum' नाडिकाविच्छेदपटहः. 2 (H. s) कालः; 'at all h. s' सदा, सर्वदा; 'in an evil h.' अशुभे लग्ने-मुहूर्ते; 'an h. and a half.' अर्धयामः. **-ly,** *a.* प्रतिघटिकं *adv.*

Houri, *s.* दिव्यांगना, स्वर्गकन्या, दिव्ययोषित्.

House, *s.* गृहं, गेहं, अ(आ)गारं, सदनं, वेश्मन्-सद्मन् *n.*, निकेतनं, मंदिरं, वासः, आ-निवासः, भवनं, आयतनं, नि-आ-लयः, ओकस्-धामन् *n.*, वसति *f.*, निवासस्थानं, आवसथः, उदवसितं, निकाय्यः, निशांतं, ह(ह)र्म्यं; 'body of a h.' गर्भागारं, वासगृहं. 2 कुलं, अन्वयः, वंशः. 3 गृहजनः, कुटुंबं, परिवारः; 'h.-breaker' कुड्यच्छेदिन् *m.*, भित्तिसंधि-चौरः, कपाटघ्नः, गृहभेदकः; 'h.-dog' गृहकुक्कुरः; 'h.-door' गृहद्वारं; 'h.-hold' परिवारः, कुटुंब-वर्गः, परिजनः, गृहपरिजनः, परिवारः; (*a.*) गृह्य, ex. by गृह in comp.; 'h.-hold duties' गृहकार्याणि, गृहाचाराः; 'h.-hold gods' कुलदेवताः; 'h.-holder' गृहिन् *m.*, गृहस्थः, गृहपतिः, गृहमेधिन् *m.*, कुटुंबिन् *m.*, गेहिन् *m.*; 'h.-hold stuff' गृहोपस्करः, गृहसामग्री; 'h.-keeper' गृहारक्षकः (-क्षिका *f.*); 'h.-keeping' गृहव्यापारः-कार्यं-कर्मन् *n.* 'h.-maid' दासी गृहदासी-मार्जनी; 'h.-room' वासस्थानं, वेश्मन् *n.* 'h.-warming' गृहप्रवेशः; 'h.-wife' गृहिणी, गेहिनी, गृहकार्यकुशला-दक्षा, गृहमेधिनी; 'h.-wifery' गृहकार्यकुशलता-नैपुण्यं, गृहकर्मानुष्ठानं, परिमितव्ययः. **-less,** *a.* गृहहीन-शून्य, निरालय, अशरण, निराश्रय, निर्गृह.

Housing, *s.* परिस्तो(स्त्रो)मः, सज्जा, कल्पना, कुथः, आस्तरः, प्रसाधनं.

Hovel, *s.* उटजः-जं, कुटीरः, कुटी, पर्णशाला, तृणकुटी.

Hover, *v. i.* परितः विसृप् 1 P or डी 1 A, आकाशे व्यावृत् 1 A or विसृप् or विचल् 1 P, परिभ्रम् 1, 4 P; 'h. about' मंडले चर् 1 P, (वृषस्योपरि मंडले चरति Mr. 3); मंडलाकारेण भ्रम्. 2 (fig.) विशंक् 1 A, विक्लृप् 1 A, विचर् c. **-ing,** *s.* परिभ्रमणं, मंडलावृत्ति *f.*

How, *adv.* कथं, केन प्रकारेण-रूपेण. 2 कियत् (in 'how long,' 'how far'); 'h. much' कियत्; 'h. many' कति (pl.); 'h. long' कियच्चिरं, कियंतं कालं; 'h. many kinds' कतिविधाः; 'h. many times' कतिकृत्वः; 'h. now' ननु, ननु भोः; 'h. far' कियद्दूरं, कियदवधि; 'h. much more-less' किमुत, किं पुनः, किमु; 'h. else' अथ किं; with *adj.* ex. by अहो; 'h. pleasing' अहो मधुरं; अहो पापं, &c.

Howdah, *s.* वरंडकः.

However, Howsoever, *adv.* यथातथा, येनकेन प्रकारेण; (with *adj.*) by अपि, or by नाम with imp. of verb; 'h. industrious a man may be' दीर्घव्यवसायोपि नरः, करोतु नाम व्यवसायं नरः (H. 2). **-*conj.*** (Howbeit) किंतु, अपि तु, तु, परंतु, तथापि, पुनः.

Howl, *v. i.* आक्रंद् 1 P, उत्क्रुश् 1 P, उच्चैः रस्-रुद् 1 P, गर्ज् 1 P, दीर्घं विरु 2 P, रै 1 P. **-*s.*, -ing,** *s.* उत्क्रोशः- शनं, आक्रंदनं, दीर्घरुतं, आरटनं, र(रा)वः, दीर्घरवः, गर्जनं, रसितं; 'h. of dogs' भषणं, बुक्कनं, रायणं.

Hub, *s.* नाभि *f.* 2 त्सरुः. 3 लक्ष्यं, शरव्यं.

Hubbub, *s.* कोलाहलः, कलकलः; तुमुलं, तुमुलरवः- नादः, संकीर्णनादः.

Hucklebone, *s.* श्रोण्यस्थि *n.*

Huckster, *s.* क्षुद्रपण्यविक्रयिन्-विक्रेतृ *m.* **-*v. i.*** क्षुद्रपण्यानि वि-क्री 9 A.

Huddle, *v. t.* पिंडीकृ 8 U, सं-कॄ 6 P, संमिश्र् 10, संकुलीकृ, संपिंडयति (D.). 2 संक्षुभ् c.; ससंभ्रमं वि-धा 3 U or कृ. **-*v. i.*** संकुलीभू 1 P, संमिश्री-संकरी-भू, संकॄ pass., पिंडीभू. **-*s.*** संकुलं, संकरः, संक्षोभः, संकीर्णता.

Hue, *s.* रागः, रंगः, वर्णः, छाया, छवि *f.* 2 आक्रोशः; 'h. and cry' कलकलः, कोलाहलः, जनरवः, संहूति *f.*

Huff, *v. t.* विस्तॄ c., श्वि c., वृध् c., 2 सदर्पं निर्भर्त्स् or तर्ज् 10 A. **-*v. i.*** श्वि 1 P, स्फाय् 1 A, वृध् 1 A. 2 दृप् 4 P, विकत्थ् 1 A, प्रगल्भ् 1 A. **-*s.*** कोपः, रोषः, संरंभः; *See* **Anger.** 2 दर्पः, औद्धत्यं, निर्भर्त्सनं. 3 उद्धतः, दर्पाध्मातः, दांभिकः, विकत्थनः. **-er,** *s.* दांभिकः, शूरंमन्यः, विकत्थन.. **-ish,** *a.* **Angry, Arrogant,** q. v.

Hug, *v. t.* आलिंग् 1 P, आ-सं-श्लिष् 4 P, परिष्वंज् 1 A, बाहुभ्यां पीड् 10. *See* **Clasp. -*s.*** आश्लेषः, परिष्वंगः, आलिंगनं, उपगूहनं.

Huge, *a.* महत्, बृहत्, स्थूल, विशाल, विपुल, गुरु, बृहत्परिमाण, अतिमहत्-बृहत्. 2 (In body) स्थूल-काय-देह, बृहच्छरीर, महाकाय, विपुलांग (गी *f.*). **-ly,** *adv.* अतिमहत्, अत्यंतं, अतिमात्रं. **-ness,** *s.* अतिबृहत्त्वं, स्थूलता, विशालता.

Hulk, *s.* जीर्णनौका.

Hull, *s.* (पोतस्य) स्थूलभागः. 2 पुटः-टं, कोशः-षः, त्वच् *f.*, आवेष्टनं, तुषः (of grain).

Hum, *v. i.* गुंज् 1 P, वि-,रु 2 P, झंकृ 8 U, अस्पष्टं निस्वन् 1 P or स्वन् 1 P. **-*s.*, -ming,** *s.* गुंजनं, गुंजितं, कलरवः-स्वरः, वि-,रुतं-रावः, झंकारः, हुंकारः, हुंकृतं, अस्पष्टध्वनिः निस्वनः-नादः, कलकलः.

Human, *a.* मानुष (षी *f.*), पौरुषेय (यी *f.*), मनुष्यजातीय, मानवीय-न, gen. ex. by मनुष्य or नर in comp.; 'in h. accents' मनुष्यवाचा; 'uttered h. accents' मानुषीं गिरमुदीरयामास; 'h. nature' मानुष्यकं, पुरुषत्वं, नरस्वभावः; 'h. form' मानुषी तनुः, नररूपं; 'a h. brute' नरपशुः; 'h. kind' मनुष्य-नृ-जाति *f.*, मनुष्यवर्गः. **-ize,** *v. t.* वि-नी 1 P, शिष्टाचारं-सभ्यरीतिं शिक्ष् c. or शास् 2 P. **-ly,** *adv.* नरवत्, मानुषप्रकारेण. **-Humane,** *a.* दयालु, कृपालु, सदय, परहितकाम, परोपकारशील, अनुकंपिन्, करुणा-दया-शील, दयावत्, करुणार्द्र, दयार्द्र, परहितैषिन्, आपन्न-दीन-अनुकंपिन्; *See* **Kind. -ity,** *s.* दया, करुणा, कृपा, दयालुता, आपन्नानुकंपा, दीनवात्सल्यं, दयाशीलता, परहितेच्छा. 2 मानुष्यं-ष्यकं, मनुष्यता, मानुषता, मानवत्वं. 3 मनुष्याः, मनुष्यवर्गः-जातिः. **-ly,** *adv.* सदयं, सकरुणं, परहितेच्छया, सानुकंपं.

Humble, *a.* नीच, अपकृष्ट, अधम. 2 क्षुद्र, अल्पमति. 3 (In good sense) नम्र, विनीत, निरभिमान, विनत, सविनय, निरहंकार, अनुद्धत, दर्प-गर्व-अभिमान-हीन or रहित, नम्रचेतस्, विनयिन्, विनयशील-वृत्ति. 4 निःस्व, दरिद्र, दीन, दुर्गत, निर्धन, आपन्न; 'in h. days' आपत्समये, दरिद्रावस्थायां, आपदि; 'the friends of h. days' आपत्कालीनमित्राणि; 'to eat h. pie' मानं पृष्ठे कृ 8 U. **-*v. t.*** अव-नम् c. (नमयति), नम्रयति (D.), (सपदि विनयः नम्रयति मां U. 6); अभि-परा-भू 1 P, दर्प-गर्व-भंज् 7 P or ह्र 1 P, नि-अव-पत् c., अप-कृष् 1 P, नम्रीकृ; 'thus completely h. ing the kings' इति राज्ञः

शिरसि वामपादमाधाय (R. VII. 70); 'h.-bee' भ्रमरः; See **Bee.** **-ed,** *a.* अभिभूत, भग्नदर्प, आत्त-गर्व-गंध, हृतगर्व; आनत, नम्रीकृत, पातित, अपकृष्ट. **-ing,** *s.* दर्प-मान-भंगः, अभिभवः. **-ness,** *s.* नीचता, अपकृष्टता, क्षुद्रता. 2 विनयः, नम्रता, अनहंकारः, अनभिमानः, अगर्वः, निरभिमानता, नम्रशीलता. **-Humbly,** *adv.* नीचैः, क्षुद्रतया, कृपणं. 2 सविनयं, नम्रतया, नम्रं, निरभिमानं, गर्वं विना, अनुद्धतं, नम्रचेतसा.

Humbug, *v. t.* प्रवृ c., वंच् 10; See **Cheat.** **-s.** प्रतारणं-णा, वंचना, कपटः-टं, छलं.

Humdrum, *a.* विरस, जड, मंद, फल्गु. **-s.** मूढः, स्थूलधीः.

Humerus, *s.* प्रगंडः.

Humid, *a.* आर्द्र, क्लिन्न, उन्न, सरस, तिमित. **-ity.** आर्द्रता, क्लेदः, तेमः, सरसता.

Humiliate, *v. t.* गर्वं हृ 1 P or भंज् 7 P, अभिभू 1 P, अपकृष् 1 P; See **Humble.** **-ing,** *a.* दर्प-मान-हर. **-ion,** *s.* गर्व-दर्पभंगः, अवमानना, मानभंगः-हानि *f.*, अभिभवः, अपकर्षः; दमनं; नियमनं.

Humility, *s.* विनयः, शालीनता, अगर्वः, अदर्पः, नम्रता, अनभिमानः, अनहंकारः, अनौद्धत्यं.

Humour, *s.* भावः, वृत्ति *f.*, मनोवृत्तिः, स्वभावः, शीलः-लं, प्रकृति *f.*; 'good h.' सद्भावः, सुशीलता, सौजन्यं; 'bad h.' वक्रभावः, दुःशीलं; 'joyous h.' आनंदवृत्तिः. 2 छंदः, छंदस् *n.*, मनोलौल्यं, बुद्धिचापल्यं, लहरी, चित्ततरंगः, चापलं. 3 क्लेदः, तेमः, आर्द्रता, स्नेहः, जलावसेकः. 4 रसः, जलं, धातुः (of the body); 'disorder of the three h. s.' दोषत्रयं, त्रिदोषं. 5 वैदग्ध्यं, रसिकता, रसः, सारस्यं, वैचित्र्यं. **-v. t.** (a person) चित्तवृत्तिं अनुवृत् 1 A, (अहं तावत्स्वामिनश्चित्तवृत्तिमनुवर्तिष्ये S. 2), छंदेन or छंदः (दं) अनुवृत्, भावं अनुरुध् 4 A or अनुप्र-विश् 6 P; (inclinations) अनुवृत्, अनुरुध्, अनुप्र-विश्. 2 अनुरंज् c., संतुष् c., आराध् c., प्र-सद् c., भज् 1 U, उपलल् 10, उपच्छंद् 10. **-ing,** *s.* अनुवर्तनं, अनुरोधः, छंदोनुवृत्तिः, भावानुप्रवेशः. **-ist,** *s.* वैहासिकः, हासकरः, विदूषकः, भंडः, परिहासशीलः, नर्मसचिवः. 2 रसज्ञः. **-ous,** *a.* हासकर (री *f.*), परिहासवत्, विनोदिन्, सरस, रसवत्, रसिक, हास्य, परिहासशील; विनोदनशील; oft. by परिहास or नर्म in comp.; 'a h. speech' परिहासः, परिहासजल्पितं, नर्मालापः, नर्मभाषितं. **-ously,** *adv.* सरसं, विनोदार्थं, परिहासपूर्वं. **-some,** *a.* वक्रभाव-शील, दुःशील, दुष्प्रकृति. 2 चलचित्त, लोलमति, चलप्रकृतिभाव; See **Fickle.**

Hump, *s.* ककुद् *f.*, ककुदः-दं (fig. also), अंसकूटः (of bulls); गडुः, स्थगुः; 'having a h.' ककुद्मत्, ककुद्मिन्; 'h.-backed' कुब्ज, गडुल-र, कुब्जक, वक्रपृष्ठ, न्युब्ज.

Hunch, *s.* गडुः. 2 पिंडः. **-v. t.** अरत्निना तद् 10 or प्रहृ; 'h.-backed' **Hump-backed,** q. v.

Hundred, *a.* शतं; शतसंख्यक; 'by h. s' शतशः; 'in h. ways' शतधा; 'h.-fold' शतगुण *a.*; 'the life of man extends to h. years' शतायुर्वै पुरुषः. **-s.** शतं. **-th,** *s.* शततम (मी *f.*).

Hunger, *s.* क्षुधा, क्षुध् *f.*, बुभुक्षा, जिघत्सा, अशनाया, अशनायितं; 'h.-starved' क्षुत्क्षाम, क्षुधावसन्न. **-v. i.** क्षुध् 4 P (with dat.), भुज् desid. (बुभुक्षति-ते). 2 **Long,** q. v. **-Hungry,** *a.* क्षुधित, क्षुधार्त, क्षुधान्वित, क्षुत्पीडित, क्षुधातुर, जिघत्सु, बुभुक्षु, क्षुधाव्याकुल, बुभुक्षित, अन्नार्थिन्, अशनायित; 'h. and thirsty' क्षुत्पिपासित. 2 अवसन्न, क्षीण, क्षाम, कृश.

Hunks, *s.* See *Miser.*

Hunt, *v.* मृग् 10 A, मृगयां कृ 8 U, (मृगयायां) अनुधाव् 1 P, अनुसृ 1 P, अनुवृत् 1 A, अनुबंध् 9 P. 2 अन्विष् 4 P, निरूप् 10. **-s., -ing,** *s.* मृगया, आखेटः, मृगव्यं, आच्छोदनं, पापर्द्धि *f.* 2 अनुसरणं, अन्वेषणं, मार्गणं, अनुधावनं; लाभेच्छा, लिप्सा; 'h.-dress' मृगयावेषः; 'h.-dog' विश्वकद्रुः, मृगयाकुक्कुरः. **-er, Huntsman,** *s.* व्याधः, लुब्धकः, मृगयुः, आखेटकः, मृगवधाजीवः; जीवांतकः; शाकुनिकः (of birds); वागुरिकः, जालिकः (with nets).

Hurdle, *s.* काष्ठावरणं.

Hurl, *v. t.* (तरसा-सवेगं) क्षिप् 6 P, वि-सृज्-मुच् 6 P, अस् 4 U, ईर् c., प्रेर् c., प्रहृ 1 P; 'h. down' नि अव-पत् c., अव-भ्रंश् c., अधःक्षिप्. **-s.** क्षेपः-पणं, पातनं. 2 तुमुलं, कोलाहलः. **-ing,** *s.* क्षेपणं; 'h. of stones' शिलावर्षः-आसारः.

Hurly-burly, *s.* तुमुलं, कोलाहलः, तुमुलरवः-कलकलः.

Hurrah, *interj.* जय or हर्ष-निस्वनः-शब्दः-नादः.

Hurricane, *s.* प्रकंपनः, महावातः, अतिवातः, प्रभंजनः, वात्या, प्रचंडवातः, वेगानिलः, वातालो, वात्यावेगः, चक्रवातः, जवानिलः, झंझावातः (with showers).

Hurry, *v. i.* त्वर् 1 A, शीघ्रं गम् 1 P, ससंभ्रमं गम्. **-v. t.** त्वर् c. (त्वरयति). 2 सत्वरं आकृष् 1 P or प्रणुद् 6 P, or प्रेर् c.; शीघ्रं सं-नि:-पद् c. or वि-धा 3 U or साध् 5 P. **-s.** त्वरा, संभ्रमः, रभस् *n.*, रभसः, व्यग्रता, वेगः, आकुलत्वं, आ-सं-वेगः, त्वरितगति *f.*; 'why are you in such a h.' किमसि

संभ्रांतेच (U. 3); 'in a h.' संभ्रांत, व्याकुल, व्यग्र. **-ed,** *a.* त्वरित, शीघ्र; 'a h. speech' निरस्तं वचः, त्वरितोदितं. **-edly,** *adv.* शीघ्रं, त्वरितं, सत्वरं, ससंभ्रमं, सरभसं, व्यग्रं.

Hurt, *v. t.* क्षि 5 P, तुद् 6 P, हिंस् 7 P, अर्द् 1 P or c., बाध् 1 A, व्यथ् c. (व्यथयति), द्रुह् 4 P, क्षण् 8 P, पीड् 10, अपकृ 8 U, विप्र-कृ, दु 5 P; 'does not h. one's reputation' यशः न क्षिणोति (R. II. 40). **-s** क्षतं, हिंसा, अपकारः, अपकृति *f.*, बाधा, पीडा, व्यथा. 2 अपायः, क्षयः, हानि *f.*, नाशः. **-ful,** *a.* पीडाकर (री *f.*), अपायावह, हिंसात्मक, बाधक, अपकारिन्, अहित-हानि-क्षति-कर. 2 हिंस्र, घातुक, शरारु. **-fully,** *adv.* हिंसापूर्वं, सापकारं. **-less,** *a.* अक्षत. 2 अहिंस्र, अनपकारिन्, अनुपद्रविन्.

Hurtle, *v. i.* संघट्ट 1 A, अभिसं-पत् 1 P. 2 सरभसं निष्क्रम् 1 U, 4 P or निर्गम् 1 P. 3 **Echo,** q. v.

Husband, *s.* पतिः, भर्तृ, उपयंतृ, परिणेतृ, परिग्रहीतृ, विवोढृ; कांतः, दयितः, धवः, नाथः, स्वामिन्; इष्टः, प्रियतमः, प्राणेशः, हृदयेशः, all *m.* (poetical words) ;'h. and wife' दं(जं)पती, जायापती, भार्यापती; 'h.'s brother' देवरः, देवृ *m.*, देवलः; 'a second h.' दिधिषुः; 'h.'s sister' ननांदृ; 'h.'s brother's wife' यातृ ; 'sister's h.' श्यालः, श्यालकः, आवुत्तः, भगिनीपतिः. **-v. t.** परिमितं व्यय् 10 (व्यययति), न विक्षिप् 6 P, परिमितव्ययं कृ 8 U. 2 कृष् 1 P, 6 U. **-less,** *a.* विधवा, अनाथा, पतिहीना, मृतभर्तृका, निर्णाथा. **-ry,** *s.* कृषि *f.*, कृषिकर्मन् *n.*, कर्षणं, कृषिविद्या, वैश्यवृत्ति *f.*, हलभृति *f.* 2 परिमितव्ययः, गृहकर्मनिर्वाहविद्या. **-Husbandman,** *s.* कृष(षि)कः, कर्षकः, कृषीवलः, क्षेत्रिकः, हालिकः; *See* **Farmer.** 2 वैश्यः, विश् *m.* ऊरुजः, ऊरव्यः, अर्यः, भूमिस्पृश् *m.*

Hush, *interj.* तूष्णीं भव, शांतं, वाचंयम-निःशब्द-*a.* भव. **-v. i.** शम् 4 P, प्र-उप-शम्, तूष्णीं भू, मौनीभू. **-v. t.** शम् c. (शमयति), निभृतं समा-धा 3 U; *See* **Conceal** also.

Husk, *s.* तुषः, त्वच् *f.*, कोशः, पुटः-टं, आवेष्टनं. 2 बुषं-सं, कडंगरः. **-v. t.** निस्तुषयति-निस्त्वचयति (D.), त्वचं हृ 1 P, निस्तुषीकृ 8 U. **-ed,** *a.* निस्तुष, त्वग्हीन. 2 सतुष, त्वग्युक्त. **-y,** *a.* सतुष, तुषवत्. 2 रूक्ष, कर्कश; 'in h. tones' रूक्षस्वरेण, बाष्पवृत्तिकलुषं.

Hussar, *s. See* **Cavalier.**

Hussy, *s.* बंधकी,पापा, दुष्टा स्त्री.

Hustle, *v. t.* **Drive away,** q. v. 2 संबाध् 1 A, संक्षुभ् c.

Hut, *s.* उटजः-जं, पर्णशाला, कुटीरः, तृणकुटी कायमानं.

Hutch, *s.* कुसू(सू)लः, धान्यकोष्ठः.

Huzza, *s.* जयध्वनिः, हर्षनादः-स्वनः.

Hyaline, *a.* काचमय, काचनिर्मित.

Hybrid, *a.* संकीर्णजाति, संकीर्ण, संकरजात, मिश्रज.

Hydra, *s.* जलव्याल.

Hydraulic, *a.* जल-प्रेरित-चोदित. 2 जलवाहिन्. **-s,** *s.* चलज्जलविज्ञानं.

Hydrocele, *s.* कोष-मुष्क-वृद्धि *f.*, फल or कोष-शोफः.

Hydrocephalus, *s.* मस्तिष्कशोथः, शिरोग्रहः.

Hydrography, *s.* समुद्रवेलादिविवरणं.

Hydromel, *s.* जलसंसृष्टं मधु.

Hydropathy, *s.* जलोपचारः, जलप्रयोग-चिकित्सा.

Hydrophobia, *s.* जलसंत्रासः; अलर्काभिभवः, आलर्कं.

Hydropsy, *See* **Dropsy.**

Hyemal, *a.* हैमंत (ती *f.*), शीतकालीन

Hyena, *s.* तरक्षुः-क्षः, तर्क्षुः.

Hygiene, *s.* आरोग्यविद्या.

Hygrometer, *s.* क्लेदमापकः.

Hymen, *s.* विवाहः, उद्वाहः. 2 विवाहाधिष्ठात्री देवता. **-eal,** *a.* विवाहीय, वैवाहिक-उद्वाहिक (की *f.*).

Hymn, *s.* स्तोत्रं, सूक्तं, गेयं, गानं, गीतं, स्तुतिगीतं; 'a chanter of h.s' उद्गातृ *m.*, सुम्नयुः. **-v. t.** गै 1 P, वर्ण् 10, गानद्वारेण स्तु 2 U or प्रशंस् 1 P; 'h.s praises' उपवीणयति (D.).

Hyp *s. See* **Dejection.**

Hyperbole, *s.* अतिशयोक्ति *f.*, अत्युक्तिः, वागुपचयः, सत्यातिक्रमः. **-ic, -ical,** *a.* अत्युक्तिपूर्वं, सत्यातिक्रामिन्. **-ize,** *v. t.* अत्युक्त्या वर्ण् 10 or कथ् 10.

Hyperborean, *a.* उत्तर, उदच्, उदीचीन, उत्तरीय.

Hypercritic, *s.* एकांततः गुणदोषनिरूपकः or छिद्रान्वेषिन् *m.*, दोषैकदृश् *m.*

Hypnotic, *a.* सुषुप्तिजनक.

Hypochondria, *s.* पित्तोन्मादः, वायुकोपः. 2 विषादः, उद्वेगः, अवसादः. **-cal,** *a.* पित्तोन्मादिन्, विषण्ण.

Hypocrite, *s.* दांभिकः, दंभिन् *m.*, कपटिन् *m.*, कापटिकः, कुहक-वृत्तिः, छद्म-कपट-वेशिन् *m.*, 'a religious h.' धर्मध्वजिन् *m.* लिंगवृत्तिः, बकवृत्तिः-व्रतः, आर्य-रूपः-लिंगिन् *m.*, छद्मतापसः. बैडालव्रतः. **-ical,** *a.* दांभिक, कपटिन्, छाद्मिक-कापटिक-दांभिक (की *f.*), छद्म-कपट- in comp.; 'a h. sage' छद्मतापसः, कपटव्रतिन् *m.* मुनिवेषधारिन् *m.* **-ically,** *adv.* सदंभं, सकपटं, सव्याजं; दांभिकवत्, छद्मना. **-Hypocrisy,** *s.* दंभः, दांभिकता, कपटधर्म

धर्मोपधा, बकव्रतं, धर्मध्वजमात्रं, लिंगवृत्ति *f.*, कुहकवृत्तिः, छाग्रिकत्वं, कापट्यं, सभ्याजता, आर्यरूपता.

Hypodermic, *a.* त्वगंतर्वर्त.

Hypotenuse, *s.* कर्णः, श्रुति *f.*

Hypothecate, *v. t.* आधिं गृहे गुप् 1 P; 'a h.-ed article' गोप्याधिः.

Hypothesis, *s.* उपन्यासः, प्रतिज्ञा, संकेतः, समयः. **-Hypothetic,-al,** *a.* उपन्यस्त, सांकेतिक (की *f.*), सोपन्यास, कल्पित. **-ally,** *adv.* सोपन्यासं, ससंकेतं, ससमयं, प्रतिज्ञाक्रमेण.

Hysterics, (**Hysteria,**) *s.* वातोन्मादः; हर्षमूर्च्छा, हर्षमोहः; मोहः, मूर्च्छा. **-Hysteric,-al,** *a.* हर्षमूर्च्छाल, मूर्च्छावत्; मोहोपहत, मूढ, मुग्ध.

I.

I, *pron.* अहं; oft ex. by अयं जनः (referring to persons, of any number or gender).

Ice, *s.* तुषार-हिम-संघातः, हिमसंहति *f.*, संहत-घनीकृत-जलं, हिमं; *See* **Snow** also; 'i.-berg' हिमपर्वतः-राशिः, हिमसंघातः, तुषारराशिः. **-v. t.** हिमीकृ 8 U, हिमेन शीतीकृ. **-Icy,** 'i.-cold', *a.* हिम, हिम्य, हैम (मी *f.*), तुषारवत्. 2 हिमशिशिर, शीतल; जड, शीत, शिशिर. 3 निरुत्साह, निःस्नेह, वीतराग. **-Icicle,** *s.* हिमकणः-बिंदुः.

Ichneumon, *s.* नकुलः, बभ्रुः, अंगूषः.

Ichor, *s.* पूयरक्तं.

Ichthyography, *s.* मत्स्यवर्णनं. **-Ichthyology,** *s.* मत्स्यशास्त्रं.

Icon, *s.* मूर्ति *f.*, देवताप्रतिमा. **-oclasm,** *s.* प्रतिमाभंगः. **-oclast,** *s.* देवताप्रतिमाभंजकः. **-ography,** *s.* प्रतिमालिखनं. **-ology,** *s.* प्रतिमाविद्या.

Idea, *s.* मति *f.*, बुद्धि *f.* 2 मतं, अभिप्रायः, आशयः, मनोगतं, भावः. 3 कल्पः, संकल्पः, कल्पना, भावना, वासना, बोधः; 'with the i. that' ex. by बुद्ध्या in comp. or इति कृत्वा. **-Ideal,** *a.* मनःकल्पित, मानस (सी *f.*), काल्पनिक-मानसिक (की *f.*), चित्तोद्भावित; मनसिज, मनोभव. **-s.** मनोरथसृष्टि *f.*; oft ex. by परम; 'i. of beauty' परमलावण्यं. **-ism,** *s.* बाह्यशून्यवादः. **-ly,** *adv.* मनसा, कल्पनया, भावनापूर्वं.

Identical, *a.* तद् (*pron. a.*) with एव, अनन्य, अनन्यरूप, निर्विशेष, अभिन्न, अव्यतिरिक्त, अभिन्नरूप, सम, समान, निरस्तभेद, आत्मन्-रूप in comp.; 'i. with the world' जगदात्मक विश्वरूप; 'becoming i. with Brahman' ब्रह्मसायुज्यं प्राप्त, ब्रह्मलीनः. **-ly,** *adv.* अभिन्नं, समं, निर्विशेषं. **-Identify,** *v. t.* समीकृ 8 U, तुल्यीकृ, अनन्यीकृ. 2 तदेव इति प्रति-पद् c. or वि-भू c., or अभि-ज्ञा 9 U, तुल्यत्वेन परिच्छिद् 7 P. **-v. i.** समीभू. **-ication,** *s.* समीकरणं, एकरूपता, सायुज्यं, अभिज्ञानं, विभावनं; 'i. with Brahman' ब्रह्मसायुज्यं, ब्रह्मभूयं. **-Identity,** *s.* ऐक्यं, साम्यं, संवादः, निर्विशेषः, अभेदः, अनन्यता, तादात्म्यं, सारूप्यं, सरूपता, आत्मता, सायुज्यं; 'i. of thoughts' चित्तैक्यं, एकचित्तता; 'i. of class' सावर्ण्यं, सजातित्वं; 'i. of hand' वर्णसंवादः.

-eology, *s* मानसशास्त्रं.

-...m, *s.* वाक्पद्धति-रीति *f.*, वाग्व्यवहारः, वाकृतंप्रदायः, विशिष्टस्वरूपं. **-atic,** *a.* Ex. by (*s.*).

Idiosyncrasy, *s.* देहस्वभावः, जातिस्वभावः.

Idiot, *s.* जडः, मूर्खः, अनात्मज्ञः, मूढः, वैधेयः, बालिशः, अज्ञः, निर्बुद्धिः. **-ic,** *a.* जड, मूढ, मूर्ख, हतज्ञान, बुद्धिविकल. **-Idiocy,** *s.* मूढता, मूर्खता, जाड्यं, अज्ञता, बालिशता; *See* **Fool,-ish, Folly.**

Idle, *a.* अलस, कर्म or कार्य-विमुख or पराङ्मुख (खी *f.*), कर्मद्वेषिन्, आलस्यशील, अनुद्योगशील. 2 अव्यापृत, निरुद्योग, निर्व्यवसाय, कर्म or कार्य-शून्य or रहित, निर्व्यापार, निरुद्यम, निश्चेष्ट; उदासीन, निरुत्साह. 3 निरर्थक, निष्प्रयोजन, व्यर्थ, मोघ; 'it were i. to talk of friend or foe in Govinda' गोविंदविषये मित्रामित्रकल्पनं व्याघातः, व्याहतं एव; 'to be i.' उदास् 2 A; 'i. talk' वृथालापः, वृथाकथा. **-v. t.** (time) उदास्, कालं मुधा क्षै c. (क्षपयति) or नी 1 P or अतिवह् c., कालं हृ 1 P or क्षिप् 6 P, कालक्षेपं कृ 8 U, अलस-निर्व्यापार -*a.* भू. **-er,** *s.* निर्व्यापारः, कालक्षेपकः, कार्यद्वेषः, मुखनिरीक्षकः. **-ness,** *s.* आलस्य, कार्यद्वेषः, कार्यविमुखता, उदासीनता. 2 अनुद्योगः, अव्यापारः, कार्यशून्यता, कालक्षेपः-पणं. **-Idly,** *adv.* आलस्येन, अलसवत्. 2 निरुद्योगं, निर्व्यापारं. 3 निरर्थकं, व्यर्थं, वृथा, मुधा.

Idol, *s.* (देव-) प्रतिमा-मानं, मूर्ति *f.*, दैवतं, देवता, देवताविग्रहः, प्रतिकृति *f.* 2 (Fig.) आराध्यदेवता; 'attendant on an i.' देवलः, देवाजीवः-विन् *m.* **-Idolater,** (**Idolatrous**) *s.* मूर्ति-प्रतिमापूजकः-अर्चकः-उपासकः, देवतार्चकः, प्रतिमासेविन् *m.* **-Idolatry,** *s.* प्रतिमा or मूर्ति-पूजा or अर्चनं, देवतार्चनं, प्रतिमासेवा देवतोपासना, मूर्तिसेवा-उपासनं. **-Idolatrize,** *v. i.* प्रतिमां पूज् 10 or अर्च् 1 P. 10. **-Idolize,** *v. t.* दैवतं इव आराध् c.

दैववत् पूज्, or भज् 1 U; एकांततः प्री-अनु-रंज्-pass., अत्यंतानुरक्त-*a.* भू, अतिप्रेम कृ 8 U.

Idoneous, *a. See* **Fit.**

If, *conj.* यदि, चेत (not at beginning); 'if so' यद्येवं, एवं स्थिते; 'if not' नोचेत, अन्यथा, यदि न; 'as if' इव.

Igneous, *a.* अग्निमत्, आग्नेय-आग्निमय (यी *f.*).

Ignis-Fatuus, *s.* मिथ्याग्निः, मिथ्यादीप्ति *f.*, दीप्त्याभासः.

Ignite, *v. t.* ज्वल् c., दीप् c., सं-इंध् 7 A, संधुक्ष् 10, दह् 1 P, तप् c. **–***v. i.* ज्वल् 1 P, दीप् 4 A, सं-इंध् pass. **–ion,** *s* दीपनं, ज्वलनं, इंधनं.

Ignoble, *a.* अकुलीन, हीनजाति-वर्ण, नि-अप-कृष्ट, नीच, अधम, जघन्य, अनार्य; *See* **Base. 2** अकीर्तिकर-लज्जाकर (री *f.*). **–Ignobly,** *adv.* अनार्यवत्, नीच-अधम-वत्.

Ignominy, *s.* **Disgrace,** q. v. **2** अपकर्षः, अवज्ञा, अपमानः, कलंकः, अप्रतिष्ठा, तिरस्कारः, परिभवः. **–ious,** *a.* अपकीर्ति-लज्जा-कलंक-कर (री *f.*), गर्ह्य, कलंकावह, वाच्य.

Ignoramus, *s.* अज्ञः, पंडितंमन्यः.

Ignore, *v. t.* न ज्ञा 9 U, न स्वीकृ 8 U. **–ance,** *s.* अज्ञानं, अविद्या, ज्ञानाभावः, अबोधः, मोहः. **2** ज्ञानहीनता, अनभिज्ञता, अज्ञता, अनभिज्ञानं, निर्बुद्धित्वं; 'difference imagined by i.' अविद्याकल्पितभेदः. **–ant,** *a.* अज्ञ, अवेदिन्, अज्ञान, अनभिज्ञ, oft. ex. by not 'know', q. v. **2** अप्राज्ञ, अविज्ञ, अपंडित, दुर्बुद्धि, निर्बुद्धि, अ-निर्-बोध, विद्या-ज्ञान-प्रज्ञा-बोध-हीन-शून्य-रहित, दुर्मति, अविद्वस्. **–antly,** *adv.* अज्ञानतः, अज्ञानेन, अज्ञान-अबोध-पूर्वं.

Iguana, *s.* गोधा, गौधारः.

Iliac, *a.* आंत्रिक (की *f.*), अंत्र in comp.; 'i. pain' अंत्रशूलं, शूलव्याधिः-रोगः.

Ill, *a.* दुष्ट, पाप, असत्, असाधु, गर्ह्य, खल, कुत्सित, अभद्र, अमंगल, अशुभ, gen. ex. by दुर्, कु, अप, वि, कद्, pr.; *See* **Bad;** oft. by अ in comp. **2** अस्वस्थ, अस्वस्थ-असुस्थ-शरीर, असुस्थ, असुस्थित, व्याधित, सामय, रोगिन्; gen. ex. by आर्त, ग्रस्त, आतुर, पीडित in comp.; 'i. with fever' ज्वरार्त, ज्वरपीडित. **–***s.* दुष्टता, खलता, असाधुता. **2** पापं, दुराचारः, अधर्मः, दुर्वृत्तं, दोषः, अपराधः. **3** अनिष्टं, अशुभं, अमंगलं, अकुशलं, अभद्रं, दुःखं, दुर्गति *f.*, आपद्-विपद् *f.*, व्यसनं, उत्पातः, अनर्थः, अरिष्टं, अनिष्टपातः, कष्टः-ष्टं, अपायः. **4** अपकारः, अपकृति *f.*, अहितं, अपायः, क्षति-हानि *f.*, क्षयः, अपचयः. **5** रोगः, व्याधिः, आमयः, पीडा, उपतापः, अस्वास्थ्यं, *See* **Disease.** **–***adv.* असाधु, अनार्यं, असम्यक्, दुष्टं. **2** दुःखेन, कष्टेन, कृच्छ्रेण; in comp. words, ex. by दुर्, कु, अप, वि, कद्, अ, दुष्ट, पाप; 'i.-advised' अपरीक्षित, अविमृश्य कृत; 'i.-affected' वि-अप-रक्त, द्रोहबुद्धि, अहितैषिन्; 'i.-arranged,-ordered,-regulated' दुष्क्रम, दुर्विरचित, अव्यवस्थित; 'i.-behaved,-bred,-natured' अविनीत, दुःशील, दुर्वृत्त, कुशील, अविनय, दुर्विनीत, अशिष्ट, असभ्य, दुराचार, पाप, कुवृत्ति, विनयापेत; 'i.-breeding' अविनयः, दुःशीलता, असभ्यता, विनयप्रमाथः, दुर्वृत्ति *f.*, दुराचारः; 'i.-conditioned' दुर्गत, दुःस्थित; 'i.-dressed' दुर्वासस्, कुप्रावृत; 'i.-fame' अयशः, अपकीर्ति *f.*, अप्रतिष्ठा; 'i.-fated' दुर्भाग्य, मंदभाग्य, दुर्दैव, दैवोपहत, दुर्दैवग्रस्त-उपहत; 'i.-favoured, -formed,-shaped' अप-कु-रूप, कदाकार, दुर्दर्शन; 'i.-fitted' अयोग्य, अनर्ह, अनुचित; 'i.-gotten' अन्यायार्जित; 'i.-grounded' अमूलक; 'i.-judged' अविमृश्य-अविचार्य-कृत, अनालोचित; 'i.-judging' विवेकशून्य; निर्विवेक; 'i.-looking' दुर्दर्शन, कुरूप; 'i.-luck' दुर्दैवं, दुर्भाग्यं, मंदभाग्यं, दैवविपर्यासः-दुर्विपाकः, दुर्जातं, अनिष्टं; *See* (*s.*); 'i.-nature,-temper' दुः-शीलं, दुष्प्रकृति *f.*, वक्रभावः-शीलं, वामशीलं, भावप्रतीपता, वामशीलता, स्वभाववक्रता 'i.-natured, -tempered' दुष्प्रकृति, वक्र वाम-शील, दुष्ट-खल-स्वभाव, कटु-कर्कश-प्रतीप-स्वभाव, कु-दुः-शील; 'i.-omened' अशुभसूचक, अनिष्टशंसिन्, अनिष्टलक्षण; 'i.-sounding' अपस्वर, वि-कु-स्वर, कटु; 'i.-timed अकाल, अप्राप्तकाल, अप्राप्तावसर, अनवसर, आकालिक (की *f.*); 'i.-treat' विप्र-अप-नि-कृ 8 U, उपद्रु 1 A, पीड् 10, अर्द् 1 P or c., खलीकृ; 'i.-treatment' अपकारः, पीडा, अर्दनं; *See* (*s.*); 'i.-turn' अपकारः, पापं, अप्रियं अहितं, हिंसा, द्रोहः; 'i.-will' दुष्टभावः-बुद्धिः, द्रोहः, द्वेषः, मात्सर्यं, असूया. **–ness,** *s.* रोगः, व्याधिः, आमयः, रुजा, अस्वास्थ्यं, पीडा, बाधा, आर्ति *f.*, क्लेशः, उपतापः, दुःखं, विकारः, विकृति *f.*; 'dangerous i.' जीवितसंशयः, सान्निपातः.

Illapse, *s.* सहसा प्रवेशः or आक्रमणं. **–***v. i.* सहसा प्रविश् 6 P or पत् 1 P.

Illation, *s.* अनुमानं, तर्कः. **–Illative,** *a.* आनुमानिक (की *f.*). **–ly,** *adv.* अनुमानेन, अपोहेन.

Illegal, *a.* नियम-विधि-विरुद्ध, शास्त्र-स्मृति-व्यवहार-न्याय-विरुद्ध, स्मृत्यपेत, अधर्म्य, अन्याय्य, न्याय-धर्म-रोधिन्, अविधि. **–ity,** *s.* विधि-धर्म-शास्त्र-नियम-विरोधः, अन्याय्यता, अधर्म्यता, अव्यवस्था, नियम-व्यवस्था-विधि-भंगः. **–ly,** *adv.* नियम-विधि-विरुद्धं.

Illegible, *a.* दुर्वाच्य, अव्यक्ताक्षर, अस्पष्टाक्षर, अस्पष्ट-अव्यक्त-वर्ण.

Illegitimate, *a.* अन्याय्य, विधिविरुद्ध; *See* **Illegal. 2** विजात, जारजात, जारज, असतीप्रसूत, अनौरस, विजन्मन्, जारोत्पन्न. 3 कृत्रिम. कृतक, कल्पित; 'an i. child' अनौरसः-सी, जारजः-जा, दासीपुत्रः, कौलटेयः-यी, कौलटेरः-री, बंधकी-उपत्नी-सुतः-ता, बंधुलः, कौलटिनेयः-यी. **-ly,** *adv.* विजन्मना; अधर्मेण. **-Illegitimacy,** *s.* विजन्मन् *m.*, वैजात्यं, अनौरसत्वं.

Illiberal, *a.* अनुदार, कृपण, कृपणबुद्धि-चेतस्-स्वभाव, (lit. and fig.) ; अत्याग-अदान-शील, अवदान्य. **-ity,** *s.* अत्यागः, अवदान्यत्वं, अनौदार्यं, कार्पण्यं, नीचता, दीनता.

Illicit, *a.* प्रति-नि-षिद्ध, अधर्म्य, अन्याय्य, नियम-धर्म-विरुद्ध, व्यवहारविरोधिन्.

Illiterate, *a.* अशिक्षित, अप्रबुद्ध, असंस्कृत, अव्युत्पन्न, विद्या-ज्ञान-हीन, निरक्षर, अनक्षर, असंस्कृतचित्त.

Illimited,-able, *a.* निरवधि; अनंत, अमेय, असीम, अमित, अमर्याद; *See* **Endless.**

Illogical, *a.* अयुक्तिसिद्ध, न्यायविरुद्ध-विपरीत, अन्यायानुसारिन्, अन्याय्य, अतार्किक (की *f.*) ; 'i. conclusion' अपसिद्धांतः, अविनिगमः. **-ly,** *adv.* न्यायविरुद्धं.

Illude, *v. t.* वंच् 10, मुह् c., प्रलृ c.; *See* **Cheat. -Illusion,** *s.* माया, प्रपंचः, इंद्रजालं, अलीकता, अविद्या; *See* **Delusion. Illusive, -Illusory,** *a.* मायिन्, अलीक, ऐंद्रजालिक; *See* **Delusive.**

Illume, Illumine, Illuminate, *v. t.* द्युत्- c., प्रकाश् c. उद्भास् c., उद्दीप् c., वि-,राज् c., भ्राज् c., उज्ज्वल् c. **2** (पत्राणि) रंज् c. **-Illumination,** *s.* उद्भासनं, द्योतनं, प्रकाशनं, उज्ज्वलनं, दीप्ति-द्युति-*f.*, भ्राजिष्णुता. **2** (i. s) दीपालि *f.*, दीपमाला-समूहः, दीपोत्सवः. 3 पत्ररंजनं. **-Illuminator,** *s.* द्योतकः, प्रकाशकः, दीपकः. **2** पत्ररंजकः.

Illustrate, *v. t.* व्या-ख्या 2 P, व्या-चक्ष् 2 A, स्पष्टीकृ 8 U, विवृ 5 U; उदा-हृ 1 P, निर्दिश् c., निदर्शनेन व्या-ख्या, व्यक्ती-विशदी-कृ, चित्रेण स्पष्टीकृ, प्रकाश् c., द्युत् c., शुभ् c., दीप् c, चित्रादिना शुभ् c. **-ion,** *s.* उदाहरणं, दृष्टांतः, निदर्शनं, व्याख्या-ख्यानं, प्रकाशनं, निरूपणं. **-ive,** *a.* प्रकाशक, दार्ष्टांतिक (की *f.*). **-or,** प्रकाशकः, निदर्शकः, व्याख्यातृ *m.*

Illustrious, *a.* विश्रुत, ख्यात, प्रथित, प्रसिद्ध, महायशस्क; *See* **Famous. 2** विशिष्ट, उत्तम, उत्कृष्ट, परम, प्रमुख, महत्. **-ly,** *adv.* विश्रुतं, प्रथितयशसा, विशिष्टतया. **-ness,** *s.* विश्रुति-ख्याति- *f.*

Image, *s.* प्रतिमा, मूर्ति *f.*, प्रतिकृति *f.*- मूर्तिः-मानं-रूपं, प्रतिच्छंदकः 2 प्रतिबिंबं, बिंबं, छाया, प्रतिच्छाया, प्रतिच्छंदः-दकः; 'this youth is the complete i. of Râma' रामस्याकृतिरस्मिन् शिशौ संपूर्णं प्रतिबिंबिता (U. 4). **3 Idea,** q. v.; 'iron i.' लोहप्रतिमा, स्थूणा, सू(शू)र्मी. **-*v. t.*** मनसा कॢप् c. or चिंत् 10, प्रतिबिंबयति (D.) ; 'i. various shapes' तैस्तैराकृतिविशेषैरनुगताः (Mr. 5). **-ery,** *s.* मनः-कल्पना-सृष्टि *f.*-संकल्पः, भावना, वासना. **2** उपलक्षणं, लक्षणा. **3** आभासः, आडंबरः, अनुकारः.

Imagine, *v. t.* मनसा कॢप् c., सं-परि°, सं-वि-भू c., सृज् 6 P, ध्यै 1 P. **2** मन् 4 A, गण् 10, चिंत् 10, तर्क् 10, उत्प्रेक्ष् 1 A, बुध् 1 P, अव-इ 2 P, अवगम् 1 P, उपलभ् 1 A. **-able,** *a.* संभाव्य, चिंतनीय, बोधगम्य; 'with all i. ease' मनसोप्यगोचरीभूतया-मनसाप्यकल्प्यमानया-लीलया. **-ary,** *a.* मनःकल्पित, वासना-भावना-सृष्ट,मनोरथसृष्ट, मानस (सी *f.*), काल्पनिक (की *f.*), संकल्पज. **2** अमूलक, असत्य, मायामय (यी *f.*). **-ation,** *s.* भावना-नं, कल्पना-नं, संकल्पः, वासना, मनःकल्पना. **2** (Faculty of i.) कल्पना-तर्क-शक्ति *f.*, भावना, उपलब्धि *f.* **-ative,** *a.* कल्पक, विभावक, भावनापर, कल्पनाशील.

Imbecile, *a.* दुर्बल, अशक्त, क्षीणबल; *See* **Feeble. 2** (In mind) न्यूनबुद्धि, अल्प-विकल-मति, बालिश, कृपणबुद्धि. **-ity,** *s.* दौर्बल्यं, न्यूनबुद्धिता, बालिशत्वं.

Imbed, *v. i.* अंतर्मस्ज् 1 P, निविश् 6 P.

Imbibe, *v. t.* नि-पा 1 P, आ-पा, चुष् c. **2** (Fig.) अधिगम् 1 P, मनसा ग्रह् 9 U or आकल् 10 (कलयति) or उपलभ् 1 A.

Imbricate, *v. t.* आतिव्याप् 5 P.

Imbroglio, *s. See* **Embroglio.**

Imbrue, *v. t.* सिच् 6 P, लिप्, 6P, उक्ष् 1 P, क्लिद् c.; अंज् 7 P, दिह् 2 U; 'i. ed with blood' रक्ताक्त, रक्तक्लिन्न.

Imbue, *v. t.* अभिरंज् c. **2** शास् 2 P, उपदिश् 6 P, शिक्ष् c.

Imitate, *v. t.* अनुकृ 8 U (oft. with gen.), अनुगम्-सृ 1 P, अनु-इ-या 2 P, अनुवृत् 1 A, अनुवि-धा 3 U, अनुवद् 1 P, अनुह् 1 P, विडंब् 10. **-ion,** *s.* अनुकारः-करणं, अनुकृति *f.*, विडंबनं, अनुवृत्ति *f.*, अनुसरणं. **2** उपमानं, प्रतिकर्ष, सादृश्यं. **-ive,** *a.* अनुकरणशील, अनुकारिन्, अनुगामिन्. **-or,** *s.* अनुकर्तृ *m.*, अनुकारकः, अनुयायिन्-अनुकारिन् *m.*, अनुमतिकः.

Immaculate, *a.* निष्कलंक, निर्मल, अकल्मष, अनघ, निर्दोष, विमल.

Immanent, *a.* अंतर्भव, अंतरस्थ.

Immaterial, *a.* अमूर्त, निरवयव, अशरीरिन्, अमूर्तिमत्. 2 लघु, अगुरु, अगुर्वर्थ, यत्किंचित्, निष्प्रयोजन, अनावश्यक (की *f.*), निरर्थक. **-ism,** *s.* निराकारवादः. **-ist,** *s.* निराकारवादिन् *m.* **-ity,** *s.* अमूर्तता, अशरीरिता. **-ly,** *adv.* निरर्थकं, निष्प्रयोजनं.

Immature, *a.* अपक्व, अपरिणत, असंपूर्णकाल, असिद्ध, अप्राप्तकाल आकालिक(की *f.*). **-ly,** *adv.* अपक्वं, अपरिणतं, अप्राप्तकालं, अतिशीघ्रं, परिणामकालात् प्राक्. **-ity,-ness,** *s.* अपाकः, अपरिपाकः, अपरिणामः, अप्रौढता, अप्राप्तकालता.

Immeasurable, *a.* अमेय, अमित, अपरिमाण, दुर्मेय, महत्, बहु, अति pr.

Immediate, *a.* अनंतर, अव्यवहित, निरंतर, अव्यवधान. 2 तात्कालिक (की *f.*), सद्यस्क, अचिर, शीघ्र; better by 'i. ly.' 3 सन्निहित, उपस्थित, आसन्न, निकट. **-ly,** *adv* सद्यः, सपद्येव, समनंतरमेव, सपदि तत्क्षणात्, तत्काले, सद्य एव, झटिति, द्राक्, आशु, अविलंबितं, अचिरादेव; oft. by एव or मात्र; 'i. after he had spoken' तस्मिन्नुक्तवत्येव; मुक्तमात्रे सायके &c.

Immedicable, दुरुपचार, अचिकित्स्य.

Immemorable, *a.* अस्मर्तव्य.

Immemorial, *a.* अस्मार्त, स्मरणातिक्रांत, अतिप्राचीन, अनादि; 'i. succession' अनादिपरंपरा; 'from times i.' अनादिकालात्, अस्मार्तकालात्.

Immense, *a.* अत्यंत, अपरिमेय, अतिमात्र, अनंत, अपरिमाण, अमित, अतिमर्याद, दुर्मेय; महत्, बृहत्, सु-अति-महत्, अतिबृहत्. **-ly,** *adv.* अत्यंतं, अतिमात्रं. **-ity,** *s.* आनंत्यं, अमितता, अपरिमाणत्वं, महत्त्वं, सुमहत्त्वं. **-urable,** *a.* *See* **Immeasurable.**

Immerge, Immerse, *v. t.* अवगाह् c., निमस्ज् c. (मज्जयति), आप्लु c., जले प्रविश् c. **-ed,** *a.* मग्न, नि-अभिनि-विष्ट, व्यापृत, लीन, आसक्त, निष्ठ-पर-तत्पर-in comp.; *See* **Fixed, Intent.** **-Immersion,** *s.* निमज्जनं, अवगाहः-हनं, आप्लावः, स्नानं, अभिषेकः. 2 मग्नता, निष्ठा, तत्परता, अभिनिवेशः.

Immethodical, *a.* क्रमहीन, क्रमविरुद्ध, अव्यवस्थित. **-ly,** *adv.* क्रमविरुद्धं, अक्रमेण.

Immigrate, *v. i.* देशांतरं अधिवस् 1 P or अध्यास् 2 A (with acc.). **-ion,** *s.* देशांतराधिवासः, देशत्यागः. **-Immigrant,** *s.* देशांतराधिवासिन् *m.*

Imminent, *a.* उपस्थित, आसन्न, संनिकृष्ट, उपनत, निकट-आसन्न-वर्तिन्; 'a drought is i.' अनावृष्टिः संपद्यते लग्ना (P. I. 7). 2 आत्ययिक (की *f.*), जीवितसंशयावह, 'he stood in i. peril of death' महति जीवित, संशये अवर्तत.

Immit, *v. t.* *See* **Place.**

Immobile, *a.* स्थिर, निश्चल, अचल, निष्कंप.

Immoderate, *a.* अमित, अपरिमित, अमर्याद, अत्यंत, अतिमात्र, अत्यधिक, सु-अति pr. **-ly,** *adv.* अतिमात्रं, अत्यंतं, सु-अति-pr. **-ion,** *s.* अमर्यादा, मर्यादातिक्रमः, अत्याचारः, अतिरेकः, अतिशयः.

Immodest, *a.* वैयात, निर्लज्ज, निस्त्रप. अविनीत, प्रगल्भ, धृष्ट, लज्जा-व्रीडा-त्रपा-हीन. 2 अश्लील, ग्राम्य, अवाच्य, अशुद्ध, अशुचि. 3 असाधु, असद्वृत्त, पांसुल, व्यभिचारिन्. **-ly,** *adv.* निर्लज्जं, प्रगल्भं, धृष्टवत्, अश्लीलं. **-y,** *s.* वैयात्यं, अविनयः, प्रागल्भ्यं, धृष्टता निर्लज्जत्वं.

Immolate, *v. t.* (यज्ञे) हन् 2 P, विशस् 1 P, उपहारीकृ 8 U, हत्वा उत्सृज् 6 P, बलिं दा 3 U or कृ, आलभ् 1 A, सं-ज्ञा c (ज्ञपयति); 'i. oneself' प्रेतेन सह आत्मानं दह् 1 P, सह गम्. **-ion,** *s.* उपहारीकरणं, उपहारः, बलिदानं, आलंभः, संज्ञपनं, उत्सर्गार्थं वधः or विशसनं.

Immoral, *a.* असाधु, दुश्चरित्र, दुर्वृत्त, दुराचार-पापकर्मन्, व्यभिचारिन्, व्यसनिन्, पापिन्; दुष्ट, धर्मविरुद्ध, अपुण्य, अशुचि, पाप. **-ity,** *s.* असाधुता, दुर्वृत्तता; व्यसनं, अधर्मः, पापं, पापचरितं, दुश्चरितं, व्यभिचारः. **-ly,** *adv.* धर्मविरुद्धं, दुराचारेण.

Immortal, *a.* अमर, अमर्त्य, जरामरणरहित, अक्षय, अजर, निर्जर, अनश्वर, अविनाशिन्, नित्य, सनातन (नी *f.*), अनंत, शाश्वत (ती *f.*), सदास्थायिन्. **-ity,** *s.* अमरता-त्वं अनश्वरता, आनंत्यं, नित्यता. **-ize,** *v. t.* अमरी-अक्षयी-कृ 8 U; better by (*a.*). **-ly,** *adv.* अजरं, अक्षयं, अनश्वरं, शाश्वतं.

Immoveable, *a.* अचल, स्थिर, स्थावर, अचर, अजंगम.

Immune, *a.* मुक्त, रहित; ex. by अ or निर् pr. अगम्य, अक्षम, अनर्ह. **-ity,** *s.* मुक्ति *f.*, मोक्षः. 2 अभावः, विरहः न्यूनता, राहित्यं; oft. by अ or निर् pr.; 'i. from danger' अभयं, निर्भयत्वं.

Immure, *v. t.* नि-अव-रुध् 7 U, बंध् 9 संयम् 1 P, कारायां गुप् 1 P. 2 परिवृ 5 U, परिवेष्ट् 1 A or c.

Immutable, *a.* अव्यय, निर्विकार, नित्य, अविक्रिय, विकाराक्षम, स्थिर, निर्विकल्प, अपरिवर्तनीय. **-Immutability,** *s.* अविकारः, नित्यता, अव्ययः.

Imp, *s.* पिशाचः, भूतः; *See* **Devil, Demon.**

Impact, *s.* संस्पर्शः, संपर्कः, समा-प्रति-घातः, संघट्टः.

Impair, *v. t.* ह्रस् c., अप-चि 5 U, क्षि 1, 5 P or c., नश् c., विलुप् c., लघूकृ 8 U, ऊन् 10, उप-हन् 2 P, दुष् c. (दूषयति), अल्पीकृ, विकलीकृ, क्षिणीकृ. 2 तेजः-बलं-हृ 1 P, दुर्बलीकृ. **-ed,** *a.* ह्रसित, क्षीण, विकल, अपचित, उपहत, विशीर्ण, लुप्त, न्यूनी-विकली-कृत; 'i. in strength' क्षीणबल, निःसत्व. **-ing,** *s.* क्षयः, ह्रासः, अपचयः, अवसादः; वैकल्यं, न्यूनता, लोपः.

Impale, *v. t. See* **Empale.**

Impalpable, *a.* अस्पृश्य, अग्राह्य, स्पर्शाव्यक्त, इंद्रियागोचर, अव्यक्त, अतिसूक्ष्म.

Imparity, *s.* वैषम्यं, भेदः, असाम्यं.

Impart, *v. t.* दा 3 U, 1 P, प्रति-पद् c., सम्-ऋ c. (अर्पयति), निक्षिप् 6 P, संक्रम् c., ग्रह् c., वि-तॄ 1 P (with loc.), संसृज् 6 P, सुवर्णविकारा अपीतौ न सुवर्णमात्मीयेन धर्मेण संसृजंति (S. B. 431) 'do not i. to gold their properties'. 2 नि-आ-विद् c., कथ् 10; प्रकाश् c., वि-ज्ञा c (ज्ञापयति), ख्या 2 P or c. 3 संचर् c., संक्रम् c.

Impartial, *a.* अपक्षपातिन्, समक्रिय, समदर्शिन्, समवृत्तिभाव, उदासीन, मुक्तसंग, सर्वसम, पक्षपातहीन, न्यायवर्तिन्, न्याय्य, धर्म्य. **-ity,** *s.* अपक्षपातः, धर्मः, समता, निःसंगता, औदासीन्यं, न्याय्यता. **-ly,** *adv.* न्यायेन, निःसंगं, अपक्षपातेन.

Impartible, *a.* अविभाज्य, अवंटनीय.

Impassable, *a.* अगम्य, अलंघ्य, दुस्तर, दुर्गम, दुस्तार्य, गहन, संबाध, संकट.

Impassible, *a.* अ-निः-चेतन, सुखदुःखाक्षम.

Impassioned, *a.* अनुरक्त, अनुरागवत्, रागान्वित, बद्धभाव, सानुराग, प्रीत्याकृष्ट, आसक्तचित्त. 2 सरस, रसिक, रागयुक्त, रागिन्; 'what an i. strain अहो रागपरिवाहिणी गीतिः (S. 5).

Impassive, *a.* विकार-अक्षम-अगम्य.

Impatient, *a.* (For) उत्सुक, व्यग्र सोत्कंठ, प्रसित, उत्क; *See* **Eager. 2** (Of) असह, असहन, अक्षमिन्, असहिष्णु, अक्षम. 3 अधीर, कालहरणाक्षम, अमर्षण, अतितिक्षु. **-ly,** *adv.* अधीरं, सोत्सुकं, व्यग्रं, सावेगं, अक्षांत्या. **-Impatience,** *s.* अधीरता, औत्सुक्यं, व्यग्रता, उत्कंठा, अक्षमा, असहत्वं.

Impawn, *v. t. See* **Pledge.**

Impeach, *v. t.* अभियुज् 7 A, 10, अभिशंस् 1 P, अपवद् 1 U, आधृष् c. **-er,** *s.* अभियोगिन्-योक्तृ *m.* **-ment,** *s.* अभियोगः, अभिशंसनं.

Impeccable, *a.* अपाप, निर्दोष.

Impecunious, *a.* दरिद्र, अकिंचन, निर्धन.

Impede, *v. t.* रुध् 7 U, प्रतिबंध् 9 P, वि-प्रति-हन् 2 P, नि-वृ c., स्तंभ् 9 P, or c., बाध् 1 A, कुंठयति (D.). **-Impediment,** *s.* विघ्नः, प्रत्यूहः, अंतरायः, व्याघातः, उपरोधः, प्रतिबंधः; *See* **Obstacle.**

Impel, *v. t.* नि-प्र-उद्-चुद् 10, प्रवृत् c., प्रोत्सह् c., उत्तिज् c., प्रेर् c., क्षुद् 6 P or c., प्रणुद्, प्रचुद् 10, कृष् 1 P; *See* **Drive. -lent,** *s.* प्रवर्तकः, प्रेरकः, प्रोत्साहकः, प्रचोदकः.

Impend, *v. i.* आ-प्र-लंब् 1 A, उपरि लंब्. 2 उपगम् 1 P, समा-पत् 1 P, प्रत्या सद् 1 P, उप-स्था 1 U, उपागम् 1 P, निकटे-समीपे-वृत् 1 A, or स्था; 'an untimely storm i. s' उपगमत्यकालदुर्दिनं (Mr. 5); 'a drought is closely i. ing' अनावृष्टिः संपद्यते लघ्वा (P. I. 7). **-ent,-ing,** *a.* उपस्थित, आसन्न, निकटवर्तिन्, उपनत, उपगमत्.

Impenetrable, *a.* अभेद्य, अच्छेद्य, अप्रवेश्य, गहन, दुर्गम. 2. कठिन, वज्रमय (यी *f.*); 'darkness i. by the sun' अभानुभेद्यं तमः.

Impenitent, *a.* अननुशायिन्, अननुतापिन्, खेद्, पश्चात्ताप-हीन, अननुतप्त. **-Impenitence.** *s.* अननुतापः, अननुशयः, अखेदः; कठिनता, कठोरता.

Imperative, *a.* आज्ञापक, आदेशक, नियोजक, विधायक, प्रचोदक. 2 अविचार्य, अवश्यकर्तव्य, अनुपेक्ष्य; 'i. mood' लोट्, आज्ञार्थः. **-ly,** *adv.* अवश्यमेव.

Imperceptible, *a.* अस्पष्ट, अव्यक्त, अविभाव्य, अगोचर, अगम्य; 'i. to the senses' इंद्रियागोचर, इंद्रियातीत, अतींद्रिय; 'i. to the eye' अप्रत्यक्ष, परोक्ष, नयनागोचर; 'i. difference' अतिसूक्ष्मः भेदः. **-Imperceptibly,** *adv.* अव्यक्तं, अगोचरं, अलक्षितं, निभृतं.

Imperfect, *a.* अपूर्ण, अपरिणत, असंपन्न, अपक्व, असमाप्त, असमग्र. 2 न्यून, विकल, लुप्त, हीन, सदोष, सच्छिद्र, ऊनावयव, विकलेंद्रिय, विकलांग; 'i. memory विकला स्मृतिः; 'i. comparison' लुप्तोपमा; 'i. tense' लङ्. **-ion,** *s.* दोषः, छिद्रं, रंध्रं, अगुणः दूषणं; कलंकः, वैकल्यं, न्यूनता, हानि *f.*, क्षति *f.*, अपर्याप्ति *f.* **-ly,** *adv.* असंपूर्णं, असम्यक्, विकलं.

Imperforate, *a.* नीरंध्र, अच्छिद्र.

Imperial, *a.* महेश्वरीय, महाराज-अधिराज-in comp.; 'i. rule' आधिराज्यं, चक्रवर्तित्वं.

Imperil, *v. t. See* **Endanger.**

Imperious, *a.* आज्ञापक. 2 दृप्त, उद्धत, धृष्ट, अवलिप्त, सावलेप; 'in an i. tone' सावलेपं, तर्जयंत्या गिरा, उद्धतं, साटोपं. **-ness,** *s.* दर्पः, अवलेपः उत्सेकः, औद्धत्यं; *See* **Pride.**

Imperishable, *a.* अनश्वर, अक्षय-य्य, अक्षयिन्, अविनाशिन्, अव्यय, अजर, अक्षर.

Impermeable, *a.* अप्रवेश्य, अभेद्य.

mpersonal, *a.* अकर्तृक, अकर्तृवाच्य; ex. by भाव 'i. verb, भाववाच्यं.

npersonate, *v. t.* चेतनवत् उपचर् 1 P. (with loc.). 2 **Feign,** q. v.; 'i. ed Râma' गृहीतरामरूपः वेशः.

Impertinent, *a.* विधात, अशिष्ट, प्रगल्भ, धृष्ट, अविनीत, दुः-कु-शील. 2 अप्रस्तुत, अप्रकृत, अप्रासंगिक (की *f.*); असंगत, असंबद्ध, निष्प्रयोजन, अनर्थक. 3 पराधिकारचर्चक, अव्यापारेषु व्यापारं कुर्वत्. **-ly,** *adv.* अविनयेन, धृष्टतया, प्रगल्भं, अप्रस्तुतं. **-Impertinence,** *s.* अविनयः, प्रागल्भ्यं, धृष्टता, अशिष्टता, वैयात्यं. 2 अप्रस्तुतत्वं, असंबंधः, अनन्वयः, असंगतता.

Imperturbable, *a.* अक्षोभ्य, निर्विकार, समवृत्ति-बुद्धि; अपारिप्लव.

Impervious, *a.* दुर्भेद्य, दुष्प्रवेश्य, अभेद्य. 2 गहन, निबिड, अगम्य, संकट, संबाध, नीरंध्र.

Impetuous, *a.* तीव्र, चंड, तीक्ष्ण, उग्र, प्रबल, अविमृश्य कृत, वेगवत्, सरभस. 2 संरंभिन्, साहसिन्, अमर्षण, साहसिक (की *f.*), असमीक्ष्यकारिन्, तीक्ष्णकर्मन्. **-ly,** *adv.* वेगेन, महावेगेन, सवेगं, उग्रं, ससंरंभं, तीक्ष्णं, साहसेन, सरभसं, तरसा. **-ness, -Impetuosity,** *s.* वेगः, सं-आ-महा-वेगः; चंडता, संरंभः, तीव्रता, साहसं, अमर्षता, रभस् *n.*, रभसः.

Impetus, *s.* वेगः, सं-आ-वेगः. गति-शक्ति *f.*, (fig;) प्रेरणा, प्रचोदना, प्रोत्साहनं.

Impinge, *v. t.* आहन् 2 U (usually A), समापत् 1 P, संघट्ट् 1 A.

Impious, *a.* अभक्त, अधार्मिक (की *f.*), अपुण्यशील, अधर्मिन्; दुष्ट, पापिष्ठ, असाधु. **-ness, -Impiety,** *s.* अभक्ति *f.*, अधर्मः, पापं, दुष्कृतं, धर्मलोपः, देवनिंदा, धर्महीनता, असाधुता, दुष्टता.

Implacable, *a.* अहार्य, अचल, अशाम्य, अशमनीय, अतोषणीय, अनाराध्य, अप्रसाद्य, असांत्वनीय. 2 दीर्घ-अति-द्वेषिन्; 'i. hatred' आमरणांतिकं वैरं, दीर्घद्वेषः, बद्धवैरं.

Implant, *v. t.* नि-धा 3 U, विलिख् 6 P, निरुह् c., प्रति-नि-ष्ठा c. (ष्ठापयति), प्रतिवप् 1 P, निखन् 1 P, 'as if i. ed in the heart' प्रत्युप्तेव...अंतर्निखातेव च (Mal.5;) 'so many are the thorns of anxiety i. ed in the heart' तावंतोपि विलिख्यंते हृदये शोकशंकवः (H. 4).

Implement, *s.* उपकरणं, साधनं, उपस्करः, सामग्री, द्रव्यं, पात्रं, यंत्रं.

Implicate, *v. t.* संबंध् 9 P, संश्लिष् c., लिप् 6 P, संसृज् 6 P, संक्रम् c.; 'he is i. ed in many crimes' अनेकपापैर्लिप्यते, अनेकदोषास्तस्मिन् संक्रांताः. **-ion,** *s.* संबंधः, संसर्गः, समन्वयः, अनुषंगः.

Implicit, *a.* निर्विवाद, अवैकल्पिक-असांशयिक (की *f.*); विचारानपेक्ष, अवितर्कित, अनाशंकित, अविचारित; better by 'i. ly.' **-ly,** *adv.* अवितर्कं, अनाशंकं, असंशयपूर्वं, अविचार्य, निःशंकं, निर्विवादं, निर्विकल्पं.

Implore, *v. t.* प्र-अभि-अर्थ् 10 A, याच् 1 A, सविनयं-सांजलि-याच्, अनुनी 1 P, आराध् c., प्र-सद् c. **-ingly,** *adv.* बद्धांजलि *a.*, पादयोः पतित्वा, समणिपातं, सविनयं.

Imply, *v. t.* सूच् 10, ध्वन् c., वच् desid. (विवक्षति), भंग्या व्यंज् c., उप-लक्ष् 10, सूच् c. 2 (As meaning) प्रति-इ c., द्युत् c., गम् c., अभि-धा 3 U; *See* **Mean;** 'these senses are i. ed' एते अर्थाः प्रतीयंते (S. B. 33); oft. by अर्थ, गर्भ in comp.; 'words i. ing censure' निंदार्थं वचः. **-ed,** *a.* विवक्षित, प्रतीत, उपलक्षित, भंग्या सूचित-ध्वनित; 'i. sense' ध्वनिः, फलितं, फलित-ध्वनित-गर्भित-अर्थः. **-ication,** *s.* विवक्षा, उपलक्षणं-णा, भंगी *f.*, व्यंजना, अनुमानं.

Impolite, *a.* अशिष्ट, असभ्य, ग्राम्य, दुर्मर्याद, असुजन, दुःशील, अनार्य, अविनीत, अदक्षिण.

Impolitic, *a.* अनीतिज्ञ, नयानभिज्ञ, अबुध, अविवेचक, अविज्ञ, असमीक्ष्यकारिन्, अमतिमत्. 2 अहित, सापकार, अनर्थावह, अनिष्टकर (री *f.*), असमीक्ष्यकृत, न्यायविरुद्ध. **-ally,** *adv.* असमीक्ष्य, अनीतिज्ञवत्, अविचार्य. **-Impolicy,** *s.* दुर्णयः, अनयः, अनीति *f.*

Imponderable, Imponderous, *a.* अगुरु, लघु, निर्भार.

Import, *v. t.* (देशांतरात्) आनी or आहृ or आवह् 1 P. 2 सूच् 10, बुध् c., उद्दिश् 6 P, द्युत् c.; *See* **Imply, Mean.** 3 गुरुतया संबंध् 9 P or अवलंब् 1 A. **-s.** (I. s) विदेशीयपण्यानि, विदेशजद्रव्याणि, बहिर्देशागतवाणिज्यद्रव्याणि. 2 अर्थः, भावः, अभिप्रायः, आशयः, उद्देशः, विवक्षा; 'of like i.' तुल्यार्थ, समानार्थ. 3 गुरुत्वं, गौरवं. **-ance,** *s.* महत्त्वं, गुरुत्वं, गुरुता, गौरवं, प्रभावः, गरिमन्-महिमन् *m.* 2 उत्कर्षः, उन्नति *f.*, प्रतिष्ठा, प्रतिपत्ति *f.*, गौरवपदं; परम-उच्च-पदं. 3 अभिमानः, दर्पः. **-ant,** *a.* महत्, गुरु, अलघु, गुर्वर्थ, बह्वर्थ, बहु-गुरु-प्रभाव, परम; 'i. object' गुर्वर्थः. **-antly,** *adv.* गुरुतया, परमं. **-ation,** *s.* देशांतरादानयनं. 2 आनीतद्रव्याणि.

Importune, *v. t.* निर्बंधेन प्रच्छ् 6 P or प्रार्थ् 10 A or याच् 1 A. अनु-निर्-बंध् 9 P, अनुरुध् 7 U, अतिप्रार्थनया उद्विज् c. or आयस् c.; 'being i. ed &c.' निर्बंधपृष्टः स जगाद सर्वं (R. xiv. 32); पुनः पुनश्चानुबध्यमाना (Ka. 69). **-acy, -ity,** *s.* निर्बंधः, अतिनिर्बंधः, अतियाचना-प्रार्थना, नित्यप्रार्थना,

आग्रहः. -ate, *a.* निर्बंधशील-पर, आग्रहिन्, अतियाचक-मार्थक; 'i. demand' अतिनिर्बंधः. -ately, *adv.* साग्रहं, निर्बंधेन, पुनःपुनः, सनिर्बंधं.

Impose, *v. t.* निक्षिप् 6 P, नि-विश् c., न्यस् 4 U, नि-आ-धा 3 U, आ-समा-रुह् c. (रोपयति), स्था c. (स्थापयति), नियुज् 7 A, 10; 'i. upon' वंच् 10, विप्र-लभ् 1 A; *See* **Cheat.** -ing, *a.* गांभीर्यद्योतिन्, गुरुप्रभाव, विस्मयावह, अद्भुत, विस्मापक, भव्य, प्रकांड, महातेजस. -ition, *s.* न्यासः, आरोपः-पणं, स्थापनं, निवेशनं. 2 करः, शुल्कः-ल्कं. 3 छलं, कपटं, दंभः; *See* **Fraud.**

Impostor, *s.* धूर्तः, दांभिकः, वंचकः, प्रतारकः, कितवः. 2 (In religion) धर्मध्वजिन् *m.*, लिंगवृत्तिः; *See* **Hypocrite.**

Imposture, *s.* वंचना-नं, छद्मन् *n.*, दंभः, कपटं, माया, विप्रलंभः, अतिसंधानं, प्रतारणा; *See* **Fraud.**

Impossible, *a.* अशक्य, असाध्य, असंभव, अकरणीय, दुष्कर; gen. ex. by न शक् pass. -**Impossibility,** *s.* अशक्यता, असाध्यता. 2 असाध्यं, असंभवः; oft. ex. by शशविषाण-शृंगं, खपुष्पं, गगनकुसुमं.

Impost, *s.* करः, शुल्कः-ल्कं; बलिः, राजस्वं, राजभागः.

Imposthume, *s.* विद्रधिः.

Impotent, *a.* निर्बल, दुर्बल, अशक्त, निःसत्व; *See* **Feeble.** 2 क्लीब, पुंस्त्वहीन, नपुंसक, निष्पौरुष. 3 निष्फल, निरर्थक, व्यर्थ, वृथा-मुधा- in comp. -ly, *adv.* दुर्बलं, निर्वीर्यं, निःसत्वं. -**Impotency,** *s.* दौर्बल्यं, निःसत्वं, वीर्याभावः, क्लीबता, अपौरुषं, पुंस्त्वाभावः, वैक्लव्यं.

Impound, *v. t.* गोष्ठे नि-अव-रुध् 7 U or रक्ष् 1 P.

Impoverish, *v. t.* निर्धनीकृ 8 U, दरिद्रीकृ, धनं नश् c. or क्षि c. 2 वीर्य-शक्तिं-हृ 1 P or नश् c. -ed, *a.* निर्धन, क्षीणधन, परिक्षीण, गतविभव, नष्टार्थ, दरिद्रीकृत, अकिंचन, गत-प्रचलित-विभव; *See* **Poor.** -ment, *s.* दारिद्र्यं, धननाशः-क्षयः, परिक्षीणता.

Impracticable, *a.* असाध्य, अशक्य, दुष्कर, असंभव, अनुपपाद्य, अकार्य.

Imprecate, *v. t.* शप् 1 U, आ-क्रुश् 1 P, गर्ह् 1, 10 A, अभिशंस् 1 P. -ion, *s.* शापः, आक्रोशः-शनं, अभिशंसनं, गालि *f.* -ory, *a.* आक्रोशक, अनिष्टावेदिन्, शापगर्भ.

Impregnable, *a.* अजय्य, अलंघ्य, दुर्जय, दुराक्रम, अनाक्रम्य. 2 गहन, दुर्गम, अगम्य.

Impregnate *v. t.* सिच् 6 P, नि-आ°-, प्र-क्षिप् 6 P; व्याप् 5 P or c., व्यश् 5 A, पूर् 10. 2 (Make pregnant) रेतः सिच्, गर्भं ग्रह् c. or उत्पद् c., ससत्वां कृ; *See* **Pregnant.** -ed, *a.* सिक्त, व्याप्त, पूर्ण-गर्भ-in comp. 2 आपन्नसत्वा, गर्भवती. -ion, *s.* सेकः, निषेकः, गर्भाधानं.

Impress, *v. t.* नि-धा 3 U, न्यस् 4 U, निविश् c.; पदं ग्रह् c., निष्ठा c. (निष्ठापयति), चित्तनिष्ठ-*a.* कृ 8 U; संस्कृ; (हृदये) पदं कृ, स्थानं लभ् 1 A (in the mind). 2 अंक् 10, चिह्न् 10, मुद् 10: *See* below. 3 हृ 1 P, आकृष् 1 P; *See* **Attract.** -*s.* मुद्रा, अंकः, चिह्नं, लक्षणं. -ed, *a.* मुद्रित, अवगाढ, अंकित; निवेशित, निष्ठ-स्थ- in comp.; 'i. in the mind' हृदयस्थ, चित्तनिष्ठ; 'deeply i. on the ground' अवगाढा भूमौ (S. 3). -ion, *s.* अंकनं, चिह्नं, मुद्रा, अंकः. 2 संस्कारः, चित्तसंस्कारः. 3 अनुभवः, बुद्धि *f.*, मति *f.*, मतं. 4 परिणामः, उत्पन्नं, संस्कारजन्यं फलं; oft. ex. by अंतरं, अवकाशः, पदं with लभ् or ग्रह्; तव लब्धपदं हृदि शोकघने (R. VIII. 91), लेभेंतरं चेतसि नोपदेशः (R. VI. 66) 'made or left no i. on the heart &c.'. 5 आघातचिह्नं, छेदः. -ive, *a.* हृदयहारिन्, हृदयंगम, चित्ताकर्षिन्, हृदयस्पृश्.

Imprint, *v. t.* मुद् 10. अंक् 10, न्यस् 4 U; *See* **Impress.**

Imprison, *v. t.* कारायां-कारागृहे-निक्षिप् 6 P or बंध् 9 P or निरुध् 7 U. 2 बंदिग्राहं ग्रह् 9 U, आसिध् 1 P, बंदीकृ 8 U. -ment, *s.* कारावासः, कारानिरोधः, कारावंधनं-प्रवेशः, निरोधः-धनं, बंधनं, आसेधः, प्रग्रहः, बंदीकरणं.

Improbable, *a.* असंभव, अघटनीय, दुर्घट, अनुपपन्न; 'it is i.' नैतदुपपद्यते, संभवति or घटते. -**Improbability,** *s.* असंभवः, अनुपपत्ति *f.*, असंगति *f.*

Improbity, *s.* अशुचिता, अनृजुता, असारल्यं, कापट्यं, कौटिल्यं, शाठ्यं, जिह्मता, खलता; *See* **Fraud.**

Impromptu, *a.* आकस्मिक (की *f.*), अयत्नपूर्व, अचिंतितपूर्व. -*adv.* पूर्वचिंतां विना.

Improper, *a.* अयुक्त, अनुचित, अनुपपन्न, अनर्ह; oft. by कु-अ pr.; 'i. union' असंगतिः, कुयोगः. -ly, *adv.* अयुक्तं, असम्यक्, अस्थाने, अनुचितं, अनुपपन्नं; 'acting i.' अकृत्यकारिन्. -**Impropriety,** *s.* अनौचित्यं, अन्यायः, अयुक्तता, अनुपपत्ति *f.* 2 (Of conduct) अविनयः, कुचरितं, अमर्यादा, दुश्चरितं, अकार्यं, अपचारः, मर्यादातिक्रमः.

Improve, *v. t.* उत्कृष् 1 P or c., संस्कृ 8 U, उन्नतिं-श्रेयस्त्वं-नी 1 P or प्राप् c., उप-चि 5 U, भद्रतर-श्रेयस् *a.* कृ; शुध् c., प्रमृज् 2 P or c., प्रतिसं-समा-धा 3 U, (as faults). -*v. i.* सं-वि-अभि-वृध् 1 A, उपचि pass., वृद्धिं-उन्नतिं-उत्कर्षं-इ-या 2 P or गम् 1 P or प्राप् 5 P. श्रेयस्-भद्रतर-*a.* भू 'has i. ed

in health ' अस्ति विशेषः; ' to i. in knowledge ' विद्यां अर्ज् 1 P or अधिगम् or आप्. **-ment,** *s.* वृद्धि *f*., अभि-प्र-वृद्धिः, उत्कर्षः, उन्नति *f*., उपचयः, उदयः, अभ्युदयः, आगमः, आधिक्यं, बृंहणं. 2 श्रेयस्त्वं, भद्रतरत्वं, वरीयस्त्वं. 3 शोधनं, प्रतिसमाधानं; ' i. in knowledge ' विद्यागमः, ज्ञानोपचयः; ' i. in health ' विशेषः.

Improvident, *a.* अदीर्घदृष्टि, अदूरदर्शिन्; *See* **Imprudent. -ly,** *adv.* असमीक्ष्य, अविमृश्य. **-Improvidence,** *s.* अदीर्घ-अदूर-दृष्टि *f*.

Improvise, *v. t.* अचिंतितपूर्व-प्रासक-लं-कृ 8 U or रच् 10.

Imprudent, *a.* अनयज्ञ, अनीतिमत्, अविज्ञ, अविचक्षण, अनीतिज्ञ, अनभिज्ञ, अमतिमत्; अदीर्घ-अदूर-दृष्टि. अविमृश्य-असमीक्ष्य-कारिन्, अदूरदर्शिन्, अविवेकिन्, निर्विवेक, असावधान. 2 (Of acts) अविमृश्यकृत, अनवहित; better by ' i.-ly '. **-ly,** *adv.* अविमृश्य, असमीक्ष्य, अविचार्य, अनालोचितं, अदीर्घदृष्ट्या, निर्विवेकं, अविज्ञवत्, अविवेकितया, साहसेन, सावेगं, ससंरंभं. **-Imprudence,** *s.* अदीर्घ-अदूर-दृष्टि *f*., अपूर्वचिंता, असमीक्षा-क्षणं, अविमर्शः, अविवेकः, अविचारः. 2 अविनयः, दुर्णीति *f*, दुर्णयः.

Impudent, *a.* धृष्ट, वियात, प्रगल्भ, निर्लज्ज, अविनीत, दुर्विनीत, निस्त्रप, लज्जा-त्रपा-व्रीडा-हीन, प्रौढ, प्रतिभावत्. **-ly,** *adv.* धृष्टवत्, प्रगल्भं, निर्लज्जं, वैयात्येन, धाष्टर्येन. **-Impudence,** *s.* धृष्टता, धाष्टर्यं, वैयात्यं, प्रागल्भ्यं, अविनयः, अलज्जा, निर्लज्जता, प्रतिभा-भानं.

Impugn, *v. t.* प्रत्या-ख्या 2 P, विरुध् 7 U, निरा-कृ 8 U, अधरीकृ, प्रत्यादिश् 6 P; *See* **Contradict.** 2 अपवद् 1 A, विपरीतं वद्, निंद् 1 P, दोषं ग्रह् 9 U.

Impulse, *s.* प्रवर्तनं, प्रणोदनं, प्रवृत्ति *f*., प्रचोदनं-ना, प्रोत्साहनं-ना; ' sudden i. ' आकस्मिकी प्रवृत्तिः, वेगः, सं-आ-वेगः. 2 हेतुः, कारणं, निमित्तं, प्रयोजनं. **-Impulsive,** *a.* प्रवर्तक, प्रणोदक, प्रोत्साहक, प्रचोदक. 2 आवेगशील, सहसाप्रवर्तिन्, वेगानुवर्तिन्, संरंभिन्; ' pray, don't grow i. ' सहसा-आकस्मिकवृत्त्या कर्मणि प्रवर्तितुं नार्हसि. **-ly,** *adv.* सहसा, आकस्मिकप्रवृत्त्या.

Impunity, *s.* दंडाभावः, दंडमुक्ति *f*. 2 अनपायः, अनपकारः, अक्षति *f*., अहानि *f*., अनाशः, अहिंसा, अपीडा; ' with i. (to oneself) ' अपकारं विना, स्वयमक्षतेन, आत्महानिं विना.

Impure, *a.* अशुद्ध, अशुचि, अपवित्र, अनिर्मल, समल, अमेध्य. 2 गर्ह्य, निंद्य, कश्मल, कुत्सित. 3 पांसुल, व्यभिचारिन्. **-ly,** *adv.* अपवित्रं, अशुचिवत्. **-ity, -ness,** *s.* अशुचित्वं, अमेध्यता. 2 मलः-लं, अशौचं, कालुष्यं, किट्टं, मालिन्यं, अपद्रव्यं; *See* **Dirt.** 3 गर्ह्यता, निंद्यता. 4 पांसुलता, लांपट्यं, व्यभिचारः.

Impute, *v. t.* आरुह् c., (रोपयति), संबंध् 9 P, कॢप् c., प्रसंज् c., निक्षिप् 6 P; *See* **Ascribe.** 2 अप-परि-वद् 1 U, आ-अधि-क्षिप्, निंद् 1 P; *See* **Censure. -ation,** *s.* (Act) आरोपः-पणं, कल्पना, संबंधः, प्रसंगः; ' i. of a crime ' दोषकल्पना, दोषारोपः. 2 अभियोगः, अभिशंसनं. 3 आरोपः, आ-अधिक्षेपः, दूषणं, अपवादः, कलंकः, परि(री)-वादः; *See* **Calumny.**

In, *prep.* Gen. ex. by loc.; अंतरे, मध्ये, in comp.; with verbs by नि pr. 2 (Denoting instrument, manner, time, direction) ex. by instr.; ' i. great intimacy ' महता स्नेहेन; ' i. six days ' षडहेन; ' i. a short time ' अचिरेण, अचिरात्; ' i. breadth ' विस्तारेण; ' drives i. a chariot ' रथेन याति-चरति; ' i. a joyful mood ' आनंदेन; ' i. order ' क्रमेण, क्रमशः; ' i. small quantities ' अल्पशः; ' i. the same manner ' तद्वत्, तथैव; ' i. as much as ' यतः, यस्मात्, यत्, oft. by abl. or instr. of abstract nouns; *See* **Because**; ' i. as much as it arises from ingorance ' अविद्यामूलत्वात्.

Inability, *s.* असामर्थ्यं, दौर्बल्यं, अशक्ति *f*.

Inabstinence, *s.* असंयमः, अनिग्रहः.

Inaccessible, *a.* अगम्य, दुर्गम, दुरासद, दुष्प्राप, दुरारोह, गहन, विषमस्थ.

Inaccurate, *a.* अयथार्थ, अनृत, अतथ्य, अशुद्ध. **-ly,** *adv.* अयथार्थं, अन्यथा.

Inaction, Inactivity, *s.* आलस्यं, अनुद्योगः, निर्व्यापारत्वं, कार्यद्वेषः, औदासीन्यं.

Inactive, *a.* अलस, निर्व्यापार, निरुद्यम, अव्यवसाय; *See* **Idle**; ' to be i. ' उदास् 2 A.

Inadequate, *a* अक्षम, अयोग्य, असमर्थ, अपर्याप्त, अनुचित, अननुरूप.

Inadmissible, *a.* अग्राह्य, अनुपादेय; ' i. into society ' अपांक्तेय, अपांक्त्य.

Inadvertent, *a.* अनवधान, प्रमादिन्, प्रमत्त, उपेक्षक, निरवेक्ष, असमीक्ष्य-सप्रमादं-कृत. **-ly,** *adv.* सप्रमादं, निरवेक्षं, अनवधानात्, असमीक्ष्य, असावधानं. **-Inadvertence,** *s.* प्रमादः, उपेक्षा, अनवेक्षा, अनवधानं.

Inalienable, *a.* अविच्छेद्य, अनन्यहार्य.

Inamorata,-Inamorato, *s.* *See* **Lover.**

Inane, *a.* रिक्त, शून्य, अ-निः-सार.

Inanimate, *a.* अ-वि-चेतन, प्राणहीन निर्जीव.

Inapplicable, *a.* अनुपयोज्य, अनुपपन्न, अयोग्य, अनुचित.

Inapplication, *s.* आलस्यं, अनुद्योगः, कार्यनिवृत्ति *f.*, अप्रवृत्ति *f.*, अमनोयोगः, अनभिनिवेशः.

Inapposite, Inappropriate, *a.* अयोग्य, असंगतं, अप्रस्तुत, विरुद्ध.

Inappreciable, *a.* अत्यल्प, क्षुद्र.

Inapprehensive, *a.* निःशंक, अकुतोभय, वीतभय.

Inapt, *a.* अपात्र, अयोग्य. **-itude,** *s.* अपात्रता, अयोग्यता. **-ly,** *adv.* अस्थाने, असंगतं.

Inarticulate, *a.* अव्यक्त, अस्पष्ट, अस्फुट, अव्यक्तपद-वर्ण-अक्षर **-ly,** *adv.* अस्पष्टं, अव्यक्तं; गद्गदवाचा.

Inartificial, *a.* अकृत्रिम, सहज.

Inasmuch as, *adv.* यस्मात्, येन, यतः.

Inattentive, *a.* अनवधान, निरपे(वे)क्ष, अनासक्त, उपेक्षक, मंदादर, प्रमत्त, प्रमादिन्, अनवहित, अनिविष्टचित्त, शून्यहृदय. **-ly,** *adv.* सप्रमादं, अनवधानेन, प्रमादतः, असमीक्ष्य, अविमृश्य, निरपेक्षं. **-Inattention,** *s.* अनवधानं, अनपे(वे)क्षा, उपेक्षा, अनादरः, अननुरागः, अमनोयोगः, प्रमादः, शून्यहृदयत्वं.

Inaudible, *a.* अश्राव्य, कर्णागोचर; 'i. weeping' निःशब्दरोदनं.

Inaugurate, *v. t.* अभिषिच् 6 P, अधिकारे निविश् c. 2 प्रति-ष्ठा c. (प्रतिष्ठापयति), संस्कृ 8 U, उपक्रम् c., आरभ् c. (रंभयति). **-ion,** *s.* अभिषेकः, प्रतिष्ठापनं, संस्कारः उपक्रमः.

Inaurate, *See* **Gild,-ed.**

Inauspicious, *a.* अशुभ, अमंगल, अभद्र, अकल्याण (णी *f.*). **-ly,** *adv.* अशुभं, अशुभलग्ने.

Inborn, Inbred, *a.* सहज, नैसर्गिक-स्वाभाविक (की *f.*), स्वभावज, अंतर्भव.

Incalculable, *a.* अगण्य, संख्यातीत. 2 अमित.

Incandesce, *v. t.* प्र-, ज्वल् 10, उत्-तप् c. **-ence,** *s.* अत्युष्णता, उज्ज्वलता. **-ent,** *a.* प्रज्वलन, उत्तप्त, अत्युष्ण.

Incantation, *s.* मंत्रः, अभिचारः, योगः, मंत्रप्रयोगः, माया; 'to use i.s' मंत्रैः वशीकृ 8 U or मुह् c., अभिमंत्र् 10 A, अभिचर् c.

Incapable, *a.* अक्षम, असमर्थ, अशक्त, अपर्याप्त, अनुचित, अयोग्य.

Incapacious, *a.* अपृथु, अविपुल, अविशाल, संकट, संबाध.

Incapacitate, *v. t.* शक्तिं हृ 1 P, अक्षमं-अक्षमी-कृ 8 U, अपात्री-अयोग्यं कृ.

Incapacity, *s.* असामर्थ्यं, अशक्ति, *f.*, अनर्हता, अयोग्यता, अपात्रता. 2 मेधाभावः, बुद्धिहीनता.

Incarcerate,-ion, *See* **Imprison.-ment.**

Incarnadine, *v. t.* अरुणीकृ 8 U. **-a.** रक्त, रुधिरताम्र, आताम्र.

Incarnate, *a.* मूर्त, मूर्तिमत्, देहवत्, शरीरिन्, शरीरबद्ध, देहिन्, सशरीर. 2 अवतारिन्, मनुष्यरूपधारिन्, गृहीतदेह, मनुष्यरूपेण अवतीर्ण. **-ion,** *s.* अवतारः; शरीरधारणं, देहग्रहणं, मूर्तिमत्ता, सशरीरता; better by (*a.*); *See* **Embody** also.

Incase, *v. t.* भांडे नि-धा 3 U or निविश् c. 2 पि-धा, आवृ 5 U, आ-परि-वेष्ट् c., परि-आ-च्छद् 10.

Incautious, *a.* असमीक्ष्य-अविमृश्य-कारिन्, साहसिन्. 2 अनवधान, प्रमादिन्, प्रमत्त. **-Incaution,** *s.* प्रमादः, असमीक्षा; *See* **Inattention.**

Incendiary, *s.* गृह-अगार-दाहिन् *m.* **-Incendiarism,** *s.* गृहदाहः.

Incense, *s.* धूपः, तुरुष्कः, पिंडकः, सिह्लः, यावनः (olibanum); यक्षधूपः, सर्जरसः, रालः, सर्वरसः; 'artificial i.' वृकधूपः, कृत्रिमधूपकः. **-v. t.** धूप् 1 P, 10, धूपेन वास् 10. 2 उत्तिज् c., उद्दीप् c., संधुक्ष् धुक्ष् 10, क्षुभ् c., कुप् c., प्रकुप् c.; *See* **Enrage. -Incensory,** *s.* धूपपात्रं-भाजनं.

Incentive, *s.* प्रलोभनं, प्रचोदनं, प्रवर्तनं, उत्तेजनं, प्रोत्साहनं; प्रेरणं, प्रणोदनं, उद्बोधकं. 2 कारणं, निमित्तं, प्रयोजनं, हेतुः. **-a.** प्रवर्तक, प्रचोदक, &c.

Inception, *s.* प्रारंभः, उपक्रमः.

Incertitude, *s.* विकल्पः, शंका, अनिर्णयः.

Incessant, *a.* सतत, अविरत, अनवरत, अविच्छिन्न, अविश्रांत, प्रसक्त. **-ly,** *adv.* अनवरतं, सततं, अजस्रं, अविच्छेदं, अश्रांतं, सर्वदा, प्रसक्तं, निरंतरं, अभीक्ष्णं.

Incest, *s.* व्यभिचारः, अगम्यगमनं; oft. by गमनं; 'i. with a mother, sister &c.' मातृगमनं; स्वसृगमनं, &c. **-uous,** *a.* अगम्यगामिन्, व्यभिचारिन्; 'i. son' मातृगामिन् *m.*

Inch, *s.* अंगुलः; 'not even an i.' न रेखामात्रमपि, नाल्पमपि; 'by i. es' अल्पाल्पं, अल्पशः.

Inchastity, *s.* व्यभिचारः; असतीत्व, पांसुलता (of women).

Inchoate, *a.* उपक्रांत, अचिरप्रारब्ध. 2 असंपूर्ण. **-ion,** *s.* उपक्रमः, प्रारंभः.

Incident, *s.* वृत्तं, वृत्तांतः, व्यतिकरः, प्रसंगः, संगति *f.*, घटना. 2 उपाख्यानं, प्रासंगिककथा. **-al,** *a.* प्रासंगिक-आनुषंगिक-आगंतुक-आकस्मिक-आपतिक-नैमित्तिक- (की *f.*), आहार्य, आगंतु, अप्रस्तुत, अप्रकृत; 'i. cause' आगंतुकारणं, कार्यनिमित्तं. **-ally,** *adv.* प्रसंगतः, प्रसंगवशात्, यदृच्छया, कथाप्रसंगेन, कार्यकारणतः, दैवात्, आगंतुकतया.

Incinerate, *v. t.* भस्मसात्कृ 8 U, भस्मीकृ.

Incipient, *a.* आरब्ध, उपक्रांत; प्रथम, अग्र, पुरोगामिन्.

Incise, *v. t.* छिद् 7 P, कृत् 6 P, तक्ष् 1, 5 P; *See* **Cut.** **-ion,** *s.* छेदः, कर्तनं, क्षतं, भेदः.

Incite, *v. t.* प्रवृत् c., प्रोत्सह् c., प्रेर् c., प्र-चुद् 10, प्रयुज् 6 P or c., उद्युज् 10; (anger &c.) उद्दीप् c., उत्तिज् c., संक्षुभ् 10. **2** आ-समा-श्वस् c. **-ation,-ment,** *s.* प्रोत्साहनं, प्रचोदनं प्रवर्तनं, प्रेरणं, उत्तेजनं. **2** **Incentive,** q. v.

Inclement, *a.* निष्ठुर, कर्कश, निर्घृण, निर्दय. **2** (Of weather) उग्र, कठोर, रूक्ष, असौम्य, तीक्ष्ण, तीव्र, प्रचंड. **3** वातवृष्टिमत्. **Inclemency,** *s.* अदया, अकारुण्यं, रूक्षता, कटुता.

Incline, *v. i.* नम् 1 P, अव-आ°-,नम्रीभू 1 P. **2** प्रवण-*a.* भू; 'favourably i. ed towards her by (her) penance' तपसा तत्प्रवणीकृतः (K. IV. 42); gen. ex. by शील in comp.; 'i. ed to favour' अनुग्रहशील; or by इष् 6 P, वांछ् 1 P; by मनस् or काम with inf. form, or by desid. forms. **-v.** *t.* आ-अव-नम् c. (नमयति), आवृज् 10, नम्रीकृ. **2** प्रवणीकृ, प्रवृत् c., नि-उद्-युज् 10, प्रोत्सह् c., प्रेर् c.; *See* **Incite.** **-s.** उत्सर्पिणी or अवसर्पिणी भूमिः, प्रवणा भूमिः. **-ation,** *s.* प्रवृत्ति *f.*, प्रवाहः, प्रावण्यं; gen. ex. by शीलता-त्वं or आलुता-त्वं in comp. or by desid. forms; 'i. to fall' पतनशीलता, पतयालुता, पिपतिषा. **2** भावः, अभिलाषः, इच्छा, कामः, छंदः, छंदस् *n.*, रुचि *f.*, चित्तप्रवृत्तिः; 'following one's own i.' कामचारिन्, स्वच्छंद, स्वैरवृत्त, कामचार, स्वैर, स्वैरिन्. **3** आ-,नति *f.*; 'i. of a planet's orbit to the ecliptic' परमापमः. **-ed,** *a.* नत, आवर्जित. **2** प्रवर्तित, प्रवण, in comp., शील or आलु in comp. or by desid. forms.

Inclose, *v. t. See* **Enclose.**

Include, *v. t.* परिग्रह् 9 P, अंतर्गण् 10, समाविश् c., अंतः कल् 10, परिसमाप्-अभिव्याप्- 5 P, प्रतिसंह् 1 P; gen. ex. by अंतर् with भू-गम्-पत् 1 P or वृत् 1 A (with nom. of what is included). **2** आ-धा 3 U, धृ 10, आ-वृ 3 A, गर्भ in comp. **-ed,** *a.* अंतर्भावित, अंतर्गणित; परिगृहीत, अंतर्भूत, अंतर्गत, अंतर्वर्तिन्, समाविष्ट, सहित, अवांतर, गर्भित, अभिव्याप्त; गर्भ in comp.; 'i. space' अंतरालः-लं, अभ्यंतरं; 'those persons i.' तावकान् समाकलय्य, तैर्नरैः सह. **-ing,** **-Inclusive,** *a.* परिग्राहिन्, अभिव्यापक; oft. by सह, or सहित *a.*; 'both days i.' उभाभ्यामपि दिवसाभ्यां सह, उभयदिनसहितं; 'then enter a hermit with two others (three i. himself)' ततः प्रविशत्यात्मनातृतीयो वैखानसः (S. 1). **-Inclusively,** *adv.* साकल्येन, अशेषेण, सहितं. **-Inclusion,** *s.* अंतर्भावः, अंतर्गणना-नं, समावेशः-शनं, परिग्रहः, अभि-,व्याप्ति *f.*, प्रतिसंहारः.

Incognito, *a.*, प्रच्छन्न, अलक्षित, प्रच्छन्न-गुप्त-रूप. **-adv.** प्रच्छन्नं, गुप्त-अलक्ष्य-रूपेण, निभृताकारेण.

Incognizance, *s.* अनभिज्ञानं, अप्रतिपत्ति *f.* **-Incognizant,** *a.* अनभिज्ञ, अज्ञ.

Incoherent, *a.* असंगत, असंबद्ध, अनन्वित. **-ly,** *adv.* असंगतं, अनन्वयं. **-Incoherence,** *s.* असंबंधः, असंगति *f.*, अनन्वयः, असंदर्भः.

Incombustible, *a.* अदाह्य, दुर्दाह्य.

Income, *s* आयः, उदयः, आगमः, धनागमः, अर्थप्राप्ति *f.*, धनोदयः.

Incommensurable, *a.* असमपरिमाण. असमान, असदृश. **2** अपर्याप्त.

Incommensurate, *a.* अतुल्य, असमान, अननुरूप; अपर्याप्त, न अलं, असदृश.

Incommode, *v. t.* पीड् 10, क्लिश् 9 P, आयस् c.; 'don't i. yourself' अलमायासेन. **Incommodious,** *a.* अनुपयुक्त, अयोग्य. **2** क्लेश-पीडा-कर (री *f.*), असुखद, उपरोधिन्.

Incommunicative, *a.* वाग्यत, मितवाच्, मितकथ, भाषणविरक्त, संलापविमुख (खी *f.*).

Incomparable, *a.* अतुल, अनुपम, अद्वितीय, निरुपम, अप्रतिम, अप्रतिरूप, अनुपमेय.

Incompassionate, *a.* निर्घृण, क्रूर, नृशंस, निर्दय; *See* **Cruel.**

Incompatible, *a. See* **Inconsistent.**

Incompetent, *a.* अशक्त, असमर्थ, अयोग्य, अकर्मक्षम, अनलंकर्मीण. **-ly,** *adv.* अयोग्यं, अक्षमवत्. **-Incompetence,-cy,** *s.* अक्षमता, असामर्थ्यं, कार्याक्षमता, अपर्याप्ति *f.*

Incomplete, *a.* अपूर्ण, असमाप्त, अनिष्पन्न, सावशेष. **2** विकल, न्यून, लुप्त, हीनांग, न्यूनावयव, लुप्तावयव, असमग्र. **-ly,** *adv.* अपूर्णं, सावशेषं, अपर्याप्तं; वैकल्येन, असमस्तं. **-ness,** *s.* अपूर्णता, असमाप्ति *f.* **2** वैकल्यं, न्यूनता.

Incomplex, Incomposite, *a.* अमिश्रित. असंकीर्ण, शुद्ध.

Incomprehensible, Inconceivable, *a* अज्ञेय, अगम्य, दुर्बोध, अचिंत्य, अविभाव्य, अग्राह्य, अबोधगम्य, अतर्क्य, अधीगम्य, [illegible] धातीत, इंद्रियातीत, अतींद्रिय, इंद्रियागोचर.

Inconclusive, *a.* अनिर्णायक, अप्रमा[illegible] अनिश्चायक. **-ly,** *adv.* अप्रमाणं, प्रमाणं [illegible], अनिर्णायकत्वेन.

Incongruous, *a.* असंगत, विरुद्ध, असंबद्ध, अनुपपन्न. **-ness,** **-Incongruity,** *s.*

विरोधः, असंगति *f.*, अनुपपत्ति *f.*; oft. by क-कृ; *See* **Congruous.**

Inconsequent, *a.* अप्रयुक्त, अप्रयोगिन्, अयौक्तिक, न्यायविरुद्ध, अयुक्तिसिद्ध.

Inconsiderable, *a.* अल्प, क्षुद्र, तुच्छ. 2 अल्पार्घ.

Inconsiderate, *a.* असमीक्ष्य-अविमृश्य-कारिन्, अविवेकिन्, अविमर्शिन्, साहसिन्, प्रमत्त, असावधान; 'an i. deed' साहसं. **-ly,** *adv.* अविमृश्य, असमीक्ष्य, अविचार्य, सहसा, निर्विवेकं, सरभसं, अनालोचितं, निरवधानं, प्रमादतः, साहसेन. **-ness,** *s.* अविमर्शः, अविवेकः, असमीक्ष्यकारित्वं, अविचारणा, असमीक्षा.

Inconsistent, *a.* असंगत, विरुद्ध, विरोधिन्, असंबद्ध, अनन्वित, विसंवादिन्, विगीत, विपरीत; परस्पर विरोधिन्-विरुद्ध, परस्परपराहत, संकुल, पूर्वापरविरुद्ध, क्लिष्ट; oft. ex. by विसंवद् 1 U, विरुध् pass., विप्रवद्; *See* **Consistent** also. **-ly,** *adv.* विरोधेन, विरुद्धं, विसंवादेन, परस्परविरुद्धं.

Inconsistence,-cy, *s.* असंगति *f.*, असंबंधः, अनन्वयः, विरोधः, वैपरीत्यं, विभेदः, असादृश्यं, विसंवादः, विप्रतिपत्ति *f.*, परस्परविरोधः, विरोधोक्ति *f.*

Inconsolable, *a.* अशरण, निर्विनोद, शोकाकुल.

Inconsonant, *a. See* **Inconsistent.**

Inconspicuous, *a.* अप्रकाश, अस्पष्ट. 2 अप्रधान.

Inconstant, *a.* अस्थिर, अदृढ; चल, चंचल; तरल, लोलमति, चलचित्त. **-Inconstancy,** *s.* अस्थैर्यं, तरलता, चंचलत्वं; *See* **Fickle, -ness.**

Incontaminate, *a.* अकलंक, अदूषित, पवित्र.

Incontestable, *a.* निर्विवाद, अविचार्य, अप्रत्याख्येय, निःसंदेह, सुनिश्चित.

Incontinent, *a.* असंयत, अवशिन्, अजितेंद्रिय, व्यभिचारिन्. **-Incontinence,** *s.* असंयमः, अदमः, अयमः, अजितेंद्रियत्वं, व्यभिचारः, लांपट्यं, इंद्रियावृत्तः.

Incontrovertible, *a.* अप्रत्याख्येय, निर्विवाद, अबाध्य, असंदिग्ध.

Inconvenient *a.* अनुपयुक्त, अनुचित, अपर्याप्त, अयोग्य; अहित, असुखकर, क्लेशकर (री *f.*); क्लेशद, दुःखावह, उपरोधक, दुःखद. **-Inconvenience,** *s.* अयोग्यता, अनौचित्यं, अनुपयोगः, अपर्याप्ति *f.* 2 क्लेशः, असुखं, उपरोधः, पीडा, आयासः, आयास or क्लेश-हेतु. or कारणं. **-v. t.** उप-रुध् 7 U, बाध् 1 A, पीड् 10; *See* **Convenience.**

Inconversant, *a.* अनभिज्ञ, अविज्ञ; अनभ्यस्त.

Incorporate, *v. t.* संमिश्र् 10, संहन् 2 P, संयुज् 7 U, 10, संसृज् 6 P. संश्लिष् c., एकीकृ 8 U. **-v. i.** एकीभू, संसृज्-संयुज्- pass. **-ion,** *s.* संयोगः, संश्लेषः, संमिश्रणं, संसर्गः.

Incorporeal, *a.* अशरीरिन्, विदेह, निरवयव.

Incorrect, *a.* अशुद्ध, अशुचि, सदोष, दोषवत्. 2 असत्य, अयथार्थ, वितथ; 'i. in conduct' दुर्वृत्त, दुराचार. **-ly,** *adv.* मिथ्या, अन्यथा, असत्यं, अयथार्थं; अशुद्धं. **-ness,** *s.* अशौचं, अशुद्धता, असत्यता, &c.

Incorrigible, *a.* अशोध्य, असमाधेय, शिक्षातीत, असाध्य, अप्रतिसमाधेय.

Incorrodible, *a.* अक्षयणीय.

Incorrosive, *a.* अविलयन, अनाशक.

Incorrupt, *a.* अदुष्ट, शुचि, पवित्र, शुद्ध. **-ness,** *s* शुचिता, शुद्धता.

Incorruptible, *a.* अनाश्य, अदूष्य, अक्षय.

Increase, *v. i.* वृध् 1 A, वि-सं-प्र-परि°, एध् 1 A, सं-ऋध् 4,5 P, स्फाय् 1 A, आ-प्यै 1 A, वृद्धिं या-इ 2 P or गम् 1 P or प्राप् 5 P, प्र-उप-चि pass., मुर्छ् 1 P. (मुमूर्छ सहजं तेजो हविषेव हविर्भुजां R. x. 79), प्ररुह् 1 P. 2 विस्तॄ-वितन्- pass., वि-प्र-सृ 1 P. **-v. t.** वृध् c., एध् c., ऋध् c., आप्यै c., स्फाय् c. (स्फावयति), आगम् c., बृंह् c. वृद्धिं नी 1 P, प्ररुह् c., प्र-उप-चि 5 U. 2 विस्तॄ c., वितन् 8 U, प्रसृ c., **-s.** वृद्धि-स्फीति-समृद्धि *f.*, उप-प्र-चयः, वर्धनं, आप्यायनं, बृंहणं, उन्नति *f.*, विस्तारः, आधिक्यं. **-ing,** *a.* वर्धिष्णु, प्रचीयमान, प्ररोहिन्. *See* **Grow.**

Incredible, *a.* अश्रद्धेय, अविश्वास्य, प्रत्ययातीत, विश्वासानर्ह, अतिप्रत्यय-विश्वास, अप्रमाणभूत.

Incredulous, *a.* अश्रद्धालु, अप्रत्ययिन्, शंकाशील, अविश्वासशील. **-ly,** *adv.* साशंकं, अप्रत्ययेन. **-Incredulity,** *s.* अप्रत्ययः, अश्रद्धा, अविश्वासः.

Incremate, *v. t.* दह् 1 P.

Increment, *See* **Increase** (*s.*).

Incriminate, *v. t.* अभियुज् 7 A, 10; *See* **Accuse.**

Incrust, *v. See* **Encrust.**

Incubate, *v. i.* अत्र-स्था 1 A, अंडानामुपरि संविश् 6 P, अंडानि पुष् 1, 9 P. **-ion,** *s.* अंडपोषणं.

Incubus, *s.* कुस्वप्नः, दुःस्वप्नः.

Inculcate, *v. t.* अनु-,शास् 2 P, उपदिश् 6 P, (चित्ते) निविश् c., शिक्ष् c.; *See* **Impress.**

Inculpate, *v. t. See* **Censure.**

Incumbent, *a* अवलंबिन्; आश्रित, उपरिस्थ. 2 आवश्यक; oft. ex. by pot. pass. part. or अर्ह् 1 P. **-s.** अधिकृतः, नियोज्यः, वृत्तिभुज् *m.*, वृत्तिभोगिन्-धारिन् *m.*

Incur, *v. t.* भज् 1 U, आश्रि 1 U, आप् 5 P, लभ् 1 A; आवह् 1 P, उत्पद् c.; gen. ex. by इ-या- 2 P, गम् 1 P &c. with object, by pot. pass. part., अर्ह् 1 P or अर्ह, योग्य,

भाजनं, पात्रं, in comp.; 'he i. s blame' वाच्यतां याति, दोषभाजनं-दोषभाक्-दोषपात्रं भवति; 'i. s debt' ऋणं करोति, 'you will only i. sin' पापमेवाश्रयेथाः: 'i. s a penalty' दंडयो भवति, दंडमर्हति.

Incurable, *a.* असाध्य, अशमनीय, दुरुपचार, अप्रतिकार्य, अपरिहार्य, असमाधेय, निरुपाय.

Incurious, *a.* अनुत्सुक, अजिज्ञासु, अकुतूहलिन्.

Incursion, *s.* अवस्कंदः-दनं, अभिद्रवः, उपप्लवः, आक्रमः, अभियानं, अभिग्रहः; 'to make i. s' अवस्कंद् 1 P, अभिद्रु 1 P; *See* **Attack.** **-Incursive,** *a.* उपप्लाविन्, उपद्राविन्.

Incurvate, *v. t.* नम् c., आवृज् 10, भुज् 6 P, आकुंच् c. **-ion,** *s.* आ-,नतिf.,आकुंचनं.

Indebted, *a.* ऋणिन्, ऋणग्रस्त-बद्ध. 2 उपकृत, अनुगृहीत, कृतोपकार; 'I am i. to fortune' दैवेनानुगृहीतोस्मि

Indecent, *a.* ग्राम्य, अश्लील, अवाच्य, अश्राव्य. 2 अविनीत, विनयशून्य-रहित, निर्मर्याद,अतिक्रांतमर्याद विनय; अशिष्ट, असभ्य, शिष्टाचारविरुद्ध. 3 अयुक्त, अन्याय्य, लज्जाकर (री f.). निंद्य, निर्लज्ज. **-ly,** *adv.* गर्हितं, अश्लीलतया, अविनयेन, अमर्यादं, अयुक्तं. **-Indecency,** *s.* अश्लीलता, ग्राम्यता. 2 अविनयः, अमर्यादा, अशिष्टता, मर्यादातिक्रमः. 3 अयुक्त , अनुपपत्ति f., निंद्यता, गर्ह्यता, अन्यायः, कुरीति f. अनीति f., अनयः, कुशीलं, अपचारः

Indecision, *s.* संदेहः, अनिर्णयः, अनिर्धारणं, विकल्पः, संशयः, अनिश्चयः, वितर्कः,आशंका, द्वापरः. 2 विकल्प-वितर्क-शीलता, संदिग्ध अस्थिर-मतित्वं, चलचित्तता, लौल्यं, चंचलता.

Indecisive, *a.* संदिग्ध, अनिर्णीत, अनिश्चित, सविकल्प, अनिर्णायक. 2 विकल्प-वितर्क-संदेह-शील, अस्थिर-संदिग्ध-लोल-मति,-धी,-बुद्धि,-चित्त, अनवस्थित, चलचित्त, दोलायमानचित्त; *See* **Fickle.** **-ly,** *adv.* अनिश्चितं, ससंदेहं.

Indeclinable, *a.* अव्यय, अविकार्य, अविभक्तिक; 'an i. word' अव्ययः-यं, निपातः.

Indecorous, Indecorum, *See* **Indecent, Indecency.**

Indeed, *adv.* नूनं, खलु, किल, नाम, वस्तुतः, परमार्थतः, सत्यं, तत्त्वतः, अर्थतः. ध्रुवं, तावत्, हि, एव.

Indefatigable, *a.* अक्लांत, अश्रांत, अविषण्ण, महोत्साह, बहुश्रमक्षम, अनिर्विण्ण; *See* **Assiduous.**

Intense, *a.* प्रचंड, तीव्र, उग्र, तिग्म, प्रखर, अत्यंत, घन, गाढ, प्रबल, तीक्ष्ण, परम, महत्, गुरु, अतिमात्र, भृश, नितांत; gen. by सु or अति pr. **-ify,** *v. t.* वृध् c., प्रकर्षं नी 1 P, better by कृ with (*a.*). **-ity, -ness,** *s.* चंडता, तीव्रता, अत्यंतता, गाढता, प्रकर्षः, उत्कर्षः, गरिमन् *m.*, अतिशयः, उद्रेकः, अतिभूमि *f.*, पराकोटि *f.*-काष्ठा; ' i. of application ' अत्यंताभिनिवेशः, व्यासंगः. **-ive,** *a.* प्रकर्षकर-वृद्धिकर-(री *f.*). **-ly,** *adv.* अत्यंतं, तीव्रं, तीक्ष्णं, नितांतं, अतीव, बलवत्, सु-अति pr.

Intent, *s.* **Intention,** q. v.; ' to all i. s ' सर्वथा. **-a.** एकाग्र, एकनिष्ठ, सुसमाहित, अनन्यमानस, अनन्यविषय, एक-तान-चित्त-अयन; *See* **Fixed;** आसक्तचित्त, आसक्त, व्यापृत, निरत, नियत, व्यग्र, निष्ठित, समाहित, नि-आ-अभिनि-विष्ट, अभियुक्त oft. by पर, तत्पर, निष्ठ, परायण in comp.; ' i. on evil ' दुष्टपरायण; अध्ययनपर, &c. **-ly,** *adv.* एकाग्रचित्तेन, अनन्यमनसा;

एकाग्रतया, निष्ठापूर्वं, साभिनिवेशं, आसक्तचेतसा, मनोयोगेन; 'look or hear i.' लोचनैः or कर्णैः पा 1 P. **-ness,** *s.* एकाग्रता, एकनिष्ठता, अनन्यचित्तता, आसक्ति *f.*, अभिनिवेशः, तत्परता, निष्ठा, मनोयोगः.

Inter, *v. t.* भूमौ-श्मशाने निखन् 1 P or निक्षिप् 6 P or नि-धा 3 U.

Interact, *s.* विष्कंभकः, प्रवेशकः. *-v. t.* मिथः चेष्ट् 1 A or बाध् 1 A.

Intercalar,-y, *a.* अधिक, निवेशित; 'i. month' अधिकमासः, मलमासः, मलिम्लुचः. **-Intercalate,** *v. t.* अधिकमासं-दिवसं निविश् c.

Intercede, *v. i.* अंतर् गम् 1 P or स्था 1 P, मध्ये स्था or गम्, मध्यस्था भू, म-धा 3 U, मध्यस्थतां ग्रह् 9 U, मध्यस्थवृत्तिं आ-स्था 1 U or आश्रि 1 U, माध्यस्थ्यं कृ 8 U (परार्थे) प्रार्थ् 10 A, अनुनी 1 P, आराध् c., वद् 1 P. **-er,-Intercessor,** *s.* मध्यस्थः, मध्यस्थपुरुषः, परार्थे प्रार्थकः, परार्थवादिन् *m.* **-Intercession,** *s.* माध्यस्थ्यं, मध्यस्थता, सधानं, परार्थप्रार्थनं-ना, पराथ .दुः-निवेदनं.

Intercept, *v. t.* रुध् 7 U, विच्छिद् 7 P, वियुज् 7 A, 10, प्रतिबंध् 9 P; *See* **Obstruct. -er,** *s.* रोधकः, विघ्नकरः. **-ion,** *s.* रोधः, विच्छेदः, प्रतिबंधः, विघ्नः, भंगः.

Interchange, *v. t.* परस्परं विनि-मे 1 A or परिवृत् c., व्यति-हृ 1 P. *-s.* विनिमयः, परिवर्तः, व्यतिहारः, परिवृत्ति *f.*, आदानप्रदानं; *See* **Exchange. -able,** *a.* परिवर्तनीय, परस्परानुगामिन्.

Interclude, *v. t. See* **Intercept.**

Intercommune, *v. See* **Associate. -ion, -ity,** *s.* अन्योन्यव्यवहारः.

Intercourse, *s.* संगः, समागमः, संगति *f.*, संसर्गः, संगमः, संपर्कः, साहचर्यं, साहित्यं, संघट्टनं, अन्योन्यसंसर्गः, आलापः, संवादः, परिचयः; 'sexual i.' मैथुनं, रतिक्रिया, सुरतं, स्त्रीभोगः; 'social i.' लोकव्यवहारः-संसर्गः.

Intercutaneous, *a.* त्वगंतर्भूत.

Interdependence, *s.* परस्पर-निबंधनं, अन्योन्याश्रयः.

Interdict, *v. t.* नि-प्रति-षिध् 1 P, निवार् 10, प्रत्या-ख्या 2 P, प्रत्या-दिश् 6 P; *See* **Forbid. -s., -ion,** *s.* निषेधः, निवारणं, प्रत्याख्यानं, निरोधः, बाधा. **2** शापः, आक्रोशः. **-ory,** *a.* निषेधक, निवारक.

Interest, *s.* अर्थः, हितं, लाभः, कल्याणं, श्रेयस् *n.*, भूति *f.*, क्षेमः-मं; 'in my i.' मदर्थे-र्थं. **2** आदरः, स्नेहः, रागः, अपेक्षा, अनुरागः, स्पृहा, अपेक्षा. **3** संपातः, संगः; 'without any i.' मुक्त-वीत-संग *a.* **4** वृद्धि *f.*, वार्धुष्यं; 'simple i.' सरलवृद्धिः, 'compound i.' चक्रवृद्धिः, 'i. at five percent' पंचकेन शतेन, पंचकशतं, पंचोत्तरं शतं. **5** भागः, अंशः, अधिकारः, उद्धारः. **6** रसः, विनोदकत्वं, मनोहरता, हृदयंगमता; दृष्टं कथारसस्याक्षेपसामर्थ्यं (Ka. 346) 'you have seen how the i. (i.ing nature) of the story diverted (me) from my topic'; 'take or feel i.' आदृ 6 A; 'looking to one's own i.' स्वार्थबुद्धि *f.*, स्वार्थपरता, स्वार्थलिप्सा. *-v. t.* अनुरंज् c., स्नेहं-अनुरागं-उत्पद् c., अनुरक्त-सानुराग *a.* कृ 8 U. **2** वि-लुभ् c., मनः-चित्तं-रंज् c. or विलुभ् c., हृदयं गम् 1 P or आकृष् 1 P or हृ 1 P, मनो हृ. **3** भागं-अंशं दा 3 U or लभ् 1 A or आप् 5 P; संबंध्-अनुबंध्-pass. **-ed,** *a.* अनुरक्त, जातानुराग, जातस्नेह. **2** पक्षपातिन्, संगिन्, सपक्षपात. **3** आसक्त, निविष्ट, निरत. **4** भागिन्, अंशिन्. **5** संबद्ध, लाभालाभसंबद्ध. **6** स्वार्थपर, स्वार्थदर्शिन्, स्वलाभासक्त, स्वहितपरायण-तत्पर, स्वलाभापेक्ष, स्वहितैषिन्, स्वार्थलिप्सु. **-ing,** *a.* विनोदिन्, मनोहर, सरस, चित्ताकर्षिन्, हृदयंगम, हृदयहारिन्-ग्राहिन्, विनोदिन्; चित्तरंजक.

Interfere, *v. i.* मध्ये स्था or पत् 1 P, परकार्येषु व्यापृ 6 A, परकार्याणि निरूप् 10 or चर्च् 6 P, 10 A; 'if it should not i. with other duties' न चेदन्यकार्यातिपातः (S. 1); 'he who i.s with matters not his own' अव्यापारेषु व्यापारं यः करोति (P. 1). **2** परस्परं संघट्ट् 1 A or विरुध् 7 U. **-ence,** *s.* माध्यस्थ्यं, परव्यापार-परकार्यचर्चा, परकार्यनिरूपणं; चर्चा, निरूपणं. **2** परस्परसंघट्टः, समाघातः.

Interfluent, *a.* मध्यस्राविन्.

Interfused, *a.* मध्यप्रसारिन्, मध्यप्रसृत.

Interim, *s.* कालाभ्यंतरं, कालांतरालं, मध्य-अंतर्गत-कालः, 'in the i.' अत्रांतरे, कालाभ्यंतरे.

Interior, *a.* अंतरस्थ, अंतर्गत, अंतर्भूत, अंतःस्थ, अंतर्वर्तिन्, आंतर-आभ्यंतर (री *f.*), अंतर् in comp. *-s.* अंतर्भागः, उदरं, गर्भः अभ्यंतरं, हृदयं, अंतर् in comp.; 'the i. of a house' गर्भागारं, वासगृहं, भवनोदरं, अंतर्भवनं.

Interjacent, *a.* मध्यवर्तिन्, मध्यस्थित.

Interject, *v. t.* मध्ये-अंतः-क्षिप् 6 P or प्रविश् c. **-ion,** *s.* अंतःक्षेपः-पणं. **2** उद्गारः.

Interlace, *v. t.* संमिश्र 10, संश्लिष् c.

Interlard, *v. t.* मध्ये-अंतर्-निविश् c. **2** संमिश्र् 10.

Interlay, *v. t.* मध्ये नि-धा 3 U or नि-विश् c.

Interleave, *v. t.* अंतः-मध्ये पत्रं निविश् c.

Interlinear, *a.* पंक्तिद्वयमध्ये लिखित.

Interlocution, *s.* संलापः, संवादः, संकथा, संभाषणं. -**Interlocutor,** *s.* संभाषकः, संवादकः, उत्तरप्रत्युत्तरकृत् *m.* -**y,** *a.* संवाद-संकथा-रूप, संवादात्मक, संकथासंबंधिन्.

Interlope, *v. i.* अन्यायेन (पराधिकारं) प्रविश् 6 P or आक्रम् 1 U, 4 P. -**er,** *s.* अन्यायेन प्रवेशकः, आगंतुकः.

Interlude, *s.* मध्यरंगः; विष्कंभः-भकः.

Interlunar,-y, *a.* अमा, अमावास्या in comp.

Intermarry, *v. i.* परस्परं विवह् 1 P or कुलान् परिग्रह् 9 P or परिणी 1 P. -**age,** *s.* परस्परविवाहः, प्रत्युद्वाहः, विवाहव्यवहारः.

Intermeddle, *v. i.* परकार्याणि निरूप् 10 or चर्च् 6 P, 10 A, पराधिकार-परकार्य-चर्चां कृ 8 U; *See* **Interfere.** -**er,** *s.* पराधिकारचर्चकः-निरूपकः.

Intermedial, Intermediate, *a.* अंतर्-मध्यवर्तिन्, मध्य, मध्यस्थित, व्यवहित, अंतरालस्थित, अंतर-अंतराल-in comp.; 'i. space' अंतरं, अभ्यंतरं, अंतरालं; 'i. time' कालांतरं. -**ly,** *adv.* मध्ये, अंतराले, अभ्यंतरे.

Interminable, *a. See* **Infinite.**

Intermingle, *v. t.* संमिश्र 10, संकॄ 6 P, संसृज् 6 P, संपृच् 2 A, 7 P, संमिल् c.; संकुली-संकीर्णी-कृ 8 U, मिश्रीकृ. -*v. i.* संमिश्रीभू 1 P, संमिल् 6 P. -**ed,** *a.* सं-व्या-मिश्र, मिश्रित, संकीर्ण, संसृष्ट, संपृक्त.

Intermit, *v. i.* विरम् 1 P, निवृत् 1 A (with abl.); शम् 4 P, विच्छिद् pass. -*v. t.* निवृत् c., विरम् c. or शम् c. (शमयति), विच्छिद् 7 P, त्यज् 1 P; *See* **Cease.** -**tent,** *a.* सविराम, सविच्छेद; 'i. fever' मुक्तानुबंधी ज्वरः. -**Intermission,** *s.* विरामः, विरति *f.*, निवृत्ति *f.*, विच्छेदः; उपशमः; 'without i.' निरंतरं, अनवरतं, अविरतं, अविच्छेदं. -**Intermissive,** *a. See* **Internittert,** above.

Intermix, *v. t. See* **Intermingle.** -**ture,** *s.* संसर्गः, संमिश्रणं, संकरः, संपर्कः, संयोगः, संमिलनं.

Intermontane, *a.* पर्वतमध्यवर्तिन्.

Intermundane, *a.* जगन्मध्यवर्तिन्.

Intermural, *a.* प्राकारांतर्वर्तिन्.

Internal, *a.* अंतर् in comp.; अंतर्गत, अंतःस्थ, आभ्यंतर-आंतर (री *f.*), गर्भस्थ; 'i. soul' अंतरात्मा; 'i. anguish' अंतःशोकः, अंतर्दाहः; *See* **Inside.** -**ly,** *adv.* अंतर्, अंतरे, अभ्यंतरे.

International, *a.* (देशानां) परस्परव्यवहारसंबंधिन्.

Internecine, *a.* परस्परविनाशिन्, मिथःक्षयकर, प्राणापहारिन्.

Interpolate, *v. t.* सकपटं नि-विश् c. or निक्षिप् 6 P, मिथ्या क्लृप् c. or अभिलिख् 6 P. -**ion,** *s.* कपटेन निवेशनं, मिथ्याकल्पनं; मिथ्याकल्पितं, निवेशितलेखः.

Interpose, *v. t.* मध्ये निक्षिप् 6 P, अंतर्-धा 3 U, व्यव-धा, मध्ये-अंतः-स्था c. (स्थापयति) or नि-प्र-विश् c. -*v. i.* मध्ये स्था 1 P or वृत् 1 A or गम् or पत् 1 P, अंतर्-इ 2 P, मध्ये प्रविश् 6 P; मध्यस्थतां ग्रह् 9 U, माध्यस्थ्यं अवलंब् 1 A. -**er,** *s.* मध्यस्थः, मध्यवर्तिन् *m.*, मध्यस्थायिन् *m.* -**ition,** *s.* मध्यस्थता, माध्यस्थ्यं; व्यवधानं, मध्यवर्तित्वं, अंतरायः.

Interpret, *v. t.* युज् 10 (words, &c.); व्याख्या 2 P, वि-वृ 5 U, व्याचक्ष् 2 A, अर्थं प्रकाश् c. or व्या-ख्या or वि-वृ or व्याकृ 8 U; *See* **Construe, Explain.** 2 भाषांतरेण वद् 1 P or कथ् 10 or व्याहृ 1 P. -**ation,** *s.* (पदानां) योजना; व्याख्या, व्याख्यानं, विवरणं, निरूपणं, अर्थ-बोधनं-प्रकाशनं, विस्तारः; 'i. of a dream' स्वप्नार्थः, स्वप्न-विचारः-निरूपणं. 2 अर्थः, व्याख्या, टीका, भाष्यं. 3 भाषांतरं. -**er,** *s.* व्याख्यातृ *m.*, विवरणकृत् *m.*, अर्थ-प्रकाशकः-बोधकः, 2 भाषाद्वयज्ञः भाष्य-वृत्ति-कारः, टीकाकृत् *m.*

Interregnum, *s.* अराजत्वं, अनायका-अराजका-राज्यस्थिति.

Interrogate, *v. t.* प्रच्छ् 6 P, अनुयुज् 7 A, परीक्ष् 1 A. -**ion,** *s.* पृच्छा, प्रश्नः, अनुयोगः. -**ive,** *a.* प्रश्नरूप, प्रश्नार्थक प्रश्नात्मक. -**ively,** *adv.* प्रश्न-रूपेण-क्रमेण, अनुयोगतः, प्रश्नार्थरूपेण. -**or,** *s.* प्रष्टृ *m.*, पृच्छकः, अनुयोक्तृ *m.* -**ory,** *s.* प्रश्नः, अनुयोगः. -*a. See* **Interrogative above.**

Interrupt, *v. t.* प्र[illegible] 9 P, प्रति-वि-हन् 2 P, उप-नि-रुध् 7 U, भंज् 7 P, विच्छिद् 7 P, खंड् 10, बाध् 1 A, भिद् 7 P, विघ्नयति (D.); (speech &c.) आक्षिप् 6 P; 'do not i. him' मैनमंतरा प्रतिबध्नीत (S. 6). -**ion,** *s.* अंतरायः, प्रतिबंधः, उपरोधः, विच्छेदः, भंगः, भेदः, व्याघातः, विघ्नः; 'i. in sleep' निद्राभंगः. -**edly,** *adv.* सविच्छेदं, सभंगं. -**er,** *s.* विच्छेद-भंग-कारिन् *m.*, विघ्न-व्याघात-कृत् *m.*

Intersect, *v. t.* परस्परं-अंतरा-छिद् 7 P. -**ion,** *s.* परस्परच्छेदः.

Intersperse, *v. t.* इतस्ततः प्र-क्षिप् 6 P or सं-समा-कॄ 6 P or संमिश्र 10. -**ed,** *a.* संमिश्र, संकीर्ण. -**ion,** *s.* संमिश्रणं, वि-संकिरणं.

Interstellar, *a.* तारागणमध्यवर्तिन्.

Interstice, *s.* छिद्रं, रंध्रं, संधिः, विच्छेदः, अंतरं, अंतरालः-लं, अवकाशः, विवरं; 'without i. s' निरंतर, नीरंध्र, निश्छिद्र, निबिड, घन, अविरल; 'having i. s' सच्छिद्र, सांतराल, विरल.

Intertexture, *s.* संग्रथनं, परस्परस्यूति *f.*

Intertwine, Intertwist, *v. t.* ग्रंथ् 9 P, सं-उद्°, परस्परं कुंच् c. or व्यावृत् c., उत्क्षप् 10, परस्परं ग्रंथ् or संयुज् 7 U, 10, समिश्र् 10; 'with hair i. ed with the tendrils of creepers' लताप्रतानोद्ग्रथितैः केशैः (R. II. 8); अनुव्यध् 4 P, सं-वे 1 U; शैवलेनानुविद्धं (सरसिजं) (S. 1) 'i. ed with moss.'

Interval, *s.* अंतरं, अंतरालं, अभ्यंतरं; अवकाशः, मध्यस्थानं, व्यवधानं, व्यवायः. 2 अवधिः, मध्य-अभ्यंतर-कालः, अवकाशः. 3 विरामः, विच्छेदः, निवृत्ति *f.*, उपशमः; 'in the i.' अंतराले, अंतरा; 'at i. s' काले काले, अंतरा अंतरा, (प्रजानुरागहेतोश्चांतरांतरा दर्शनं ददौ Ka. 58); रम्यांतरः कमलिनीहरितैः सरोभिः (S. 4) 'pleasant at i. s &c.'; 'without i. s' निरंतर, निरंतराल.

Intervene, *v. i.* मध्ये-अंतर् गम् 1 P or भू 1 P or स्था 1 P or वृत् 1 A, अंतर्या 2 P or उप-स्था. 2 अंतर्-इ 2 P, व्यव-धा pass. **-ing,** *a.* मध्यवर्तिन्, मध्यस्थायिन्, व्यवहित, अंतरित, अंतरागत, मध्ये स्थित; 'i. period' अंतरालं, अभ्यंतरकालः. **-Intervention,** *s.* मध्यस्थता, माध्यस्थ्यं, व्यवधानं, अंतर्गमनं, मध्यवर्तनं, मध्ये स्थिति *f.*

Interview, *s.* दर्शनं; सन्निपातः, संगमः, समागमः, अन्योन्य-परस्पर-दर्शनं; 'he had an i. with the king' स नृपदर्शनं लेभे, राजदर्शनं कारितः.

Interweave, *v. t. See* **Intertwine.**

Intestate, *a.* अकृतमृत्युलेख.

Intestine, *a.* अबाह्य; *See* **Internal.** 2 अविदेशज, देशीय; गृह in comp.; 'i. quarrels' गृह-छिद्रं-भेदः, अंतर्भेदः. **-s.** अंत्रं, पुरीतत् *n.*; नाडि-डी-लि-ली *f.*

Intimate, *a.* गाढ, रूढ, प्रवि-रूढ, दृढ, दृढबद्ध, घन. 2 (Of persons) सुपरिचित, रूढसौहृद, बद्धसख्य, प्रणयिन्, प्रियतम, हृदयंगम, सुसंसर्गिन्, संस्तुत, दृढ-गाढ-सौहृद. 3 **Internal,** q. v.; 'strangers made i.' बाह्या अभ्यंतरीकृताः (P. I. 9). **-s.** दृढसुहृद् *m.*, दृढमित्रं, सुहृत्तमः, प्रियवयस्यः. **-v. t.** (भंग्या) सूच् 10, संदिश् 6 P, उपन्यस् 4 U, उपक्षिप् 6 P; साकूतं कथ् 10. **-ion,** *s.* सूचना, संदेशः, उपक्षेपः; इंगितं, आकूतं. **-ly,** *adv* दृढं, गाढं; दृढ-सौहृदेन-संसर्गेण, सुपरिचितं, दृढमित्रवत्; दृढ, गाढ in comp. **-Intimacy,** *s.* गाढसौहृदं, सुपरिचयः, दृढसंसर्गः-संयोगः, संस्तवः, अतिमित्रता-प्रणयः-सख्यं, अत्यासंगः, अतिपरिचयः.

Intimidate, *v. t.* त्रस् c., भी c. (भीषयते-भापयते), सभयं निवृत् c. 2 भर्त्स् 10 A, तर्ज् 1 P, 10 A. 3 **Dishearten,** q. v. **-ion,** *s.* भीषका, भीषा, भीषणं, भयदर्शनं; भर्त्सनं, तर्जनं.

Into, *prep.* मध्ये, अंतर्, अंतरे; gen. by loc., or by acc. with verbs of motion; 'converted i. water' जलसात्कृत; 'made i. one mass' एकपिंडीकृत-भूत.

Intolerable, *a.* असह्य, असहनीय, दुःसह, अक्षंतव्य, दुर्विषह.

Intolerant, *a.* अक्षमिन्, असहन, अमर्षण, असहिष्णु, अक्षम. 2 परमतासहिष्णु, परमताद्वेषक, अन्यमतासह. **-Intolerance,** *s.* अमर्षणं, अतितिक्षा, अक्षमा, असहिष्णुता.

Intone, *v. t.* गंभीरं वद् 1 P or वच् 2 P, गंभीरस्वनं उद्गै c. or उद्गाह् 1 P. **-ation,** *s.* स्वरः, लयः, वर्णोच्चारणं; स्वरभेदः.

Intort, *v. t. See* **Contort.**

Intoxicate, *v. t.* मद् c., उद्-प्र-°, मदं उत्पद् c., मत्तीकृ 8 U; (fig.) उत्सिच् c., उद्हन् 2 P, आ-ध्मा 1 P, मुह् c. **-ed,** *a.* मत्त, प्र-उत्-मत्त, क्षीव, मदोन्मत्त, उन्मद, मदोद्धत, मदान्वित, शौंड, मदोद्धत; 'to be i.' मद् 4 P, मदेन स्पृश् pass., क्षीव् 1, 4 P. **-ing,** *a.* उन्मादक, मादक, उन्मादिन्. **-ion,** *s.* मदः, मादः, उन्मादः, क्षीवता, शौंडता, मत्तता.

Intractable, *a.* दुर्दम, दुर्दांत, अदम्य, अविधेय, अवश्य, अविनेय, दुर्निग्रह, दुराधर्ष, दुःशास्य, अनिवार्य, प्रतीप, उच्छृंखल.

Intramural, *a.* प्राकारांतर्वर्तिन्, भित्त्यंतर्वर्तिन्.

Intransient, *a.* अभंगुर, चिरस्थायिन्.

Intransitive, *a.* अकर्मक.

Intrench, *v. t.* परिखया रक्ष् 1 P or परिवेष्ट् c. or परि वृ 5 U, परिखां खन् 1 P. 2 आक्रम् 1 U, 4 P. **-ment,** *s.* परिखा, परिक्रिया.

Intrepid, *a.* निर्भय, निःशंक, शूर, साहसशील, प्रगल्भ. **-ity,** *s.* धैर्यं, प्रतिभा, प्रतिभानं, शौर्यं, निर्भयत्वं, पौरुषं, विक्रमः. **-ly,** *adv.* वीरवत्, सविक्रमं, सप्रतिभं; *See* **Bold,-ly,** &c.

Intricate, *a.* विषम, दुर्गाह्य, संकुल, गहन, दुर्बोध, गूढ, अस्पष्टार्थ. 2 वक्र, असरल, जिह्म, कुटिल. **-ly,** *adv.* विषमं, असरलं, कुटिलं. **-ness, -Intricacy,** *s.* वैषम्यं, गहनता, गूढता. 2 वक्रता, कौटिल्यं, असारल्यं.

Intrigue, *s.* उपजापः, कूटप्रबंधः, कपटप्रबंधः, कूटयुक्ति *f.*, कूट or कपट-संकल्पः or प्रयोगः; 'love-i.' व्यभिचारकर्मन् *n.*, कामचारितं. **-v. i.** उपजप् 1 P, उपजापं रच् 10, कूटप्रबंधं प्रयुज् A, 10, कूटप्रयोगं रच्. **-er,** *s.* उपजापकः, कपट-प्रबंध-योजकः.

Intrinsic,-al, *a.* अंतरस्थ, अंतर्गत, सहजवर्तिन्, स्वभावज, आंतर-आभ्यंतर (री *f.*). 2 सत्य, यथार्थ, वास्तविक (की *f.*), अकृत्रिम, स्वाभाविक-सांसिद्धिक-(की *f.*). **-ally,** *adv.* वस्तुतः, तत्त्वतः, यथार्थतः, स्वभावतः.

Introduce, *v. t.* प्रविश् c., दर्शनं कृ c. 2 (Insert) प्र-नि-आ-विश् c. 3 परिचयं उत्पद् c. or जन् c. (जनयति); 'i. me to your friend' तव मित्रेण मम परिचयमुत्पादय. 4 प्रवृत् c., प्रचर्-ल् c., प्रति-ष्ठा c. (-ष्ठापयति), आरभ् 1 A, प्रस्तु 2 U, उपक्रम् 1 A. 5 आ-नी 1 P, आवह् 1 P, आगम् c. (गमयति). **-er,** *s.* प्रवेशकः. 2 प्रवर्तकः, प्रतिष्ठापकः, प्रारंभकः. **-Introduction,** *s.* प्रवेशनं; परिचयकरणं. 2 प्रवर्तनं, प्रचारणं, प्रतिष्ठापनं, निवेशनं; आनयनं. 3 मुखबंधः, आमुखं, प्रस्तावना (of plays); प्रस्तावः, आरंभः, उपन्यासः, वाङ्मुखं, उपोद्घातः, उदाहारः, उपक्रमः, वचनारंभः. **-Introductory, -Introductive,** *a.* प्रावेशिक (की *f.*), आरंभक, प्राथमिक (की *f.*), प्रथम; उपोद्घात or प्रस्तावना in comp.; 'as an i. portion' उपोद्घातरूपेण, प्रस्तावनाद्वारा. 2 प्रस्तावना रूप; पारिभाषिक (की *f.*).

Intromit, *v. t.* प्रविश् c.

Introspection, *s.* अंतर्दर्शनं, अंतरालोकनं.

Introvert, *v. t.* अंतः परिवृत् c.

Intrude, *v. i.* अनाहूत-*a* प्र-आ-विश् 6 P or आगम् 1 P, सधर्षं प्रविश् or आक्रम् 1 U, 4 P, अनधिकारपूर्वं प्रविश्. **-er,** *s.* आगंतुकः, अनाहूत प्रवेशकः. **-Intrusion,** *s.* आगंतुकभावः, अनाहूत प्रवेशः-शनं. **-Intrusive,** *a.* धृष्ट, आगंतुक, प्रगल्भ, सधर्ष; परचर्चाशील.

Intrust, *See* **Entrust.**

Intuition, *s.* सहजावबोधः, सहजज्ञानं, अंतर्ज्ञानं. **-Intuitive,** *s.* सहजोपलब्ध, अंतर्ज्ञानोपलभ्य, अविचारपूर्वं उपलब्ध. 2 सहजज्ञ, अंतर्ज्ञानिन्. **-ly,** *adv.* सहजज्ञानेन; अंतर्ज्ञानेन, प्रमाणनिरपेक्षं.

Intumesce, *v. i.* श्वि 1 P; *See* **Swell.** **-ence,** *s.* शोथः, शोफः.

Inturbidate, *v. t.* कलुषीकृ 8 U, आविलयति (D.); *See* **Confuse.**

Intwine, Intwist, *v. t.* ग्रंथ् 9 P, गु(गुं)-फ् 6 P, रच् 10; *See* **Intertwine.**

Inumbrate, *v. t.* छायया आ-प्र-च्छद् 10.

Inunction, *s.* अभ्यंजनं, विलेपनं.

Inundate, *v. t.* जलेन आप्लु c. or व्याप् 5 P. **-ed,** *a.* आप्लावित, आ-सं-प्लुत, जलाप्लावित, जलव्याप्त, जलमय (यी *f.*). **-ion,** *s.* आप्लावः, जलौघः, तोय or जल-विप्लवः-प्रलयः-उप-प्लवः, जलवृद्धि *f.*; *See* **Deluge.**

Inurbanity, *s.* अशिष्टता, असभ्यता.

Inure, *v. t.* अभ्यस् 4 U or c., शिक्ष् c., परिचयं कृ 8 U; परिचित-*a.* कृ. 2 कठिनीदृढी-कृ. **-ed,** *a.* अभ्यस्त, ज्ञात, परिचित; अभिज्ञ in comp.; 'i. to fatigue' जितश्रम; 'i. to seclusion' परिचितविविक्त.

Inurn, *v. t.* समाधौ नि-धा 3 U or निक्षिप् 6 P.

Inutility, *s.* अनुपयोगः, वैफल्यं, व्यर्थता, मोघता, वैयर्थ्यं.

Invade, *v. t.* अभि-द्रु 1 P, आक्रम् 1 U, 4 P, अवस्कंद् 1 P, अभिप्र-या 2 P, आपत् 1 P, उप-द्रु 1 A. or c.; *See* **Attack.** **-er,** *s.* आक्रामकः, उपप्लविन् *m.*; gen. ex. by **Enemy,** q. v. **-Invasion,** *s.* आक्रमः-मणं, अवस्कंदः, अभिद्रवः, उपप्लवः, अभिप्रयाणं, अभियोगः, आपातः.

Invalid, *a.* दुर्बल, अशक्त, अप्रभाव, निस्तेजस्, व्यर्थ, विफल. 2 अप्रमाण; निष्प्रमाण, लघुप्रमाण. **-s.** रोगिन् *m.*, रुग्णः, आतुरः. **-ate,** *v. t.* मोघी-व्यर्थी-कृ 8 U, विफलीकृ, लुप् 6 P or c., अधरीकृ. **-ity,** *s.* निर्बलता, अनिष्पत्ति *f.*, व्यर्थता, मोघता. 2 अप्रामाण्यं.

Invaluable, *a.* अनर्घ, अनर्घ्य, अमूल्य, मूल्यातीत, अतिमूल्य, अत्युत्कृष्ट.

Invariable, *a.* नित्य, सतत, अविकार्य, निर्विकार, स्थिर, नियत, अचल, एकांत; नायमेकांतो नियमः (S. B. 273) 'not an i. rule.' **-y,** *adv.* एकांततः, नित्यं, नियतं.

Invective, *s.* आ-अधि-क्षेपः, निर्भर्त्सना, निंदा, निंदावाक्यं, दुरुक्ति *f.*, अप-परि-वादः, गर्हा. **-a.** निंदक, अपवादक, निंदात्मक.

Inveigh, (against) *v. i.* आ-अव-अधि-क्षिप् 6 P, निंद् 1 P, गर्ह् 1, 10 A, अभिशंस् 1 P; *See* **Abuse, Censure.**

Inveigle, *v. t.* प्र-वि-लुभ् c., मुह् c., चाटूक्त्या आकृष् 1 P or प्रलुभ् c. or निपत् c., वंच् 10. **-er,** *s.* प्र-वि-लोभकः, मोहकः, आकर्षकः. **-ing, -ment,** *s.* प्र-वि-लोभनं; आकर्षणं, मोहः, वंचना, प्रतारणा.

Invent, *v. t.* क्लृप् c., निर्मा 3 A, 2 P, सृज् 6 P, वि-धा 3 U, घट् c. (घटयति), रच् 10. 2 मनसा सृज् 10 or चिंत् 10 or क्लृप् c. 3 मिथ्या क्लृप् c. **-ed,** *a.* क्लृप्त, निर्मित, रचित, घटित. 2 मनःसृष्ट, मनःकल्पित, मिथ्याकल्पित, काल्पनिक (की *f.*), कृतक, कृत्रिम. **-ion,** *s.* कल्पना-नं, रचना-नं, निर्माणं, घटनं. 2 कृति *f.*, सृष्टि *f.*, कल्पितं, कल्पना, निर्मितकला. 3 कल्पना, युक्ति *f.*, उपायज्ञानं. 4 मिथ्याकल्पनं, कूटरचना, मनःसृष्टिः; 'one's own i.' स्वकपोलकल्पितं. **-ive,** *a.* कल्पक, योजक, उपायज्ञ, कल्पनाचतुर, निर्माणकुशल, चतुर, युक्तिमत्. **-or,** *s.* कल्पकः, स्रष्टृ *m.*, निर्मातृ *m.*, चिंतकः, योजकः.

Inventory, *s.* (गृहोपस्करादेः) परिसंख्या, परिगणना, संख्यापत्रं.

Inverse, *a.* व्यत्यस्त, विपर्यस्त, व्यस्त, पर्यस्त, विपरीत, वि-प्रति-लोम, प्रतीप, व्युत्क्रांत. **-ly,** *adv.* विपर्ययेण, वि-प्रति-लोमतः, व्यत्यासेन, व्युत्क्रमेण. **-Inversion,** *s.* विपर्यासः, विपर्य-

(र्या)यः, व्युत्क्रमः, व्यत्यासः, पर्यासः, प्रातिलोम्यं, व्यत्ययः; व्यस्तता, विपरीतता.

Invert, *v. t.* विपर्यस् 4 U or c., परि-वि-व्यति-अस्, परिवृत् c., विपर्यासं-विपर्ययं-नी 1 P; *See* **Alter, Change.** 2 अधोमुखीकृ 8 U; विलोमीकृ. **-ed,** *See* **Inverse.**

Invertebrate, *a.* पृष्ठवंशहीन. 2 (fig.) संशयात्मन्, अधीर, चंचलमति.

Invest, *v. t.* परि-धा c. (धापयति), आच्छद् 10, प्रावृ 5 U, संवेष्ट् c., वस् c., संव्ये 1 P. 2 अलंकृ 8 U, मंडू 10, भूष् 10. 3 संयुज् 7 U, 10, संपन्न-युक्त-विशिष्ट-*a.* कृ; *See* **Endow.** 4 उपरुध् 7 U, पर्यवस्कंभ् 9 P. 5 (Money) लाभार्थं विनियुज् 7 A, 10; 'i. with power' अधिकारे प्रविश् c. or नियुज्; प्रति-ष्ठा c. (-ष्ठापयति), संस्कृ, अभिषिच् 6 P. **-iture,** *s.* अभिषेकः, संस्कारः, प्रतिष्ठापनं, पदस्थापनं, अधिकारदानं; 'i. with the sacred thread' उपनयः-यनं. **-ment,** *s.* परिधानं, वस्त्रं. 2 उपरोधः, अवष्टंभः. 3 लाभार्थं धनविनियोगः.

Investigate, *v. t.* अव-परि-सं-ईक्ष् 1 A, निरूप् 10, अनुसं-धा 3 U, विचर् c., विमृश् 6 P, निर्णी 1 P, निश्चि 5 U, निधृ 10, आलोच् 10. 2 अन्विष् 4 P, मृग् 10 A.; *See* **Examine.** **-ion,** *s.* अवेक्षणं, निरूपणं, अनुसंधानं, विचारः-रणा-णं, विमर्शः, निर्णयः, निश्चयः; चर्चा, अन्वेषणं, अनुयोगः, जिज्ञासा; 'under i.' निरूप्यमाण. **-or,** *s.* अवेक्षकः, निरूपकः, विचारकः, अनुसंधातृ *m.*, निर्णेतृ *m.*

Inveterate, *a.* बद्ध-रूढ-मूल, सुदृढ, गाढ, प्ररूढ, दृढ, स्थिर, चिर-बहु-कालिक (की *f.*), चिरस्थायिन्; 'i. enemy' गाढ-बद्ध-वैरः शत्रुः; 'i. enmity' बद्धवैरं. **-Inveteracy.** *s.* बद्धवैरं, वैरानुबंधः; बद्धमूलता, विरूढता, स्थिरता, अभिनिविष्टता.

Invidious, *a.* द्वेषजनन (नी *f.*), मत्सरावह, ईर्ष्या-असूया-कर (री *f.*). 2 मत्सरिन्, समत्सर, ईर्ष्यालु. **-ly,** *adv.* समत्सरं, साभ्यसूयं, सेर्ष्यं.

Invigorate, *v. t.* बलं-तेजः-शक्तिं वृध् c. or धा 3 U or उप-चि 5 U, आप्यै c., पुष् 1, 9 P, or c.; दीप् c. **-ing,** *a.* बलवर्धन (नी *f.*), तेजस्कर (री *f.*), पुष्टिद, वीर्यप्रद, उत्साहदायिन्. **-ion,** *s.* बल-तेजो-वर्धनं, पुष्टिकरणं. 2 बल-तेजो-वृद्धि *f.*

Invincible, *a.* अजय्य, दुर्जय, दुरासद, अधृष्य, अवध्य.

Inviolable, *a.* अलंघ्य, अनतिक्रमणीय, अभेद्य, भंगायोग्य. 2 अबाध्य, अनपकार्य, अवध्य (as a herald). **-ness,** *s.* अलंघ्यता, अवध्यभावः

Inviolate, *a.* अभिन्न, अभग्न, अलंघित, अक्षत, अदूषित, अखंड, अभंग.

Invisible, *a.* अदृश्य, परोक्ष, दुर्दर्श, अंतर्हित, तिरोहित, अंतरित, दर्शनातीत, नयनविषयातीत, दृगगोचर, दृष्ट्यविषय, अलक्ष्य, अचाक्षुष (षी *f.*) ('evidence &c.); 'to be i.' अंतर्-तिरः-धा pass., तिरोभू 1 P, अंतरि 2 P. **-ness,** *s.* परोक्षता, अप्रत्यक्षता, अदर्शनं, तिरोधानं, अंतर्धानं, अविषयः, परोक्षं. **-y,** *adv.* अप्रत्यक्षं, परोक्षं, असमक्षं अलक्ष्यं, असाक्षात्, अदृष्टरूपेण; निभृतं अलक्षितं.

Invite, *v. t.* आ-नि-अभि-मंत्र् 10 A, आ-समा-ह्वे 1 P, अभ्यर्थ् 10 A, आहृ c., आवह् c. 2 आकृष् 1 P, हृ 1 P, प्र-वि लुभ् c. **-ation,** *s.* निमंत्रणं, आह्वानं, आवाहनं, अभ्यर्थना. **-ing,** *a.* चित्ताकर्षिन्, मोहिन्, मनोहर.

Invocate, *See* **Invoke.**

Invoice, *s.* आयातपत्रं, बीजकं.

Invoke, *v. t.* आ-ह्वे 1 P, आ-अभि-मंत्र् 10 A, आ-वद् 1 P, संबुध् c., आवह् c., आहृ c., नाम ग्रह् 9 U or स्मृ 1 P; अर्थ् 10 A, अभिवंद् 1 A; 'i. blessings on' आशास् 2 A. **-Invocation,** *s.* आह्वानं, आमंत्रणं, आवाहनं, नामग्रहणं, प्रार्थनं-ना.

Involuntary, *a.* अकाम्य, अनिच्छापूर्व, अबुद्धि-अज्ञान-पूर्व, अनैच्छिक (की *f.*), अस्वेच्छाजात. 2 अकाम, अनिच्छु. **-ly,** *adv.* अकामतः अकाम- अनिच्छा-अमति-पूर्वं, अनिच्छया, असंतोषेण, अबोध-अज्ञान-पूर्वं.

Involve, *v. t.* अवगुंठ् 10, आवृ 5 U, आ-वेष्ट् 1 A, or c., आच्छद् 10. 2 परिग्रह् 9 P, अंतर्गण् 10, समाविश् c., *See* **Include.** 3 अभिभू 1 P, ग्रस् 1 A; 'i. ed in difficulty' विपद्ग्रस्त. 4 संबंध् 9 P, संश्लिष् c., संयुज् 7 U, 10, संसृज् 6 P, लिप् 6 P, संक्रम् c.; *See* **Implicate.** **-ed,** *a.* आवेष्टित, अवगुंठित, आवृत, आच्छन्न. 2 अंतर्गत, परिगृहीत, समाविष्ट, अंतर्भूत, गर्भ in comp. 3 अभिभूत, ग्रस्त. 4 संबद्ध, संश्लिष्ट, संसृष्ट, संसक्त, अनुषक्त, संयुक्त, लिप्त; 'i. in crimes' पापलिप्त, दोषग्रस्त. 5 ध्वनित, फलित; 'i. meaning' फलितं, फलितार्थः, ध्वनिः. **-Involution,** *s.* आवेष्टनं, आवरणं. 2 जटिलत्वं, व्यतिकरः, संकीर्णता, अन्योन्यसंश्लेषः, परस्परसंसक्ति *f.* 3 (In Math.) संवर्गीकरणं; 'i. to the third power' सदृशत्रयसंवर्गः.

Invulnerable, *a.* अभेद्य, अच्छेद्य, क्षतक्षम.

Inward, *a.* अंतर्वर्तिन्, अंतःस्थित, अंतरस्थ, अंतर्भव; oft. by अंतर् in comp. **-adv.,** **-ly,** *adv.* अंतः, अभ्यंतरे; 'i. corrupted' अंतर्दुष्ट. 2 मनसा, चित्तेन, हृदये; सुनिभृतं. **-Inwards,** *s.* अंत्राणि (pl.).

Inweave, *v. t.* *See* **Intertwine.**

Inwrap, *v. t.* आवेष्ट् 1 A or c.; *See* **Involve** (1).

Inwrought, *a.* खचित, प्रणिहित, प्रतिबद्ध, छुरित.

Iota, *s.* अणुः, लवः, कणः, कणिका, बिंदुमात्रं.

Irascible, *a.* चंडकोप, क्रोधशील, सुलभकोप, शीघ्रकोपिन्, क्रोधिल, संरंभिन्, चंडस्वभाव. **-ness,** *s.* क्रोधशीलता, सुलभकोपः, चंडता, पित्तस्वभावः-प्रकृति *f.*

Irate, *a.* क्रुद्ध, कुपित, रुष्ट.

Ire, *s.* रोषः, क्रोधः, कोपः. **-ful,** *a.* क्रुद्ध, रुष्ट; *See* **Angry.**

Iris, *s.* इंद्रधनुस् *n.* 2 तारामंडलं. 3 गोलोमी, श्वेतदूर्वा.

Irk, *v. t.* पीड् 10, आयस् c., खिद् c.; *See* **Afflict.** **-some,** *a.* दुःख-खेद कर(री *f.*), दुःखद, क्लेशावह, क्लेशद, आयासहेतुक, कष्ट; 'how i. are the toils of state ! राज्यं हि नाम (राज्यशासनश्रमाः) महद्प्रीतिस्थानं (Mu. 3).

Iron, *s.* लोहः-हं, अयस् *n.* आयसं, कालायसं, कृष्णायसं, पिंडं, तीक्ष्णं, शस्त्रकं, अश्मसारः, लौहं; 'green sulphate of i.' धातुशेखरं, कासीस(शी)सं; 'rust of i.' मंडूरं, सिंहाणं, अयोमलं, 'tipped with i.' आयोग्र, लोहाग्र; 'sulphuret of i.' ताप्यं; 'wrought i.' कुशी. 2 बंधनं, शृंखला-लः-लं, लौहबंधनं. **-v. t.** शृंखलया बंध् 9 P, or संयम् 1 P. **-a.** लौह (ही *f.*), लोहमय-अयोमय (यी *f.*,) लोहनिर्मित, आयस (सी *f.*), लोहात्मक, लोह or अयस् in comp.; 'of an i. constitution' वज्रदेह, सिंहसंहनन; 'i.-bar' फालः, लोहपिंडः; 'i.-filings' लोहचूर्णं, लोहजं; 'i.-fisted' लोह-वज्र-मुष्टि; 'i.-foundery' संधानी, कुप्यशाला; 'i.-hearted' अयो-वज्र-हृदय, कठिन-पाषाण-हृदय; 'i.-mold' लोहांकः, लोहचिह्नं; 'i.-monger' लोहकारः, अयस्कारः, अयोकारः, लोहकारकः. **-y,** *a.* *See* (*a.*) above.

Irony, *s.* सोल्लुंठः-ठनं, सोत्प्रासः, व्याजस्तुति *f.*, निंदा, व्याजोक्ति *f.*, विपरीतलक्षणा, उपरोधः; 'it was a strange i. of fate in the case of Râma' रामस्यापि दैवदुर्नियोगः कोपि यत् &c. (U. 4). **-ical,** *a.* (*s.*) in comp.; 'i. speech' सोल्लुंठवचनं, सोल्लुंठगोक्तिः; 'i. speaker' सोल्लुंठवादिन् *m.* **-ically,** *adv.* सोत्प्रासं, सोल्लुंठनेन, व्याजोक्त्या.

Irradiate, *v. t.* प्रकाश् c., द्युत् c., दीप् c., राज् c. **-ion,** *s.* प्रकाशनं, द्योतनं, प्रदीपनं. 2 (Irradiance) उद्द्योतः, दीप्ति *f.*, प्रभा, कांति-द्युति *f.*, तेजस् *n.*

Irrational, *a.* विवेक-रहित-वर्जित-हीन, अचेतन, अविवेक, ज्ञान-बुद्धि-हीन, निर्बोध, अव्युत्पन्न, विच्छित्तिरहित; पशुधर्मन्. 2 न्याययुक्ति-विरुद्ध, अन्याय्य, अयुक्तिसिद्ध, अतार्किक (की *f.*). **-ity,** *s.* बुद्धिहीनता, अन्याय्यता. **-ly,** *adv.* न्यायविरोधेन, अयुक्तिवादेन.

Irreconcilable, *a.* असंधेय, अशाम्य. 2 असंगत, विगीत, परस्परविरुद्ध, परस्परपराहत; *See* **Inconsistent.** **-ness,** *s.* असंगति *f.*, परस्परविरोधः.

Irrecoverable, *a.* अपुनःप्राप्य, पुनरलभ्य, असमाहार्य. **-y,** *adv.* अनु-द्धार्यतया; 'it is i. gone' असन्निवृत्त्यै तदतीतमेव (S. 6).

Irredeemable, *a.* अनिष्क्रेय, अत्यंतनष्ट.

Irreducible, *a.* न्यूनीकरणाक्षम.

Irrefragable, *a.* अखंड्य, अबाध्य, अप्रत्याख्येय, दृढ-स्थिर-प्रमाण.

Irrefutable, *a.* अप्रत्याख्येय, अखंडनीय.

Irregular, *a.* अनियत, विधि-नियम-विरुद्ध, अयथाविधि, अविधि, उत्सूत्र, विधिघ्न (घ्नी *f.*); (as words) अपवादक, निपातित; 'these are put down as i. forms' एते निपात्यंते (S. K.). 2 क्रम-हीन-रहित-शून्य-विरुद्ध, अव्यवस्थित, अपर्याय, उच्छृंखल. 3 (In conduct) उत्क्रांतमर्याद, व्यभिचारिन्, विपथ-अपथ-गामिन्, दुराचार, कुचारित, अमर्याद. 4 विषम, असम; 'i. in shape' विरूप, कदाकार. **-ity,** *s.* अविधिः, विधि or नियम-विरोधः or भंगः, अनियमः, उत्सूत्रता, निपातः-तनं. 2 अक्रमः, उत्क्रमः, व्यतिक्रमः, अपर्यायः, अपरिपाटि-टी *f.*, अव्यवस्था. 3 व्यभिचारः, विपथगमनं, अमर्यादता, अनाचारः, दुर्वृत्तता. 4 वैषम्यं. **-ly,** *adv.* विधि-नियमविरुद्धं, अविध्यनुरूपं, अयथाविधि, क्रमविरुद्धं; अनियमेन, अनियतवेलं, अविधितः, अक्रमेण.

Irrelative, *a.* असंबंधिन्, असंग, निःसंग.

Irrelevant, *a.* अप्रस्तुत, अप्रकृत, असंबद्ध, अप्रासंगिक (की *f.*), अनन्वित, प्रस्तुतबाह्य, असंगत. **-ly,** *adv.* अप्रकृतं, अप्रस्तुतं, असंबद्धं. **-Irrelevancy,** *s.* अप्रकृतता, अनन्वयः, असंबंधः, असंगति *f.*, अप्रस्तावः.

Irreligion, *s.* अधर्मः, अपूजा, अभक्ति *f.*, धर्मलोपः, देवनिंदा, पापता. **-Irreligious,** *a.* अधार्मिक (की *f.*), अधर्मनिष्ठ, विधर्म, धर्मभक्ति-हीन; अपुण्य, दुष्ट, पापिन्. **-ly,** *adv.* अधर्मेण, दुष्टवत्.

Irremediable, *a.* अप्रतिविधेय, अप्रतिकार्य, निरुपाय, अशक्यप्रतिकार, उपायातीत, अचिकित्स्य, दुःसाध्य.

Irremovable, *a.* अपरिहार्य, अनपानेय, स्थिर, अचल.

Irreparable, *a.* असमाधेय, असाध्य; अप्रतिकार्य, अशक्यप्रतिकार. **-y,** *adv.* अप्रतिविधेयं; 'the act i. damaged his reputation' तेन कर्मणा तस्य यशस्तथा क्षीणं यथा तत्प्रतिसंधातुमशक्यं.

Irreprehensible, *a.* अनिंद्य, अदूषणीय, निर्दोष.

Irrepressible, *a.* अनिवार्य, दुर्निवार, दुर्निग्रह.

Irreproachable, *a.* अनिंद्य, अगर्ह्य, अनवगीत; *See* **Faultless.**

Irresistible, *a.* अनिवार्य, दुर्निवार, अप्रतिकार्य, अनवग्रह, दुर्निग्रह, दुर्धर, अप्रतिहत. **-y,** *adv.* दुर्निवारं, अनवग्रहं.

Irresolute, *a.* अस्थिर-चल-लोल-मति-चित्त-बुद्धि, चलवृत्ति, चंचलधी, विकल्पशील, संशयात्मन्, अधीर, तरलमनस्. **-ly,** *adv.* अस्थिरचेतसा, चंचलवृत्त्या, लोलबुद्ध्या, अधीरं. **-ness, -Irresolution,** *s.* अस्थैर्यं, विकल्पशीलता, लोलमतित्वं, चलचित्तता, चंचलबुद्धि *f.*, लोलमति *f.*, अनवस्थिति *f.*, चापल्यं.

Irrespective, (of) *a.* अनपेक्ष्य, अगणयित्वा, अव्यपेक्ष्य, विहाय (with acc.), अनपेक्ष, निरपेक्ष,निर्व्यपेक्ष in comp.; *See* **Independent,** (of). **-ly,** *adv.* अनपेक्षं निरपेक्षं.

Irresponsible, *a.* अननुयोगाधीन, अप्रष्टव्य, अपृच्छ्याधीन.

Irrestrainable, *a. See* **Irresistible.**

Irretrievable, *a. See* **Irreparable, Irrecoverable.**

Irreverent, *a.* अनादरिन्, परिभाविन्, उपेक्षक, अवज्ञाकारिन्. **-ly,** *adv.* सावज्ञं, सावमानं, अनादरेण. **-Irreverence,** *s.* अवमानः, अवज्ञा, अनादरः, तिरस्कारः, परिभवः.

Irreversible, *a.* अपरिवर्तनीय, अलोप्य, अलंघ्य.

Irrevocable, *a.* अनन्यथाकरणीय.

Irrigate, *v. t.* अव-सिच् 6 P, जलेन आप्लु c. or अभ्युक्ष् 1 P, अभिवृष् 1 P. **-ion,** *s.* सेकः, जलप्लावनं, अभ्युक्षणं.

Irriguous, *s.* जलाढ्य, सजल, जलपूर्ण, अनूप, बहूदक, जलसिक्त.

Irritate, *v. t.* कुप् c., क्रुध् c., रुष् c.; *See* **Enrage. -ion,** *s.* प्रकोपः, क्रोधः, रोषः, कोप or रोष-कारणं or हेतुः. **2** उत्तापः, उत्तेजनं, संतापः, दाहः; 'i. of the throat' कासः, क्षवथुः. **-ing, -ive,** *a.* संतापक; कोपावह. **-Irritable,** *a.* क्रोधन, कोपन, कोपशील, सुलभकोप, शीघ्रकोपिन्, चंडप्रकृति-स्वभाव. **-Irritability,** *s.* चंडस्वभावः-प्रकृति *f.*, शीघ्रकोपित्वं.

Irruption, *s. See* **Inroad.**

Ischury, *s.* मूत्रावष्टंभः, मूत्रकृच्छ्रं.

Island, Isle, *s.* द्वीपः-पं, अंतरीपः. **-a.** द्वीप्य, द्वीपस्थ, द्वैप(पी *f.*). **-Islander,** *s.* द्वीपवासिन् *m.*, द्वीपस्थः.

Isochronal, *a.* समकालीन.

Isolate, *v. t.* वि-युज् 7 A, 10, विच्छिद् 7 P, विश्लिष् c.; *See* **Separate. -ed,** *a.* वियुक्त, अन्यविश्लिष्ट, अनन्यसंसक्त, असंग. **-ion,** *s.* विच्छेदः, विश्लेषः, असंगः, पृथक्त्वं.

Isosceles, *a.* समद्विभुज.

Issue, *v. i.* निर्गम् 1 P, अप-इ 2 P, निर्-या 2 P, निःसृ 1 P, निष्क्रम् 1 U, 4 P. **2** स्रु 1 P, निः-प्र-°; क्षर् 1 P, गल् 1 P, स्यंद् 1 A. **3** उत्-प्र-भू 1 P, प्र-जन् 4 A, उत्पद् 4 A, प्रवृत् 1 A; *See* **Arise. 4** निष्पद्, निर्वृत्, समाप् pass. **-v. t.** निःसृ c., प्रस्रु-स्रु c., निर्गम् c. (गमयति), बहिर्गम् c. **2** प्रकाश् c., प्र-ख्या c. (ख्यापयति), घुष् 10. **-s.** निर्गमः, निःसरणं, निर्याणं, निष्क्रमणं. **2** फलं, परिणामः, उदर्कः, अंतः, उत्तरफलं, उत्तर्क; *See* **End. 3** संतति *f.*, प्रजा, अपत्यं, संतानः-नं. **4** रक्तातिसारः, स्रावः; 'matter at i.' विवादवस्तु *n.*, विचार्यविषयः. **-less,** *a.* निरपत्य, निर्वंश, निःसंतान, अप्रजस्, निरन्वय.

Isthmus, *s.* संयोगभूमि *f.*

It, *pron.* Ex. by *m. f.* or *n.* form of pronouns, corresponding to the noun; sometimes not ex. at all; 'what is i. that you want' किमपेक्ष्यते त्वया; 'i. is good to study' अध्ययनं प्रशस्तं.

Itch, *s.* कंडु-डू *f.*, खर्जूः, कंडूया; (dry) कच्छु-च्छू *f.*, पामा, पामन् *f.*, विचर्चिका. **2** कंडूयनं. **3** अत्यभिलाषः, अतिस्पृहा, इच्छातिरेकः. **-v. i.** कंडूयति-ते (D.). **2** अत्यंतं स्पृह् 6 P or अभिलष् 1, 4 P, गृध् 4 P. **-y,** *a.* कंडूल, पामन, कच्छुर.

Item, *s.* विषयः, अर्थः, पदं, अधिकरणं, भिन्नभागः.

Iterate, *v. t.* पुनः पुनः वद् 1 P or वच् 2 P. **2** पुनः पुनः कृ 8 U. **-ion,** *s.* पुनरुक्ति *f.*, पौनरुक्त्यं, पुनर्वचनं, पुनःकरणं. **-ive,** *a.* पुनर्वादिन्, पुनःकारिन्.

Itinerant, *a.* भ्रमणशील, अटमान, परिभ्रमिन्, भ्रमणकारिन्, अवनिचर.

Itinerary, *s.* प्रवासवृत्तांतलेखः.

Itinerate, *v. i. See* **Travel.**

Ivory, *s.* गज-हस्ति-दंतः, दंतः (the sense being clear). **-a.** (*s.*) in comp.; 'i. doll' दंतपांचालिका.

Ivy, *s.* तरुरोहिणी, वृक्षलता.

J

Jab, *v. t.* अप-, व्यध् 4 P.

Jabber, *v. i.* प्रजल्प् 1 P, प्रलप् 1 P,. अव्यक्तं-अस्पष्टं-वद् 1 P, त्वरितं वच् 2 P, **-er,** *s.* वाचालः-टः, वावदूकः, जल्प(ल्पा)-कः. **-ing,** *s.* जल्पः, प्रलापः, प्रजल्पः, अस्पष्टं वचनं.

Jack, *s.* पनसः. **2** वृक्षः, उपस्तंभः, आधारः; 'j.-fruit' पनसं.

Jackal, *s.* शृ(सृ)गालः, गोमायुः, जंबू(बु)कः, क्रोष्टु *m.*, फेरवः, भूरिमायः, शिवा, मृगधूर्तकः, वंचु(च)कः, फेरुः.

Jackanapes, *s.* वानरवृत्ति *f.*, मर्कटशीलं.

Jackass, *s.* गर्दभः, रासभः, खरः.

Jackdaw, *s.* काकः, द्रोणकाकः, द्रोणः.

Jacket, *s.* कूर्पासकः, कंचुकः, निचोलः.

Jack-ketch, *s.* घातकपुरुषः, उद्बंधकः.

Jack-pudding, *s.* भंडः, विदूषकः, वैहासिकः.

Jaculate, *v. t.* निर्-,अस् 4 P.

Jade, *s.* कदश्वः, अश्वकः. **2** पुंश्चली, बंधकी, कुलटा, भ्रष्टा, असती, असाध्वी. **-***v. t.* खिद् c., क्लम् c., श्रम् c., आयस् c., अवसद् c **-***v. i.* श्रम् 4 P, क्लम् 1, 4 P, आयस् 1, 4 P, अवसद् 1 P, खिद् pass. ग्लै 1 P. **-ed,** *a.* क्लांत, श्रांत, खिन्न, श्रमार्त, ग्लान. **-Jadish,** *a.* दुष्ट, पापीयस्, कुत्सित, कु-कद्-दुर्-pr.

Jag, *s.* भंगः, दंतः, छेदः. **-***v. t.* भंगुरी-दंतुरी-कृ 8 U, ककचरूपेण छिद् 7 P. **-ged,-gy,** *a.* दंतुर, अनुक्रकच, भंगुर, क्रकचाकार.

Jaggery, *s.* गुडः, मत्स्यंडी, फणितं.

Jail, *s.* कारा, कारागृहं, कारागारं, कारावेश्मन् *n.*, बंधनागारं, बंधनालयः, बंधन-निरोध-स्थानं, बंदिशाला, गुप्ति *f.* **-er,** *s.* काराध्यक्षः, बंदिपालः, काराधिपतिः, कारागृहावेक्षकः.

Jam, *s.* मिष्टान्नं, स्वाद्वन्नं, संधितं. **-***v. t.* सं-पीड् 10, संबाध् 1 A, संमृद् 9 P, क्लिश् 9 P. **-med,** *a.* संपीडित, संबाध, संकुल, संकट.

Jangle, *v. i.* वि-वद् 1 A, विप्र-लप् 1 P, वि-प्रति-पद् 4 A, कलहं कृ 8 U. **-***v. t.* **Rattle,** q. v. **-***s.*, **-ing,** *s.* विवादः, विप्रलापः, वा-क्कलहः, वाग्युद्धं.

Janitor, *s.* द्वाःस्थः, द्वारपालः, प्रति(ती)हारः.

Janty, *a.* चपल, लघु-चल-स्वभाव, सरस.

January, *s.* पौषमाघं.

Jape, *v. t.* परि-उप-अव-हस् 1 P.

Jar, *s.* घटः-टी, कुंभः, कलशः-शी-शं; (earthen) मृद्भांडं, मृण्मयं पात्रं; कुटः, निपः; 'a large j.' मणिकः, अलि(लं)जरः. **2** कर्कशध्वनिः-शब्दः, संघर्षणध्वनिः, कटु-परुष-स्वनः. **3** कलहः, विसंवादः. **4** संघट्टः, समाघातः, परस्पराघातः. **-***v. i.* संघट्ट् 1 A, समाहन् 2 P. **2** कर्कशं ध्वन्-स्वन् 1 P. **3** विद् 1 A, कलहायते (D.) विप्र-लप् 1 P. **-ring,** *a.* कर्णकर्कश, परुष, कटु, कर्कश-शब्दकारिन्. **2** परस्परविरुद्ध; *See* **Inconsistent.**

Jargon, *s.* प्रलपितं, अनर्थकं वचनं, अनर्थक-धातुप्रपंचः; संकीर्णवाच् *f.*

Jasmine, *s.* भूपदी, श(शी)तभीरुः, मल्लिका, आस्फोटा (wild); मागधी, गणिका, यूथि-का, अंबष्ठा; अतिमुक्तः, पुंड्रकः; वासंती, माधवी, सुमनाः, मालती, जाति-ती *f.*, सप्तला, नवमल्लिका-मालिका; माध्यं, कुंदः-दं (different species).

Jasper, *s.* सूर्यकांतः.

Jaundice, *s.* कामला-लः, पांडुः, पांडुरोगः. **-ed,** *a.* कामलोपहत, पांडुग्रस्त. **2** साचीकृत, सत्यात् परिवर्तित.

Jaunt, *v. i.* विहारार्थं परिभ्रम् 1, 4 P or पर्यट् 1 P. **-***s.* विहारः, पर्यटनं.

Javelin, *s.* शूलः-लं, शल्यं, शंकुः, प्रासः, शक्ति *f.*, अस्त्रं, कुंतः.

Jaw, *s.* हनु *m. f.* **2** वक्त्रं, मुखं; 'lower j.' पीचं, कुंजः, चिबुकं, चिबुः, 'locked j.' हनुग्रहः; 'j.-tooth' दंष्ट्रा; 'fallen in the j. s of death' मृत्योर्मुखे पतितः, मृत्युदंष्ट्रां-तर्गतः. **3** भर्त्सना, वाक्पारुष्यं, तर्जनं, आक्रोशः. **-***v. i.* तर्ज् 1 P, 10 A, भर्त्स् 10 A, आक्रुश् 1 P. **-ed,** *a.* हनुमत्, हनुविशिष्ट.

Jay, *s.* चाषः-सः, किकीदिविः, किकिदिवः-विः, किकीदिवीः-वः, किकिः, दिवः.

Jealous, *s.* मत्सरिन्, समत्सर, सासूय, साभ्य-सूय, सेर्ष्य, परोत्कर्षासहन, परसुखद्वेषिन्; *See* **Envious.** **2** प्रेमसंशयिन्, शंकाशील, प्रीत्याशंकिन्; 'a j. husband' परपुरुष-व्य-भिचार-जार-शंकित; 'a j. wife' परस्त्रीशं-किनी. **3** कृतादर, आदृत, साभिमान, सावधान, अनुपेक्षक. **-ly,** *adv.* समत्सरं, सेर्ष्यं, सासूयं, साभ्यसूयं; साभिमानं. **-ness, -y,** *s.* मत्सरः, मात्सर्यं, असूया, ईर्ष्या, अभ्यसूया, सापत्न्यं, परोत्कर्षद्वेषः. **2** शंकाशीलता, व्य-भिचारशंका, प्रेम-प्रीति-शंका. **3** सावधानता, अभिमानापेक्षा.

Jeer, *v. i.* उप-अव-हस् 1 P, अव-आ-क्षिप् 6 P, अव-ज्ञा 9 U, तिरस्कृ 8 U, गर्ह् 1, 10 A, अवहासास्पदीकृ. **-***s.* उप-अव-हासः, अवक्षेपः; अवज्ञा. **-ingly,** *adv.* सोपहासं, सावक्षेपं; सावज्ञं.

Jejune, *a.* शुष्क, रूक्ष, नीरस, विरस, निःसार, निःसत्त्व.

Jelly, *s* श्यान-सांद्र-द्रव्यं.

Jeopardy, *s.* संशयः, संदेहः, शंका; 'j. of life' जीवितसंशयः, प्राणसंदेहः. **-Jeopard,** *v. t.* **-ize,** *v. t.* संशये पत् c., संशयस्थ-संशयित-*a.* कृ 8 U; 'one who j.-es his life' संशयितजीवितः; *See* **Danger** also.

Jerk, *v. t.* (सहसा) चल् c., वि-धू 6 P, 5, 9 U; लघु-सहसा तड् 10 or प्रहृ 1 P, अकस्मात्-सवेगं-क्षिप् 6 P. **–s.** चालनं, लघुप्रहारः, लघ्वाघातः, लघु-आकास्मिक-क्षेपः.

Jerkin, *s. See* **Jacket.**

Jessamine, *s. See* **Jasmine.**

Jest, *s.* परि(री)हासः, नर्मन् *n.*, हास्यं, विनोदोक्ति *f.*, प्रहसनं, विनोदभाषणं, परिहासोक्तिः, नर्मालापः; 'truce to (fie upon) your j. s ' धिक्प्रहसनं (U. 4.), अलं परिहासेन; ' uttered in j. ' परिहासजल्पितं; 'made a j. of the matter' तमर्थं परिहासमिव मेने. **2** खेला, क्रीडा, केलि *f.*, कौतुकं; ' in j. ' परिहासेन, परिहासपूर्वं. **–***v. i.* परिहस् 1 P, विनोद-परिहास-वाक्यं वद् 1 P or उदीर् c.; क्रीड् 1 P. **–er,** *s.* वैहासिकः, परिहासयितृ *m.*, परिहास-विनोद-कारिन् *m.*, भंडः, चाटुपटुः; ' king's j. ' विदूषकः, नर्मसचिवः. **–ingly,** *adv.* परिहासपूर्वं, सपरिहासं, सविनोदं.

Jet, *s.* जलोत्क्षेपः. **2** कृष्णप्रस्तरः; ' j.-black ' घनकृष्ण, अतिकृष्ण. **–ty,** *a.* कृष्णवर्ण.

Jewel, *s.* मणि *m f.*, रत्नं; 'j. of a woman' स्त्रीरत्नं; ' j. -house ' मणिशाला, रत्नागारं; 'j.-mine' रत्नाकरः, रत्न-मणि-खनि *f.*-भूमि *f.* **–led,** *a.* रत्नवत्, मणि-रत्न-मय (यी *f.*), रत्नसनाथ, मणि-रत्न-खचित, रत्नानुविद्ध. **–ler,** *s.* रत्नाजीविन् *m.*, मणिकारः, रत्नकारः. **–Jewelry,** *s.* रत्नानि (pl.), रत्नादिकोशः-षः.

Jiffy, *s.* निमेषः, क्षणः.

Jig, *s.* नृत्यविशेषः. **2** वंचना, व्याजः, छलं.

Jilt, *s.* प्रतारिका, चपला, वंचिका, संकेतलंघिनी. **–***v. i.* प्रेमसंकेतं लंघ् 1 A, 10, प्रेमविषये वंच् 10, or प्रतृ c., खंड् 10.

Jingle, *v. i.* शिंज् 2 A, 10, क्वण् 1 P. वि-रु 2 P, झणझणायते (D.), कलं स्वन् 1 P. **–s., –ing,** *s.* शिंजितं, शिंजा, झणत्कारः, झणझणस्वनः, क्वणितं, क्वणनं, कलरवः.

Job, *s.* कार्यं, कृत्यं, व्यापारः, क्रिया. **2** लघु-क्षुद्र-नीच-क्रिया. **3** स्वार्थपरं कार्यं, आत्मवृद्ध्यर्थं कर्मन् *n.* **–***v. i.* क्षुद्रकर्माणि कृ 8 U, स्वार्थमुद्दिश्य कार्यं कृ. **2** पण् 1 A. **3** *v. t.* अवस्यध् 4P. **–ber,** *s.* क्षुद्रकर्मकारिन् *m.*, परार्थं क्रयविक्रयकारिन् *m.*, स्वार्थप्रवर्तकः, क्रयविक्रयिन् *m.* **–bing,** *s.* क्षुद्रकर्मव्यवसायः, स्वार्थप्रवृत्ति *f.*

Jockey, *s.* अश्वज्ञः, हयज्ञः, अश्वविद् *m.*, अश्वकोविदः, अश्वविद्याविशारदः. **–***v. t.* अश्वज्ञ इव प्रतृ c. or वंच् 10. **–ism.** *s.* अश्वविद्या-शिक्षा.

Jocose, Jocular, *a.* हास्यकर (री *f.*), विनोदिन्, हास्यावह, विनोदात्मक, सरस, हास्यगर्भ, सकौतुक; (of persons) परिहासशील, परिहासक, विनोद-नर्मालाप-पर, कौतुकिन्. **–ly,** *adv.* परिहासेन, परिहासपूर्वं, सकौतुकं, विनोदार्थं, रसिकवत्. **–ness, -ity,** *s.* परिहासशीलता, रसिकता, विनोदः, कौतुकं, उल्लासः, हर्षः, प्रमोदः.

Jocund, *a.* प्र-,हृष्ट, प्र-,मुदित, आनंदवृत्ति. **–ity,** *s.* उल्लासः, प्रहर्षः, आनंदः; *See* **Glad.**

Jog, (on) *v. i.* मंदं मंदं प्रसृप् 1 P or चल् 1 P or सृ 1 P. **–***v. t.* अरत्निना तड् 10, ईषत् चल् c. **–s.** ईषदाघातः, ईषत्प्रहारः-चालनं; ' j.-trot ' गज-मंद-गति *f.*, मंदप्रयाणं.

Join, *v. t.* युज् 7 U, 10, सं-आ°-,संसंज् 1 P, यु 2 P, संश्लिष् c., सं-धा 3 U, संबंध् 9 P, संहन् 2 P, एकत्र कृ 8 U, संग्रंथ् 9 P, योक्त्रयति (D.), घट् c. (घटयति), संपृच् 2 A, 7 P. **2** (Go to) समुपागम् 1 P, संइ 2 P, संमिल् 6 P, संगम् 1 A; pass. of roots above (with instr.); ' j. hands ' अंजलिं बंध् 9 P, प्रां(सां)जलि-*a.* भू, हस्तौ समा-नी 1 P; ' j. ed their hands in marriage ' विवाहविधिना ताभ्यां अन्योन्यपाणिग्रहणं कारयामास, वधूवरं संगममाचकार **–ed,** *a.* युक्त, युत, संयुक्त, संयुत, संश्लिष्ट, संहत, सं-समा-सक्त, लग्न, संलग्न, संबद्ध, संपृक्त, संहित, सहित, संगत, समेत, मिलित, घटित. **–er,** *s.* तक्षकः, रथकारः, सूत्रधारः, तष्टृ *m.*, तक्षन् *m.*, काष्ठतक्ष् *m.*, वर्धकिः. **–ery,** *s.* काष्ठतक्षणं. **–ing,** *s.* सं-,योगः, संधिः, संसर्गः, संधानं, संश्लेषः, संघातः, संगमः, संसक्ति *f.* **–Joint,** *s.* संधिः, पर्वन् *n.*, ग्रंथिः, कांडः-डं, अस्थिग्रंथिः-संधिः; ' out of j. ' विलग्न, विसंधि. **–***a.* संयुक्त, समवेत, एककार्यव्यापृत, संहत. **2** असंविभक्त, अविभक्त, साधारण (णी *f.*), सामान्य, सह in comp.; संघातवत्, संभूयकारिन्; ' j. proprietor' सहाधिकारिन् *m.*; ' j. family property ' संसृष्टिधनं; ' members of a j. family ' संसृष्टाः, संसृष्टिनः; ' with j. labour' संभूयश्रमेण सर्वेषां यत्नेन; 'j.-stock company' संभूयसमुत्थानं; 'j.-heir' भागिन् *m.*, संविभागिन् *m.*, समांशहरः, समांशिन् *m.* **–***v. t.* संधियुक्त-*a.* कृ; ex. by (*s.*). **–ed,** *a.* संधिविशिष्ट, ग्रंथिल, संधि-ग्रंथि-युक्त, पर्ववत्. **–ly,** *adv.* समं, सह, संभूय, संयोगेन, सहितं, समवायेन, एकीभूय, एकचित्तीभूय, युगपत्. **–Jointure,** *s.* विधवाधनं; स्त्रीधनं.

Joke,-er, *See* **Jest,-er**

Jole, *s.* गंडः, कपोलः.

Jolly, *a.* प्र-,हृष्ट, सानंद, उल्लसित, प्रमोदिन्, हृष्ट-प्रीत-हृदय; परिहासशील, विनोदिन्, विलासिन्, विनोदशील. **–ity,** *s.* उल्लासः, आनंदः, प्र-,हर्षः, प्रमोदः, उत्सवः. **–ness,** *s.* विनोदपरता, प्रहासः,

Jolt, *v. t.* संक्षुभ् 9 P or c. **–***v. i.* क्षुभ् 1 A, 4 P. **–s., –ing,** *s.* संक्षोभः, उद्घातः, आकस्मिकक्षेपः.

Jolthead, *s.* स्थूलबुद्धिः, मूर्खः, मूढः; *See* **Fool.**

Jostle, *v. t.* स्कंधसाहनेन निराकृ 8 U or निः-सृ c. or निर्-धू 6 P, 5, 9 U or निर्-अस् 4 U; परस्परं समाहन् 2 P or संघृष् 1 P or संमर्द् 9 P, अभिसं-पत् 1 P; संघट्ट् 1 A. **-ing,** *s.* परस्परसमाघातः-घर्षणं, अन्योन्यसंमर्दः, अभिसंपातः.

Jot, *s.* कणः, लवः, अणुः, लेश-लव-कण-बिंदु-मात्रं, तिलमात्रं. *-v. t.* (स्मरणार्थं) लिख् 6 P or अंक् 10. **-ting,** *s.* अभिलिखितं.

Journal, *s.* वार्ता-वृत्त-समाचार-पत्रं or पत्रिका. **-ist,** *s.* वृत्तपत्रप्रकाशकः-लेखकः.

Journey, *s.* प्रयाणं, प्रस्थानं. प्रवासः. यात्रा, देशभ्रमणं-पर्यटनं, अध्वन् *m.*, मार्गः, अध्व or मार्ग-गमनं or क्रमणं, 'on account of the fatigues of j.' अध्वसंजातखेदात्; उत्थाय पुनरवहत् (Ka. 299). 'resumed his j.' &c., 'it is only a week's j.' सप्ताहगम्योऽध्वा; 'to return from a j.' प्रवासाद् उपानि-वृत् 1 A; 'may the j. be pleasant to you' शिवास्ते पंथानः संतु. *-v. i.* प्र-या 2 P, मार्गेण गम् or व्रज् or चर् 1 P or या, पर्यट् 1 P, परिभ्रम् 1, 4 P वह् 1 P, दिवा रात्रौ चावहत् (Ka. 301); 'to j. abroad' प्रवस् 1 P. **-er,** *s.* अध्वगः, पथिकः, पांथः, यात्रिकः. **-Journeyman,** *s.* वैतनिकः, हस्तकर्मकारः.

Jovial, *a.* उल्लासिन्, सदानंदिन्.

Joy, *s.* आनंदः, हर्षः, उत्सवः.

Jubilant, *a.* जयघोषं कुर्वाण, जयध्वनिकारिन्.

Jubilate, *v. i.* जयघोषं कृ 8 U, नंद् 1. A, हृष् 1 P.

Jubilee, *s.* प्रहर्षः, महोत्सवानंदः, महोत्सवः, उत्सवकालः.

Judge, *s.* प्राड्विवाकः, अ(आ)धिकरणिकः, अक्षदर्शकः, धर्माध्यक्षः, धर्माधिकारिन् *m.*, न्यायाध्यक्षः, निर्णेतृ *m.*, दंडनायकः. **2** (In general) अभिज्ञः, गुणदोषज्ञः, विशेषज्ञः, परीक्षकः, परिच्छेदकः, विवेकिन् *m.*, गुणग्राहिन् *m.*, रसज्ञः, तद्विद् *m.*, *-v.* वि-विच् 3, 7 U, परिच्छिद् 7 P, वि-ज्ञा 9 U, विभू c., विचर् c., निर्णी 1 P, निश्चि 5 U, अव-निर्-धृ 10, अव-परि-ईक्ष् 1 A, तीर् 10, अनुसं-धा 3 U. **2** वितर्क् 10, विमृश् 6 P, विगण् 10, विकल्प् c., मनसा विचर् or विविच्, मन् 4 A; 'it is for you to j. whether &c.' एतद्विषये भवान् प्रमाणं; 'j. me by my acts' फलेन मद्गुणदोषनिर्णयः क्रियतां; 'to j. ill or wrongly' मिथ्या कल्प् c. or संभू c. or मन्. **-ment,** *s.* विवेकः, परिच्छेदः, विचारः- रणा, विज्ञानं, विभावनं, निर्धारणा, निर्णयः, निश्चयः, संकल्पः, अवधारणं-णा. **2** (Judicial decision) निर्णयः, विचारः, निर्णयपादः, आधर्षणं, तीरणं, दंडाज्ञा. **3** अनुभवः, तर्कः, ज्ञानं, अनुमानं. **4** मति *f.*, बुद्धि *f.*, मतं, अभिप्रायः, संकल्पः, बोधः; 'according to one's j.' यथामति, यथाबुद्धि. **5** (Divine j.) ईश्वराज्ञा, ईश्वर-विधिः-नियमः-शासनं; 'j.-day' विचारदिनं; 'j.-hall' न्यायसभा, विचार-धर्म-सभा; 'j.-seat' व्यवहारासनं, न्यायासनं, धर्मासनं. **-Judicatory,** *s.* धर्म-विचार-न्याय-सभा, व्यवहारमंडपः, धर्माधिकरणं. **2** न्यायप्रणयनं. **-Judicature,** *s.* न्यायाधिकारः, व्यवहारदर्शनाधिकारः; *See* **Judicatory** above. **-Judiciary,** *a.* विचारक, व्य(व्या)वहारिक (की *f.*). **-Judicial,** *a.* व्यवहारविषयक, व्यवहार in comp.; 'j. proceeding' व्यवहारदर्शनं, व्यवहारः, न्यायविचारः. **-ly,** *adv.* व्यवहारानुसारेण, यथाव्यवहारं, न्यायानुरूपं. **-Judicious,** *a.* (Act) समीक्ष्य-विमृश्य-कृत, न्याय्य, धर्म्य, समंजस, उचित, यथान्याय, सविवेक, युक्त योग्य. **2** (Persons) विमृश्य-समीक्ष्य-कारिन्, विवेकिन्, नीतिमत्, परिच्छेदक, नयज्ञ, प्राज्ञ, विवेकदृश्वन्, विशेषज्ञ, सदसद्दर्शिन्. **-ly,** *adv.* युक्तं, समंजसं, यथान्यायं, उचितं, सम्यक्. **2** सविवेकं, सपरिच्छेद, सुविमृश्य, सुविचार्य, प्राज्ञ-विज्ञ-वत्.

Jug, *s.* कुंभः, कलशः, कंसः, उदकपात्रं; *See* **Jar.**

Jugate, *a.* संयुक्त, संश्लिष्ट.

Juggle, *v.* मुह् c., छल् 10, वंच् 10, दृष्टिं मुह् c. or बंध् 9 P, मायां-कुहकं-इंद्रजालं-कृ 8 U. **-s.,** **-ing,** **-ry,** *s.* माया, कुसृति *f.*, दृष्टिमोहः-बंधः, इंद्रजालं, कुहका-कं, इंद्रियदृष्टि-मोहः, हस्तलाघवं-चापल्यं. **2** वंचना, छलं, कूटता, प्रतारणा. **-er,** *s.* ऐंद्रजालिकः, मायिन् *m.*, मायाकारः, मायाजीविन् *m.*, कुहकजीविन् *m.*, कौसृतिकः, अ(आ)हितुंडिकः.

Jugular, *a.* कंठस्थ, कंठ्य.

Juice, *s.* रसः, द्रवः, सारः, निर्यासः, आसवः, 'j. issuing from the elephant's temples' मदः, दानं, मदवारि. **-less,** *a.* नीरस, अरस, विरस, असार, सारहीन शून्य, शुष्क, पिंडीर. **-y,** *a.* रसमय (यी *f.*), रसपूर्ण, सरस, बहुरस, रसाढ्य, सार-रस-वत्.

Jujube, *s.* बदरी, कर्कंधु-धू *m. f.*, कोलि *f.*, कोलाली; (fruit) बदरं, कोलं, कुवलं, फेनिलं, सौवीरं, घोंटा.

July, *s.* आषाढश्रावणं.

Jumble, *v. t.* संकॄ 6 P, संमिश्र् 10, संक्षिप् 6 P, संकुली-संकरी-कृ 8 U. *-v. i.* संकॄ pass., संकरी-संकुली-भू 1 P. *-s.* संकरः, स-, मिश्रणं, संक्षोभः, संकुलता, संनिपातः.

Jump, *v. i.* प्लु 1 A, वल्ग् 1 U, स्कंद् 1 P. 'j. about' नृत् 4 P; 'j. over' लंघ् 1 A, 10; 'j. up' उत्प्लु, उत्पत् 1 P; 'j. with' **Agree,** q. v. **-s.,** **-ing,** *s.* प्लवनं, उत्पतनं

चलितं, प्लुतं-ति *f.*, प्लुतः, आस्कंदः, झंपः-पा. **-er,** *s.* प्लुवकः, झंपिन् *m.*

Junction, *s.* स-,योगः, संगमः, संमिलनं, संगति *f.*, समागमः, संश्लेषः, संधिः, संसर्गः, संघातः, संसक्ति *f.*, संपर्कः; 'j. of rivers' संभेदः, संगमः. 2 संधिस्थानं.

Juncture, *s.* वेला, समयः; कष्टकालः-समयः, संकटवेला. 2 संधिः, ग्रंथिः.

June, *s* ज्येष्ठाषाढकं.

Jungle, *s.* गुल्मावृतं स्थानं.

Junior, *a.* कनीयस्, अवर, अवरज, यवीयस्, अवरपदभाज्.

Junket, *s.* निभृतोत्सवः. 2 मिष्टान्नं, मोदकः.

Junta, Junto, *s.* सभा, समाजः, गूढसंसर्गः, कुसंसर्गः.

Juridical, *a.* व्य(व्या)वहारिक (की *f.*); *See* **Judicial.**

Jurisconsult. *s.* स्मृतिशास्त्रज्ञः, धर्मशास्त्रकोविदः.

Jurisdiction, *s.* अधिकारः, व्यवहारदर्शनाधिकारः, न्यायप्रभुत्वं.

Jurisprudence, *s.* धर्मशास्त्रं, स्मृतिशास्त्रं, व्यवहार or विद्या-ज्ञानं or शास्त्रं, विधिः; 'a head of j.' व्यवहारविषयः,-पदं.

Jurist, *s.* धर्मशास्त्रकोविदः, स्मृतिज्ञः.

Jury, *s.* सभ्याः; प्रमाणपुरुषगणः.

Just, *a.* (Of persons) न्यायवर्तिन्, न्यायिन्, न्यायशील-पर, साधुवृत्ति, ऋजु, विमलात्मन्, निष्कपट, निर्व्याज, शुचि, न्यायपरायण, धार्मिक-सात्त्विक (की *f.*). 2 न्याय्य, धर्म्य, यथान्याय, न्यायानुसारिन्, सत्य, तथ्य, योग्य, युक्त, यथार्थ, उचित, सम्यच्. 3 सम, समवृत्ति, निःपक्षपात, समदर्शिन्. 4 संपूर्ण, अविकल, अन्यून. **-adv** अंतिकं-के, समीपं, निकटे. 2 प्रायः, प्रायशः; cft. by भूयिष्ठ, कल्प, प्राय in comp., or by desid.; *See* **About.** 3 सद्यः, अचिरादेव, नातिचिरात्, प्राक्; oft. by एव, मात्र in comp.; 'j. now' अधुनैव; 'it is j. proper' उचितमेव; 'j. dead' सद्योमृत; 'j. born' जातमात्र. 4 युक्तं, सम्यक्, यथार्थं, यथावत्. 5 तावत् 'j. come here' इतस्तावदागम्यतां; 'j. so' एवमेव, तथैव, एवमेतत्, अथ किं, युक्तं, युज्यते; 'j. as' 'j. like' इव, यद्वत्, or निर्विशेष in comp.; 'stay j. as in your own house' स्वगृहनिर्विशेषमत्र वस; 'bred j. like one's own children' स्वपुत्रनिर्विशेषं संवर्धित. कष्टेन, कृच्छ्रेण. **-ly,** *adv.* निर्व्याजं, निर्व्यलीकं, मारल्येन. 2 यथान्यायं, न्यायेन, धर्मेण, न्यायतः, धर्मतः, यथाधर्मं, न्यायानुसारेण, सम्यक्, यथावत्. 3 सत्यं, अवितथं, यथार्थं, अर्थतः, यथावत्, यथातथं, यथार्हं, उपपन्नं, यथोचितं, युक्तं, स्थाने, यथायोग्यं, अंजसा. **-ness,** *s.* न्याय्यता, यथार्थता, योग्यता, औचित्यं, युक्तता; साम्यं, पक्षपातः. **-Justice,** *s.* धर्मः, न्यायः, नयः, नीति *f.*, न्यायिता, ऋजुता, साधुता. 2 न्याय्यता, युक्तता, योग्यता, यथार्थता, सत्यता, युक्ति *f.*, याथार्थ्यं. 3 साम्यं, समदर्शित्वं, अपक्षपातः, सर्वसमता. 4 न्यायदंडः, योग्य-दंडः-शिक्षा, अपराधानुरूपो दंडः. 5 धर्माध्यक्षः; प्राड्विवाकः; *See* **Judge**; 'court of j.' न्याय-धर्म-सभा, व्यवहारमंडपः. **-ship,** *s.* धर्माधिकारः, न्यायाध्यक्षत्वं. **-Justiciary,** *s.* **Judge,** q. v. **-Justify,** *v. t.* न्याय्य -*a.* इति प्रति-पद् c. or प्रवृत् c.; शुध् c, दोषं निराकृ 8 U or निवार् 10 or शुध् c. or मृज् 2 P, दोषाद् मुच् 6 P or c. **-able,** *a* निवार्यदोष, शोधनीय, शुद्धिक्षम. **-ication,** *s.* शुद्धि *f.*, शोधनं, दोषशुद्धिः, दोषमुक्ति *f.* -मार्जना, दोषप्रतीकारः, विमोचनहेतुः, अपव्यप-देशः. **-er,** *s.* शोधकः, दोषनिवारकः.

Justle, *v. See* **Jostle.**

Jut, *v. i.* प्रलंब् 1 A, बहिर्वृत् 1 A or स्था 1 P. **-s.** प्रलंबनं, आभोगः, प्रलंबः.

Jute, *s.* शणं.

Juvanescent, *a.* तरुणीभवत्.

Juvenile, *a.* तरुण, अल्पवयस्क, युवन्, कौमार (री *f.*), अभिनववयस्. **-ity,** *s.* यौवनं, तारुण्यं, कौमारं, यौवनावस्था, तारुण्यभावः.

Juxtapose, *v. t.* संनि-धा c. **-ition,** *s.* सान्निध्यं, संनिधिः, संस्थिति *f.*, सन्निकर्षः, संसर्गः, नैकट्यं, उपश्लेषः.

K.

Kaw, *v. i.* कै 1 P, ध्वां(ध्रां)क्ष् 1 P. **-s.** काकरवः-रुतं

Keel, *s.* नौतलं.

Keen, *a.* तीक्ष्ण, शित, निशित, शात, निशात, शितधार, तीक्ष्णाग्र; तीव्र, तिग्म, प्रखर. 2 व्यग्र, उच्चंड, उन्मुक, उत्कट, कुतूहलिन्; *See* **Eager.** 3 सूक्ष्म, कुशाग्र-धीय, विदग्ध. 4 उग्र, कटु, अरुंतुद, मर्मस्पृश्, तिग्म (words); 'k. words' वागिषुः, वाग्मिः; 'k.-eyed' 'k.-sighted' सूक्ष्ममति, तीक्ष्ण-सूक्ष्म-बुद्धि, कुशाग्रमति-बुद्धि, दूरदर्शिन्. **-ly,** *adv.* तीक्ष्णं, तीव्रं, उग्रं, प्रखरतया. **-ness,** *s.* तीक्ष्णता, तीव्रता. 2 व्यग्रता, उच्चंडता, कौतूहलं, अत्युत्साहः. 3 सूक्ष्मता, विदग्धता, कुशाग्रमतित्वं, बुद्धिसूक्ष्मता. 4 कटुता, तिग्मता, उग्रता.

Keep, *v. t.* रक्ष् 1 P, पा 2 P, पा c. (पालयति), गुप् 1 P, त्रै 1 A, अव् 1 P. 2 धृ 1 P, 10; धा 3 U, नि-आ-°, निविश् c., स्था c. (स्थापयति), न्यस् 4 U. 3 रुध् 7 U,

Lose, v. t. अप-,हृ c., त्यज् 1 P, हा 3 P or c. (हापयति). 2 वियुज्-विहा-परिहा-pass., विनाकृ 8 U, (with instr.); भ्रंश् 1 A, 4 P, परि-प्र°, च्यु 1 A, प्र-वि-°, (with abl.); See **Deprived** also; 'he lost his life' प्राणैर्वियुक्तः, विगतासुर्बभूव, प्राणहीनः, प्राणैरहीयत; 'lost his realm' राज्याद्भ्रष्टः-च्युतः; 'l. s his friends' मित्रैर्वियुज्यते; 'he lost his wife' मत्पत्नी मृता, पत्न्या विरहितः. 3 (Destroy) नश् c., क्षि 1, 5 P or c., अप-चि 5 U, उच्छिद् 7 P. प्र-वि-ध्वंस् c. 4 (Not to find) ex. by नश् 4 P, प्रभ्रंश्; 'have you lost a camel' अपि युष्माकमुष्ट्रो नष्टः; 'the lost ring' नष्टमंगुलीयकं; 'l. the way' मार्गात् or पथः-भ्रंश् or च्यु or विचल् 1 P; 'he lost his way' प्रभ्रष्ट-नष्ट-पथः or उन्मार्गगामी अभूत्; 'lost his caste' जातेर्भ्रष्टः. 5 पराजि-पराभू-pass. (in battle &c.); 'l. one's wits' बुद्धिहीन-a. भू 'to l. time' कालं व्यर्थं नी 1 P or विक्षिप् 6 P, कालं हृ 1 P or या c. (यापयति), कालहरणं-कालक्षेपं कृ 8 U, विलंब् 1 A; 'l. good name' चारित्र्यं-कीर्तिं कलंकयति or मलिनयति (D.) or दुष् c. (दूषयति); 'l. one's consciousness' मुह् 4 P, मूर्छ् 1 P, चेतनां-संज्ञां हा, नष्टचेतन-लुप्तसंज्ञ- a. भू; 'we don't l. anything (in this way)' न नः किंचित् छिद्यते (S. B. 345), नास्माकं किमपि हीयते; 'to l. oneself in' आत्मान-

निरत- *a.* यू; *See* **Absorb.** **-er,** *s.* प्राप्तापायः, अपाय-हानि-सहः, पराजितः, लब्धहानिः;प्राप्तनाश:-क्षयः. **-Lost,** *a.* नष्ट, भ्रष्ट, च्युत, गत, मीत, हीन, त्यक्त, हृत, हारित, क्षीण, लुप्त; 'who has l. his office' च्युताधिकारः, अधिकारभ्रष्टः, 'who has l. wealth' अर्थहीनः, गतविभवः, नष्टार्थः; 'who has l. his way' पथभ्रष्टः, उन्मार्गप्रवृत्तः, दिङ्मूढः; 'who has l. everything' हृतसर्वस्वः; 'who has l. one eye' अक्ष्णा अंधः, एकाक्षिविकलः; 'l. to shame' त्यक्त-निरस्त-लज्ज, व्रीडाहीन, 'l. to sense of freedom' स्वातंत्र्यरसानभिज्ञ; 'l. in meditation' ध्यानपर-परायण-निष्ठ-मग्न, चिंतासक्त; 'the bone fell and was l.' अस्थि निपतितं नयनविषयातीतं च; 'to be l.' नश्, अंतर्-इ, तिरोधा pass., तिरोभू. **2** मोहित, मूढ, भ्रांत-चित्त-बुद्धि. **-Loss,** *s.* हानि *f.*, क्षयः, सं-उप-परिक्षयः, वि-,नाशः, अपायः, अपचयः, लोपः, भ्रंशः, च्युति *f.*, व्ययः, ध्वंसः, प्र-वि-ध्वंसः, वियोगः, अपहारः, अत्ययः, त्यागः, अलाभः, क्षति *f.* **2** पराजयः, पराभवः, भंगः; 'compensating l.' क्षतिपूरणं; 'profit and l.' लाभालाभौ; 'l. of time' कालहरणं-क्षेपः, विलंबः; 'l. of caste' जातिभ्रंशः; 'l. of army' सैन्यनाशः, बलव्यसनं; 'to be at a l.' मुह् 4 P; 'being at a l. what to do or say' किंकर्तव्यता-किंवक्तव्यता-मूढ.

Lot, *s.* अंशः, वि-,भागः, उद्धारः. **2** भाग्यं, दैवं, भागधेयं, दैवगति *f.*, दशा, भवितव्यता; *See* **Fate.** **3** गुटिका; 'fall to the l. of' आपत् 1 P, उपनम् 1 P, उप-स्था 1 U; आपतंति हि संसारपथमवतीर्णानामेते वृत्तांताः (Ka. 175); 'happiness will be your l.' त्वं सुखभाग् भविष्यसि, तव सुखमुपनमेत्.

Loth, *a.* *See* **Loath.**

Lotion, *s.* धावनं, धावनौषधं.

Lottery, *s.* गुटिकापातः; गुटिकपातेन निर्णयः.

Lotus, *s.* पद्मं, कमलं, नलिनं, अरविंदं, उत्पलं, कुवलयं, सरसिजं, अब्जं, अंभोजं, महोत्पलं, शतपत्रं, सहस्रपत्रं, कुशेशयं, पंकेरुहं, पंकजं, सरोरुहं, तामरसं, सारसं सरसीरुहं, पुष्करं, अंभोरुहं, बिसप्रसूनं, राजीवं, अंबुजं; 'white l.' पुंडरीकं, सिताभोजं; 'red l.' कोकनदं, रक्तोत्पलं; 'blue l.' इंदीवरं, नीलोत्पलं. **2** (The plant) नलिनी, कमलिनी, पद्मिनी, मृणालिनी, कुमुदिनी; 'l. stalk' नालं-लः-ली-ला; 'l. fibre or film' मृणालः-ली-लं, बिसं-शं; l.filament' किंजल्कः, केसः(स)रः-रं, 'l. root or bulb' करहाटः, शिफाकंदः, शालु(लू)कं; 'l. seed' कमलाक्षः, पद्मबीजं; 'seed vessel of l.' बीजकोशः, वराटकः; 'new leaf of l.' सं-

वर्तिका, नवदलं; 'an assemblage of l. es' षंडः, खंडः, पद्मखंडः.

Loud, *a.* उच्च, तार, महत्, ध्रुव, उत्ताल; महास्वन ध्रुवस्वर, महाध्वनिकर (री *f.*), महाघनघोष, महाशब्द, घोषण; 'a l. noise' तारस्वरः, उच्चैर्घोषः, महाशब्दः-स्वनः, प्रणादः तुमुलरवः. **-ado.**, **-ly,** *adv.* उच्चैः, तार-उच्चस्वरेण, प्रोच्चैः, महाशब्देन, महास्वनेन; 'stil l. er' उच्चैस्तरां. **-ness,** *s.* उच्चता, महत्त्वं, उत्तालता, &c.

Lounge, *v. i.* उदास् 2 A, आलस्येन कालं क्षिप् 6 P or हृ 1 P, अलसीभू. **-er,** *s.* अलसजनः. कालक्षेपकः, उदासीनः, कार्यद्वेषः. **-ing,** *a.* अलस, मंद; *See* **Lazy;** 'l. gait' मत्तेभगति *f.*-गमनं.

Louse, *s.* यूकः-का, केशकीटः; 'l.-egg' लिक्षा. **-y,** *a.* बहुयूक, यूकापूर्ण, यूकोपद्रुत, सयूक.

Lout, *s.* ग्राम्यजनः, वृषलः, ग्रामीणः, स्थूलजनः. **-ish,** *a.* ग्राम्य, स्थूल, अशिष्ट,असभ्य, स्थूल-बुद्धि-मति.

Louver, *s.* धूमरंध्रं, धूमपथः-निर्गमः.

Lovage, *s.* अजमोदा, उग्रगंधा, ब्रह्मदर्भा, यवा(मा)निका.

Love, *s.* प्रेमन् *m. n.*, अभिलाषः, स्नेहः, रागः, वात्सल्यं, अनुरागः; प्रणयः, भावः, प्रीति *f.*, प्रेम-प्रीति-स्नेह-भावः (all with loc.); 'l. for God' ईश्वरभक्ति *f.* **2** (Amorous) कामः, अनंगरागः, शृंगारः, शृंगारभावः, रति *f.*, रतिसुखं, मदनः. **3** (God of love) कामः, मदनः, स्मरः; *See* **Cupid.** **4** दया, अनुकंपा. **5** रुचि *f.*, अभिरुचिः, आसक्ति *f.*, व्यसनं, अभिनिवेशः, प्रीतिः. **6** (Darling) प्रियः-या, प्रियतमः-मा, दयितः-ता; 'to fall or be in l. with' स्निह् 4 P, अनुरंज् pass., भावं-अभिलाषं-बंध् 9 P or निविश् c., अनुरागवत्-बद्धभाव-मोहित- *a.* यू; 'l.-affected', 'l.-stricken', 'under the influence of l.' अनंगतप्त-पीडित, कामार्त, कामवश, कामातुर, अनंगविधुर, मदनावस्थ, स्मराकुल, कामासक्त; 'to make l.' विवाहार्थं प्रार्थ् 10 A or आराध् c.; 'gestures of l.' शृंगारचेष्टा, हावः, विलासः, विभ्रमः, लीला, भावः; 'l.-knot' प्रेमग्रंथिः-बंधः; 'l.-letter' 'अनंग-मदन-लेखः, मन्मथलेखः; l.-match' प्रेम-विवाह-संबंधः; 'l. quarrel' प्रणय-प्रेम-प्रीति-कलहः; प्रणयकोपः; 'l.-sick' कामार्त, कामातुर, कामपीडित, अनंगतप्त, विधुर, मदनविह्वल; 'l.-song' शृंगारगीतं; 'l.-tale' प्रेम-शृंगारकथा; 'l.-token' प्रीतिलक्षणं, प्रेमाभिज्ञानं. **-v.** *t.* कम् 10 A (amorously); प्री-अनुरंज्-आसंज् pass.; gen. ex. by स्निह् (with loc.); बंध्, निविश् c. with (*s.*); 'the king l. s Sâgarikâ' नृपः सागरि

कामी मद्यानुरक्तः, आसवाभिरतः, द्यूतव्यसनः, &c. 2 रुच् 1 A, आनंद् 1 P, मुद् 1 A, तुष् 4 P (with instr.); ex. by प्रिय-a.; *See* **Fond, Like**; 'I l. music' संगीत-मिवोऽस्मि; 'l. knowledge' विद्याव्यसनिनी मम. **-able,** *a.* स्नेहार्ह, प्रिय. **-ed,** *a.* प्रिय, दयित, कांत, इष्ट, अभीप्सित, स्निग्ध, हृद्य, मनीषित. **-er,** *s.* (Amorous) कामुकः, कामिन् *m.*, कांतः, प्रियः, दयितः, वल्लभः, रमणः, नायकः, इष्टः, प्राणेशः, जीवितेशः. 2 प्रणयिन् *m.*, अनुरागिन् *m.*, निरतः, सेवी-प्रियः-in comp.; 'l. of knowledge' प्रियज्ञानः, ज्ञाननिरतः, ज्ञानेप्सुः; 'a l. of learned men' आप्तसमृद्धसेवी (R. vi. 41). **-ing,** *a.* प्रणयिन्, अनुरागवत्, सस्नेह, प्रणयवत्, प्रीतिमत्, वत्सल, अनुरक्त, अनुरागिन्, आसक्त, प्रिय, नि-,रत, सेविन् in comp; 'l. gambling' द्यूतासक्त, द्यूतसेविन्; 'a l. husband' अनुरागवान् पतिः; 'l. kindness' कृपा, घृणा, कारुण्यं, वात्सल्यं, प्रसादः, अनुग्रहः, स्नेहः, अनुकंपा. **-ingly,** *adv.* सप्रणयं, सस्नेहं, सानुरागं, स्नेहेन, वात्सल्यात्, प्रीतिपूर्वं. **-Lovely,** *a.* कांत, सुंदर (री *f.*), रुचिर, शोभन, सुभग, मनोज्ञ, मंजु, मंजुल, चारु, मनोरम, मनोहर, ललित, वाम, मुग्ध, कमनीय, अभिराम; *See* **Beautiful. -liness,** *s.* कांति *f.*, सौंदर्यं, शोभा, श्रीः, लावण्यं, सुभगता, चारुता; *See* **Beauty.**

Low, *a.* (Of place) नीच, निम्न, नत, नीचस्थ, अधःस्थ, अधस्तन (नी *f.*), अवाच्. 2 ह्रस्व, नीच, अल्पाकार, खर्व, अनुच्च, अतुंग. 3 नीच, अप-नि-कृष्ट, अधम, हीन, जघन्य, अवर, खल, क्षुद्र, अनार्य, वाच्य, गर्ह्य, अश्लील, निंद्य, (language); *See* **Mean**; 'a l. man' अपसदः, नीचः, पृथग्जनः; जाल्मः, दुर्हृदः. 4 (Voice) नीच, मंद्र, मंद, धीर, ग(गं) भीर. 5 (Price) स्वल्प, अल्प, मित, परिमित, अल्पमूल्य. 6 (L.-spirited) अवसन्न, खिन्न, उद्विग्न, म्लान, विषण्ण, विमनस्, दीन or उद्विग्न-मनस् or चेतस्; *See* **Dejected** 7 नम्र, विनीत, अनुद्धत, निरभिमान; *See* **Humble.** 8 निःसत्त्व, रूक्ष, असार, अपौष्टिक (की *f.*) (as food); 'of l. rank,' 'l.-born' नीच, हीनजाति, अंत्यजातीय, नीचकुलज, हीनकुल, दुष्कुलीन, अधमजन्मन्, नीचवंशप्रसूत, हीनवर्ण. **-adv.** नीचैः, अनुच्चं, नीच in comp.; 'going l.' नीचग; 'l. bending grass' नीचैः प्रणतानि तृणानि. 2 मंदं, मृदु, सौम्यं. 3 अधस्, अधोभागे, अधस्तात्. **-v. i.** रेभ् 1 A, नद् 1 P, नर्द् 1 P, गर्ज् 1 P, हंभारवं कृ 8 U. **-ing,** *s.* रेभणं, रेभितं, हंभा, हंभारवः. **-a.** हंभारवकारिन्, रेभमाण. **-ness,** *s.* नीचता, निम्नता, अधमता, अपकर्षः, हीनता, जघन्यता, गर्ह्यता, मंद्रता, गांभीर्यं, विषादः, अवसादः, उद्वेगः, दैन्यं, दौर्मनस्यं, ग्लानि-म्लानि *f.*, &c. **-Lower,** *a.* अवर, अधरस्थ, अधस्तन, नीचस्थ, अधःस्थ, अवाच्, अधः in comp.; 'l. world' अधोलोकः; 'l. garment' अधोंशुकं; 'l. region' अधःप्रदेशः; 'the l. classes' हीन-अधम-जातीयाः, अवरवर्णाः, अंत्यजातीयाः. **-v. t.** न्यूनीकृ 8 U, ऊन् 10, ह्रस् c., अल्पीकृ, लघूकृ, लघयति (D.), अपचि 5 U. 2 अपकृष् 1 P, अव-नम् c. (नमयति), भ्रंश् c., गौरवं-मानं-भंज् 7 P or ह्र 1 P; *See* **Humble.** 3 अवतॄ c., अधः कृ, अव-नि-पत् c. **-v. i.** न्यूनीभू 1 P, अल्पीभू, अपचि-क्षि pass., ह्रस् 1 P. 2 नम्रीभू. 3 मलिनीभू, कलुषीभू, तमोवृत-मेघाच्छन्न-*a.* भू. 4 भ्रूभंगं कृ, भ्रुवौ संकुच् 1 P. **-s.** दुर्दिनं, मेघतिमिरं, तिमिराकृतत्वं, साभ्रता. 2 कालुष्यं, मुखमालिन्यं. **-ing,** *a.* तमोवृत, मेघाच्छन्न, साभ्र, दुर्दिनग्रस्त. 2 मलिन, कलुष. **-Lowly,** *a.* नम्र, विनत, सविनय, निरभिमान, अनहंकार, अनुद्धत, अगर्व, नम्रवृत्ति, दर्पहीन; *See* **Humble. -adv. -ly,** *adv.* सविनयं, विनयेन, नम्रतया, अनुद्धतं. **-ness,** *s.* विनयः, नम्रता, अनहंकारः, अगर्वः, अनभिमानः, नम्रवृत्ति *f.* **-Lowland,** *s.* निम्नदेशः-भूमि *f.*, नीचप्रदेशः, उपत्यका. **-er,** *s.* निम्नदेशीयः.

Loyal, *a.* भक्त, अनुरक्त, दृढभक्ति, भक्तियुक्त-मत्, सानुराग, आसक्त; 'l. to the king' नृपानुरक्त, प्रभुभक्तिनिष्ठ, राजाज्ञानुवर्तिन्, नृपासक्त; 'a l. wife' सती, साध्वी, पतिव्रता, एकपत्नी, सुचरित्रा, 'l. husband' स्वदारनिरतः, भार्यानुरक्तः. **-ly,** *adv.* भक्तिपूर्वं, सानुरागं, दृढभक्तिपूर्वं, राजनिष्ठापूर्वं. **-ty,** *s.* भक्ति *f.*, अनुरागः, आसक्ति *f.*, प्रभु-स्वामि-भक्तिः, राजभक्तिः-अनुराग., दृढभक्तिः, राजनिष्ठा; (in a wife) पातिव्रत्यं, सतीत्वं, &c.

Lubber, *s.* ग्राम्यः, स्थूलजनः, स्थूलधीः-बुद्धिः. **-ly,** *a.* स्थूल, अदक्ष. 2 स्थलीय.

Lubric, Lubricious, *a.* स्निग्ध, चिक्कण, श्लक्ष्ण, मेदुर. **-Lubricate,** *v. t.* अभ्यंज् 7 P, स्निग्धी कृ 8 U, स्नेहेन अंज्. **-ed,** *a.* अभ्यक्त, स्नेहाक्त. **-ion,** *s.* अभ्यंजनं, स्निग्धीकरणं. **-Lubricity,** *s.* स्निग्धता, चिक्कणता.

Lucent, *a.* *See* **Bright.**

Lucid, *a.* दीप्तिमत्, शोभन, सुप्रभ, तेजस्विन्, उज्ज्वल, देदीप्यमान; *See* **Bright.** 2 विशद, स्वच्छ, निर्मल, अ-वि-मल, प्रसन्न, शुभ्र. 3 व्यक्त, सुस्पष्ट, भिन्नार्थ, स्पष्टार्थ. 4 प्रसन्नचित्त; 'l. interval' चित्तप्रसादः. **-ly,** *adv.* स्पष्टं, सुव्यक्तं, भिन्नार्थं; स्फुटं, विशदं. **-ness,** *s.* दीप्ति *f.*, कांति *f.*, शोभा, प्रभा, द्युति *f.*, 2 स्पष्टता, वैशद्यं, प्रसादः, वैमल्यं.

Lucifer, *s.* शुक्रः, भार्गवः; 'l. match' अग्निशलाका.

Luciferous, *a.* प्रकाशद, द्युतिकर (री *f.*).

Luciform, *a.* तेजोमय (यी *f.*), प्रकाशविशिष्ट.

Luck, *s.* दैवं, भाग्यं, भागधेयं, विधिः, नियति *f.*, भवितव्यता, दैवयोगः; *See* **Fate**; 'good l.' सौभाग्यं, पुण्योदयः, भाग्योदयः, 'bad or ill l.' दैवदुर्विपाकः-विपर्ययः, मंदभाग्यं, दौर्भाग्यं, दुर्दैवं, दुर्गति *f.*, अशुभं, अमंगलं. **-less,** *a.* हतभाग्य, मंदभाग्य, अधन्य, दुर्भग, अभागिन्, भाग्य-दैवहीन, दुर्दैवग्रस्त, हीनभाग्य. **-lessly,** *adv.* दुर्दैवात्, दुर्भाग्यात्. **-Lucky,** *a.* भाग्यवत्, धन्य, सौभाग्यवत्, पुण्यवत्, भाग्य-दैव-शालिन् 2 शुभ, कल्याण (णी *f.*), भद्र, मंगल, शिव. **-ily,** *adv.* दैवात्, दैवयोगात्, दिष्ट्या, दैवभाग्य-वशात्, सौभाग्येन. **-iness,** *s.* सौभाग्यं, धन्यता, पुण्यवत्ता, &c.

Lucre, *s.* लाभः, आयः, आगमः, फलं, वृद्धि *f.*, अर्थः, फलोदयः, अर्थप्राप्ति *f.* **-Lucrative,** *a.* लाभद, लाभकर (री *f.*), अर्थद, फलावह. **-ly,** *adv.* लाभपूर्वं, सफलं.

Lucubrate, *v. i.* रात्रौ अधि-इ 2 A or अभ्यस् 4 U. **-ion,** *s.* रात्र्यध्ययनं, निशाभ्यासः.

Luculent, *a. See* **Lucid.**

Ludicrous, *a.* हास्य, हासकर (री *f.*), उप-अव-हास्य, असंगत. **-ly,** *adv.* असंगतं, हास्यरूपेण.

Lug, *v. t.* बलेन आकृष् 1 P or हृ 1 P.

Luggage, *s.* परिच्छदः, उपस्करः, यात्रासामग्री, यात्रापात्रसंभारः.

Lugubrious, *a.* शोकात्मक, दुःखात्मक, कारुणिक (की *f.*), दुःखावेदिन्.

Lukewarm, *a.* कोष्ण, कवोष्ण, मंदोष्ण, कदुष्ण, ईषदुष्ण, ईषत्तप्त. 2 उत्साहहीन, उदासीन, मंदोत्साह, निरुत्सुक, अतीक्ष्ण, मंदोद्योग, निरुत्साह. **-ly,** *adv.* ईषत्तापेन, कवोष्णं. 2 निरुत्साहं. **-ness,** *s.* कवोष्णता, ईषत्तापः. 2 निरुत्सुकता, मंदोत्साहः, औदासीन्यं, मंदोद्योगः, अनौत्सुक्यं.

Lull, *v. i.* शम् 4 P, प्र-उप°, निवृत् 1 A, विरम् 1 P, निर्वा 2 P, विगम् 1 P. **-v. t.** शम् c. (शमयति), सांत्व् 10; निवृत् c. 2 प्र-सद् c., लल् 10; 'l. to sleep' (गीतादिना) स्वप् c. **-s.** शांति *f.*, अक्षोभः, प्र-उप-शमः, निर्वातः, वायुनिवृत्ति *f.*-विरामः-विच्छेदः. **-er,** *s.* शमकः, शांतिदः. **-Lullaby,** *s.* स्वापगीतं.

Lumbago, *s.* कटिवेदना.

Lumber, *s.* भारः, निरर्थकद्रव्यं, निष्प्रयोजनद्रव्यं. **-v. i.** मंदं चल् 1 P. **-v. t.** संकृ 6 P. संकुलीकृ 8 U.

Luminary, *s.* ज्योतिस् *n.*, प्रकाशद् *m.*, ज्योतिष्मत् *m.*, तेजस् *n.*; *See* **Star.**

Luminous, *a.* तेजोमय (यी *f.*), सप्रकाश, तेजस्विन्, प्रभावत्, द्युतिमत्, भास्वर, 'self-l.' स्वयंप्रकाश. **-ly,** *adv.* तेजसा.

Lump, *s.* राशिः, संघः, चयः, समूहः, ओघः, पुंजं, संचयः, समाहारः; *See* **Multitude.** 2 पिंडः-डं, गंडः, घनः, स्थूलभागः-अंशः. 3 साकल्यं, समासः; 'in the l.' एकीकृत *a.* पिंडित *a.* साकल्येन, 'this is the meaning in the l.' एष पिंडितार्थः (M. 1.). **-v. t.** पिंडीकृ 8 U, राशीकृ, पुंजीकृ, एकीकृ, पिंड् 10. **-ish,** *a.* स्थूल; स्थूलबुद्धि. **-y,** *a.* सपिंड, पिंडित, पिंडीभूत.

Lunar, *a.* चांद्र (द्री *f.*), चांद्रमस (सी *f.*), सौम्य, ऐंदव (वी *f.*), gen. ex. by चंद्र-सोमin comp.; 'l. month' चांद्रमासः; 'l. race' चंद्र-सोम-वंशः; 'l. day' तिथि *m. f.*; 'l. mansion' नक्षत्रं; 'l. eclipse' चंद्रोपरागः.

Lunated, *a.* अर्धचंद्राकार.

Lunatic, *a.* उन्मत्त, सोन्माद, वातुल, भ्रांतचित्त-मति-बुद्धि, विक्षिप्तचित्त, हत-नष्ट-बुद्धि; 'a l. asylum' वातुलालयः. **-Lunacy,** *s.* उन्मादः, बुद्धि-मति-भ्रंशः, चित्तविक्षेपः-विभ्रमः, वातुलता, मति-बुद्धि-भ्रमः.

Lunch, Luncheon, *s.* उपहारः, लघ्वाहारः.

Lune, *s.* अर्धचंद्राकृतिः.

Lungs, *s.* तिलकं, क्लोमन् *n.*, क्लोमं, फुप्फुसः-सं.

Luniform, *a.* चंद्राकृति, चंद्राकार.

Lupine, *s.* द्विदलं, शमीधान्यं. **-a.** वृकसंबंधिन्, वृकसदृश.

Lurch, *v. i.* अप-सृ 1 P, निभृतं स्था 1 P, नि-ली 4 A. 2 **Disappoint, Steal,** q. v. **-er,** *s.* कौटिकः. 2 कौटिककुक्कुरः.

Lure, *v. t.* प्र-वि-लुभ् c., आकृष् 1 P, हृ 1 P, प्र-वृत् c., प्रोत्सह् c., प्रलुभ् 6P or c., मुह् c., प्रलुभ् 10. 2 आमिषदर्शनेन आकृष्. **-s.** प्र, विलोभनं, आकर्षणं, प्रोत्साहनं. 2 आमिषं, आमिषदर्शनं.

Lurid, *a.* वि-,पांडु, मलिन, उग्रदर्शन, घोररूप, मलिनप्रभ, तमोवृत.

Lurk, *v. i.* निभृते-प्रच्छन्नं-स्था 1 P or वृत् 1 A, नि-ली 4 A, गुप् pass.; *See* **Conceal.** **-er,** *s.* निभृतस्थायिन् *m.* **-ing,** *s.* प्रच्छन्नवासः, गुप्ति *f.*, 'l.- place' निलयः, गुप्तिः, निभृत-गूढ-स्थानं.

Luscious, *a.* ललित, सुभग, अतिमधुर, कमनीय, सुस्वादु, सुमधुर, अतिमिष्ट-स्वादु. **-ly,** *adv.* अतिमधुरं, सुस्वादु. **-ness,** *s.* अतिमाधुर्यं, सुस्वादुता.

Lush, *a.* सरस, रसगर्भ.

Lust, *s.* कामः, कामानलः, मैथुनेच्छा, सुरताभिता, मदनः, व्यवायेच्छा, रताभिलाषः,

विषयसुखेच्छा, इंद्रियासक्ति *f*. 2 अतिस्पृहा-वांछा, लालसा, अतिलिप्सा, लोभः; वांछा, आकांक्षा, अभिलाषः. 3 दुर्वासना, कुवासना. **–*v*. *i*.** मैथुनं-सुरतं इष् 6 P or अभिलष् 1, 4 P, रतार्थिन्-*a*. भू; better ex. by 'l.-ful.' 2 अत्यंतं इष् or वांछ् 1 P or स्पृह् 10 or कांक्ष् 1 P, गृध् 4 P, लुभ् 4 P. **–ful**, *a*. कामासक्त, कामांध, कामुक, कामिन्, इंद्रियवश्य विषयानिरत, इंद्रियसुखासक्त, कामार्त, कामातुर, कामग्रस्त, कामजित, कामाविष्ट, स्मरातुर, कामवृत्ति, रतार्थिन्, मैथुनार्थिन्, मैथुनेच्छु, व्यवायिन्, लंपट, स्त्रीलंपट-पर-व्यसनिन्, कामन, अभीक, अनुक. **–fully**, *adv*. सकामं, कामुक-लंपट-वत्.

Lusty, *a*. महाबल, सवीर्य, ससत्त्व, सबल, बल-वीर्य-वत्, मांसल, दृढांग (गी *f*.), दृढशरीर, वज्रदेह, पृथुशरीर, व्यूढोरस्क, अंसल, महाकाय. **–ly**, *adv*. सवीर्यं, ससत्त्वं, बलवत्, तेजसा, पौरुषेण. **–ness**, *s*. वीर्यं, सत्त्वं, मांसलता, दृढांगता, &c.

Lustral, *a*. पावन, पावक, शुद्धिकर (री *f*.); 'l. water' पावनोदकं, शांत्युदकं. **–Lustrate**, *v*. *t*. पू 9 U, शुध् c. **–ion**, *s*. शुद्धि *f*., शोधनं, पावनं, पवित्रीकरणं.

Lustre, *s*. द्युतिः, कांतिः, दीप्तिः, रुचिः, भास्, रुच्, शोभा, प्रभा, ओजस्विता (all *f*.), तेजस् *n*., प्रकाशः, प्रतापः, उद्द्योतः. **–Lustrous**, *a*. सुप्रभ, उज्ज्वल, तेजस्विन्, शोभन, दीप्ति-कांति-मत्; *See* **Bright.**

Lustrum, *s*. वर्षपंचकं.

Lutarious, *a*. पंकस्थ, कर्दमवासिन्. 2 पंकिल, कार्दम (मी *f*.). 3 पंकवर्ण.

Lute, *s*. वीणा, वल्लकी, विपंची-चिका, तंत्रीः, परिवादिनी (seven-stringed); 'bow of a l.' कोणः, शारिकः, रणः; 'play on a l.' वीणां वद् c. **–Lutanist, Luter, Lutist**, *s*. वीणावादः-दकः, वैणिकः.

Luteous, Lutescent, *a*. पीतवर्ण.

Luxate, *v*. *t*. विसं-धा 3 U, अस्थिसंधिं भंज् 7 P or त्रुट् c. or विसं-धा. **–ed**, *a*. संधिच्युत-भ्रष्ट, संधि-विश्लिष्ट, त्रुटितसंधि. **–ion**, *s*. अस्थित्रोटनं-भंगः-विश्लेषः.

Luxury, *s*. विषयसुखं, सुखोपभोगः, सुखभोग-आसक्ति *f*., विषयभोगः-सेवा, विलासः, विलासित्वं, सुखसेवा-आस्वादः. 2 सुखं, भोगः, सुखसाधनं, भोगसाधनं, सुखसाहित्यं. 3 स्वादुवस्तु, भोजनविशेषः, उत्तमान्नं, विशिष्टभोजनं. **–iance, –iancy**, *s*. अति-वृद्धि-स्फीति *f*., समृद्धि *f*., वृद्धिबाहुल्यं, उद्रेकः. **–iant**, *a*. अतिवर्धिष्णु, अतिस्फीत, अतिसमृद्ध, सुमधुर, अत्यंत, अतिबहुल, उद्रिक्त, अतिरिक्त, अत्यधिक. **–iantly**, *adv*. अतिसमृद्धया, अतिमाधुर्येण, बाहुल्येन, अतिबहुलं, अतिरिक्तं, अतिबहुशः. **–iate**, *v*. *i*. अत्यंतं वृध् or स्फाय् 1 A or पुष् 4, 5 P or आ-प्यै 1 A, अतिवृद्धिं इ 1 P, अतिमधुरीभू 1 P. 2 अतिविलासेन वृत् 1 A or व्यव-ह 1 A यथेच्छं सेव् 1 A or उपभुज् 7 A. **–ious**, *a*. विलासासक्त, विषयसेविन्, विषयासक्त, सुख-भोग-परायण, इंद्रियसुखनिरत, सुखास्वादतत्पर. 2 विलासयुक्त-मय (यी *f*.), सविलास, अतिसुखावह, सुखभोगकर (री *f*.), भोगानुकूल. **–iously**, *adv*. सविलासं, अतिसुखेन; सुखोपभोगपूर्वं, सुखासक्तवत्. **–iousness**, *s*. विलासित्वं &c.; *See* (*s*.).

Lye, *s*. क्षारोदकं, क्षारजलं.

Lymph, *s*. वसा, मेदस् *n*. 2 निर्झरः, उत्सः, ( ) वाहः. **–Lymphatic**, *s*. मेदोवाहिनी.

Lynx, वनमार्जारः-बिडालः.

Lyre, *s*. वीणा, विपंची; *See* **Lute.** **–ic, –ical**, *a*. वैणिक (की *f*.). **–ist**, *s*. वैणिकः.

Lythrum, *s*. अग्निज्वाला, सुभिक्षा, धातकी, धातु(तू)पुष्पिका.

M.

Macaw, *s*. वक्रतुंडः, शुकः, कीरः.

Mace, *s*. जातिपत्री, जाति-ती *f*., जाति(ती)-कोशं, जातिफलं-कोशं. 2 गदा; दंडः, यष्टि *m*. *f*.; वेत्रं, लगुडः, मुस(श)लः-लं, मुद्गरः; 'm.-bearer' दंड-यष्टि-धरः, वेत्रधरः, गदाहस्तः पाणिः, यष्टिग्रहः, वेत्रपाणिः, दंडभृत्.

Macerate, *v*. *t*. जलेन आप्लु c., आर्द्रीकृ, 8 U, सं-धा 3 U. **–ion**, *s*. संधानं, प्लावनं आर्द्रीकरणं.

Machinate, *v*. *t*. मंत्र् 10 A, (उपाये) चिंत् 10, संप्र-धृ 10, परिक्लृप् c., युज् 10. 2 द्रुह् 4 P, कपटप्रबंधं रच् 10, गूढमंत्रणां कृ 8 U. **–ion**, *s*. कुकल्पना, कुमंत्रणा, कूटप्रबंधः, गूढप्रयोगः, कपटप्रबंधः, द्रोहचिंतनं, कल्पना, चिंतनं, योजना, विधानं. **–or**, *s*. कुमंत्रणाकृत् *m*., कपटप्रबंधरचकः.

Machine, *s*. यंत्रं, साधनं, उपकरणं. ***–Machinery***, *s*. यंत्राणि, यंत्रसामग्री, यंत्रसमुदायः. ***–Machinist***, *s*. यंत्रकारः-विद्, यंत्रकलाज्ञः. ***–Mechanic***, *s*. शिल्पिन् *m*., शिल्पकारः, कर्मकारः, कारुः, शिल्पोपजीविन् *m*. **–*a*. –al, –*a***. यंत्र in comp., यंत्रसंबंधिन्, यंत्रविषय, यंत्र-शिल्प-विद्यासंबंधिन्, यांत्रिक (की *f*.). 2 शिल्पविद्याकृत, यंत्रकलानुरूप, 'm. art' शिल्पं, कला. 3 यंत्रतुल्य, यंत्र-

वत्, अप्रबोधपूर्वक. 4 यंत्रविद्या-शिल्पविद्या-निपुण; शिल्पकारिन्. **-ally,** *adv.* यंत्रविद्यानुरूपं, शिल्पशास्त्रानुसारेण. 2 यंत्रवत्, अबुद्धिपूर्वं, अमति-अप्रबोध-पूर्वं. **-ian,** *s.* शिल्पशास्त्रज्ञः, यंत्रविद्याकुशलः. **-Mechanics,** *s.* यंत्र-शिल्प-विद्या-शास्त्रं, यंत्रगतिशास्त्रं. **-Mechanism,** *s.* यंत्ररचना, कला, युक्ति *f.*; यंत्रगति *f,* यंत्रव्यापारः. **-Mechanist,** *s.* यंत्रकारः.

Macrocosm, *s.* विश्वं, त्रिभुवनं, अखिलं जगत्.

Macrology, *s.* अतिविस्तारः, दीर्घसूत्रता.

Macula, *s.* कलंकः, अंकः, लांछनं, लक्ष्मन् *n.* **-Maculate,** *v. t.* कलंकयति-मलिनयति (D.), **-a.,-ed,** *a.* कलंकित, कलुषित, लांछित.

Mad, *a.* उन्मत्त, वातुल, सोन्माद, हत-नष्ट-भ्रष्ट-बुद्धि, हतज्ञान, भ्रांत-विक्षिप्त-चित्त; 'make m.' उन्मादं नी 1 P, उन्मद् c.; 'to go m.' उन्मद् 4 P. 2 (Of acts) बालिश, उन्माद-युक्त, असमीक्ष्यकृत, साहसिक (की *f.*); 'm.-brain,-brained' विक्षिप्तबुद्धि &c.; 'm.-cap' साहसिकः; 'm. with anger' संरब्ध, कोपाकुल, मन्यूद्ग्र; 'm.-house' वातुलालयः; 'a m. dog' अलर्कः; 'a. m.-man' वातुलः, उन्मत्तः. **-den,** *v. t.* उन्मद् c., वातुलीकृ 8 U, व्यामुह् c., उन्मत्तीकृ; 'm. ed with rage' क्रोधांध; 'm. ed with liquor' सुरापानमत्त. **-ing,** *a.* उन्मादक, उन्मादजनन (नी *f.*). **-ly,** *adv.* उन्मत्तवत्, उन्मादात्, सोन्मादं, वातुलवत्, चित्तविभ्रमेण, भ्रांतचेतसा. 2 साहसिकतया. **-ness,** *s.* उन्मादः, उन्मत्तता, वातुलता, मति-बुद्धि-भ्रमः, चित्तविप्लवः-विक्षेपः, मति-बुद्धि-भ्रंशः. 2 (Fig.) व्यामोहः, मूढता, साहसं.

Madam, *s.* आर्या, भाविनी, कुलजा; (in addresing) आर्ये, भवति.

Madder, *s.* मंजिष्ठा, विकसा-षा, जिंगी, समंगा, कालमेशि(षि)का, मंडूकपर्णी, मंडि-(डी)री, भंडी, योजनवल्ली.

Madefy, *v. t.* क्लिद् c., आर्द्रीकृ 8 U.

Magazine, *s.* नानाविषयसंबद्धं पुस्तकं; 'a m. of arms' आयुधागारं, शस्त्रागारं. 2 भांडागारं.

Maggot, *s.* कृमिः, कीटः. **-y,** *a.* कीटमय (यी *f.*), कीटपूर्ण.

Magic, *s.* इंद्रजालं, माया, अभिचारः, मंत्रयोगः, वशक्रिया, कुहका-कं, मंत्रः, कार्मणं, कुसृति *f.*, मोहः, योगः. **-a.,-al,** *a.* ऐंद्रजालिक-आभिचारिक-मायिक-कौसृतिक-(की *f.*), मायामय (यी *f.*), मोहिन्, माया in comp. **-ally,** *adv.* इंद्रजालेन, मायया, अभिचारेण. **-ian,** *s.* ऐं(इं)द्रजालिकः, मायाविन् *m.*, मायाकारः, मायिन् *m.* अभिचारिन् *m.* कुहकः, कुहकाजीविन् *m.* कौसृतिकः, योगिन् *m.*, योगेश्वरः, सिद्धः; 'm.'s brush' पिच्छिका.

Magistrate, *s.* धर्माध्यक्षः, न्यायाध्यक्षः; *See* **Judge. -Magistracy,** *s.* धर्माधिपत्यं, न्यायाधिकरणं, धर्माधिकारः. 2 धर्माध्यक्ष-गणः-समूहः. **-Magisterial,** *a.* (*s.*) in comp., आधिकारिक (की *f.*). 2 प्रभुत्व-विशिष्ट, आज्ञापक, सावलेप, दृप्त, प्रगल्भ. **-ly,** *adv.* शासनरूपेण; सदर्पं, सावलेपं.

Magnanimous, *a.* महात्मन्, महामनस्, महामनस्क, महानुभाव, उदार-धी-चेतस्-मति, उदार, महेच्छ, महाशय, उदारात्मन्. 2 (Of acts) अवदात, उदार, औदार्यपूर्ण. **-ly,** *adv.* औदार्येण, माहात्म्येन, महानुभावात्, उदारचेतसा. **-Magnanimity,** *s.* माहात्म्यं, उदारात्मता, महात्मता, औदार्यं, महानुभावः, चित्तौदार्यं, उदारमतिता, महेच्छा, महाशयः.

Magnate, *s.* उत्कृष्टपदस्थः, उच्चपदस्थः, धुरंधरः, धुरीणः.

Magnet, *s.* अयस्कांतः, अयोमणिः, लोहकांतः, चुंबकः. **-ic, -ical,** *a.* आकर्षक, आकर्षणशील, लोहचुंबनशील; 'm. needle' अयस्कांतशलाका; 'm. attraction' आकर्षः-र्षणं. **-ically,** *adv.* आकर्षणद्वारेण. **-ism,** *s.* अयस्कांतगुणः, आकर्षणशक्ति *f.*, लोहकांतधर्मः. **-ize,** *v. t.* आकर्षणशक्तिं दा 3 U or संक्रम् c. or संचर् c.

Magnificent, Magnific, *a.* शोभमान, तेजस्विन्, अतिशोभन, महाप्रभ, श्रीमत्, महातेजस्, महाप्रताप, विभूतिमत्, देदीप्यमान. 2 (Palace &c.) विशाल, तुंग, उज्ज्वल. **-ly,** *adv.* अतितेजसा, सप्रतापं, विभूत्या, ऐश्वर्येण. **-Magnificence,** *s.* महिमन् *m.*, प्रतापः, श्रीः, शोभा, तेजस् *n.*, अतिप्रतापः, शोभा-प्रभा, ओजस्विता, महाप्रतापः, विभूति *f.*, औज्ज्वल्यं, विभवः, ऐश्वर्यं.

Magniloquent, *a.* प्रौढ-प्रगल्भ-वाच्, दृप्त-धृष्ट-वाच्. **-Magniloquence,** *s.* प्रौढभाषणं, प्रगल्भोक्ति *f.*, गर्वोक्तिः.

Magnify, *v. t.* वृध् c., उप-चि 5 U, स्फाय् c. (स्फावयति), अधिकीकृ 8 U; *See* **Increase.** 2 अत्यंतं वर्ण् 10, उत्-सं-कृत् 10. 3 अतिशयोक्त्या वृध् c. or विस्तृ c. **-er,** *s.* वर्धकः. 2 बृंहणयंत्रं. **-ing,** *a.* वर्धिन्, बृंहणकारिन्.

Magnitude, *s.* मानं, प्र-परि-माणं, आकारमानं, मात्रा in comp., इयत्ता; 'of the m. of an egg' अंडमात्र, अंडपरिमाण. 2 गुरुत्वं, महत्त्वं, बृहत्त्वं, वैपुल्यं, प्रथिमन् *m.*, गरिमन् *m.*, महिमन् *m.*, पृथुता, विशालता.

Mag-pie, *s.* *See* **Jay.**

Maid, Maiden, *s.* कन्या, कुमारी, तरुणी, बालिका, युवतिः-ती, बाला, कन्यका, कुमारिका. 2 अनूढा, अपरिणीता, अविवाहिता, अदत्ता, अक्षत-अविद्ध-योनिः. 3 (M.-servant) दासी, चेटी, प्रेष्या, परिचारिका,

कर्मकरी. -*a*. कौमार (री *f*.), कन्याविषय. 2 अभिनव, अकृतोपभोग, अक्षत, अखंड. -**hood**, *s*. कौमारं, तारुण्यं, कुमारीभावः-दशा. 2 अभिनवत्वं, अखंडता. -**ly**, -**like**, *a*. कन्यकोचित, कन्या-कुमारी-योग्य.

Mail, *s*. वर्मन् *n*., तनुत्रं, तनुत्राणं, कवचः-चं, उरश्छदः, दंशनं. कंकटकः, ज(जा)गरः; *See* **Armour**; 'm.-coat' कंचुकः, वारबाणः; 'having put on a m.-coat' आमुक्त-प्रति-मुक्त, अपिनद्ध, पिनद्ध. 2 पत्र-लेख्य-वाहनं. -**ed**, *a*. सकवच, कवचिन्, कवचधारिन्; कृतसन्नाह, वर्मित, सन्नद्ध, सज्ज, दंशित, व्यूढकंकट.

Maim, *v. t.* विकली-व्यंगी-कृ 8 U, हीनांगीकृ, विकलयति (D.). -*s* अंगवैकल्यं, हीनांगता, न्यूनावयवत्वं. -**ed**, *a*. विकलांग (गी *f*.), व्यंग, हीनांग, विकल, अंगविकल.

Main, *a*. मुख्य, प्रधान, प्रमुख, परम, अग्र्य, श्रेष्ठ, उत्कृष्ट, उत्तम, विशिष्ट, मूल in comp., मुख्यतम; 'm. matter' गुरुकार्यं, गुर्वर्थः; 'm. door' सिंहद्वारं; 'm. stock' मूलधनं. -*s*. प्रधानभागः, प्रधानांशः, मुख्यांशः, बाहुल्यं, भूयिष्ठभागः. 2 महोदधिः, महार्णवः; *See* **Sea** 3 बलं, शक्ति *f*., प्रभावः, सामर्थ्यं. 4 प्राणिद्यूतं. समाह्वयः; 'in the m.' बहुशः, बाहुल्येन, भूयिष्ठं, सामान्यतः; 'with might and m.' सर्वबलेन, प्रसभं, प्रसह्य; 'm. land' मध्य-मूल-भूमि *f*., मुख्य-प्रधान द्वीपः-पं. -**ly**, *adv*. मुख्यशः, बहुशः, प्रधानतः, मुख्यांशेन, भूयिष्ठं, बहुतरं, सामान्यतः, विशेषेण, प्राधान्येन.

Maintain, *v. t.* ग्रह् 9 U, धृ 1 P, 10. 2 पा c. (पालयति), रक्ष् 1 P, भृ 1 P, 3 U आ-अव-लंब् 1 A, उत्तंभ् 9 P or c., संस्तंभ् संवृध् c., पुष् 1, 9 P or c., योगक्षेमं वह् 1 P, पालनं-पोषणं कृ 8 U. 3 प्रवृत् c., रक्ष् न विच्छिद् 7 P or वि-रम् 1 P. 4 प्रति-पद् c., वह् 1 P, निर्वह् 1 P or c., समर्थ् 10, संस्तंभ्, दृढीकृ, अनु-पा c. (पालयति); *See* **Fulfil** also. 5 (As a theory) वद् 1 P, 'he who m. s that there is God' ईश्वरवादिन्; 'one who m. s the doctrine of atheism' नास्तिकमतवादिन्. 6 सनिश्चयं वद् 1 P, दृढोक्त्या प्रति-पद् c.; 'to m. oneself' जीविकां धृ, शरीरवृत्तिं कृ or निर्वृत् c.; *See* **Live** (on). -**er**, *s*. पालकः, पोषकः, रक्षितृ *m*., आलंबिन्, भरः-धरः-in comp. -**Maintenance**, *s*. धारणं. 2 रक्षा, रक्षणं, भरणं, भृति *f*., आ-समा-लंबनं, पालनं, पोषणं, संवर्धनं 3 जीविका, वृत्ति *f*., आ-उप-जीविका. आजीवः; प्राणयात्रा; *See* **Living**. 4 प्रामाण्यकरणं. अवलंबः. आश्रयदानं. 2 प्रतिपादनं. निर्वाहः.

Maize, *s*. [illegible]

Majesty, *s*. राजश्रीः, राजप्रतापः-तेजस् *n*., राजमहिमन् *m*.-प्रभावः-गौरवं, प्रतापः, राजत्वं, तेजः, प्रभावः, ऐश्वर्यं, महिमन् *m*., वैभवं, विभूति *f*., गौरवं, महत्त्वं; 'your m.' देवः, महाराजः, देवपादाः, स्वामिन् *m*., श्रीमद्देवपादाः, प्रभुः, प्रभविष्णुः; (in addressing) देव, महाराज, &c. -**ic**, -**ical**, *a*. राजयोग्य, राजतुल्य, नृपोचित, राजतेजोमय (यी *f*.), राजश्रीमत्, राजप्रतापवत्, सानुभाव, सावष्टंभ, प्रतापवत्, ऐश्वर (री *f*.), विभूतिमत्, प्रभाववत्, ओजस्विन्; उन्नत, अतिप्रौढ, उज्ज्वल, उत्तुंग; *See* **Lofty** also; 'm. splendour' द्युति *f*.; 'm. dignity' अनुभावः, अवष्टंभः, ओजस्विता. -**ically**, *adv*. राजसदृशं, सावष्टंभं, सानुभावं, नृपोचितं, राजप्रतापेन-तेजसा-महिम्ना, सप्रतापं, सप्रभावं, ऐश्वर्येण, सगौरवं.

Major, *a*. अधिक, भूयस्, अधिकसंख्य. 2 मुख्य, प्रधान, प्रमुख, गुरु, वरीयस्, वर्षीयस्. -*s*. प्राप्तव्यवहारः, व्यवहारक्षमः-योग्यः, अतीत-त्यक्त-शैशवः. 2 गुल्माध्यक्षः, सैन्यदलाध्यक्षः. -**Majority**, *s*. बहु (pl.), बहुतरभागः, भूयिष्ठभागः, अधिकसंख्या; 'a m. of members have come' सभासदां मध्याद्बहवः समागताः; 'm. of votes' बहुमतं, मताधिक्यं. 2 व्यवहारः, व्यवहारक्षमता, व्यवहार्यदशा, वयस् *n*.; 'reached his m.' प्राप्तव्यवहारः, त्यक्तशैशवः; *See* **Grow up**.

Make, *v. t.* कृ 8 U, वि-धा 3 U, अनु-ष्ठा 1 P, आचर् 1 P. 2 (Create) निर्मा 3 A, 2 P, सृज् 6 P, घट् c., (घटयति), कृ, वि-धा, रच् 10, कॢप् c., उत्पद् c., जन् c. (जनयति), साध् c., निः-सं-पद् c. 3 (Produce) उत्पद् c., जन् c., कृ; *See* **Cause**. 4 (Force) ex. by causal of roots; 'm. s me question you' प्रश्नकर्मणि मां नियोजयति (Ka. 134); *See* **Compel**. 5 निर्मा, घट् c.; gen. ex. by निर्मित, घटित, रूप, मय, आत्मक in comp.; also by भू 1 P, सं-पद् 4 A; '10 repeated 2 times m. s 20' द्विरावृत्ता दश विंशतिर्भवति or संपद्यते. 6 आप् 5 P, विद् 6 U, लभ् 1 A; *See* **Get**; 'm. amends for' क्षतिं पूर् 10, प्रतिफलं दा 3 U, प्रमृज् 2 P, निष्कृ; 'm. account of' मन् 4 A or c., गण् 10, अपेक्ष् 1 A; 'to m. the best of a bad matter' दोषमपि गुणत्वमापादयितुं; 'self-made man' स्वोद्यमलब्धप्रतिष्ठः; 'm. merry' हृष्ट-*a*. भू, उत्सवं कृ; 'm. much of' बहु मन्; 'm. light of' तृणाय मन् or गण्, लघूकृ, अव-ज्ञा 9 U; *See* **Contemn**; 'm. way' अंतरं दा; अप-सृ 1 P, अप-इ-या 2 P; अपक्रम् 1 U, 4 P; 'm. free with' संकोचं त्यक्त्वा आचर् or व्यवहृ 1 P, 'm. away with' नश् c., व्या-पद् c., हन् 2 P or c.

(घातयति); *See* **Kill;** ‘m. water’ मूत्रोत्सर्गं कृ; ‘m. good’ पा c. (पालयति), पूर् 10, दृ 1 P, रक्ष् 1 P (promise &c.); *See* **Fulfil** also; सं-पद् c., साध् 5 P or c. (loss) पूर्, प्रतिविधा 3 U, प्रतिकृ, अपाकृ, क्षुध् c.; ‘m. bold to say’ प्रगल्भतया वद् 1 P or वचनसाहसं कृ **-for,** अभि-या 2 P, प्रति-या, उपसृप्-उपगम् 1 P, अभि-उप-स्रु 1 P. **2** आवह् 1 P कॢप् 1 A. **-into,** निर्मा, वि-धा; ‘gold is made into ornaments’ सुवर्णस्यालंकाराः क्रियंते. **-of,** *See* **Make** (5) above; ‘made of’ मय (यी *f.*), घटित, निर्मित, आत्मक, रूप in comp., or only by comp.; ‘a pot made of gold’ हेमनिर्मितं पात्रं, हेमपात्रं. **2** अवगम् 1 P; बुध् 1 P; ‘not knowing what to m. of it’ किं नु एतत्स्यादिति ज्ञातुमसमर्थः. **-off,** पलाय् 1 A, अपक्रम्, अप-इ, अप-सृ-गम्-धाव् 1 P. **-out,** निरूप् 10, ज्ञा 9 U, अवगम्, ग्रह् 9 U, उपलभ् 1 A, विद् 2 P; *See* **Know. 2** प्रति-पद् c., समर्थ् 10; प्रमाणीकृ, साध् c., निष्पद् c. **-over,** सम्-ऋ c. (अर्पयति), संक्रम् c., निक्षिप् 6 P, न्यस् 4 U, आयत्तीकृ. **-up,** समाहृ 1 P संकल् 10, संभृ 1 P, 3 U, समा-नी 1 P, एकीकृ. **2** (A loss) पूर्, प्रतिवि-धा; ‘you should m. up for your want of beauty by being good’ त्वया अलावण्यदोषः सदाचरणेन प्रतिविधेयः. **3** (A quarrel) सं-धा, प्रशम् c., (प्रशमयसि विवादं S. 5). **4** निर्णी, साध्, निष्पद् c.; ‘m. up one's mind’ निर्णी, निश्चि 5 U; *See* **Determine;** ‘m. up to’ उपसृ, उपगम्; *See* **Approach.** *-s.* आकारः, आकृति *f.*, रूपं, विग्रहः, अंगं, वपुस् *n.*; ‘handsomeness of m.’ अंग-सौष्ठवं. **-er,** *s.* कारः, करः, कारिन्, कृत् in comp.; कर्तृ *m.*, निर्मातृ *m.* विधातृ *m.*, कल्पकः, रचकः, घटकः; ‘m. of pots’ कुंभकारः-कृत् &c. **2 Creator,** q. v. ‘man is the m. of his own fortune’ लोके गुरुत्वं विपरीततां वा स्वचेष्टितान्येव नरं नयंति (H. 2). **-ing,** *s.* करणं, विधानं, रचनं, कल्पनं, निर्माणं, &c.

Maladdress, *s.* अपटुत्वं, अकौशलं.

Maladministration, *s.* कुशासनं, दुर्णयः, असम्यक् निर्वाहः.

Maladroit, *a.* अपटु, अकुशल.

Malady, *s.* रोगः, व्याधिः, आमयः, विकारः, रुजा, गदः; *See* **Disease.**

Mala fides, *adv.* सव्यलीकं. *-s.* विप्रलिप्सा, वंचनेच्छा.

Malaise, *s.* व्यग्रता, आकुलता, उद्विग्नता.

Malapert, *a.* अविनीत, धृष्ट, प्रगल्भ, प्रतिभानवत्, निर्लज्ज. **-ly,** *adv.* अविनयेन, धृष्टवत्, निर्लज्जं. **-ness,** *s.* अविनयः, धृष्टता, प्रागल्भ्यं, प्रतिभा-भानं.

Malapropos, *adv.* अस्थाने, अकाले, अनवसरे.

Malaria, *s.* पूतिवायुः, दुर्वातः.

Malcontent, *a.* or *s.* असंतुष्ट, अप-वि-रक्त, राजापरक्त, राजनीत्यसंतुष्ट.

Male, *s.* पुंस् *m.*, पुरुषः, नरः, नृ *m.*; ‘m. and female’ स्त्रीपुंसौ, स्त्रीपुरुषौ, युग्मं, मिथुनं, द्वंद्वं. *-a.* ex. by masc. gender; पुंजातीय; ‘m. sparrow’ चटकः; sometimes by पुरुष-पुं-नर- in comp., ‘m. tiger’ पुंव्याघ्रः; ‘m. cuckoo’ पुंस्कोकिलः; ‘m. attire’ पुरुषवेशः; ‘m. child’ अपत्यं पुमान्, पुत्रः, सुतः, &c.; ‘m. species’ पुंजाति *f.*, पुरुषजातिः.

Malediction, *s.* शापः, आक्रोशः-शनं. ***-Maledictory,*** *a.* अभिशापक, आक्रोशगर्भ, अमंगलाशंसिन्.

Malefactor, *s.* पातकिन् *m.*, पापिन् *m.*, अपकारिन् *m.*, अपराधिन् *m.* पापकर्मन् *m.*, दुष्कृतिन् *m.* दोषभाक्, कृतागस् *m.*

Malefic, *a.* अपकारिन्.

Malevolent, *a.* अभिद्रुग्ध, द्रोहमति-बुद्धि, दुष्ट-भाव-मति-बुद्धि, दुरात्मन्, दुराशय, कुबुद्धि दुर्बुद्धि, मत्सरिन्, साभ्यसूय, पापाशय, अहितैषिन्, दुर्हृद्, दुःशील, अनिष्टार्थिन्. **-ly,** *adv.* द्रोहबुद्ध्या, दुष्टभावेन, साभ्यसूयं, अहितेच्छया. ***-Malevolence,*** *s.* द्रोह-अहित-बुद्धि *f.*, दुष्टभावः, कुभावः, कुबुद्धिः, द्रोहमति *f.*, द्रोहः, असूया, अभ्यसूया, दौरात्म्यं, मात्सर्यं, अहितेच्छा, अपकारेच्छा, पैशुन्यं.

Malfeasance, *s.* अपकारः, दुष्कर्मन् *n.*

Malformation, *s.* विकृति *f.* वैरूप्यं.

Malice, *s.* वि-,द्वेषः, वैरं, द्वेष-शत्रु-भावः, द्रोहः, दुष्टभावः, द्रोहमति-बुद्धि *f.*, मात्सर्यं, असूया, अहितेच्छा, पापाशयः, दौरात्म्यं, दौर्जन्यं, पैशुन्यं. ***-Malicious,*** *a.* वैर-द्वेष-पूर्वक, द्रोह or द्वेष-मूल or हेतुक. **2** अतिद्वेषिन्, द्रोहिन्, द्रोहमति-बुद्धि, दुष्टभाव-मति, द्रोहशील, अपकारेच्छु, पापात्मन्, दुरात्मन्, साभ्यसूय, मत्सरिन्, दुर्जन, खल, पिशुन; *See* ***Malevolent.*** **-ly,** *adv.* द्रोहबुद्ध्या, दौरात्म्येन, सद्वेषं, मात्सर्येण; ‘m. intentioned’ द्रोहबुद्धि &c. **-ness,** द्रोहमतित्वं, दुष्टशीलता; *See* (*s.*)

Malign, *v. t.* अपभाष् 1 A, परि-अप-वद् 1 U, अभिशंस् 1 P, कलंकयति (D.), वि-,द्विष् 2 U. *-a.*, **-ant,** *a.* द्वेषबुद्धि, द्रोहपरायण, दुष्टबुद्धि, दुर्बुद्धि, दुराशय, नृशंस, दुर्मति; *See* ***Malicious, Malevolent.* 2** (Star) अशुभ, दुष्ट, अनिष्ट, अमंगल. **3** उग्र, घोर, अतिदुष्ट, अरुंतुद, अतितिग्म. **4** असाध्य, दुःसाध्य, दुश्चिकित्स्य, मारात्मक, सान्निपातिक (की *f.*), काल in comp. **-ly, -antly,** *adv.* सद्रोहं, अत्युग्रं. **-er,** *s.* अभिशंसकः, अपवादकः, पिशुनः. **-ity,** ***-Malignancy,*** *s.* द्रोहबुद्धि *f.*, द्वेषपरायणता, परमद्वेषः, भावदुष्टता, अतिपैशुन्यं;

See **Malice.** 2 उग्रता, तिग्मता, दुष्टता, 3 असहिष्णुता, मात्सर्यकता.

Malinger, *v. i.* शरीरास्वास्थ्यं अपदिश् 6 P.

Malison, *s. See* **Curse.**

Malkin, *s.* अशुद्धा, भ्रष्टा.

Mall, *s.* महामुद्गरः, घनः. 2 जनाकीर्णमार्गः, जनसामान्यपथः.

Malleable, *a.* उद्वर्तनीय, घनेन वर्धनीय, उद्वर्तनक्षम. **-Malleate,** *v. t.* मुद्गराघातेन उद्-वृत् *c.*

Mallet, *s.* मुद्गरः, द्रुघणः, घनः.

Malodorous, *a.* दुर्गंधि.

Malpractice, *s.* दुराचारः, दुश्चरितं, कुचरितं, कुचेष्टितं.

Malt, *s.* यवपानीयबीजं; 'm.-drink' यवसुरा, यवजं, यवपानीयं; 'm.-house' यवसंधानगृहं.

Maltreat, *v. t.* अप्रियं आचर् 1 P or वृत् 1 A, नि-अप-विप्र-कृ 8 U, पीड् 10. **-ment,** *s.* अपकारः, निकारः, पीडा.

Malversation, *s.* दुराचरित, शाठ्यं, धूर्तता; *See* **Fraud.**

Mamma, *s.* माता, अंबा, जननी; *See* **Mother.**

Mammal, *s.* सस्तन *a.* प्राणिन्. **-ia,** *s.* सस्तनाः प्राणिनः.

Mammiferous, *a.* सस्तन, स्तनविशिष्ट.

Mammiform, *a.* स्तनाकृति, कुचाकार.

Mammon, *s.* धनं, लक्ष्मीः, संपद् *f.* (the god) कुबेरः. **-ist,** *a.* or *s.* धनपरायण, द्रव्यार्जनतत्पर. **-ism,** *s.* द्रव्यपरायणता.

Man, *s.* मनुष्यः, मानुषः, मनुजः, नरः, नृ *m.*, मानवः, पु(पू)रुषः, मर्त्यः, पुंस् *m.* 2 (As opposed to child) मानुषः, प्रौढवयस्कः, त्यक्तशैशवः, मानुष्यप्राप्तः, प्रौढः. 3 (As opposed to woman) पुरुषः, पुमान्, नरः. 4 (M.-kind) मनुष्याः, मानवाः, मनुष्यजाति *f.*, मर्त्याः, मानुष्यं, मानुषता, जनः, लोकः, मनुष्यजीव-लोकः. 5 (In chess) शा(सा)रः-रिः; 'an eminent m.' पुरुषसिंहः-व्याघ्रः, नरवरः-शार्दूलः-पुंगवः-ऋषभः; *See* **Excellent;** 'm.-eater' पुरुषादः, नृभुज्, नरभोजिन्; 'm.-hater' मनुष्यशत्रुः-द्रोही, मनुष्यद्वेषी; 'm. of war' महती युद्धनौः; 'm.-slaughter' मनुष्यवधः-घातः-हत्या, प्रमाथः; 'm.-stealing' मनुष्यापहारः. **-v. t.** पुरुषसनाथीकृ 8 U, सैन्यं निविश् *c.* **-ful, -ly,** *a.* पौरुष(षी *f.*), पौरुषेय(यी *f.*); शूर-वीर-योग्य, महावीर्य, विक्रांत, शूर, वीर्यवत्; पुरुष-नर- in comp.; 'm. deed' पुरुषकारः, पौरुषं; 'm. office' पुरुषाधिकारः. **-fully,** *adv.* पुरुषवत्, सवीर्यं, सपौरुषं, सविक्रमं, शूर-वीरवत्, निर्भयं. **-fulness, -liness,** *s.* पौरुषं, वीर्यं, पुरुषकारः, वि-परा-क्रमः, शौर्यं, साहसं. **-hood,** *s.* मनुष्यत्वं, मानुषता, मानुष्यं, पुरुषदशा-धर्मः-भावः. 2 पुंस्त्वं, पौरुषं, ओजस्-तेजस्- *n.*, वीर्यं, ऊर्जस् *n.*, यौवनं, तारुण्यं, यौवनावस्था, तारुण्यदशा, प्रौढता, व्यवहारदशा; 'having reached the stage of m.' प्राप्तयौवनः, आरूढयौवनः. 4 वीर्यं, वि-परा-क्रमः, शौर्यं, पौरुषं.

Manacle, *s.* हस्तनिगडः-बंधनं-पाशः. **-v. t.** (हस्तौ) निगडेन बंध् 9 P or संयम् 1 A.

Manage, *v. t.* निर्वह् *c.*, व्यव-स्था *c.* (स्थापयति), घट् *c.* (घटयति); सं-पद् *c.*, वि-धा 3 U, प्र-वृत् *c.*, कृ 8 U. 2 अधि-ष्ठा 1 P, अवेक्ष् 1 A; प्र-णी 1 P, शास् 2 P, नियम् 1 P, नियंत्र् 10; निग्रह् 9 P, वशीकृ, दम् *c.* (दमयति); *See* **Control.** 3 विनी, अनुशास्, शिक्ष् *c.* 4 परिमितं व्यय् 10 (व्ययति). **-v. i.** आचर् 1 P, वृत् 1 A, घट् 1 A, उपायं युज् 10 or चिंत् 10 or क्लृप् *c.*, संवि-धा; *See* **Arrange;** यथा नौ प्रियसखी बंधुजनशोच्या न भवति तथा निर्वाहय (S. 3) 'so m. that &c.' **-able,** *a.* प्रणेय, विधेय, विनेय, वश्य, आयत्त, शासनीय, सुकर. **-ed,** *a.* प्रणीत, विहित; नियत, नियंत्रित; प्रयुक्त, घटित; 'well-m.' सुघटित, सुविहित, सुप्रयुक्त. **-er,** *s.* निर्वाहकः, प्रणेतृ *m.*, व्यवस्थापकः, अवेक्षकः, प्रवर्तकः, प्रयोजकः, संपादकः, घटकः, अधिकारिन् *m.* अधिकृतः, नायकः, अधिष्ठातृ *m.*, अध्यक्षः, चालकः; 'm. of public affairs' जनकार्याध्यक्षः, पौरकार्यावेक्षकः, जनकार्याधिकारी; 'm. of the treasury' कोशाध्यक्षः, द्रव्याधिकारी. 2 (Stage-m.) सूत्रधारः, स्थापकः. 3 परिमितव्ययिन् *m.* **-ing,** *a.* व्यवस्थापक, कार्याधिकारिन्, कार्यावेक्षक, चालक. **-ment,** *s.* प्रणयनं, नयः, नीति *f.*, निर्वाहः-हणं, घटनं, प्रवर्तनं, करणं, विधानं; अधिष्ठानं, अवेक्षा-क्षणं, व्यवस्थापनं, चालनं. 2 अधिकारः, अधिष्ठातृत्वं, शासन, नियमनं, अध्यक्षता, विनियमः, नियंत्रणं, वशीकरणं. 3 उपायः, प्रयोगः, युक्ति *f.*, उपाय-कल्पना-प्रयोगः, संविधा; 'under his m. of affairs' तस्मिन् कार्याणि अवेक्षमाणे, कार्याध्यक्षे तस्मिन्.

Manakin, *See* **Manikin.**

Manciple, *s.* भोजनाधिकारिन् *m.*

Mandate, *s.* आज्ञा, शासनं, आ-नि-देशः, नियोगः, विधिः; 'written m.' आज्ञापत्रं, शासनपत्रं. **-ory,** *a.* आदेशक, आज्ञापक, शासक.

Mandible, *s.* हनु *m.* *f.*, चिबुक, पीचं, कुंजः.

Mandrake, *s.* लक्ष्मणा, पुत्रदात्री, पुत्रदा.

Manducate, *v. t.* चर्व् 1 P.

Mane, *s.* केश(स)रः; सटा (of a lion). **-ed,** *a.* केसरिन्.

Manege, *s.* अश्वदमनविद्या-कला.

Manes, *s.* पितरः,स्वधा-श्राद्ध-भुजः; पिंडभाजः, पिंडाशाः (all pl.) पितृगणः-वर्गः-लोकः-जनः; 'offering oblations to the m.' पितृ-कर्म-कार्य-क्रिया-यज्ञः-मेधः, श्राद्धकर्म-क्रिया; 'oblations to the m.' पिंडः, स्वधा, कव्यं, श्राद्धं; 'gifts in honour of the m.' पितृदान-तर्पणं; 'a day sacred to the m.' पितृतिथि *m.f.*

Mange, *s.* (पशूनां) सिध्मन् *m.*, पामा; *See* **Itch.**

Manger, *s.* द्रोणिः, यवादनी, तृणभाजनं-पात्रं.

Mangle, *v. t.* व्यव-च्छिद् 7 P वि-दॄ 9 P, व्रश्च् 6 P, निकृत् 6 P, लवशः कृत् or खंड् 10 or छिद्. **-s.** वस्त्रमार्जनयंत्रं. **-ed,** *a.* छिन्नभिन्न, विक्षतांग (गी *f.*), व्यवच्छिन्न, क्षतविक्षत, लवशः कृत.

Mango, *s.* आम्रं, आम्रफलं; (tree) आम्रः, चूतः-तकः, रसालः; सहकारः (very fragrant); 'm.-blossom' चूतप्रसवः; 'm.-sprout' सहकारमंजरी.

Mania, *s.* उन्मादः, बुद्धिभ्रमः, *See* **Madness.** 2 महाव्यसनं,एकविषयासक्ति *f.* **-Maniac,** *a.* उन्मत्त, वातुल. **-s.** उन्मत्तः,वातुलः, *See* **Mad.**

Manifest, *a.* स्पष्ट, स्फुट, व्यक्त, प्रत्यक्ष, प्रकाश, प्रकट, सुव्यक्त-स्पष्ट-प्रकाश, परिस्फुट, अभिव्यक्त, प्रकटित, आविर्भूत; प्रादुर्भूत; 'to become m.' प्रादुर्भू 1 P,आविर्भू, प्रकटी-स्पष्टी-भू, प्रकाश् 1 A **-v. t.,** 'make m.' प्रकाश् c., व्यंज् 7 P or c., स्पष्टीकृ 8 U, आविष्कृ, प्रकटी-प्रत्यक्षी-स्फुटी-कृ, विशदीकृ, प्रकटयति (D.), सूच्, दृश् 10, c.; आविर्भूतज्योतिषां ब्राह्मणानां (U. 4.) 'to whom the Supreme Light has m. ed itself.' **-ation,** *s.* आविष्करणं, प्रकाशनं, व्यंजनं स्फुटीकरणं, &c. 2 व्यक्ति *f.*, प्रकाशता स्पष्टता, आविर्भावः, प्रादुर्भावः, प्रत्यक्षता अवभासः, प्राकट्यं. **-er,** *s.* प्रकाशकः, व्यंजकः. **-ly,** *adv.* व्यक्तं, स्पष्टं, स्फुटं, सुव्यक्तं, परिस्फुटं. **-ness,** *s.* व्यक्तता, स्पष्टता, &c. **-Manifesto,** *s.* प्रकाशन-घोषणा-पत्रं, ज्ञापन-प्रसिद्धि-पत्रं.

Manifold, *a.* *See* under **Many.**

Manikin, *s.* क्षुद्रनरः, माणवकः, मनुष्यकः.

Maniple, *s.* मुष्टि *m.f.* 2 लघुगुल्मः.

Manipulate, *v. t.* हस्ताभ्यां कृ 8 U or वि-धा 3 U; हस्तौ व्यापृ c. or चल् or विक्षिप् 6 P. **-ion,** *s.* हस्तव्यापारः, हस्तादिचालनं-विक्षेपः.

Manna, *s.* (Of bamboos) वंशरो(लो)-चना, त्वक्क्षीरी, वंशजा, शुभ्रा, वंशक्षीरी, वैणवी.

Manner, *s.* प्रकारः, रीति *f.*, विधा, विधिः, रूपं, मार्गः, पर्यायः, क्रमः; पद्धति *f.*, सरणि-णी *f.*; 'in this m.' इत्थं, एवं, अनेन प्रकारेण, &c.; 'in that m.' 'in such a m.' तथा, तेन प्रकारेण, एवंविधं, तथाविधं, एवंरूपेण, &c.; 'in like m.' तथा, तथैव, एवमेव, वद्वत्. 2 (Kind) भेदः, विशेषः, प्रकारः. 3 आकारः, आकृति *f.*, रूपं, मुखचर्या, वदनाकृतिः. 4 (M. s) आचारः, आचरणं, वृत्ति *f.*, वृत्तं, वर्तनं, व्यवहारः, चर्या, रीतिः; नियमः, चरित्रं, शीलं, मार्गः, सम्प्रदायः, धारा, अभ्यासः (habitual m. s); 'good m. s' सदाचारः, सद्वर्तनं, विनयः, सुनीति *f.*, शिष्टाचारः, मर्यादा, सुशीलता, शिष्टता, सभ्यता, शिष्ट-संप्रदायः; 'bad m. s' अमर्यादा, दुराचारः, अनीतिः; कुरीतिः; 'm. s of a country' देशाचारः, देशव्यवहारः; 'violation of good m. s' मर्यादा-विनय-अतिक्रमः. **-ed,** *a.* सुशील, शिष्टाचार, विनीत; 'ill-m.' अशिष्ट, असभ्य, दुःशील, दुर्मर्याद, अविनीत. **-ism,** *s.* एकरीतिसेवनं, एकरसत्वं. **-less,** *a.* अविनीत, दुराचार, अशिष्ट, अमर्याद. **-ly,** *a.* शिष्ट, विनीत, सभ्य, सुशील, सुजन, सदाचार, साधुवृत्त, शिष्टाचार **-adv.** सविनयं, शिष्टवत्.

Manœuvre, *s.* यानप्रकारः, युद्धव्यपदेशः. 2 प्रयुक्ति *f.*, कौशलं, वैदग्ध्यं, उपायः, व्यपदेशः, माया, विदग्धप्रयोगः, कपटोपायः. **-v. t.** विदग्धोपायं रच् 10 or युज् 10, छलं-कपटं प्र-युज् 8 U.

Manor, *s.* ग्रामाधिपत्यभूमि *f.* स्थानं; 'lord of the m.' ग्रामेश्वरः, ग्रामपतिः.

Mansion, *s.* हर्म्यं, सौधं, गृहं, मंदिरं, भवनं, गेहं, सदनं, निकेतनं, शाला, आयतनं; *See* **House**; 'lunar m.' नक्षत्रं, दक्षजा, विधुप्रिया.

Mantle, *s.* प्रावारः-रकः, अवगुंठनं, आवरणं, पिधानं. **-v. t.** आ-प्र-वृ 5 U, समाकृ 6 P, आ-च्छद् 10. **-v. i.** प्रवृध् 1 A, विस्तृ-वितन् pass.; प्र-वि-सृप् 1 P. 2 उद्गम् 1 P, उत्सृप्, आविर्भू 1 P. 3 उत्सिच् pass., फेन यते (D.). 4 मुद् 1 A, आनंद् 1 P, उत्सवं कृ 8 U; *See* **Delight.**

Mantua, *s.* स्त्रीवस्त्रं-परिधानं.

Manual, *a.* हस्त्य, हस्त in comp., 'm. art' शिल्पं, कला; 'm. dexterity' हस्तकौशलं-लाघवं; 'm. labour' श्रमः, आयासः; 'sign m.' स्वाक्षरं, स्वहस्ताक्षरं. **-s.** लघुपुस्तकं, संक्षिप्त-ग्रंथः, सारसंग्रहः.

Manufacture, *s.* निर्माणं, विरचनं-ना, घटनं-ना, उत्पादनं, शिल्पकर्मन् *n.*, शिल्पनिर्माणं 2 शिल्पनिर्मितं-द्रव्यं-वस्तु. **-v. t.** शिल्पेन निर्मा 3 A, 2 P, or क्लृप् c. or रच् 10 or वि-धा 3 U or कृ 8 U. **-al,** *a.* शिल्पिक (की *f*). **-er,** *s.* शिल्पकारः, शिल्पिन् *m.*, शिल्पकः.

-Manufactory, *s.* शिल्पशाला-गृहं, निर्माणशाला-गृहं.

Manumit, *v. t.* दास्यात् मुच् 6 P or c. or मोक्ष् 10. **-Manumission,** *s.* दास्यमोचनं, बंधनमोक्षः

Manumotive, Manumotor, *a.* हस्तप्रेरित.

Manure, *s.* सारः, भूमिलेपः, पुरीषादि *n.* **-***v. t.* पुरीषादिना लिप् 6 P, सारं नि-धा 3 U or निक्षिप् 6 P.

Manuscript, *s.* हस्तलेखः-लिखितं, लेख्यं, लिखितं. **-***a.* लिखित, हस्तलिखित.

Many, *a.* बहु, बहुल, अनेक, भूयिष्ठ, प्रभूत, प्रचुर, बहुसंख्यक, भूयस्, विपुल, नैक-नाना- in comp.; 'of m. kinds' अनेक-नाना-विध; 'as m. as' 'so m.' यावत्-तावत्, यावत्संख्यक-तावत्संख्यक, यति-तति; 'how m.' कियत्, कति (pl.); 'of how m. kinds' कतिविध-*a.*, 'in m. places' बहुत्र, अनेकत्र; 'in m. ways' बहुधा, अनेकधा; 'how m. times' कतिकृत्वः, कतिवारान्; 'm. times' बहुशः, भूयो भूयः, मुहुर्मुहुः, अनेकशः, अनेक-बहु-वारं,पुनः-पुनः, बहुकृत्वः; 'so m.' एतावत्,इयत् **-***s.* समूहः, समवायः, संघातः; समाजः; 'the good of the m.' समाजहितं. In comp. ex. by बहु or नाना; बहुपर्ण, नानावर्ण, बहुजिह्व, &c. **-Manifold,** 'many-sided' *a.* नानाविधप्रकार, बहुगुण-रूप, अनेक, अनेक-नाना-रूप, विविध, बहुविध-प्रकार;नाना in comp. **-ly,** *adv.* बहुधा, अनेकधा, नानाविधं. **-ness,** *s.* बाहुल्यं, अनेकता.

Map, *s.* वर्णनं, देशालेख्यं, आलेख्यपत्रं. **-***v. t.* (देशादीन्) अभिलिख् 6 P, वर्ण् 10, चित्र् 10.

Mar, *v. t.* हन् 2 P, वि-,नश् c., विलुप् 6 P or c., अपकृ 8 U, क्षण् 8 P, दुष् c (दूषयति); *See* **Spoil,**: 'without m. ring its beauty' लावण्यहानिं विना, रूपक्षतिं विना **-Marplot,** *s.* कार्यविघातकः, विघ्नकरः.

Marasmus, *s.* क्षयः, यक्ष्मन् *m.*, शोषः.

Maraud, *v. i.* लोप्त्रार्थं परिभ्रम् 1, 4 P or उपद्रु 1 P or उपप्लु 1 A. **-er,** *s.* उपद्रविन् *m.*, उपप्लवकारिन् *m.*, लुंठकः. **-ing,** *s.* उपप्लवः, उपद्रवः, लोप्त्रार्थं परिभ्रमणं.

Marble, *s.* मर्मरोपलः, श्लक्ष्णः प्रस्तरः, मणिशिला, शिला, पाषाणः.

Marcescent, *a.* विशीर्यमाण.

March, *v. i.* प्र-या 2 P, प्र-गम् 1 P, प्र-संचल्-इ 1 P, व्रज् 1 P, प्र-स्था 1 A; *See* **Advance,** 'm. against' अभि-या, अभिनिर्-या, प्रति-गम्-व्रज्; संमुखं या; 'who m.-es slowly,' मंदगामी; 'who m. es fast' जंघालः, तरस्वी, जवनः, अतिजवः. **-***v. t.* प्र-स्था c. (स्थापयति), प्र-या c. **-***s.* फाल्गुनचैत्रं, पूर्वचैत्रः. **2** गमनं, यानं, यात्रा, प्रस्थानं, प्रगमनं, प्रयाणं, अभिनिर्याणं; 'at a distance which is some days' m.' त्रिचतुरप्रयाणकमात्रेऽध्वनि (Ka. 258) 'going by hasty (forced) m.-es' अविच्छिन्नैः प्रयाणकैर्वहन् (Ka. 340); 'difficult m.' दुर्गसंचरः, संक्रमः; 'm. ing with an army against the enemy' अभिषेणनं; 'a m.-ing army' प्रचक्रं, चलितं; 'a hostile m.' अभिक्रमः, आसारः **-Marches,** *s.* देशसीमा-पर्यंतः.

Mare, *s.* वडवा, अश्वा, वामी, तुरगी, वाजिनी.

Margin, *s.* प्रांतः, धारः-रा, पर्यंतः, तटं, उपांतः, सीमा, परिसरः, उपकंठः, कच्छः. **-al,** *a.* प्रांतस्थ, प्रांतवर्तिन्. **-ally,** *adv.* प्रांततः, अनुप्रांतं.

Marinate, *s.* संधितं, संधानं. **-***v. t.* सं-धा 3 U उपस्कृ, 8 U.

Marine, *a.* सामुद्र (द्री *f.*), समुद्रीय, समुद्रविषयक, समुद्रज, समुद्र (Sea, q. v.) in comp.; 'm.-fight' नौयुद्धं, जलसंग्रामः. **-***s.* नौयोधः, समुद्रीयसैनिकः. **2** युद्धनौसमूहः. **3** नाविकप्रकरणं विषयः.

Mariner, *s.* नाविकः, पोतवाहः, समुद्रयायिन्-गामिन् *m.*

Marionette, *s.* सूत्रचालिता-पुत्रिका or पुत्रलिका.

Marital, *a.* पति-स्वामि-विषय.

Maritime, *a.* समुद्रीय, समुद्र in comp. **2** नाविक (की *f.*), नाव्य. **3** समुद्रतीरस्थ.

Marjoram, *s.* समीरणः, मरुवकः, प्रस्थपुष्पः, फणिज्जकः, जंबीरः, पर्णासः, कठिंजरः, कुठेरकः.

Mark, *s.* लक्षणं, चिह्नं, अंकः, लिंगं, लांछन, व्यंजनं, अभिज्ञानं. **2** कलंकः, लक्ष्मन् *n.*, अंकः, बिंदुः; 'm. on the body' सामुद्रं, लक्षणं; 'whose distinctive m. is boldness' साहसलांछनः; 'freckly m' जडुलः, कालकः, पिप्लुः, तिलकः; 'an interpreter of bodily m. s' सामुद्रिकः **3** ले (रे) खा, अंकः. **4** लक्ष्यं, शरव्यं, वेध्य, बाणलक्ष्यं; लक्षं; 'hitting the m' लक्ष्यभेदः; 'hit the m.' लक्ष्यं भिद् 7 P or व्यध् 4 P; 'wide of the m.' अप्रस्तुत, अप्रास्ताविक (की *f.*). **-***v. t.* अंक् 10 चिह्नयति-मुद्रयति (D.). लांछ् 1 P. **2** कलंकयति-मलिनयति (D.), मलिनी-कलुषी कृ 8 U. **3** लिख् 6 P, रेखाः लिख्. **4** लक्ष् 10, आ-उप-; नि-रु-प्र-सं-अव-ईक्ष् 1 A. अवधा 3 U; आलोच् 10, विमृश् 6 P; निरूप् 10; 'm. out' परिच्छिद् 7 P. सीमां निर्दृ 10 or निर्दिश् 6 P, लक्ष्,बाह्यरेखां लिख्. **-ed,** *a.* चिह्नित,मुद्रित, अंकित,कृत-लक्षण-लांछन, मुद्रांकित; 'an arm m. with the scar of the bow-string' मौर्वीकिणांकः भुजः

(S. 1.). **-Marksman**, *s.* लक्ष्यभेदिन्-वेधिन् *m.*, सुसंधानी, शराभ्यासकुशलः, धनुर्विद्.

Market, *s.* विपणि-णी *f.*, आपणः, निषद्या, पण्यवीथी, पण्यवीथिका, हट्टः, पण्य or विक्रयशाला or स्थानं, निगमः. 2 क्रयविक्रयः, विपणः. **-v.** *t.* पण् 1 A, व्यवहृ 1 P; 'm.-day' हट्टदिवसः; 'm. place' *See* (*s.*); 'm.-rate or-price' पण्यमूल्यं, अर्घबलाबलं; 'm.-town' मुख्यनगरं, कर्वटः. **-able**, *a.* पण्य, पण्यार्ह, क्रयविक्रययोग्य.

Marking-ink, *s.* अक्षरयमसी.

Marl, *s.* चिक्कणमृत्तिका.

Marmalade, *s.* मिष्टान्नं, स्वादुफलं.

Marmorean, *a.* पाषाणनिर्मित.

Marmoset, *s.* क्षुद्रप्लवंगः वानरः.

Maroon, *a.* घनारुण, घनरक्त.

Marquee, *s.* पटवासः-मंडपः, उपकार्या, वस्त्रगृहं.

Marrow, *s.* मेदस् *n.*, मज्जा, वपा, वसा, अस्थि-देह-सारः, अस्थिजं, स्निग्धा. 2 सारः-रं, गर्भः, मुख्यांशः; 'he has knocked the m. out in no time' अचिरादेव तेन सर्वस्य सारः निष्कृष्टः-गृहीतः. **-less**, *a.* मज्जा-मेदो-हीन, अ-निः-सार. **-y**, *a.* मेदस्विन्, सारवत्, ससार.

Marry, *v. t.* वि-उद्-वह् 1 P, परि-णी 1 P, उप-यम् 1 A, प्रति-परि-ग्रह् 9 P. 2 (Take for husband) (पतिं) विद् 6 U or लभ् 1 A or अधिगम् 1 P, वृ 5 U, 10 (वरयति), वृ 9 U, पत्या संयुज् pass. 3 (Give in marriage) विवाहं कृ c., पाणिं ग्रह् c., प्र-दा 3 U, पाणिग्रहणं सं-पद् c.; विवाहेन संयुज् 7 U, 10 or संबंध् 9 P, *-adv.* नूनं, खलु; *See* **Indeed** **-age**, *s.* विवाहः, उद्वाहः, उपयमः, परिणयः, पाणिग्रहः-हणं, पाणिपीडनं, दारपरिग्रहः-अधिगमनं-क्रिया; 'give in m.' विवाहविधिना दा or प्रति-पद् c.; 'm.-contract' वाङ्निश्चयः; 'm.-price' शुल्कः-ल्कं; 'm.-gifts' यौतकं, औद्वाहिकं, पारिणाय्यं, सुदायः. 'm.-string' (विवाह-)कौतुकं, मंगलसूत्रं. **-ageable**, *a.* विवाहयोग्य, परिणेय, विवाहवयस्क, उद्वाहोचित. **-ed**, *a.* ऊढ, परिणीत, उपयत, कृतविवाह, जातोपयम, निविष्ट; 'a m. man' श्रीमान्, कुटुंबी, सभार्यः, कृतदारः, सपत्नीकः; 'a m. woman' सभर्तृका, पतिपत्नी, सधवा, सुवासिनी; 'twice m.' पुनर्भूः, दिधिषु-षूः; 'one m. before his elder brother' परिवेत्तृ; 'the sin of such marriage' पारिवेद्यं

Mars, *s.* मंगलः, भौमः, अंगारकः, भू-मही-सुतः लोहितः, रुधिरः, कुजः, लोहितांगः. 2 कुमारः कार्तिकेयः, गुहः, स्कंदः, शक्तिधरः, षडाननः, महासेनः, शरजन्मन् *m.*, सेनानीः. अग्निभूः, विशाखः, षाण्मातुरः.

Marsh, *s.* अनूपदेशः, कच्छः, कच्छभू-भूमि *f.*, सजल-जलाढ्य-भूमिः. **-y**, *a.* अनूप. आनूप (पी *f.*), जलाढ्य, जलपूर्ण, सजल. जलमय (यी *f.*).

Marshal, *s.* बलाध्यक्षः, संविधातृ *m.*, व्यवस्थापकः. **-v.** *t.* विन्यस् 4 U, वि-रच् 10. व्यूह् 1 U. क्रमेण रच् or स्था c. (स्थापयति). संधि धा 3 U.

Mart, *s.* क्रयविक्रयस्थानं, आपणः; *See* **Market**.

Martial, *a.* युद्ध-रण-विषयक, सांग्रामिक-सामरिक (की *f.*). 2 रणयोग्य, समरोचित. 3 रणप्रिय, समरासक्त, समर-रण-काम. 'm. music' रणवाद्यं.

Martinet, *s.* तीक्ष्ण or उग्र-दंडः or शासनः

Martingal, *s.* तलिका, अधोबंधनं.

Martyr, *s.* स्वधर्मार्थ-स्वमतार्थं त्यक्तप्राणः or देहत्यागिन् *m.* or न्यस्तजीवितः; 'a blessed m.' सुगृहीतनामा &c. **-dom**, *s.* स्वधर्मार्थ-स्वमतरक्षणार्थं प्राण-जीवित-त्यागः or प्राणोत्सर्गः or देहन्यासः.

Marvel, *s.* कौतुकं, आश्चर्यं, विस्मयहेतुः, चमत्कारः, अद्भुतं, चित्रं, चित्र-अद्भुत-वस्तु *n.* **-v.** *i.* वि-स्मि 1 A, साश्चर्य-सविस्मय-*a.* भू 1 P, विस्मयेन आकुलीभू or अभिभू pass. **-lous**, *a.* अद्भुत, साश्चर्य, चित्र आश्चर्यकर (री *f.*), विस्मयावह, आश्चर्यः 'a m. tale' चित्रा कथा; 'a m. deed' अद्भुतं कर्म. **-lously**, *adv.* अद्भुतं, चित्र **-lousness**, *s.* चित्रता, &c.

Mascot,-te, शुभवस्तु *n.*

Masculine, *a.* पौरुष (षी *f.*), पुंजातीय. अक्लीब, पुं-पुरुष- in comp. 2 पुरुषशील-स्वभाव, पुरुषप्रकृति; 'm. gender' पुंस्, पुल्लिंग; 'the word दार is plural and m. (of m. gender)' दाराः पुंभूम्नि; 'a m. woman' ऋषभी. **-ly**, *adv.* पुंवत्, पुरुषवत्. **-ness**, *s.* पुंस्त्वं, पौरुषं.

Mash, *v. t.* संपिष् 7 P, सं-मृद् 9 P, क्षुद् 7 U, चूर्ण् 10. **-s.** संपेषः, संचूर्णनं उद्पेषः

Mask, *s.* वर्णकः, वर्णिका, कपट-छद्म-मुखं. 2 छद्मन् *n.*, कपटः-टं, छलं, व्याजः, अप-व्यपदेशः. 3 कृत्रिम-छद्म-वेशः; 'to throw off the m.' (पूर्वनिगूढान्) निजमनोरथान् आविष्कृ 8 U or प्रकटीकृ. **-v.** *t.* छद्ममुखेन गुह् 1 U or प्रच्छद् 10; गुह्, अपवृ c., गुप् 1 P. **-ed**, *a.* छद्म-गुप्त-मुख (खी *f.*), सवर्णिक. 2 छद्मवेशिन्, कपटवेशः *See* **Disguised**. 3 गुप्त, छन्न, गूढ. **-er**, *s.* छद्मवेशिन् *m.*, कपटरूपिन् *m.*, &c.

Mason, *s.* लेपकः, लेपकारः, सुधाजीविन् *m.*, पल्गंडः. **-ry,** *s.* सुधा-लेप-कर्मन् *n.*, इष्टका-रचन-निर्माणं.

Masquerade, *v. i.* छद्मवेशं धृ 10, विडंब् 10, कपटवेशं परि-धा 3 U. **-s.** छद्म-कपट-वेशधारणं, छद्मवेशक्रीडा, विडंबनक्रीडा. **-er,** *s.* छद्मवेशधारिन् *m.*, कपटवेशिन् *m.*

Mass, *s.* पिंडः, घनः, गंडः. 2 राशिः, नि-प्र-चयः, निकरः, समूहः, ओघः, पुंजः, संघः, गणः, समाहारः, निवहः; *See* **Multitude,** 'in m. es' संघशः, गणशः; 'in the m.' साकल्येन. **-ive, -y,** *a.* स्थूल, गुरु, स्थूलाकार, बृहत्, बृहत्-स्थूल-परिमाण, गुरुभार, सभार; पिंडित, पिंडाकार. **-iveness,** *s.* स्थूलता, गुरुत्वं, महत्त्वं, गुरुभारः.

Penult, *s.* उपांत्याक्षरं. **-imate,** *a.* उपांत्य; 'p. letter' उपधा, उपांत्यं.

Penumbra, *s.* अंधच्छाया.

Penury, *s.* दारिद्र्यं, निर्धनता, दुर्गति *f.* **-ious,** *a.* दीन, निर्धन, निःस्व; *See* **Poor.** 2 कृपण, क्षुद्र, कदर्य; *See* **Miserly.**

Peon, *s.* भृत्यः, पदातिः; *See* **Servant.**

People, *s.* जनः, लोकः, प्रजा, (pl. also); जनता, देशवासिनः, प्रकृतयः (pl.); 'country p.' ग्रामीणाः, ग्रामीयजनः, जानपदाः; 'common p.' प्राकृताः, इतरे-पृथग्-जनाः, सामान्य or प्राकृत-जनाः or लोकाः. 2 वर्गः, गणः, वर्णः, जनः, लोकः. 3 सेवकजनः-गणः, परिवारः. **-v.** *t.* जनैः पूर् 10 or आक्र 6 P, वस् c.

Pepper, *s.* मरी(रि)चं, कालकं, वेल्लजं, कृष्णं, ऊषणं, धर्मपत्तनं; 'long p.' पिप्पली; *See* under **Long.** **-v.** *t.* अवकॄ 6 P.

Pepsin, *s.* जाठररसविकारः.

Peptic, *a.* पाचक, पाचन, दीपन, अग्निद.

Peracute, *a.* अतितीक्ष्ण, अतितीव्र.

Peradventure, *adv.* कदापि, कदाचित् दैवात्, दैववशात्.

Perambulate, *v. t.* परि-इ 2 P, परिक्रम् 1 U, 4 P, परिभ्रम् 1, 4 P, पर्यट् 1 P, परि-सृ-गम् 1 P; इतस्ततः चल्-चर् 1 P. **-ion,** *s.* परिक्रमः-मणं, परिभ्रमणं, पर्यटनं.

Per annum, *adv.* प्रतिवर्षं, प्रतिवत्सरं.

Perceive, *v. t.* उपलभ् 1 A, ज्ञा 9 U, वि-बुध् c., बुध् 1 P, ग्रह् 9 U, अवगम् 1 P, अव-इ 2 P, अनुभू 1 P, विद् 2 P; *See* **Know.** 2 (By the eye) दृश् 1 P, ईक्ष् 1 A, निरूप् 10, आ-,लक्ष् 10, आलोक् 1 A, 10; *See* **See.** **-ed,** *a.* ज्ञात, विदित, उपलब्ध, गोचर; 'p. by the senses' इंद्रियगोचर. **-er,** *s.* लक्षकः. **-Perceptible,** *a.* वेद्य, उपलभ्य, प्रत्यक्ष, दृष्टिगोचर, व्यक्त, परिस्फुट, सुलक्ष्य; oft. by विषय, गोचर, ग्राह्य in comp.; 'p. by the eye' प्रत्यक्ष, चक्षुर्ग्राह्य, दृष्टिगोचर; कर्णविषय, इंद्रियगोचर, &c. **-Perceptibly,** *adv.* प्रत्यक्षं, प्रत्यक्षतः. **Perception,** *s.* उपलब्धि *f.*, ग्रहणं, बोधः, अवगमनं, अनुभवः, वेदनं, विभावनं, ज्ञानं, व्यक्ति *f.* 2 (Power of p.) ग्राहकत्वं, ग्रहण-वेदन-शक्ति *f.*, विषयानुभवः, चैतन्यं, चिच्छक्ति *f.* **-Perceptive,-Percipient,** *a.* ग्रहणक्षम, ग्राहिन्, ग्राहक, विषयग्रहणसमर्थ, चेतन.

Per cent, *adv.* Ex. by उत्तर in comp; '5 p.' पंचोत्तरं शतं.

Perch, *s.* वासयष्टि *f.*, सेडीनयष्टिः, यष्टिः, दंडः. **-v.** *i.* अध्यास् 2 A (with acc.), नि-ली 4 A, निषद् 1 P (with loc.); सं-डी 1 A (of birds.).

Perchance, *adv.* *See* **Perhaps.**

Percolate, *v. i.* कणशः-लवशः स्रु-क्षर्-चल्-1 P or स्यंद् 1 A. *-v. t.* स्रुप् c., बिंदुशो-लवशः स्रु c. or गल् c. **-ion,** *s.* प्र-क्षरणं-प्रस्यंदनं.

Percussion, *s.* समाघातः, संघट्टः, आ-अभिघातः.

Perdition, *s.* उच्छेदः, क्षयः, वि-प्र-नाशः. 2 अधोगति *f.*, अधःपातः, नरक-निरय-पातः; 'p. (ruin) seize thee' (cf. 'Murrain take thee') अकरणिः-अजीवनिः-अवग्राहः-निग्राहः-ते भूयात्.

Perdue, *a.* प्रच्छन्न, गूढ.

Perdurable, *a.* चिरस्थायिन्.

Peregrinate,-ion, *See* **Travel.**

Peremptory, *a.* सुनिश्चित, निर्णीत, नियत; अविसंवय, अवैकल्पिक (की *f.*), परेच्छिक, अवश्यक. 2 स्पष्ट, परिस्फुट, उत्पन्न, निश्चार्थ; 'p. order' अलंघनीयः-अनतिक्रमणीयः-आदेशः; 'the command of elderly persons is (to be considered as) p.' आज्ञा गुरूणां ह्यविचार-

धीता (R. xiv. 46). 3 दृढ-स्थिर-मति, अध्यवसायिन्, दृढसंकल्प. -ily, *adv.* सुनिश्चितं, सुव्यक्तं, निश्चयार्थं, सुस्पष्टं, दार्ढ्येन, दृढनिश्चयपूर्वं. -iness, *s.* स्पष्टता, दृढनिश्चयः, दृढता, अविकल्पता.

Perennial, *a.* वर्षावधि, वर्षस्थायिन् 2 नित्य, अक्षय्य, निरंतर, अविरत.

Perfect, *a.* सिद्ध, संपन्न, निष्पन्न, समाप्त, परिणत. 2 अशेष, समग्र, सकल, सं-परि-पूर्ण, समस्त, अविकल, अखंड, अक्षत, अन्यून, निर्दोष. 3 परम, उत्कृष्ट, विशिष्ट, उत्तम; निपुण, कुशल, अभिज्ञ, पारंगत, विशारद, प्रवीण, परिपक्व, संपन्न. 4 (In grammar) लिट्. -*v. t.* साध् c., सिध् c. (साधयति), सं-निः-पद् c., परि-सं-पूर् 10, समाप् c., निर्वृत् c.; ex. by कृ 8 U with (*a.*). -er, *s.* संपादकः, साधकः. -ion, -ness, *s.* सिद्धि *f.*, संपन्नता, समग्रता, अखंडता, संपरि-पूर्णता, निष्पत्ति-समाप्ति-*f.* 2 परिपाकः, परिणति *f.*, पक्वावस्था, उत्कृष्टता, उत्कर्षः, विशिष्टता, प्रकर्षः, परा कोटिः-काष्ठा. 3 नैपुण्यं, संपन्नता, कौशलं, विज्ञानं, प्रावीण्यं. 4 गुणः, परम-उत्तम-गुणः, विशेषः, प्र-उत्-कर्षः. -ive, *a.* साधक, संपादक, समापक, सिद्धिकर (री *f.*). -ly, *adv.* सर्वथा, सर्वशः, साकल्येन; समग्रं, संपूर्णं, अशेषतः, निःशेषं.

Perfidy, *s.* विश्वासघातः-भंगः-भेदः, असत्यसंधता, प्रतिज्ञा-समय-भंगः; शत्रुसेवा, कापट्यं, धर्मघ्नता. -ious, *a.* असत्यसंध, विश्वास or विश्रंभ-घातिन् or भेदिन्, भग्नप्रतिज्ञ वंचक, शठ, मिथ्याचार, शत्रुसेविन्. 2 (Of acts) अनार्य. -iously, *adv.* विश्वासघातेन, शठवत्, कैतवेन.

Perforate, *v. t.* आ-,व्यध् 4 P, छिद्रयति (D.), निर्भिद् 7 P, उत्-समुत्-कृ 6 P, (मणौ वज्रसमुत्कीर्णे R. i. 4); 'un-p. ed jewel ' अनाविद्धं रत्नं (S. 2.) -ed, *a.* विद्ध, सच्छिद्र, उत्कीर्ण, सरंध्र, सुषिर. -ion, *s.* वेधः-धनं, निर्भेदः. 2 छिद्रं, रंध्रं, विवरं, सुषिरं. -or, *s.* वेधनिका, आविधः, आस्फोटनी.

Perforce, *adv.* बलात्, बलेन, प्रसभं, प्रसह्य, बलवत्, बलात्कारेण.

Perform, *v. t.* कृ 8 U, निर्वृत् c., आचर् 1 P, सं-निः-पद् c., साध् 5 P or c., वि-धा 3 U, अनु-ष्ठा 1 P, निर्वह् c.; (promise) पूर् 10, तृ 1 P शुध् c., अपवृज् 10; (a sacrifice) आतन् 8 U, आहृ 1 P. 2 (On the stage) नट् 10, अभि-नी 1 P, प्रयुज् 7 A, 10; *See* **Act;** 'has not been (seen) p ed on the stage ' न प्रयोगतो दृष्टं (Rat. 1). -ance, *s.* संपादनं साधनं, करणं, विधानं, निर्वहणं, अनुष्ठानं, आचरणं. 2 कार्यं, कर्मन् *n.*, क्रिया, कृति *f.*, व्यापारः, चेष्टा, चेष्टितं, प्रवृत्ति *f.*, चरितं. 3 प्रयोगः, अभिनयः, नाटनं. -er, *s.* कर्तृ *m.*, संपादकः, निर्वर्तकः, अनुष्ठातृ *m.* निर्वाहकः. 2 (In dramas) अभिनेतृ *m.*, नटः; प्रयोजकः. 3 वादकः.

Perfume, *v. t.* अधि-, वास् 10, धूप् 1 P, 10, धूपेन वास्, सुरभीकृ 8 U, परिमलयति-आमोदयति- (D.), धू c. -*s.* परिमलः, आमोदः, सुगंधः, सु-,वासः, सौरभं भ्यं. 2 (Thing scented) गंधः, गंधद्रव्यं, गांधिकं. 3 (For the person) गात्रानुलेपनी; वर्ति *f.*, अनु-वि-लेपनं, वर्णकं; ' p. artificially made' कृत्रिम धूक-धूपः. -ed, *a.* सुवासित, सवास, सुरभीकृत, सामोद, धूपित, भावित. -er, *s.* गांधिकः, गंधोपजीविन् *m.*, गंधविक्रयिन् *m.* गंधवणिज् *m.*, गंधाजीवः. -ery, *s.* गंधद्रव्यं, गंधव्यापारः-विक्रयः. -ing, *s.* वासनं, भावनं. 2 (With unguents) चर्चा, चार्चिक्यं, अनु-वि-लेपनं, स्थासकः, अंगरागः.

Perfunctory, *a.* अनवहित, निरुत्साह, प्रमत्त, अनुत्कंठ; *See* **Negligent.** -ily, *adv.* अनवधानेन, निरुत्साहं. -iness, *s.* अनवधानं, अनास्था, निरुत्साहता.

Perhaps, *adv.* कदाचित्, दैवात्, कदापि, नु वा, किंस्वित्, स्यात्, or by pot.

Perlapt, *s.* रक्षाकरंडः

Pericardium, *s.* हृदयकोशः, हृदाशयः.

Pericarp, *s.* बीजकोशः-शुक्ति *f.*

Pericranium, *s.* कपालावरणं.

Perigee, *s.* भीचतमं नैकट्य-स्थानं

Peril, *s.* भयं, शंका, संदेहः, संशयः. -*v. t.* संशये पत् c. -ous, *a.* संदिग्ध, सशंक, भयहेतुक; *See* **Danger, Hazard.**

Period, *s.* समयः, कालः, वेला, कालावधिः, अंतरं, अवधिः, नियतकालः. 2 कालचक्रपर्यायः-आवर्तः, वर्षचक्रं, युगं. 3 अंतः, अवसानं, विरामः. 4 पूर्णवाक्यं, वाक्योच्चयः, पूर्णविरामः; ' p. of life ' वयः, वयोवस्था; ' last p. ' चरमवयः, अंत्यावस्था. -ic,-ical, *a.* नित्य, अनुकालिक-नियतकालिक-सामयिक-(की *f.*). -*s.* सामयिकपुस्तकं; ' a monthly p. ' मासिकपुस्तकं. -ically, *adv.* काले काले, समयतः, कालानुरूपं, नियतकाले.

Periosteum, *s.* अस्थित्वच् *f.*

Peripatetic, *a.* इतस्ततः-भ्रमत्-भ्रमणशील.

Periphery, *s.* परिवेशः-षः. परिधिः, परिणाहः. 2 नेमि-मी *f.*, प्रधिः.

Periphrase, Periphrasis, *s.* वाग्गुणचयः वाग्विस्तरः, वाग्बाहुल्यं-प्रपंचः. -*v. t.* प्रपंचयति (D.), वाग्विस्तरेण वर्ण् 10 or व्या-ख्या 2 P. -**Periphrastic,** *a.* बहुवाक्य, बहुपद; ' p. future ' लुट्.

Perish, *v. i.* नश् 4 P, प्र-वि-°, क्षि-pass.; प्रमी 4 A, ध्वंस् 1 A, क्षयं-नाशं-नष्टं-गम्

1 P or मृ-म्ना 2 P, प्र-वि-ली 4 A; मृ 6 A, व्यापद् 4 A; *See* **Die.** **-able,** *a.* वि-, नश्वर (री *f.*), विनाशधर्मन्, भंगुर, क्षयिन्, वि-,ध्वंसिन्, क्षयिष्णु, क्षय-नाश-शील, लयाधीन; 'p. in a moment' क्षणिक, क्षणभंगुर.

Peristyle, *s.* स्तंभपंक्ति-श्रेणी *f.*

Peritoneum, *s.* अंत्रवेष्टनं.

Perjure, *v. t.* साक्ष्ये मिथ्या-अनृतं वद् 1 P, मिथ्या शप् 1, 4 U, कूटसाक्ष्यं कृ 8 U. **-ed, -er,** *a., s.* कूटशपथकारिन्, मिथ्याशपक, कूटसाक्षिन्. **-y,** *s.* कूट or मिथ्या-साक्ष्यं or [शपनं.

Perk,-y, *a. See* **Saucy.**

Permanent, *a.* नित्य, स्थिर, नित्य-चिर-स्थायिन्, ध्रुव, अक्षय, स्थायिन्; *See* **Lasting.** **-ly,** *adv.* नित्यं, स्थिरं, ध्रुवं, शाश्वतं, सर्वकालं. **-Permanence,-cy,** *s.* स्थिरता, स्थायित्वं, ध्रुवता, नित्यता, अक्षयता, अनपायः, सनातनत्वं. 2 प्रतिष्ठा, स्थिति *f.*, (कुलस्य स्थित्यै K. I. 18), (वृकारयस्य कुलं प्रतिष्ठां गतं U. 5).

Permeate, *v. t.* व्याप् 5 P, व्यश् 5 A; *See* **Pervade.** 2 प्र-विश् 6 P, भिद् 7 P, गाह् 1 A. **-ion,** *s.* व्याप्ति *f.*, प्रवेशः, भेदनं. **-Permeable,** *a.* व्याप्य, भेद्य, प्रवेश्य.

Permit, *v. t.* अनु-ज्ञा 9 U, अनुमन् 4 A, अनुरुध् 1 A, आज्ञां दा 3 U. *See* **Allow.** **-s.** अनुज्ञा-अनुमति-पत्रं, अनुज्ञा. **-Permissible,** *a.* अनुज्ञेय, अनुमंतव्य, अनुज्ञार्ह. 2 धर्म्य, न्याय्य, ग्राह्य, युक्त; *See* **Lawful.** **-Permission,** *s.* अनुज्ञा, अनुमति *f.* -नं, अनुमोदनं, आदेशः, आज्ञा. **-Permissive,** *a.* अनुज्ञामय, अनुमोदक; अनवश्यक.

Permute, *v. t.* वि-नि-मे 2 A, परि-वृत् 1 A. **-ation,** *s.* वि-,निमयः, परिवर्तः, परिवृत्ति *f.*, व्यतिहारः. 2 अंकपाशः.

Pernicious, *a.* घातक, अपकारक, वि-, नाशक, हिंस्र, हिंसक, अपकारिन्, दुष्ट, गर्ह्य; *See* **Injurious.** **-ly,** *adv.* सापकारं, सापायं, सनाशं.

Peroration, *s.* उपसंहारः.

Perpendicular, *a.* लंब, लंबरूप; सरल, ऋजु, अकुटिल. **-s.** लंबः. **-ly,** *adv.* लंबरूपेण, सरलं, ऋजु.

Perpetrate, *v. t.* कृ 8 U, वि-धा 3 U, आचर् 1 P; *See* **Commit.**

Perpetual, *a.* नित्य, सतत, शाश्वत (ती *f.*), अविच्छिन्न, अविरत, संतत, निरंतर, सनातन (नी *f.*), अनंत, नित्य-चिर-स्थायिन्. **-ly,** *adv.* नित्यं, सदा, नित्यशः, शाश्वतं, शश्वत्, सततं, अविरतं. **-Perpetuity,** *s.* अविच्छेदः, नित्य-चिर-स्थायिता, आनंत्यं, नित्यता, अविरामः, नैरंतर्यं, अक्षयस्थिति *f.*, सनातनत्वं; 'to p.' शाश्वतीः समाः. **-Perpetuate,** *v. t.* स्थिरीकृ 8 U, कृ with (*a.*).

Perplex, *v. t.* मुह् c., आकुलीकृ 8 U, सं-वि भ्रम् c. (भ्रमयति), मोहं-संभ्रमं-उत्पद् c. 2 संकुलीकृ, संकीर्णीकृ, मिश्र् 9 P; *See* **Embarrass, Confuse.** **-ed,** *a.* आ-व्या-कुल, संभ्रांत, वि-,मूढ, कातर, व्यग्र, उद्विग्न, अधीर; व्याकुलचित्त, संभ्रांतमनस्, व्यस्त-मूढ-विक्षिप्त-चित्त. **-ing,** *a.* मोहक, संदिग्ध, भ्रम-मोह-कारिन्, मोहकर (री *f.*), मोहन, भ्रांतिजनन (नी *f.*), विषम. **-ity,** *s.* व्या-, मोहः, आ-व्या-कुलत्वं-ता, संभ्रमः, व्यग्रता, चित्तविक्षेपः, व्यस्तचित्तत्वं, चित्तवैकल्यं, संशयः, संदेहः.

Perquisite, *s.* अधिकलाभः, दस्तकारः; *See* **Gift.**

Persecute, *v. t.* प्र-सं-बाध् 1 A, व्य-थ् 1 A, पीड् 10, उप-द्रु 1 P, क्लिश् 9 P, पीडार्थं अनुसृ 1 P, अभि-,द्रुह् 4 P. **-ion,** *s.* बाधा, उपद्रवः, उपद्रवः, पीडनं, अभिद्रोहः. **-or,** *s.* बाधकः, उपद्रवकारिन् *m.*

Persevere, *v. i.* मनः-चित्तं-अभिनिविश् c., सदा प्रवृत् 1 A, अभियुज् pass., अभिनिवेशेन सं-पद् c., सततं प्रयत् 1 A, अनवरतं चेष्ट् 1 A, निर्बंधं कृ, साग्रहं प्रवृत्; 'p. in your opposition' स्थिरप्रतिबंधो भव (S. 2); 'he who p. s in good actions सदाचारप्रवृत्तः, सदा सन्मार्गचारी. **-ance,** *s.* अभिनिवेशः, अध्यवसायः, उद्यमसातत्यं, दीर्घप्रयत्नः-उद्यमः-उद्योगः-उत्साहः, अतिनिर्बंधः, सदाभियोगः. 2 अनवरतचेष्टा, प्रवृत्ति *f.*, प्रसक्ति *f.*, धैर्यं, आग्रहः, उद्योगः, उद्यमः, व्यवसायः. **-ing,** *a.* अभिनिवेशवत्, उद्यमिन्, अभिनिविष्ट, अध्यवसायिन्, दीर्घोद्योगिन्, सदाप्रवृत्त, उत्साहवत्, आग्रह-निर्बंध-शील, प्रसक्त, प्रसित. **-ingly,** *adv.* अभिनिवेशेन, दीर्घोद्योगेन, प्रसक्तं, सोत्साहं, सनिर्बंधं.

Persist, *v. i.* साग्रहं प्रवृत् 1 A, अतिनिर्बंधेन आचर् 1 P, पर्यव-स्था 1 A; *See* below; 'do not p. in your wickedness' दुराचरितेषु मा ते निर्बंधो भूत्; *See* **Persevere.** **-ence,-cy** *s.* निर्बंधः, आग्रहः, अभिनिवेशः, पर्यवस्थानं, दुराग्रहः. **-ent,** *a.* निर्बंधपर, साग्रह; *See* **Obstinate.** **-ently,** *adv.* साग्रहं, निर्बंधेन.

Person, *s.* पुरुषः, नरः, जनः, व्यक्ति *f.*; 'this p.' अयं जनः (referring to the speaker); 'a female p.' स्त्रीजनः, अंगनाजनः. 2 शरीरं, अंगं, वपुस् *n.*, देहः, कायः, तनु *f.*, गात्रं, *See* **Body.** 3 रूपं, आकारः, आकृति *f.*, मूर्ति *f.*; 'an enemy in the p. of K is' कृष्णरूपः शत्रुः. 4 पात्रं, भूमिका. 5 पुरुषः (in grammar) 'in p.' स्वयं, स्वतः, आत्मना, साक्षात्, प्रत्यक्षं. **-able,** *a.* सुरूप, सुगात्र (त्री *f.*),

शोभनाकार. **-age,** *s.* पुरुषः, जनः, नरः, व्यक्तिः. 2 श्रेष्ठ-विशिष्ट-जनः. **-al,** *a.* व्यक्तिगत, पुरुषविशेषसंबद्ध, विशिष्ट-जनोद्दिष्ट. 2 शारीरिक-दैहिक- (की *f.*), शरीर-अंग in comp. 'p. beauty' अंगसौष्ठवं; 'p. graces' शरीरलावण्यं, 'p. union' शरीरसंबंधः; 'p. attendant' आत्मपरिचारकः; 'p. attendance' शरीर-चर्या-शुश्रूषा. 3 स्वयंकृत, स्व-आत्म-कृत, साक्षात्कृत. 4 आत्मन्, स्व, निज in comp., 'for p. profit' आत्म-स्व-हिताय; 'p. experience' स्वानुभवः 5 पुरुष-व्यक्ति-वाचिन्, पुरुष in comp. 6 अस्थावर, जंगम. **-ality,** *s.* व्यक्तिगताक्षेपः; विशेष-व्यक्ति-निर्देशः, व्यक्त्युद्देशः, व्यक्तिसंस्पर्शः. 2 व्यक्तिः, पृथक्त्वं, स्वत्वं. **-ally,** *adv.* स्वयं, स्वतः, प्रत्यक्ष-तः, साक्षात्. 2 व्यक्तितः, पृथक्. **-Personate,** *v. t.* रूपं-वेषं ग्रह् 9 U or धृ 1 P, 10 or आ-स्था 1 U (with gen.), उप-कृ-कृ 8 U; oft. ex. by वेश or रूप in comp., or by denom.; 'p. ing Nala' नलरूपमास्थाय, नलरूपः, नलवेशधारिन्; 'p. s a king' नृपायते, राजायते. 2 अभि-नी 1 P, नट् 10, रूप् 10. **-ion,** *s.* रूप-वेश-धारणं-ग्रहणं. 2 अभिनयः, नाटनं. **-or,** *s.* वेशधारिन्-भृत् *m.* 2 अभिनेतृ *m.* **-Personify,** *v. t.* चेतनत्वं-चेतनभावं-आरुह् c. (रोपयति), (अचेतने) चेतनवदुपचर् 1 P, (अचेतनेष्वपि चेतनवदुपचारदर्शनात् S. B. 9?) **-ed,** *a.* Ex. by मूर्ति *f.*, मूर्तशरीरिन्-*a.* इव or साक्षात्. **-ication,** *s.* चेतनत्वारोपः, चेतनधर्मारोपः, मनुष्यगुणारोपः, उपचारः; oft. by इव, साक्षात्; 'p. of virtue' साक्षात्-मूर्तिमान्-धर्मः; *See* **Embodied.**

Personnel, *s.* कार्यकारिवर्गः.

Perspicacious, *a.* तीक्ष्ण-सूक्ष्म-दृष्टि, सूक्ष्म-दर्शिन्. 2 तीक्ष्ण or सूक्ष्म-बुद्धि or मति, कुशाग्र-बुद्धि. **-ness, -Perspicacity,** *s.* सूक्ष्म-दृष्टित्वं, दृष्टिसूक्ष्मता, दृक्पाटवं. 2 सूक्ष्ममतित्वं.

Perspicuous, *a.* स्पष्ट, विशद, प्रसन्न, व्यक्त, सुप्रकाश, सुबोध. **-ly,** *adv.* स्पष्टं, विशदं, भिन्नार्थं. **-ness, -Perspicuity,** *s.* स्पष्टता, प्रसादः, वैशद्यं.

Perspire, *v. i.* प्र-, स्विद् 4 P, स्वेदं-घर्मं-सु c. **-v.** *t.* रोमद्वारा निःसृ c. or सु c., स्विद् c. **-ation,** *s.* स्वेदनं, घर्म-स्वेद-स्रावः. 2 स्वेदः, घर्मः, स्वेद-घर्म-जलं-बिंदुः-उदकं; 'excessive p.' प्रस्वेदः. **-ing,** *a.* सस्वेद, सघर्म, स्वेद-घर्म-स्राविन्, स्वेदित, स्विन्न; 'violently p' प्रस्विन्न, भृशस्विन्न.

Persuade, *v. t.* अनु-नी 1 P, प्रबुध् c., अनु-शास् 2 P, प्र-वृत् c., नियुज् 10, प्रोत्सह् c. आकृष् 1 P; ' oft. by causal of roots 2 प्रति-इ c., प्रतीतिं-विश्वासं जन् c. (जनयति), संशयं-संदेहं-छिद् 7 P; *See* **Convince. -ed.** *a.* अनुनीत, जातनिश्चय-विश्वास, प्रतीत, छिन्नसंशय, जातप्रत्यय; 'I feel p.' इति मे प्रतीतिः, इति ध्रुवं मन्ये. **-er.** *s.* प्रवर्तकः, प्रोत्साहकः, नियोजकः. **-Persuasion,** *s.* अनुनयः, अनुशासनं, उपदेशः, प्रवर्तनं, नियोजनं, प्रबोधः-धनं, प्रोत्साहनं. 2 संदेह-संशय-च्छेदः, शंकानिवृत्ति *f.*, दृढनिश्चयः, प्रत्ययः, निर्णयः. 3 मतं, मार्गः, पक्षः *m.*, संप्रदायः. **-Persuasive, Persuasory,** *a.* सानुनय, प्रवर्तक, प्रबोधक, अनुनयिन्, हृदयग्राहिन्, आकर्षिन्. 2 प्रत्ययकारिन्, संशयच्छेदिन्.

Pert, *a.* चपल, लघु; *See* **Lively. 2** धृष्ट, प्रगल्भ, अविनीत. **-ly,** *adv.* चापल्यात्, धृष्ट-तया, अविनयेन. **-ness,** *s.* चापल्यं, धार्ष्ट्यं, अविनयः.

Pertain, *v. i.* संबंध् pass., संबंधिन्-*a.* भू 1 P; *See* **Belong.**

Pertinacious, *a.* निर्बंधशील, आग्राहिन्, स्थिर-दृढ-प्रतिज्ञ, धीर, दृढ. **-ly,** *adv.* सनि-र्बंधं, साग्रहं. **-ness, -Pertinacity,** *s.* निर्बंधः, आग्रहः, अभिनिवेशः, दार्ढ्यं, धैर्यं; *See* **Obstinate, -cy.**

Pertinent, *a.* प्रास्ताविक (की *f.*), युक्त, यथायोग्य, उपपन्न, योग्य, प्रस्तावसदृश (शी *f.*); 'to be p.' उप-पद् 4 A, युज् pass. **-ly,** *adv.* युक्तं, उपपन्नं, यथोचितं, प्रसंगा-नुरूपं, प्रस्तावसदृशं. **-Petinence, -cy,** *s.* युक्तता, उपपत्ति *f.*, योग्यता, प्रसंगसंगति *f.*, याथार्थ्यं, प्रस्तुतानुसारः.

Perturb, *v. t.* सं-, क्षुभ् c. आकुलीकृ 8 U, उपहन् 2 P, वि-मुह् c., व्यग्रीकृ, व्यस् 4 A, संकरीकृ; *See* **Confuse. -ation,** *s.* सं-, क्षोभः, व्यग्रता, उपप्लवः, व्या-, मोहः, आकुलत्वं, वैक्लव्यं, उद्वेगः. **-ed,** *a.* क्षुब्ध, आ-व्या-कुल, विक्लव, व्यग्र, परिप्लुत, उद्विग्न, पर्याकुल.

Peruse, *v. t.* समग्रं पठ् 1 P or अधि-इ 2 A, निपुणं वच् c.; *See* **Read. -al,** *s.* अध्ययनं, पठनं, पारायणं.

Pervade, *v. t.* अभि-, व्याप् 5 P, वि-अश् 5 A, सर्वतः आक्रम् 1 U, 4 P or प्रविश् 6 P, वि-गाह् 1 A, मूर्च्छ् 1 P; मूर्च्छन्त्यमी विकाराः ऐश्वर्यमत्तेषु (S. 5) 'p. (the minds of) those' &c., '(the freshness of) youth has p. ed her limbs' यौवनमंगेषु संनद्धं (S. 1). **-ing, -Pervasive,** *a.* व्यापक, व्यापिन्; 'p. all things' सर्वग, सर्वव्यापिन्; 'p. the whole body' सर्वांगीण **-Pervasion,** *s.* अभिव्यापनं-व्याप्ति *f.*, आक्रमणं; मूर्च्छनं.

Perverse, *a.* वाम, कुटिल, प्रतीप, विपरीत, प्रतिकूल, वि-प्रति-लोम, वक्र-वाम-शील, कुटिल मति, जिह्म; *See* **Obstinate. -ly,** *adv.* वामतया, कौटिल्येन, प्रतीपं, विपरीतं, वामशीलतया. **-ness,** *s.* प्रतीपता, वामता,

वैपरीत्यं, कौटिल्यं, दुष्टता, दौरात्म्यं, दुःशीलं.

Pervert, *v. t.* वि-कृ 8 U, परिवृत् c., साचीकृ, विकृ 10, विलोमीकृ, अन्यथा कृ; भ्रंश् c., विपर्यस् 4 U or c., कलुषयति (D.), कलुषीकृ; दुष् c. (दूषयति), विपरिणम् c. (नमयति). **-er, -ing**, *s., a.* विकारिन्, विपरिणामिन्, विपर्यासकारिन्. **-Perversion**, *s.* विकारः, विकृति *f.*, विक्रिया, विलोमत्व, प्रतीपता, विपरिणामः, विपर्यासः, विपर्ययः, दूषणं, भ्रंशनं, साचीकरणं, कालुष्यं.

Pervious, *a.* व्याप्य, वेध्य, प्रवेश्य.

Pest, *s.* मारि-री *f.*, म(मा) रकः; (fig.) आधिः, कंटकः, उत्पातः, शल्यं; बाधः कुलस्याधयः (S. 4) 'are a p. to the family' 'p. of the people' लोककंटकः. **-er**, *v. t.* बाध् 1 A, पीड् 10, उपद्रु 1 A, *See* **Harass.** **-ilence**, *See* (*s.*) above. **-iferous, -ilential**, *a.* मरकावह, मारात्मक, घातुक, विनाशक, दूषक, बाधक, अपकारक, अपकारिन्, अनिष्टकर (री *f.*)

Pestle, *s.* मुस(श)ल:-लं, अयोग्रं.

Pet, *s.* प्रेम-प्रीति-पात्रं, प्रेमास्पदं, क्रीडामृगः. 2 ईषत्कोपः, कोपावेशः. **-a.** प्रिय, प्रेमास्पदीभूत, वल्लभ; *See* **Favourite.** **-v. t.** लल् 10; *See* **Fondle.**

Petal, *s.* दलं, पत्रं. **-ed, -ous**, *a.* सदल, दलवत्.

Petition, *v. t.* अर्थ् 10 A, प्र-अभि°-, याच् 1 A; निविद् c., वि-ज्ञा c. (ज्ञापयति). **-s.** प्रार्थना, याच्ञा, निवेदनं, विज्ञप्ति *f.*, विज्ञापना. 2 (Written) विज्ञप्तिः, प्रार्थनानिवेदन-पत्रं. **-er**, *s.* प्रार्थकः, प्रार्थयितृ *m.*, अर्थिन् *m.*, याचकः, निवेदकः; 'ascertain who are the p. s' ज्ञायतां कः कः कार्यार्थीति (Mr. 9).

Petrify, *v. t.* पाषाणी-प्रस्तरी-कृ 8 U, कठिनीकृ, जडीकृ, संस्तंभ् c.; 'p. ed with astonishment' आश्चर्यजडीकृत. **-v. i.** पाषाणीभू 1 P. **-action**, *s.* पाषाणीकरणं; पाषाणीभूतद्रव्यं.

Petroleum, *s.* शिलातैलं-रसः.

Petrology, *s.* अश्म-विद्या or शास्त्रं.

Petticoat, *s.* शाटी, शाटकः; चंडातकं, अधोंशुकं (girl's); 'p. government' स्त्रीशासनं; 'under p. government' स्त्रीजितः, स्त्रीवशः.

Pettifogger, *s.* क्षुद्र-अधम-वृत्तिः.

Pettish, *a.* कर्कश, वक्रशील-भाव, वक्रस्वभाव, प्रतीप; *See* **Peevish.** **-ly**, *adv.* कर्कशं, वक्रं. **-ness**, *s.* कार्कश्यं, वक्रस्वभावः.

Petty, *a.* लघु, क्षुद्र, अल्प; *See* **Small**; oft. by उप or कल्प in comp.; 'a p. king' उपराजा, नृपकल्पः.

Petulant, *a.* कर्कश, प्रतीप, दुःशील, वाम; *See* **Peevish.** 2 अविनीत, प्रगल्भ, धृष्ट. **-ly**, *adv.* प्रतीपं, धृष्टवत्. **-Petulance**, *s.* प्रतीपता, दुःशीलं, धृष्टता.

Pewit, *s.* *See* **Lapwing.**

Pewter, *s.* कांस्यं, पीतलोहं. **-er**, *s.* कांस्यकारः.

Phalanx, *s.* व्यूहः; पंक्ति *f.*

Phantasm, *s.* आ-,भासः, छाया, माया मनोरथसृष्टि *f.*

Phantasmagoria, *s.* मायाजालं.

Phantasy, *s.* *See* **Fancy.**

Phantom, *s.* भूतः, वेतालः, पिशाचः, रात्रिचरः. 2 आ-,भासः, मनोरथसृष्टि *f.*, माया, कल्पना.

Pharisee, **Pharisaic**, *s.*; *a.* *See* **Hypocrite.**

Pharmacopœia, *s.* औषधतत्त्वशास्त्रं, भेषजसंस्कारग्रंथः.

Pharmacy, *s.* औषधक्रिया-संस्कारः-विद्या.

Pharos, *s.* दीपस्थानं-गृहं.

Phase, Phasis, *s.* दर्शनं, वस्तु *n.*; 'p. s of the moon' चंद्रस्य आप्यायनी. 2 (Point of view) दृष्टि *f.*; *See* **View.**

Pheasant, *s.* चकोरः, जीवंजीवः.

Phenomenon, *s.* इंद्रियविषयः, गोचरवस्तु *n.*, दर्शनं, आलोकः. 2 उत्पातः, अद्भुतं.

Phial, *s.* लघुकुपी, काचकूपी-पात्रं.

Philander, *v. i.* स्त्रीजनसमागमं अभ्यस् 4 P, वि-लस् 1 P, विलासं-विभ्रमं-कृ c.

Philanthropy, *s.* लोकहितेच्छा, लोक-जनप्रीति *f.*, सर्वभूतदया, विश्वप्रीतिः, विश्वसौहृदं. **-ic-, ical.** *a.* लोकहितैषिन्, जनहितकामः, जगन्मित्रं, विश्वमित्रं, विश्वसुहृद्. **-ist**, जनहितैषिन् *m.* वि-श्वसुहृद्.

Philippic, *s.* भर्त्सनवाक्यं, निंदात्मकः प्रबंधः.

Philology, *s.* भाषाविज्ञानं-तत्त्वं, शब्दव्युत्पत्तिशास्त्रं-विद्या. **-er-, -ist**, *s.* शाब्दिकः भाषातत्त्वज्ञः. **-ical**, *a.* शाब्दिक (की *f.*), शब्दशास्त्रीय.

Philomath, *s.* विद्याप्रियः-भक्तः-अभ्यासेविन् *m.* **-y**, *s.* विद्यासेवनं.

Philosophy, *s.* दर्शनं; 'six systems of p.' षड्दर्शनं. 2 तत्त्वज्ञानं, विज्ञानं, तत्त्वविद्या-शास्त्रं, तत्त्वं, ज्ञानं, विद्या, शास्त्रं in comp.; 'moral p.' नीतिशास्त्रं; 'logical p.' तर्कशास्त्रं-विद्या, &c. **-er**, *s.* दर्शनज्ञः, तत्त्वविद् *m.*, तत्त्वज्ञः-ज्ञानिन् *m.* तार्किकः, ज्ञानी, पंडितः, प्राज्ञः, ज्ञानविदः; 'p.'s stone' चिंतामणिः; स्पर्शमणिः. **-ic,-ical**, *a.* तत्त्व-दर्शन in comp.; दार्शनिक (की *f.*). 2 विज्ञ, तत्त्व-

ज्ञानपर, ज्ञान-विद्या-पर. **-ically,** *adv.* तत्त्वज्ञानानुसारेण, तत्त्वतः. **-ize,** *v. i.* तत्त्वं निरूप् 10 or आलोच् 10 or अन्वीक्ष् 1 A.

Philtre, *s.* मंत्रौषधं, वशीकरणचूर्णं.

Phiz, *s. See* **Face.**

Phlebotomy, *s.* शिरावेधः-मोक्षः-छेदः. रक्तमोक्षणं-स्रावः

Phlegm, *s.* कफः, श्लेष्मन् *m.*, सिंघाणकं. **2** मांद्यं, जाडयं; 'a medicine removing p.' (phlegmagogue) श्लेष्मघ्नं, कफनाशनं. **-atic,** *a.* कफिन्, श्लेष्मल-ण, बहुकफ. **2** कफकर (री *f.*), श्लेष्मजनन (नी *f.*). **3** श्लेष्मज. **4** जड, मंद, शीत; *See* **Indifferent.**

Phonetic, *a.* स्वरसंबंधिन्, ध्वनि-स्वर-in comp. **-Phonetics, Phonics,** *s.* स्वर or ध्वनि-विद्या or शास्त्रं.

Phonograph, *s.* स्वरलेखनयंत्रं.

Photograph, *s.* आलोकलेख्यं. **-er,** *s.* आलोकलेख्यकारः.

Phrase, *s.* वाक्यं, उक्ति *f.*, वचनं. **-***v. t.* अभि-धा 3 U, उद्दिश् 6 P; *See* **Call.** **-Phraseology,** *s.* वाक्यबंधः-रचना, भाषासरणि *f.*, वाक्प्रकारः, वाग्रीति *f.*-व्यापारः-व्यवहारः; 'dramatic p.' नाट्योक्तिः, नाट्यपरिभाषा.

Phrenetic, *a.* उन्मत्त; *See* **Frantic.** **-Phrenitis,** *s.* सन्निपातज्वरः, उन्मादः; *See* **Frenzy.**

Phrenology, *s.* मस्तिष्कविद्या.

Phthisic, Phthisis, *s.* श्वासावरोधः, श्वासाकृच्छ्रं; क्षयः, क्षयरोगः, शोषः, यक्ष्मन् *m.*, राजयक्ष्मन्. **-Phthisical,** *a.* क्षयिन्, क्षयरोगिन्.

Phylactery, *s.* रक्षाकरंडः.

Physic, *s.* चिकित्सा, उपचारः, वैद्यक्रिया, औषधोपचारः. **2** औषधं. भेषजं, अगदः. **-***v. t.* कित् desid. (चिकित्सति-ते), उपचर् 1 P. भेषजं दा 3 U. **-ian,** *s.* वैद्यः. भिषज् *m.*, चिकित्सकः, अगदंकारः, रोगहारिन्-हृत् *m.* **-Physical,** *a.* साकार, स्थूल, जड; *See* **Material. 2** अंग, विग्रह, शरीर in comp.; 'p. strength' शरीरबलं; 'p. substance' स्थूलद्रव्यं-वस्तु. **3 Medicinal,** q. v.; 'p. science (physics)' पदार्थविज्ञानं,-शास्त्रं. **-ly,** *adv.* प्रकृत्या, स्वभावतः, जातितः, जन्मतः; *See* **Naturally.**

Physiognomy, *s.* आकृति *f.*, वदनाकृतिः. मुखं, वदनं. **2** वदनलक्षणनिरूपणं. **-ist,** *s.* मुखसामुद्रिकः

Physiography, *s.* भूवर्णनं.

Physiology, *s.* प्राण्योषधिजीवनशास्त्रं.

Physique, *s.* शरीरस्थिति *f.*

Piacular, *a.* अघ-पाप-नाशिन्.

Picaroon, *s.* समुद्रीयदस्युः.

Pick, *v. t.* चि 5 U, ग्रह् 9 U, समाह् 1 P, आ-दा 3 A, उद्-धृ 1 P, 10, लू 9 U, छिद् 7 P, (flower &c.). **2** क्षुद् c., कुष् 2 P or c., परिष्कृ 8 U. **3** (Up) वृ 5 U, उद्धृ 1 P, उद्ग्रह्; पृथक् कृ; 'p. a bone' अस्थिमांसं चर्व् 1 P, 10; 'p. out' उत्पट् 10, निष्कृष् 1 P; 'p. a quarrel' कलहं उत्-स्था c. (उत्थापयति); 'p. holes' (in another's coat) परस्य छिद्राणि दृश् 1 P, रंध्राणि-छिद्राणि-अन्विष् 4 P; 'p. the pocket' ग्रंथिं छित्त्वा अपह्. **-***s.* **Pick-axe,** q. v. **2** उद्धारः, वरणं. **3** विशिष्टभागः, उत्कृष्टभागः; 'ear-p.' कंडूयनकं; 'tooth-p.' दंतोल्लेखनी; 'p.-axe' टंकः, पाषाणभेदनी, पाषाणदारणः; 'p.-pocket' ग्रंथिच्छेदकः-चौरः. **-ing,** *s.* उद्धरणं, उद्ग्रहणं.

Picket, *s.* सेनारक्षः, रक्षकदलं. **2** शंकुः, स्थाणुः.

Pickle, *s.* संधितं, संधानं, संधितद्रव्यं. **2** लवणं. **-***v. t.* सं-धा 3 U, उपस्कृ 8 U.

Picnic, *s.* विहरणं, वनभोजनं.

Pictorial, *a.* सचित्र, चित्रोपेत, चित्रलिखित.

Picture, *s.* चित्रं, आलेख्यं, प्रतिमा, प्रतिकृति *f.*, प्रतिरूपं, प्रतिच्छंदः-दकं, प्रतिच्छाया; 'as if drawn in a p.' आलिखित इव; 'p.-board' चित्रफलकः; 'p.-frame' चित्राधारः, चित्रावरणं; 'p.-gallery' चित्रावली, चित्रशाला; 'p.-maker' चित्रक(का)रः. **-***v. t.* मनसि कृ 8 U, आलोच् 10, मनसा क्लृप् c. or विचर् c. or वि-भू c. **2** चित्र् 10, आलिख् 6 P, वर्ण् 10. **-ed,** *a.* चित्रगत, आलेख्यगत, चित्रार्पित, आलिखित. **2** मनसा कल्पित. **-Picturesque,** *a.* चित्रोपम, वि-, चित्र, शबल.

Piebald, *a. See* **Variegated.**

Piece, *s.* खंडः-डं, विभागः; अंशः, लवः, शकलः-लं, वि-, दलं, भिन्नं. **2** रचना, प्र-, बंधः; 'to break in p s' शकलीकृ 8 U, खंडशः कृ, खंड् 10; 'to fall to p. s' वि-, दल् 1 P; 'p. of poetry' काव्यप्रबंधः, कविता; 'p. of work' कार्यं; 'p. of money' मुद्रा; p. of water' जलाधारः, जलाशयः; 'in p. s' खंडशः, लवशः; 'p. at chess' शा (सा)रिः-रः; 'a p. to each' एकैकं, प्रत्येकं, पृथक् पृथक्; 'what a p. of work is man' अहो निर्माणविशेषः नरजीवः; 'of a p.' एकरूप-प्रकार; 'of a p. with' सदृश (शी *f.*), अनुरूप; *See* **Like.** **-***v. t.* संयुज् 7 U, 10, संधा- समाधा-3 U. **-less,** *a.* अखंड. **-Piecemeal,** *adv.* खंडशः लवशः, भागशः, खंडं खंडं, पृथक् पृथक्. **-a** भागिन्, खंड in comp.

Pied, *a. See.* **Variegated.**

Pier, *s.* सेतुबंधः **2** स्तंभः, वप्रः-प्रं.

Pierce, *v. t.* व्यध् 4 P, भिद्-भिद् 7 P, प्र-भंज् 7 P, छिद् 7 P; *See* **Perforate.** 2 आ-उप-हन् 2 U, शीतवातोपहतः 'p. ed by cold winds'. **-ed**, *a.* विद्ध, निर्भिन्न, छिद्रित; 'p. ed through the heart' भिन्नहृदय; 'having the ears p.' विद्ध-छिद्रित-कर्ण. **-er**, *s.* वेधकः. भेदकः. 2 वेधनिका, वेधनी. **-ing**, *a.* वेधक, वेधिन्, भेदिन् भिद्-छिद्- in comp.; 'p. the vital parts of the heart' हृदयमर्मभिद्-छिद्; (sound) पचष, कर्कश. **-s.** वेधः-धनं, निर्भेदः, छेदः-दनं.

Piety, *s. See* under **Pious.**

Pig, *s.* शूकरशावः-वकः शूकरः; *See* **Hog.** 2 कुशी, लोहपिंडः; 'p.-iron' असंस्कृतं अयः; 'p.-headed' स्थूल, स्थूलधी. **-gish**, *a.* शूकरोपम. **-Piggery**, *s.* शूकरालयः.

Pigeon, *s.* कपोतः, पारावतः, कलरवः; 'wood p.' हारित(-ति)तः; 'p.-hearted' भीरुहृदय, कातर; 'p.-hole' कपोतबिलं; 'p.-house,-cot' कपोतपालिका, विटंकः.

Pigment, *s.* वर्णकः; वर्णः, रंगः.

Pigmy, *s.* वामनः, ह्रस्वः, खर्वः. **-a.** वामन, ह्रस्व, खर्व, लघुतनु, अल्पमूर्ति.

Pike, *s.* प्रासः, कुंतः, शूलः-लं; *See* **Lance;** 'p.-man' प्रासिकः, कौंतिकः, शाक्तीकः, शूलिन् *m.*

Pilaster, *s.* चतुरस्रः स्तंभः.

Pile, *s.* राशिः, चयः, निकरः, पुंजः, पूगः, स्तोमः, समूहः. 2 चिता, चिति *f.*, चित्या. 3 स्थूणा, स्तंभः, शंकुः, कीलः. 4 हर्म्यं, भवनं, महामंदिरं. 5 ऊर्णा. **-v. t.** समाचि 5 U, राशीकृ 8 U.

Piles, *s.* अर्शस् *n.*, दुर्नामकं, अर्शोरोगः, गुदकीलकः, गुदांकुरः; 'affected by p.' अर्शस.

Pilfer, *v. t.* मुष् 9 P, चुर् 10, अपहृ 1 P **-er**, *s.* चौरः, मोषकः; *See* **rob,-ber.**

Pilgrim, *s.* यात्रिकः, तीर्थसेविन् *m.* **-age**, *s.* तीर्थयात्रा, यात्रा, यात्राप्रसंगः, तीर्थाटनं-सेवा; on a p. to Garuda' गरुडस्य यात्राप्रसंगेन; 'place of p.' तीर्थः-र्थं, पुण्यस्थानं.

Pill, *s.* वटिका, गुटिका, गुलिका.

Pillage, **-v. t.** वि-लुंट्-ठ् 1 P, 10, अपहृ 1 P. **-s.** विलुंठनं, लोप्त्रं, लोत्रं, अपहारः. **-er**, *s.* लुंठकः, अपहारकः.

Pillar, *s.* स्तंभः, स्थाणुः, स्थूणा, अवष्टंभः; यूपः (sacrificial); 'p. of state' राज्यस्य आधारस्तंभः; 'p. s of justice' न्यायाधाराः, धर्मावष्टंभाः.

Pillow, *s.* उपधानं, उपबर्हः, बालिशं; 'p.-case' उपधानकोशः-आवेष्टनं; 'I slept, making my left arm serve as a p.' वामभुजमुपधाय अशयिषि (D. K. ii. 5). **-v. t.** उपधा 3 U, उपधानीकृ 8 U.

Pilous, *a.* लोमश, प्रचुरलोमन्. **-Pilosity**, *s.* लोमशत्वं, लोमप्राचुर्यं.

Pilot, *s.* कर्णधारः-ग्राहः, कर्णिकः, कर्णिन् *m.*, नाविकः, नौवाहः 2 **Guide**, q. v. **-v. t.** मार्गं दृश् c., प्रणी 1 P, वह् c. **-age**, *s.* कर्णिकवेतनं.

Pimp, *s.* विटः, संचारकः; *See* **Pander.**

Pimple, *s.* पिटिका, स्फोटः, क्षुद्र-लघु-व्रणः. रक्तस्फोटः- गंडः, रक्तवटी. **-ed,-y**, *a.* सस्फोट, व्रणिन्, सव्रण, पिटिकावृत.

Pin, *s.* सूचि *f.*, कीलः-लकः-कं, शलाका, शंकुः, शल्यं 2 (Of a carriage) अणिः-णी, अक्षाग्रकीलः; 'p.-maker' सूचिकारः. **-v. t.** सूच्या बंध् 9 P, कील् 10.

Pincers, *s.* संदंशः-शकः, कंकमुखं.

Pinch, *v. t.* पीड् 10, बाध् 1 A, क्लिश् 9 P, संकुच् 1 P (the body), आर्तीकृ 8 U; 'p. ed with cold' शीतार्त, हिमपीडित; 'p. ing poverty' दुःसहं दारिद्र्यं. 2 अंगुल्यग्रेण पीड्. 3 त्रुटिना संग्रह् 9 P, संग्रह्; 'none but the wearer knows where the shoe p. es' न हि वंध्या विजानाति गुर्वीं प्रसववेदनां. **-s.** अंगुलिपीडनं, संग्रहः, ग्रहणं; 'p. of snuff' नस्यकूर्चः. 2 संकटावस्था, दुर्गति *f.*, कष्टं, कृच्छ्रं; 'p.-fist' बद्ध-दृढ-मुष्टिः, अमुक्तहस्तः.

Pine, *s.* देवदारुः-रु, पीतद्रुः, सरलः, पूतिकाष्ठं; *See* **Fir** also. **-v. i.** (Away) अवसद् 1 P, परि-,म्लै-ग्लै 1 P, क्षि-pass., विद्-क्षी 4 A. 2 (For) उत्सुक् 4 P, उत्कंठ् 1 A, उत्सुकायते (D.); oft by उत्क, उत्सुक, उत्कंठ in comp.; 'a heart p. ing away in absence' विरहोत्कंठं हृदयं; 'p. ed for his home' गृहं प्रतिमुदृताप्यत्, अविषु-तासमागमोत्कः (K. vi. 95) 'p. ing to be united with Parvati'; अंतःपुरविरहपर्युत्सुकस्य राजर्षेः (S. 3) 'who is p. ing by separation &c. **-ing**, *s.* म्लानि *f.*, अवसादः, उत्कंठा. **-a.** म्लान, क्षीण, विषण्ण, उत्क, उत्सुक, सोत्कंठ.

Pinion, *s.* पक्षः, पर्णं 2 बाहुपाशः-बंधः. **-v. t.** पक्षौ बंध् 9 P, बाहू बंध्.

Pink, *s.* पाटलवर्णः, पाटलः. 2 अग्रं, शिखरं, पराकाष्ठा. **-a.** पाटल, पाटलवर्ण; 'p.-eyed' गज-सूक्ष्म-नेत्र. **-v. t.** व्यध् 4 P; *See* **Perforate.**

Pinnace, *s.* क्षुद्र-लघु-नौका.

Pinnacle, *s.* अट्टः, प्रासादाग्रं-शृंगं, मौलिहर्म्यं. 2 शिखरं, शृंगं, अग्रं.

Pioneer, *s.* आटविकः, काष्ठ-तरु-छिद् *m.* 2 मार्गदर्शकः, अग्रेसरः, अग्रयायिन् *m.* *See* **Forerunner.** **-v. t.** सैन्यमार्गं शुध् c.

Pious, *a.* धार्मिक (की *f.*), पुण्य-धर्म-शील, धर्मात्मन्, पुण्य, पुण्यात्मन्, भक्तिमत्, शुचि-

व्रत, भक्ति or धर्म-निष्ठ or परायण, धर्माचार; 'led a p. life' धर्माचरणेन आयुरनयत्; 'p. action' धर्मक्रिया; for p. purpose' धर्मार्थं. 2 धर्म-भक्ति-मूलक. -ly, *adv.* भक्त्या, धार्मिकवत्. -ness,-Piety, *s.* धर्मनिष्ठा-परता-आसक्ति *f.*, धर्मात्मता, पुण्यशीलं, ईश्वर-धर्म-भक्ति *f.*, ईश्वरनिष्ठा-सेवा, पुण्यता, भक्तिः; 'distinguished for p.' धर्मप्रधान. 2 पितृसेवा, पुत्रधर्मः. [पिब् 2 P.

Pip, *s.* बीजं. 2 बिंदुः, अंकः. -*v. i.* कूज् 1 P,

Pipe, *s.* वंशः, वेणुः, सुषिरं. 2 नालः, नाडिका-लि-ली *f.*, प्रणालः-ली; 'water-p.' सारणि *f.*, प्रणालिका. -*v. i.* वेणुं वद् c. or ध्मा 1 P. -er, *s.* वांशिकः, वेणुध्मः.

Piquant, *a.* उग्र, तिग्म, कटु, तीक्ष्ण, क्षार. 2 मिष्ट, स्वादु, सरस.

Pique, *s.* कलिः, कलहः, ईषत्कोपः. -*v. t.* ईषत् कुप् c. or रुष् c. 2 उत्तिज् c., उत्पद् c., प्रोत्सह् c., प्र-वृत् c. 3 (Oneself) अभिमन् 4 A; विकत्थ् 1 A; 'he p. s himself upon his learning' पंडितंमन्योऽसौ.

Pirate, *s.* समुद्रदस्युः. 2 साहसिकनौका. 3 शब्दचौरः. -*v. t.* अपहृ 1 P, लुंठ्-लुंट् 1 P, 10. **Piracy,** *s.* समुद्रीयचौर्यं-लुंठनं -**Piratical,** *a.* साहसिन्, साहसिक (की *f.*).

Piscator, *s. See* **Fisherman.**

Pisces, *s.* मीनः, मीनराशिः.

Piscivorous, *a.* मत्स्याशन, मत्स्याद्.

Pismire, *s. See* **Ant.**

Piss, *s.* मूत्रं, मेहः. -*v. t.* मूत्रं उत्सृज् c., मिह् 1 P, मूत्र् 10.

Pistil, *s.* गर्भकेसरः-रं.

Pit, *s.* गर्तः-र्ता, विवरं, बिलं, अवटः; 'p.-coal' आकरांगारः; 'p.-fall' गूढ or छन्न-कूपः or गर्तः, अंधकूपः. -*v. t.* सूक्ष्मगर्तैः अंक् 10 or चिह्नयति (*D.*). 2 योद्धुं प्रोत्सह् c., प्रविशुध् c.

Pitch, *v. t.* रच् 10, प्रतिष्ठा 3 U; वप् c. (रोपयति), स्था c. (स्थापयति), निविश् c. 2 क्षिप् 6 P, प्र-,अस् 4 P, नि-,पत् c. 3 अरालेन अंच् 7 P. -*v. i.* आ-अव-पत् 1 P, अवपद् 1 P, अव-तॄ 1 P, अध्यास् 2 A. 2 निविश् 6 A, शिबिरं अध्यास्. 3 अधोमुखेन पत्, अवाक् गम् 1 P. 4 (Upon) वृ 5 U; *See* **Choose.** -*s.* तिंदुः, रालः, अरालः, यक्षधूपः सर्जरसः, सर्वरसः, बहुरूपः 2 कोटि *f.*, काष्ठा, अग्रं, शिखरं; 'highest p.' परा काष्ठा-कोटिः. 3 परिमाणं, पर्यंतः; *See* **Degree.** 4 उत्संगः, कटकः-कं. 5 स्वरः; 'mineral p.' शिलाजतु *n.* -y, *a.* तिंदुलिप्त. 2 सूचिभेद्य, अंध, अतिकृष्ण.

Pitcher, *s.* कुंभः, घटः, घटी, कलसः-शः, पुटग्रीवः; *See* **Jar.**

Pith, *s.* मज्जा, गर्भः, सारः. 2 सारः, सारांशः, सत्त्वं, तत्त्वं. 3 निर्यासः, रसः. 4 सत्त्वं, वीर्यं, बलं, उत्साहः. -less, *a.* असार, निःसार, फल्गु, निःसत्त्व, विरस. -y, *a.* ससार, सारपूर्ण, सरस, ससत्त्व, सारवत्, सारगर्भ. 2 सप्रभाव, तेजस्विन्, वीर्यवत्, ससत्त्व.

Pittance, *s.* स्तोकांशः, अल्पस्वभागः; अल्पमूल्य-वेतनं, ग्रासाच्छादनमात्रं.

Pity, *s.* दया, अनुकंपा, करुणा, घृणा, कृपा, अनुक्रोशः; 'in p. to my passion' (मम अर्थितं) दुःखं मे निरवेक्ष्य (Mr. 5); 'what a p. it is' अहो नु कष्टमेतत्. -*v. t.* 'take p. on' दय् 1 A (with gen.); अनुकंप् 1 A, कृपां कृ 8 U (with loc.); प्रसद् 1 P. -**Piteous, Pitiable,** *a.* अनुकंप्य, करुणा-अनुकंपा-योग्य, दयाविषयः-भाजनं-पात्रं, करुण, दीन; 'in p. accents' करुणस्वनैः. 2 वराक (की *f.*), तपस्विन् (of persons). -ly. *adv.* करुणं, दीनं. -ness, *s.* अनुकंप्यता, कारुण्यं, दैन्यं. -**Pitiful, -Pitying,** *a.* करुणार्द्र, करुणात्मक (की *f.*), करुणा-दया-शील, सदय, सानुकंप, दयालु, कृपालु; *See* **Kind;** 'a p. person' दयानिधिः-सागरः, दीनबंधुः-वत्सलः. 2 करुण, दीन, शोच्य 3 **Contemptible.** q. v. -ly, *adv.* सदयं, सानुकंपं, सकरुणं. -ness, *s.* दयालुता, कारुण्य, दयार्द्रता. -**Pitiless,** *a.* निर्दय, निरनुक्रोश, निर्घृण, निष्कृप, क्रूर, निष्ठुर, कठोर, अकरुण. -ly, *adv.* निर्दयं, क्रूर निष्ठुरं.

Pivot, *s.* विवर्तनकीलः.

Placard, *s.* घोषणापत्रं. -*v. t.* घोषणापत्रेण प्रकाश् c.

Placate, *v. t.* **Appease,** q. v. -**Placable,** *a.* क्षमाशील; सांत्वनीय, आराध्य, प्रसाद्य.

Place, *s.* स्थानं, स्थलं, प्र-,देशः, स्थली, भू-भूमि *f.*, विषयः. 2 पदं, आस्पदं, विषयः. 3 पदं, पद्धति-वी *f.*, अधिकारः, नियोगः, अधिकारपदं; *See* **Office.** 4 अवकाशः, अवसरः, प्रसरः; 'p. of honour' संमानपदं, गौरवपदं; 'in one p.' एकत्र; 'in many p. s' बहुत्र; 'p. of residence' निवासस्थानं; वसति *f.*; 'p. for dancing' नृत्यशाला-स्थानं; 'out of p.' अस्थाने, अनुचितं; 'in the p. of a father' पितृस्थाने-भूमौ; 'p. for fear' भयस्थानं-कारणं-हेतुः; 'in one p.-in another p.' क्वचित्-क्वचित्, इतः-इतः, एकत्र-अन्यत्र; 'in the first p.' प्रथमं, प्रथमतः, प्रथमं तावत्; 'in the next p.' अपरंच, पुनः, पुनश्च; 'to give p.' स्थानं त्यज् 1 P, व्यप-सृप् 1 P, अप-सृ 1 P; 'to take p.' *See* **Happen, Occur.** -*v. t.* स्था c. (स्थापयति), धा 3 U, नि-आ°-, वि-,न्यस् 4 U, निक्षिप् 6 P, आ-नि-विश् c., आरुह् c. (रोपयति), धृ 10; oft. by कृ 8 U, दा 3 U, व्याप् c., (व्या-

धारयामास करं शिरसि R. vi. 19); 'p. over' अधिकृ, अधि-ष्ठा 1 P; 'p. in an office' पदे नियुज् 7 A, 10 or आवह् c.

Placid, *a.* शांत, प्र-उप°-, प्रसन्न, निराकुल, अनुद्विग्न, जितक्रोध, असंभ्रम, शांतात्मन्, प्रसन्नचित्त. **-ly,** *adv.* प्रसन्नं, शांत्या, शांतचेतसा, निराकुलं. **-ity, -ness,** *s.* शमः, शांति *f.*, प्रसादः, अक्रोधः, असंभ्रमः, अक्षोभः.

Plagiarism, *s.* शब्दचौर्यं, वाग्अपहारः. **Plagiarist,** *s.* शब्द-ग्रंथ-चोरः.

Plague, *s.* मारी, महामारी, म(मा)रकः. 2 उत्पातः, अरिष्टं, अनर्थः, शल्यं, उपद्रवः, कंटकः, उपप्लवः; *See* **Pest.** **-v.** *t.* मार्या ग्रस् 1 A or आक्रम् 1 U, 4 P. 2 बाध् 1 A, पीड् 10, तप् c., दु 5 P; *See* **Harass.** **-ing,** *a.* बाधक, पीडक, क्लेशद, पीडाप्रद.

Plain, *s.* समभूमि *f.*-क्षेत्रः-स्थलं-ली, समभूभागः; *See* **Level.** **-a.** सम, सपाट. 2 विनीत, निरलंकार, अभूषित, निर्भूषण. 3 स्पष्ट, व्यक्त, विशद, परि-,स्फुट, सुबोध, स्पष्टार्थ, भिन्नार्थ, प्रकाश, प्रत्यक्ष, प्रकट. 4 केवल, मात्र in comp. 5 (Style) अनलंकृत, शुद्ध, अनलंकार, अव्यंजन. 6 (Food) उपस्कारहीन-शून्य, असंस्कृत. 7 अमाय, दक्षिण, निष्कपट, निर्व्याज, सरल, कपट-माया-हीन, निर्व्यलीक, अकृत्रिम, ऋजु; *See* **Frank.** 8 सामान्य, साधारण (णी *f.*); मध्यमरूप, नातिसुंदर (री *f.*); 'a p. woman' 'one p. in person' सामान्यलावण्योपपन्ना, नातिसुभगा, अनतिसुंदरी; 'p. dealing' व्यायाचार, शुद्ध-सरल-मति, निर्व्यलीक, दक्षिण, अमाय, ऋजु; (*s.*) सारल्यं, निष्कापट्यं. **-v.** *t.* समीकृ 8 U. **-ly,** *adv.* स्पष्टं, व्यक्तं, स्फुटं, स्पष्टार्थं, सुबोधं, प्रकाशं, प्रकटं, प्रत्यक्षं. 2 निर्व्याजं, निर्व्यलीकं, अवक्रं, सारल्येन, अमायया, निष्कपटं. 3 विनीतं, अनलंकारं; 'p. dressed' विनीतवेष. **-ness,** *s.* समता, विनीतत्वं, भूषणाभावः, व्यक्तता, स्पष्टता, वैशद्यं, सुबोधता, प्रकाश्यं, अव्याजः, निर्व्याजता, अकापट्यं, सारल्यं, अमाया, आर्जवं, &c.

Plaint, *s.* प्रतिज्ञा, अभियोगः, भाषापादः, भाषा, पूर्वपक्षः, पक्षः. 2 विलापः, विलपनं, परिदेवनं-ना, शोकः. **-Plaintiff,** *s.* अर्थिन् *m.*, वादी, अभियोगी, कार्यार्थी, अभियोक्तृ *m.*, सूचकः. **-Plaintive,** *a.* परिदेविन्, विलापिन्. 2 शोकावह, शोकार्थक, शोकदुःख-गर्भ; करुण, दीन, सकरुण; 'in p. words' परिदेविताक्षरैः. **-ly,** *adv.* करुणं, दीनं.

Plait, *s.* भंगि-गी *f.*, भंग, ऊर्मि *f.*, पुटः, पुटकः. 2 वेणि-णी *f.*, कबरी, धम्मिल्लः. **-v.** *t.* ग्रंथ् 9 P, व्या-वृत् c., कुंचीकृ 8 U, संवे 1 P, वेणीकृ, वेणीरूपेण ग्रंथ्.

Plan, *s.* उपायः, प्रयोगः, प्र-,युक्ति *f.*, कल्पना. 2 सूत्रपातः, चित्रलेखनं, आलेख्यं, स्थूललेखनं. **-v.** *t.* प्र-सं-कल्प् c., प्र-,युज् 10, चिंत् 10, मंत्र् 10 A, अनुसंधा 3 U, आलोच् 10, मनसा विचर् c. or वि-मृ c. 2 आलिख् 6 P, सूत्रपातं कृ 8 U. **-ning,** *s.* उपाय-कल्पना-योजना.

Planch, *See* **Plank.**

Plane, *a.* सम, समस्थ. **-s.** समं, समक्षेत्रं, धरातलं. 2 तक्षणी, त्वक्षणी. **-v.** *t.* समीकृ 8 U. 2 तक्ष् 1, 5 P.

Planet, *s.* ग्रहः, ज्योतिस् *n.*; 'minor p.' उपग्रहः; 'passage of a p.' संक्रमः, संक्रांति *f.*; 'aspect of a p.' ग्रहदृष्टिः; 'influence of a p.' ग्रहावेशः. **-ary,** *a.* ग्रह in comp.

Planish, *v. t.* समीकृ 8 U., तिक्ष्ण c.. प्र-मृज् c.

Plank, *s.* फलकः-कं; दारु-काष्ठ-फलकः. **-v.** *t.* फलकैः आस्तृ 9 U or आच्छद् 10.

Plant, *s.* ओषधि *f.*, लता; तरुः, वृक्षः. **-v.** *t.* (Seeds) आ-,रुह् c. 2 प्रति-,स्था c. (स्थापयति), वि-,न्यस् 4 U, निविशू c., नि-खन् 1 P, नि-धा 3 U, रुह् c. 3 अधि-,वस् c. **-ation,** *s.* रोपणं. 2 क्षेत्रं, in comp., वाटः-टी, वाटिका; शाकटं-शाकिनं in comp., इक्षुवाटिका; 'sugar-p.' इक्षुशाकट-वाटिका. 3 **Colony,** q. v. **-er,** *s.* रोपयितृ *m.*, रोपकः. 2 वाटिकेश्वरः.

Plantain, *s.* कदली-लः, रंभा, वारणबुसा-षा, मोचा, अंशुमत्फला, काष्ठीला; 'p. fruit' कदलीफलं, मोचं; 'wild p.' काष्ठकदली.

Plantigrade, *a.* पादतलचारिन्.

Plash, *s.* आघातः, आस्फालनं. 2 [illegible]. **-v.** *i.* जले क्रीड् 1 P, जलं आस्फल् c. **-v.** *t.* अवच्छिद् 7 P, लू 9 U, कृत् 6 P. 2 संग्रंथ् 9 P. **-y,** *a.* जलाढ्य.

Plaster, *s.* लेपः, सुधा, चूर्णलेपः. 2 उपनाहः उपदेहः. **-v.** *t.* लिप् 6 P, वि-अनु-प्र-°, दिह् 2 U, उप-नह् 4 P. **-er,** *s.* लेपकः, पलगंडः. **-ing,** *s.* वि-प्र-लेपः-पनं.

Plastic, *a.* आकारद, कल्पक. 2 [illegible].

Plat, *s.* **Plot,** q. v. **-v.** *t.* **Weave,** q. v. 2 प्र-सं-कल्प् c., चिंत् 10.

Plate, *s.* पात्रं, भाजनं. 2 कोशः-षः, हेमरूप्यं. 3 फलकः-कं, पत्रं; पट्टः-ट्टं, पट्टिका; 'copper p.' ताम्रपट्टः, ताम्रपत्रं; 'p.s of grant' शासन-नियम-पत्राणि. **-v.** *t.* रजतपत्रेण आवृ 5 U or आच्छद् 10; रजतेन अलंकृ 8 U. **-ed,** *a.* रजतपत्रावृत, कल्पितवद्ध.

Plateau, *s.* समस्थली, अधित्यका; *See* **Level.**

Platform, *s.* वेदि *f.*, वेदिका, [illegible].

Platoon, *s.* गुल्मः-ल्मं.

Platter, *s.* पात्रं, भाजनं.

Plaudit, *s.* प्रशंसा, धन्यवादः, जयघोषः.

Plausible, *a.* सत्याभास, सत्यसंकाश, बाह्यतः रमणीय.

Play, *v. i.* क्रीड् 1 P, रम् 1 A, वि-हृ 1 P, विलस् 1 P, खेल् 1 P. **2** (At dice) दिव् 4 P, क्रीड्, ग्लह् 1 A; 'p. s at dice' अक्षैः -अक्षान् दीव्यति. **3** वद् c. (instrument). **4** वेल्ल् 1 A, चुल् 1 A, चल् 1 P. —*v. t.* रूप् 10, नट् 10, अभिनी 1 P, ex. by denom.; 'p. s the king' नृपायते; 'p. s the woman' स्त्रीवाचरति. **2** प्र-,चल्-वृ c., प्रवृत् c., प्रसृ c. **3** वि-धा 3 U, कृ 8 U, अनु-ष्ठा 1 P. —*s.* क्रीडा, खेला-लनं, लीला, केलि *f.*, विनोदः, विलासः, विहारः, कौतुकं, परिहासः; 'in p.' लीलया, परिहासेन. **2** नाटकं. **3** अक्षक्रीडा, द्यूतं, देवनं. **4** अभिनयः, गति *f.* **5** आचरणं, चेष्टितं; वृत्ति *f.*, व्यापारः, कृत्यं, चेष्टा; 'foul p.' दुश्चेष्टितं. **6** चलनं, सरणं. **7** प्रसरः, अवकाशः, अवसरः; 'p.-day' अनध्यायदिवसः-तिथिः, विश्रामदिवसः; 'p. house' नाटक-रंग-शाला; 'p.-thing' क्रीडनकं, क्रीडाद्रव्यं-वस्तु. **-er,** *s.* क्रीडकः; (at dice) अक्ष-,देविन् *m.*, अक्षक्रीडकः, अक्षधूर्तः. **2** नटः, कुशीलवः, नर्तकः, अभिनेतृ *m.* पात्रं. **-ful,** *a.* क्रीडासक्त, क्रीडापर-मग्न, केलि-क्रीडा-लीला-शील, लीला-खेला-पर, विलासिन्, विनोदिन्; (of things) सलील -क्रीडा-केलि in comp.; 'p. anger' प्रणयक्रीडा-कोपः, केलिकोपः. **-fully,** *adv* क्रीडापूर्वं, परिहासेन (jokingly); लीलया, सकौतुकं, सविलासं, सखेलं. **-fulness,** *s.* क्रीडासक्ति *f.*, लीलापरता, सलीलत्वं, क्रीडाशीलता.

Plea, *s.* कारणोत्तरं, उत्तरं, उत्तरपादः. **2** व्यपदेशः, छद्मन् *n.*, अपदेशः, निमित्तं, कारणं, मोचनहेतुः. **3** वादः, व्यवहारः, कार्यं. **4** प्रार्थना; 'raising a p.' व्याजीकरणं. —**Plead,** *v.* उत्तरं दा 3 U or प्रतिपद् 4 A or वद् 1 P, निमित्तं कृश् c., वि-,अप-दिश् 6 P; 'p. guilty' अपराधी अस्मीति वद् or प्रतिपद्; 'tears shall p. in vain' अश्रुपातो निर्गुणो भवेत्. **2** विनयेन प्रार्थ् or अभ्यर्थ् 10 A, सविनयं याच् 1 A; 'p. ed for his life' जीवितदानार्थं प्रार्थयामास. **3** उप-क्षिप् 6 P, उपन्यस् 4 U, व्यपदेशार्थं पुरः क्षिप्. **4** (Cause) प्रति-पद् c., परार्थं उत्तरं वद्, परपक्षं समर्थ्; 'p. ing headache as an excuse' शिरःशूलस्पर्शं व्यपदिशन्; 'p. ing illness' अस्वास्थ्यव्याजनव्यपदेशेन. **-er,** *s.* अभिभाषकः, उत्तरवादिन् *m.* समर्थकः, हेतुवादिन् *m.* **-ing,** *s.* हेतु-उत्तर-वादः, व्यपदेशनं, हेतूपन्यासः.

Please, *v. i.* प्री 9 P, 10 (प्रीणयति), तुष् c., सं-परि-°, रम् c. (रमयति), प्रहृष् c., सुखयति (D.), आ-नंद् c., सं-,तुष् c., प्रसद् c., आह्लाद् c., हृष् c., आराध् c., अनुरंज् c.; oft. by इच्छा, प्रसादः, कृपा; विनयप्रसूतं कश्चिन्न्रेभवसूतं वा विमर्शितेच्छया (R. VIII. 46) 'if it p. God to do so' &c.; 'he was p. ed to accept my presents' मनोपायनानि स सुप्रीतमनसा-सुप्रसन्नं स्वीचकार; 'may it p. your ladyship' प्रसीदतु भट्टिनी (M. 4). **2** (Like) *See* below. —*v. i.* 'to be p. ed' तुष् 4 P, तृप् 4 P; रम्-ह्लाद् 1 A, नंद् 1 P. **2** अर्ह् 1 P or प्रसद् 1 P, with inf., or simply by Imperative; 'p. sit here' अत्रोपविशत्वार्यः; 'worthy Sir, p. to wait for 2 or 3 days' द्वित्राण्यहान्यर्हसि सोढुमर्हन् (R. v. 25) **3** रुच् 1 A, इष् 6 P; *See* Like; 'just as my friend p. s' यद्भिरोचते वयस्याय; 'do as you p.' यथाभिलषितं क्रियतां. **-ance,** *s.* क्रीडोद्यानं. **-ant,** *a.* सुखकर (री *f.*), मधुर, सुखद-प्रद, सुखावह, रम्य, रमणीय, प्रिय, मनोहर-रम, अभिराम, सुभग, आभिमत, हृद्य, काम्य, कांत, हर्षावह, रुचिर, इष्ट, हृदयंगम, प्रीति-तुष्टि-कर, मनोज्ञ, मंजुल, चारु; 'a p. joke' हृदयंगमः परिहासः (Mal. 3). **-antly,** *adv.* सुखं, रम्यं, मधुरं, प्रियं, रुचिरं. **-antry,** *s.* परि(री)हासः, नर्मभाषितं, विनोदः, नर्मालापः, विनोद-नर्म-उक्ति *f.* **-ing,** *a.* सुख in comp.; रम्य, कांत; *See* **Pleasant.** 'p to the ear' सुखश्रव, श्रुतिसुख, मंजुलस्वन, सुश्राव्य; 'p. to the eye' प्रेक्षणीय, नयनाभिराम, सुदृश्य; 'p. language' चाटु *m. n.*, चाटूक्तिः. **-ingly,** *adv.* सुभगं, सुखं, सुख-चारु in comp. —**Pleasure,** *s.* सुखं, सं-परि-तोषः, आनंदः, प्रीति *f.*, सौख्यं, तुष्टि *f.*, प्र-, मोदः, आह्लादः, हर्षः, मुदा. **2** अभि-, रुचि *f.*, इच्छा, अभिलाषः, छंदः-दस् *n.*, कामः; 'at one's p.' स्वेच्छया, कामतः, यथाकामं, यदृच्छया, स्वैरं; 'wandering at p.' कामचारिन्, स्वच्छंदगामिन्; 'sensual p.' भोगः, विषयसुखं, विषयानुरागः; 'sexual p.' रति *f.*, रतिसुखं, सु-,रतं; 'p.-boat' केलि-क्रीडा-नौका; 'p.-ground' आरामः, क्रीडा-केलि-विलास-वन-कानन, प्रमदवनं, क्रीडोद्यानं; 'p.-mansion' केलिगृह-भवनं, लीलागारं, विलासमंदिरं. **3** प्रसादः, अनुग्रहः. **-able,** *a.* रम्य, रमणीय, सुखद, सुख; *See* **Pleasant.** **-ist,** *s.* विषयिन् *m.*, विषयासक्तः, भोगासक्तः, भोगपरायणः.

Plebian, *a.* प्राकृत (ती *f.*), सामान्य, साधारण (णी *f.*), अवरवर्ण, अकुलीन. —*s.* प्राकृतः, प्राकृतजनः, पृथग्जनः, नीच-अवर-जनः.

Plectrum, *s.* कोणः, शारिका.

Pledge, *s.* न्यासः, निक्षेपः, आधिः, उपनिधिः, उपन्यासः-निक्षेपः, पणः. 2 अभिज्ञानं; 'p. of love' प्रत्यभिज्ञानं. 3 प्रतिज्ञा, क्षणः, परिपणः-नं; 'I have given a p.' विहितप्रतिज्ञः-गृहीतक्षणः-अहं. 4 प्रतिभूः, लग्नकः, बंधकः. -*v. i.* न्यस् 4 U, निक्षिप् 6 P, आ-नि-धा 3U, परि-,पण् 1 A, आधी-न्यासीकृ 8 U. 2 (One's word) प्रति-श्रु 5 P, प्रति-ज्ञा 9 A, (with dat. of person), उरीकृ, वचनेन बंध् 9 P; ex. by (*s.*); अस्मत्सौदामिमीसमक्षमनयोर्वृत्तये प्रतिज्ञा (Mal. 1) 'they two p. ed their word' &c.; 'he has p. ed his virtue (honor) that he would not harm you' तव विकल्पकरणे तेन सुकृतमंतरे धृतं (P. iv. 1) 'he who has p. ed his word' कृतविहित-प्रतिज्ञः, प्रतिज्ञा-वचन-बद्धः,दत्तवचनः-प्रतिज्ञः, गृहीतक्षणः.

Pledget, *s.* पट्टः, आवेष्टनं.

Pleiades, *s.* कृत्तिकाः.

Plenary, *a.* सं-परि-पूर्ण, समग्र.

Plenipotent, *a.* पूर्णशक्तियुक्त. **-Plenipotence,** *s.* पूर्णसामर्थ्यं शक्ति *f.* **Plenipotentiary,** *s.* पूर्णशक्तियुक्तः, महादूतः.

Plenish, *v. t.* उपस्कृ 8 U, परि-छद् 10.

Plenist, *s.* पूर्णतावादिन् *m.*

Plenitude, *s.* पूर्णता, प्राचुर्यं, वैपुल्यं, समृद्धि *f.*, अतिरेकः, उत्सेकः, परा कोटिः-काष्ठा.

Plenty, *s.* बाहुल्यं, प्राचुर्यं, वैपुल्यं, बहुत्वं, समृद्धि *f.*, उद्रेकः, अतिरेकः, उत्सेकः,स्फीतिवृद्धि *f.* **-Plenteous, Plentiful,** *a.* प्रचुल, प्रचुर, विपुल, पटु, बहुल, भूरि, भूयिष्ठ, पुष्कल, समृद्ध, सं-परि-पूर्ण, उद्रिक्त, स्फीत, उत्सिक्त, उपचित. **-ly,** *adv.* बाहुल्येन, बहुशः, भूयिष्ठं, भूरि, प्रचुरं, विपुलं, अतिरिक्तं. **-ness,** *s.* बाहुल्यं, प्राचुर्यं; *See* (*s.*).

Pleonasm, *s.* अधिकपददोषः; शब्दाधिक्यं, शब्दातिशयः. **-Pleonastic,** *a.* अधिकशब्द, बहुपद.

Plethora, *s.* रक्तपित्तं. 2 बाहुल्यं, प्राचुर्यं, अतिवृद्धि *f.* **-Plethoric,** *a* रक्तपित्तरोगिन्.

Pleurisy, पार्श्वशूलं.

Plexus, *s.* नाडी-शिरा-जालं.

Pliant, Pliable, *a.* आ-,नम्य, सुखनम्य, मृदु, शिथिल, अदृढ, आयम्य.

Pliers, *s. See* '**Pincers.**'

Plight, *s.* दशा, अवस्था, स्थिति *f.*, भावः, वृत्ति *f.*, गति *f.*; 'sorry p.' दुर्दशा, दुर्गतिः. 2 **Pledge.** q. v. -*v. t.* प्रति-ज्ञा 9 A, न्यस् 4 U; *See* **Pledge.** **-ed,** *a.* प्रतिज्ञात, न्यस्त; 'p. word' विहितप्रतिज्ञा, संगरः, अभिसंधिः.

Plinth, *s.* स्तंभमूलं-तलं; प्राकारमूलं.

Plod, *v. i.* अविरतं श्रम् 4 P or आयासं कृ 8 U, मंदं मंदं आयस् 1, 4 P. **-der,** *s.* मंदं मंदं निरंतरायासिन् *m.*, नित्योद्योगिन् *m.* पिपीलिकाधर्मिन् *m.* **-ding,** *s.* अविरतोद्योग निरंतरश्रमः-नित्यायासः.

Plot, *s.* भू-भागः-प्रदेशः, क्षेत्रं, स्थली-ली, भूभूमि *f.* 2 कपटप्रबंधः, कुप्रबंधः, कपटोपायः, मंत्रणा, कुं-संकल्पः-मंत्रणा-कल्पना,कुहोपायः, उपजापः; (generally) उपायः, संकल्पः, प्रयोगः. 3 कथा, वस्तु *n.*: 'arrangement of p.' वस्तुरचना-विन्यासः; 'the p. of which is composed by Kālidāsa' कालिदासग्रथितवस्तु नाटकं (S. 1.) -*v. i.* कपटप्रबंधान् चिंत् 10 or युज् 10, उपायान् क्लृप् c. or निरूप् 10 or अनुसं-धा 3 U; 'p. against' द्रुह् 4 P (with dat.), अभिद्रुह् (with acc.); 'p. against one's life' जीवितापहरणाय कपटप्रबंधान्रचयति. **-ter,** *s.* कुमंत्रणाकृत् *m.*, अभिद्रोग्धृ *m*

Plough, *s.* हलं, लांगलं, सीरः (सी)रः, हालः, गोदारणं; 'body of a p.' निरीशं-षं; कुटकं, फालः,कृषकः; 'pole of a p.' ईषा-शा,(लांगलीषा), लांगलदंडः; 'handle of a p.' ईषादंडः; 'furrow made by a p.' सीता, लांगलपद्धति *f.*; 'p.-boy' बालकर्षकः; 'p.-gear' हलसज्जा-उपकरणं; 'p.-land' सीत्यं, हल्यं, फालकृष्टं, हल्यक्षेत्रं; 'p.-man' हालिकः,लांगलिन् *m.*, हलिन् *m.* लांगलिकः, सैरिकः,हलधरः-भृत् *m.* कृषकः, कर्षकः; 'p.-share' कुशी, फालः, कृषकः. -*v. t.* कृष् 1 P, 6 U, भिद् 7 P, विद् 9 P or c., उत्कृष् 1 P, (सद्यः सीरोत्कषणसुरभि Me. 16). -*v. i.* हलं वह् c. or चल् c. **-ed,** *a.* कृष्ट, हल्य, सीत्य; 'twice, thrice, p.' द्वि-त्रि-हल्य; 'p. after sowing' बीजाकृत, उप्तकृष्ट. **-er,** *s.* कर्षकः, हालिकः. **-ing,** *s.* कर्षणं, उत्कर्षणं, भूमिदारणं.

Pluck, *v. t.* (Off) लू 9 U, निष्कृष् 1 P; 'crows with feathers p. ed off' लूनपक्षाः काकाः; (out) उत्पट् 10, सं-,उद्धृ 1 P, निर्हृ; (hair) लुंच् 1 P, अव-उत्-°, उत्पट् c.; (up) उन्मूल् 10, उत्-खन् 1 P, उच्छिद् 7 P, उत्पट्, उद्धृ, कृष्. 2 (Gather) चि 5 U, अव-सं-°,लू, छिद्, आ-दा 3 A, ग्रह् 9 U. -*s.* सत्त्वं, वीर्यं, पौरुषं, उत्साहः; *See* **Courage.** **-ing,** *s.* उत्पाटनं, उद्धरणं, उद्धर्षनं,अव-,चयः.

Plug, *s.* रोधनी, स्तंभनी. -*v. t.* पि-धा 3 U, स्तंभ् 9 P.

Plum, *a.* कर्कंधूः,-फलं; *See* **Jujube.**

Plumage, *s.* पक्षाः (pl.), पिच्छकलापः, बर्हभारः, पक्षः, पर्णं, पतत्रं, गरुत् *n.*

Plumb, *s.* लंबः,-सूत्रं. -*a.* लंब, ऋजु, लंबरूप. -*v. t.* सूत्रेण समायुज् 7 U, 10. 2 वेधं परि-मा 3 A, 2 P. **-er,** *s.* सीसकारः.

Plume, *s.* पक्षः, पर्ण, पिच्छं; *See* **Feather.** 2 शिखा, चूडा, शेखरः. —*v. t.* पर्णानि रच् 10. 2 पक्षान् छिद् 1 P or उत्पट् 10. 3 (Oneself upon) आत्मानं श्लाघ् 1 A, विकत्थ् 1 A; 'p. a himself upon his learning' ज्ञानेन आत्मानं अतीव श्लाघते-विकत्थते, पंडितंमन्यः, पंडितमानी. **-less,** *a.* पक्षहीन. **-ous,-ose,-y, Plumigerous,** *a.* सपक्ष, पक्षवत्, पक्षविशिष्ट.

Plummet, *s.* लंबः, लंबसूत्रं, लंबसीसकं, सीसकसूत्रं.

Plump, *a.* पीन, पीवर, पुष्ट, स्थूल, उच्छून, आप्यान, स्फीत; *See* **Fat.** —*adv.* अकस्मात्. —*v. t.* आप्यै c., श्वि c., स्फाय् c. (स्फावयति). **-ly,** *adv.* व्यक्तं, स्पष्टं. **-ness,** *s.* पीनता, पुष्टि *f.*, स्फीति *f.*

Plunder, *v. t.* (धनादि) अप-,हृ 1 P, मुष् 9 P, लुंट् 10, वि-,लुंठ्-ट् 1 P, 10. —*s.* विलुंठनं, लोत्रं, लोप्त्रं, अपहारः, अपहृतं धनं. **-er,** *s.* अपहारकः, विलुंठकः, मोषकः. **-ing,** *s.* अपहारः, अपहरणं, मोषणं.

Plunge, *v. i.* मस्ज् 6 P, नि-अव-°, आप्लु 1 A, गाह् 1 A, वि-अव-°, प्रविश् 6 P.—*v. t.* Causal of roots above. —*s.* अवगाहः-हनं, नि-,मज्जनं, आप्लवः, प्रवेशः. **-ed,** *a.* मग्न, अवगाढ, आप्लुत, लीन, प्र-नि-विष्ट.

Plungeon, *s.* प्लवः, प्लाविन् *m.*

Plural, *a.* (Number) बहुवचनं. 2 अनेक, बहु. **-ity,** *s.* बहुत्वं, अनेकता; ex. by 'Many' q. v.

Plus, *s.* धनं; सहित, संकलित in comp.

Pluto, *s.* यमः, कालः, कृतांतः.

Plutocracy, *s.* धनवत्सत्तात्मकं राज्यं. **-Plutocrat,** *s.* धनवत्-सत्तावत् *m.* -शासितृ *m.*

Pluvial, Pluvious, *a.* वृष्टिमत्, प्रचुर-बहु-वृष्टि.

Ply, *v. t.* पत् c., धा 3 U, व्यस् 4 U, प्रयुज् 7 A, 10; पुनः पुनः प्रयुज् or व्यापृ c., सततं व्यापृ c.; 'p. thy work' कार्यव्यापृतो भव, कार्यं निर्वाहय; 'p. thy needle' सूच्या कार्यं प्रवर्तस्व. 2 (प्रयत्नेन) चल् c., संचर्-र् c. 3 आग्रहेण उप-स्था 1 U, अनुनिर्बंध् 9 P; *See* **Importune;** 'p. with entreaties' अतिप्रार्थनया उद्विज् c. —*v. i.* अविरतं व्यापृ 6 A or प्रवृत् 1 A or उद्यम् 1 A or चेष्ट् 1 A. —*s.* पुटः, भंगः; *See* **Fold.**

Pneumatic, *a.* वायुमय, वायुमय (यी *f.*), वायव (वी *f.*), वायु in comp. —*s.* (P. s) वायुविद्या-शास्त्रं.

Pneumonia, *s.* क्लोमपाकः.

Poach, *v. t.* ईषत् पच् 1 P. 2 (Game) कूटोपायेन ग्रह् 9 U or अपहृ 1 P or मुष् 10. 3 चुम्बनार्थं अनुसृ 1 P or अनुगम् 1 P; *See* **Pursue. -er,** *s.* मृगयाचौरः, जांगलचौरः. **-ing,** *s.* मृगया-जांगल-चौर्यं, पशिग्रहणं.

Pock, *s.* *See* **Pimple. -mark,** *s.* मसूरिकाक्षतं-चिन्हं.

Pocket, *s.* कोषः, आधारः. —*v. t.* कोषे नि-धा 3 U, (छलेन) आत्मसात्कृ 8 U. 2 (Insult) सह् 1 A; *See* **Bear. -ed,** *a.* कोषस्थ, कोषांतर्गत, अंतर्हित.

Pod, *s.* बीजकोषः-शुति *f.*, शिंबा, शिंबि-बी *f.*, शिंबिका.

Podagrical, *a.* वातकिन्, वातरोगिन्.

Previous, *a.* पूर्व, प्राग्भूत, भूत, गत, अतीत, पूर्ववृत्त-गत, प्राक् in comp. **-ly,** *adv.* पूर्वं, प्राक्, पुरस्तात्, पूर्व in comp.

Previse, *v. t.* अग्रेदृश् 1 P or निरूप् 10. **2** पूर्वं सूच् 10 or प्र-बुध् c. **-ion,** *s.* अग्रनिरूपणं-दृष्टि *f.*

Prey, *s.* आमिषं (fig. also); मांसं, भक्ष्य, अर्थं, खाद्यं, भोज्यं; 'fell a p. to enemies' द्विषामामिषतां ययौ (R. XII. 11). *-v. i.* भक्ष्यं आ-अप-हृ 1 P. **2** (Upon) भक्ष् 10; संतप् c., बाध् 1 A, क्रमशः नश् c.

Price, *s.* मूल्यं, अर्घः, पण्यं, अवक्रयः, वस्नं; 'high p.' महार्घः, बहुमूल्यं. *-v. t.* मूल्यं स्था c. (स्थापयति) or संक्लृप् c. **-ed,** *a.* कृतमूल्य; 'high-p.' महार्घ-र्हं, बहुमूल्य.

दुर्मूल्य; 'low-p.' अल्पमूल्य. **-less,** *a.* अनर्घ-र्घ्य, अमूल्य.

Prick, *v. t.* व्यध् 4 P, छिद्-,भिद् 7 P, तुद् 6 P, पीड् 10: व्यध् c. (व्यधयति), क्लिश् 9 P or c. 2 प्रेर् c., उत्तिज् c., प्रोत्सह् c., प्रणुद् 6 P or c. 3 (Ears) उन्नम् c. (उन्नमयति), उच्छ्रि 1 U, स्तब्धीकृ 8 U; 'with ears p. ed' स्तब्धकर्ण. **-s., -ing,** *s.* प्रतोदः, तोत्रं,तोदनं; सूचि *f.*, शल्यं, कंटकः. 2 वेधः-धनं, तोदनं. 3 यातना, तीव्रव्यथा, आतंकः, शूलः-लं. **-ed,** *a.* विद्ध, भिन्न, शल्य-सूचि-विद्ध-भिन्न;. 'p. at heart' भिन्न-विद्ध-मर्मन्. **-er,** *s.* वेधकः. 2 तोत्रं; *See* (*s.*).

Prickle, *s.* कंटकः, सूचि-ची *f.*, शल्यं, शूकं. **-y,** *a.* सकंटक, सशूक, बहुकंटक-शूक.

Pride, *s.* (Good) अभिमानः. 2 अहंकारः, गर्वः, उत्सेकः, अवलेपः, दर्पः, औद्धत्यं, मदः, मादः, आटोपः, अहंमानः, मानः, चित्तसमुन्नति *f.*, अवष्टंभः, चित्तोद्रेकः, स्मयः; (impudent) प्रागल्भ्यं, धृष्टता, प्रतिभा-भानं. 3 अलंकारः, अवतंसः, ललामं,अभिमानास्पदंभूमिः. **-v. t.** (Oneself upon) आत्मानं श्लाघ् 1 A or विकत्थ् 1 A, अभिमन् 4 A, or ex. by (*s.*); 'p.-ing himself on his learning' पंडितमानी, पंडितंमन्यः, विद्याभिमानी, जातज्ञानावलेपः; 'p. ing herself upon her beauty' रूपगर्विता. **-Proud,** *a.* (In a good sense) अभिमानिन्. 2 दृप्त, गर्वित, अवलिप्त, सगर्व, सदर्प, उत्सिक्त, उद्धत, उत्सेकिन्, अभिमानिन्, साटोप, साहंकार; अहंमानिन्, उत्-, मत्त, समुन्नद्ध; प्रगल्भ, धृष्ट, प्रतिभावत्, गर्वितचित्त, मदोद्धत; दर्पाध्मात, स्मयाकुल. 3 (Building &c.) उत्तुंग, प्रोच्छ्रित, विशाल, सप्रताप; 'p. of one's birth' कुलाभिमानिन्; रूपगर्वित, यौवनोन्मत्त, &c.; 'to be p.' दृप् 4 P गर्व 1 P, प्रगल्भ् 1 A. **-ly,** *adv.* सदर्पं, सगर्वं, सावलेपं, साटोपं, साहंकारं, उद्धतं.

Priest, *s.* (Family) पुरोहितः, पुरोधस् *m.* कुलाचार्यः. 2 (Sacrificial) ऋत्विज् *m.*, याजकः, अध्वर्युः,होतृ *m.* याज्ञिकः 3(Vedic) श्रोत्रियः, मंत्रविद् *m.*, ब्राह्मणः, द्विजः, विप्रः. 4 आचार्यः, गुरुः, उपाध्यायः, पुरोहितः, धर्माचार्यः, धर्माध्यक्षः. 5 (Of a deity) पूजकः, उपासकः, अर्चकः; 'p.-craft' उपाध्यायच्छलं-कैतवं; 'p.-ridden' पुरोहिताधीन. **-ess,** *s.* होत्री, याजिका. **-hood,** *s.* पौरोहित्यं, उपाध्यायपदं-वृत्ति *f.*, 2 पुरोहिताः,पुरोहित or याज्ञिक-गणः or वर्गः, पौरोहित्यं. **-ly,** *a.* याजकीय, पौरोहित्यसंबंधिन्, (*s.*) in comp.

Prig, *s.* दांभिकः, दंभिन् *m.*, रूपगर्वितः. **-gish,** *a.* दांभिक (की *f.*), आत्माभिमानिन्.

Prim, *a.* अतिविनीत, अतिसूक्ष्म.

Prime, *s.* आदिः, आरंभः, पूर्व-प्रथम-भागः. 2 उत्तमदशा, प्रौढता, उत्तमभागः-अंशः; 'in the p. of youth' प्रथमे वयसि ; the p. of youth' प्रथमं वयः, नव-अक्षत-यौवनं, यौवनश्रीः; 'being in the p. of youth' अक्षत-नव-यौवन. **-a.** प्रथम, आद्य. 2 मुख्य, प्रधान, प्रमुख, अग्र्य; 'p. minister' मुख्यमंत्री, प्रधानामात्यः, महामंत्री. 3 उत्कृष्ट, श्रेष्ठ, परम, उत्तम, विशिष्ट; *See* **Principal. -ly,** *adv.* प्रथमं, श्रेष्ठं. **-ness,** *s.* उत्तमता, विशिष्टता. **-Primary,** *a.* प्रथम, आद्य, आदिम, पूर्व, मौल (ली *f.*), मूल-आदि in comp.; 'p. cause' आदिकारणं-बीजं, निदानं, मूलहेतुः; 'p. sense' मूलार्थः. 2 प्रधान, मुख्य, प्रमुख, अग्र्य; *See* **Prime. -ily,** *adv.* प्रथमं-मतः, आदौ, पूर्वं, मुख्यशः, प्राधान्येन. **-iness,** *s.* प्रथमता, प्राधान्यं. **-Primate,** *s.* प्रधानोपाध्यायः. **-Primer,** *s.* प्रथम-आरंभ-पुस्तकं. **-Primeval,** *a.* आद्य, आदिम, प्राक्कालीन, पूर्वकालीन, प्राक्तन (नी *f.*), मौलिक-प्राथमिक- (की *f.*). **-Primitive,** *a.* प्राथमिक, प्रथम, आद्य; *See* **Primeval.** 2 मूल in comp., अव्युत्पन्न; *See* **Primary.** 3 प्राक्तनमार्गसेविन्. **-ly,** *adv.* आदौ, आरंभे, प्रथमं-मतः. 2 प्राक्तनव्यवहारानुसारेण.

Primogenial, *a.* प्रथम-आदि-जात, मूल in comp.

Primogenitor, *s.* प्रथम-कुल-पुरुषः. **-Primogeniture,** *s.* पूर्वजत्वं, ज्येष्ठत्वं, अग्रजत्वं, वयोज्येष्ठता.

Primordial, *a.* आद्य; बीजभूत, मौल (ली *f.*), *See* **Primeval.**

Prince, *s.* कुमारः, राजपुत्रः-सुतः, युवराजः. 2 नृपः, राजन् *m.*, पार्थिवः; *See* **King.** 3 भर्तृदारकः, कुमारः, (in dramas). **-dom,** *s.* राज्यं, राष्ट्रं, विषयः. 2 यौवराज्यं. **-like, -ly,** *a.* राजयोग्य-सदृश (शी *f.*),राजार्ह,नृपोचित,नृपोपम, राजकीय, प्रतापवत्, ऐश्वर्यवत्, प्रताप-वैभव-शालिन्. 2 राजवंश्य, राजकुलज; 'p. birth' राजवंशप्रसूतिः, 'p. merits' राजोचिता गुणाः **-Princess,** *s.* कुमारी, राजपुत्री, नृपात्मजा, नृपसुता, भर्तृदारिका.

Principal, *s.* अध्यक्षः, अधि-,पतिः, नायकः, मुख्यः; *See* **Leader.** 2 मूलं,मूलधनं, नीविवी *f.*, परिपणः. **-a.** मुख्य, परम, प्रधान-वर in comp., प्रमुख, अग्र, अग्र्य, प्रवर, श्रेष्ठ, विशिष्ट, उत्कृष्ट, उत्तम, अनुत्तम, वर्य, वरेण्य, परार्ध्य, अग्रि(ग्री)य, प्राग्रहर; नायक, अग्रणी, मुख्य, धुर्य, धुरीण, धूर्वह, धुरंधर; oft. ex. by व्याघ्र, पुंगव, ऋषभ, कुंजर, सिंह, शार्दूल, नाग, प्रकांड, in comp.; *See* **Excellent,** 'p. door' सिंहद्वारं; 'p. queen' अग्र-पट्ट-महिषी; 'p. minister' प्रधानामात्यः. **-ity,** *s.* राष्ट्रं, प्रदेशः, मंडलं,

राज्यं. -ly, *adv.* प्रधानतः, प्राधान्येन, मुख्यतः, विशेषतः, विशेषेण.

Principle, *s.* तत्त्वं, मूलतत्त्वं, बीजं, सारः. 2 कारणं, हेतुः, आदि-बीज-हेतुः, मूलं, अंशं, अवयवः, साधनं, मूलांग-मुख्यं. 3 नियमः, विधिः, सूत्रं, उत्सर्गः, स्थितिः *f.*, व्यवस्था. 4 गुणः, भावः, धर्मः, स्वभावः. 5 क्रमः, रीति *f.*, मार्गः, मर्यादा, धारा, पद्धति *f.* 6 आधारः, आश्रयः, उपष्टंभः, मूलं, (opp. of practice) आगमः, शास्त्रं, ' grounded in p. s ' आगमिन्, शास्त्रनिपुण, 'having good p.s ' सुनियमनिष्ठ, सुवृत्त; ' of bad p- s.'; शंकितवृत्त, अपचरित.

Print, *v. t.* मुद्रयति (D.). अंक् 10, मुद्राक्षरैः अंक्. -*s.* चिह्नं, अंकः, मुद्रा, ' foot-p. पदं, पदमुद्रा-चिह्नं. 2 मुद्रणयंत्रं. 3 मुद्रणं, 'in p.' मुद्र्यमाण. -ed, *a.* मुद्रित, मुद्रांकित, मुद्राक्षरांकित. -er, *s.* मुद्रकः; मुद्रणकृत् *m.* -ing, *s.* मुद्रणं, मुद्रांकनं, ' p.-house ' मुद्रणयंत्रालयः, मुद्रणशाला; ' p.-press ' मुद्रणयंत्रं.

Prior, *a.* प्रथम, परीयस्, पूर्वतर, पूर्व, अग्र्य, आदिम, आद्य, पूर्व-आदि-प्राक् in comp.; ' p. existence ' प्राग्भावः, पूर्व जन्म, ' p. and subsequent ' पूर्वापर, परापर, परावर. -*s.* मठाध्यक्षः, मठाधिपतिः, विहारपालः. -ity, *s.* पूर्वता, प्रथमता. (Of rank) अग्रपदं-मानः; श्रेष्ठपदं, प्राधान्यं. -y, *s.* मठः-विहारः, आश्रमः.

Prism, *s.* काचवायतं. -**Prismatic,** *a.* काचवायत.

Prison, *s.* कारा, बंदिशाला-गृहं, बंधनालयः, कारागृहं, कारा:-रक्षः, गुप्तिस्थानं, ' escaped from the p. ' बंधनं भित्त्वा पलायांचक्रे; ' keep in p. ' बंधने निरुध् 7 U. -er, *s.* बंदि-दी *f.*, कारागुप्तः, बद्धः, कारागारस्थः. 2 (Of war) युद्धगृहीतः.

Pristine, *a.* प्राक्तन (नी *f.*), पुराण, पूर्व, पूर्वकालिक (की *f.*), प्राचीन, प्राक्कालीन.

Private, *a.* विजन, विविक्त, निर्जन, एकांत, निभृत, निःशलाक. 2 स्व, आत्मीय, असाधारण (णी *f.*), असामान्य, विविक्त, स्व-आत्म in comp. 3 गुप्त, गूढ, रहस्य, प्र-,छन्न, अप्रकट, अव्यक्त, रहस्-मिथः-अंतः-in comp. 4 अनधिकारिन् अनधिकारिक (की *f.*); ' p. profit ' आत्महितं, स्वलाभः; ' p. road ' गूढ-प्रच्छन्न-मार्गः; ' p. door' अंतर्द्वारं, गूढद्वारं, पक्षद्वारं; ' p. apartments' अंतःपुरं, अवरोधगृहं, ' अंतर्गृहं; ' now is the time to be p. ' रहस्यमधुना (Bh. II 97); ' p. talk ' रहःसंकथा, मिथोजल्पः; ' p. parts ' गुह्यं, उपस्थः; ' p. room ' अंतःशाला-कोष्ठः, अपवरकं. -*s.* सैनिकः. -ly, 'in p. ' *adv.* रहः, रहसि, मिथः, रहस्ये, निभृतं, विविक्ते, एकांते, विजने, उपांशु, गूढं, प्रच्छन्नं, गुप्तं, अप्रकाशं, अप्रकटं. -ness, **Privacy,** *s.* रहस् *n.*, विविक्तं, विजनं, रहोभावः, विविक्त-एकांत-भावः, रहस्यं, गुप्तता, छन्नता, अप्रकाश्यं. 2 रहः-स्थानं-स्थलं, विविक्त-निर्जन-स्थानं, निर्जनदेशः.

Privation, *s.* अभावः, विरहः, राहित्यं, हानि *f.*, क्षयः, लोपः, नाशः. 2 कष्टं, कृच्छ्रं, आपद्-विपद् *f.* 3 आहारविरहः, आहाराभावः, सुख-साधनलोपः, अन्नपानहानिः. -**Privative,** *a.* हानि-क्षय-लोप-कार (री *f.*). 2 अभावात्मक, अभावरूप, अभाववाचिन्. -*s.* अभाव-शब्दः, नञ्पदं. -ly, *adv.* अभावरूपेण.

Privilege *s.* विशेषाधिकारः, असामान्याधिकारः, स्वाधिकारः, अधिकारः, स्वत्वं. -*v. t.* विशेषाधिकारं दा 3 U. -ed, *a.* अधिकारविशिष्ट, साधिकार, विशेषाधिकारयुक्त.

Privy, *a.* गूढ, प्रच्छन्न, विविक्त, रहः in comp.; *See* **Private.** 2 (To) संज्ञानिन्, सहाय, सहकारिन्, सहज्ञानिन्, सहवेदिन्; ' p. council ' गूढसभा; ' p. councillor ' गूढसभासद्. -*s.* शौचस्थानं-कूपः, मलमूत्रप्रक्षालनस्थानं. -ly, *adv.* रहसि, गूढं; *See* **Privately.** -**Privity,** *s.* सहकारिता, सहायता, संसर्गः, सहज्ञानं. 2 गुह्य or गुह्य-स्थानं or इंद्रियं, अपांगं.

Prize, *s.* पारितोषिकं, उपायनं, प्रतिफलं. 2 रत्नं, बहुमूल्यं वस्तु, महार्घद्रव्यं. 3 युद्धजितं धनं-द्रव्यं. 4 जय or सिद्धि-फलं or लाभः. 5 स्पर्धा-पण-जेयं, पणः; ' p.-fighter ' मल्लः; 'p.- fighting ' मल्लयुद्धं, स्पर्धायुद्धं. -*v. t.* बहु मन् 4 A, अपेक्षया पा c. (पालयति), संमन् c. 2 मूल्यं-अर्घं-निरूप् 10 or निर्णी 1 P. -ed, *a.* बहुमत, अभीप्सित, इष्ट.

Pro, *Prefix,* प्र, अग्रे; ' p. s and cons:' विधिनिषेधपक्षौ.

Probable. *a.* संभाव्य, सत्यसंकाश; gen. ex. by सं-भू 1 P, उप-पद् 4 A, युज् pass. or by (*adv.*); ' It is p. ' एतत् उपपद्यते, संभवति, युज्यते, स्यात्काम एवं. -**Probably,** *adv.* प्रायेण, प्रायः, प्रायशः, किल, नाम,: स्यात्, by pot. pass. part. of भू, एतेन मम मित्रेणैव भाव्यं ' he is p. my dear friend.' -**Probability,** *s.* संभवः, संभाव्यता, अनुमानं, better by (*adv.*).

probate, *s.* मृतलेखप्रमाण.

Probation, *s.* परीक्षा-कालः. -ary, *a.* परीक्ष्यमाण. -er, *s.* परीक्ष्यमाणः; अंतेवासिन् *m.*, नवशिष्यः, प्राथमकल्पिकः.

Probe, *s.* शलाका, एषणी. -*v. t.* शलाकया परीक्ष् 1 A. 2 निपुण-सूक्ष्मं-परीक्ष् or आलोच् 10. -ator, *s.* परीक्षकः. -ing, *s.* क्षतपरीक्षणं.

Probity, *s.* *See* **Honesty.**

Problem, *s.* प्रश्नः, विकल्प or विचार-प्रश्न or विषयः. 2 कृत्यं, उपपाद्यं. 3 (Question) उद्देशकः (in Math.); 'its solution' न्यासः (Lit.). **-atical,** *a.* संदिग्ध, अनिश्चित, वैकल्पिक (की *f.*).

Proboscis, *s.* प्रोथः, करः, शुंडा, हस्तः.

Proceed, *v. i.* प्रचल् 1 P, प्र-या 2 P, प्रसं-वृ 1 P, अग्रे गम्, प्र-स्था 1 A. 2 प्रवृत् 1 A, न विरम् 1 P; 'the play still p. s' क्रीडा अद्यापि प्रवर्तते एव. 3 पुनः वक्तुं प्रवृत्. 4 प्रवृत्, आरभ् 1 A, प्र-उप-क्रम् 1 A; (with) प्रसृ 2 U or c., प्रवृत् c., (प्रारब्धं) सं-पद् c., निष्पद् c., निर्वह् c.; 'p. with your tale' ततस्ततः, ततः, परं कथय; 'p with the matter at issue' प्रस्तूयतां विवादवस्तु (M. 2); 'you may p. with your dinner preparations in honor of the worthy Brāhmaṇas' प्रवर्त्यतां प्रयत्नो ब्राह्मणानुद्दिश्य पाकः (Mu. I). 5 प्र-उत्-सं-भू 1 P, प्रवृत्, उत्पद् 4 A. प्र-,जन् 4 A, उद्-इ 2 P, निःसृ, निर्गम्; oft. ex. by कारणं, मूलं, निमित्तं, हेतुः; 'from what cause does thy disorder p.' किंनिमित्तं ते संतापः (S. 3). 6 (Against) अभियुज् 7 A, 10, राजकुले निविद् c. **-ing,** *a.* उत्पन्न, जात, प्रभव, उद्भव, उत्थित, मूल, कारण, निमित्त, हेतु in comp. *See* (*v.*). **-s.,** **-Procedure,** *s.* कार्यं, व्यवहारः, व्यापारः, चरितं, चेष्टितं, आचारः, वृत्तं, कृति *f.*, विधानं, अनुष्ठानं. 2 रीति *f.*, क्रमः, संप्रदायः, मार्गः, पर्यायः; 'legal p.' व्यवहारविधिः, व्यवहारक्रमः. **-Proceeds,** *s.* उत्पन्नं, उद्भवः, लाभः, फलं. **-Process,** *s.* प्रसरः, प्रगमः, प्रवृत्तिः, चारः. 2 क्रमः, रीतिः, मार्गः, पर्यायः, विधिः, गतिः, परिपाटि-टी *f.*, सरणि-णी *f.*, पद्धति *f.* 3 व्यवहारः, कार्यं; 'in p. of time' कालक्रमेण, दिनेषु गच्छत्सु, गच्छता कालेन. **-Procession,** *s.* यात्रा, जन or लोक-यात्रा or श्रेणी. 2 प्रगमनं, प्रस्थानं, प्रचलनं, प्रवृत्तिः. **-al,** *a.* यात्राकर्म.

Proclaim, *v. t.* घुष् 10, उद्-वि°-, प्र-ख्या c. (ख्यापयति), प्रकाश् c., प्रकटयति (D.), प्रकटीकृ, कृत् 10, उच्चर् c. 2 **Outlaw,** q. v. **-er,** *s.* घोषकः, प्रख्यापकः. **-Proclamation,** *s.* घोषः-षणं-णा, ख्यापनं, प्रकाशनं, उत्कीर्तनं; 'written p.' घोषणपत्रं, राजाज्ञापत्रं.

Proclivity, *s.* प्रावण्यं, प्रवृत्ति *f.*, शीलता in comp. **-Proclivious,** *a.* प्रवण, शील in comp.

Procrastinate, *v.* विलंब् 1 A, व्याक्षिप् 6 P, कालं क्षिप् or ह 1 P, चिर(रा)यति (D.), मंद्रायते (D.). **-ion,** *s.* विलंबः, दीर्घसूत्रता, व्याक्षेपः, कालयापनं-हरणं-क्षेपः. **-or,** *s.* दीर्घ-सूत्रः-त्रिन् *m.* चिरक्रियः.

Procreate, *v. t.* प्र-सू 2, 4 A, उत्पद् c., जन् c. (जनयति). **-ion,** *s.* प्रसवः, प्रसूति *f.*, जननं, उत्पत्ति *f.*, प्रजोत्पादनं. **-ive,** *a.* उत्पादक, साधक, जनयितृ. **-or,** *s.* जनकः, उत्पादयितृ *m.*

Proctor, *s.* प्रतिहस्तः, प्रतिनिधिः

Procumbent, *a.* शयान, पतित.

Procure, *v. t.* आ-नी 1 P, सं-पद् c., पद् c. (पादयति). 2 लभ् 1 A, आप् 5 P, अधि-गम् 1 P, विद् 6 U, आ-समा-सद् c.; *See* **Get.** **-er,** *s.* प्रापकः, संपादकः. 3 विटः, नर्मसचिवः, संचारकः, कुंभाशिन् *m.* **-ess,** *s.* कुट्ट(ट्टि)नी, शंभली, दूती-तिका, संचारिका, कु-,रततालो.

Prodigal, *a.* मुक्तहस्त, अति-अमित-बहु-व्ययिन्, उत्सर्गिन्, अतिव्ययशील-पर, अतित्यागिन्. **-s.** मुक्तहस्तः, व्ययपरः. **-ity,** *s.* अतिव्ययः, अपव्ययः, बहु-अमित-व्ययः, अतित्यागः, अत्युत्सर्गः, अर्थोत्सर्गः, मुक्तहस्तत्वं. **-ly,** *adv.* महाव्ययेन, मुक्तहस्तेन, अत्युत्सर्गेण.

Prodigy, *s.* अद्भुतं, अद्भुत or अपूर्व-विषयः or वस्तु, उत्पातः, महाश्चर्यं, असाधारणं वस्तु. 2 (Of persons) अद्भुतशक्ति, अद्भुतबुद्धिसंपन्न. **-ious,** *a.* महाप्रमाण, अतिमहत्-बृहत्, विकट-राक्षस-शरीर, अद्भुताकार; *See* **Giant.** 2 अद्भुत, अपूर्व, विलक्षण, विचित्र, आश्चर्य **-iously,** *adv.* अद्भुतं, साश्चर्यं. **-iousness,** *s.* अद्भुतता, अतिमहत्त्वं.

Produce, *v. t.* निर्मा 3 A, 2 P, सृज् 6 P, उत्पद् c., जन् c. (जनयति), उत्-सं-भू c., साध् 5 P or c., कृ 8 U, वि-धा 3 U, कॢप् c., घट् c., (घटयति), वि-,रच् 10. 2 प्र-,सू 2, 4 A, उत्पद् c., सं-प्र-जन् c. 3 प्र-,दृश् c., आ-उप-नी 1 P, प्रसृ c., पुरस्कृ, पुरोनि-धा, अग्रे स्था c. (स्थापयति) or निविश् c., आविष्कृ, प्रकटीकृ, निष्कृष् 1 P. 4 प्र-,हृ 3 U. 5 वृध् c. **-s.** फलं, उत्पन्नं, लाभः, उत्पत्ति *f.*, प्रसवः. **-ed,** *a.* उत्पन्न, उत्पादित, निर्मित, घटित, सृष्ट, जनित, जात, उद्भूत; 'to be p.' जन् 4 A, उत्पद् 4 A, उत्था 1 P, सं-उद्-भू 1 P; *See* **Arise;** gen. ex. by ज, जात, जन्य, प्रभव, उद्भव, हेतु, प्रसूत, प्रयुक्त in comp.; 'p. from water' अंभोज, जलोद्भव, &c.; 'p. from flowers' कुसुमभव &c. **-er,-ing,** *s., a.* उत्पादक, प्रसविन्, प्रद, द, दायिन्, आवह, कारिन्, कर (री *f.*), in comp. **-Product,** *s.* फलं, उत्पन्नं, लाभः. 2 परिणामः, फलं, उत्तरफलं. 3 गुणनफलं, घातः, घातः, फलं, गुणाकारः. **-ion,** *s.* उत्पादनं, निर्माणं, सृष्टि *f.*, रचनं, विधानं, निष्पादनं. 2 जननं, उत्पत्तिः, प्रसवः, उद्भवः, संभवः, जन्मन् *n.* 3 निर्मितवस्तु, शिल्पनिर्माणं. **-ive,** *a.* प्रसवधर्म-शालिन्, सफल, अवंध्य. 2 उत्पादक, दायिन्,

द, प्रद, कारिन्, आवह in comp.; 'p. of gain' लाभप्रद, लाभावह. 3 लाभ or फल-प्रद [or कर.

Proem, *s.* *See* **Preface.**

Profane, *v. t.* अपवित्रीकृ 8 U, दुष् c. (दूषयति). 2 लंघ् 1 A, 10, अतिक्रम् 1 U, 4 P, अतिचर् 1 P. 3 **Contemn,** q. v. —*a.* अपवित्र, अपुण्य, अमेध्य, अशुद्ध, not **Holy** q. v. 2 अधार्मिक (की *f.*), धर्म-ईश्वर-द्वेषिन्, धर्म-ईश्वर-निंदक. 3 असंस्कृत, अप्रतिष्ठित, संस्कारहीन. 4 लौकिक-सांसारिक-व्यावहारिक (की *f.*). **-ation,** *s.* दूषणं, अपवित्रीकरणं, अतिक्रमः-मणं. **-ly,** *adv.* धर्मनिंदापूर्वं, अधार्मिकवत्. **-ness,** *s.* धर्म or ईश्वर-निंदा or द्वेषः, धर्म or ईश्वर-अवज्ञा or अतिक्रमः.

Profess, *v. t.* प्रति-ज्ञा 9 A, प्रकाश् c., प्रतिज्ञापूर्वं कथ् 10 or वद् 1 P, स्वी-अंगी-कृ 8 U, उ(ऊ)रीकृ, अभ्युपगम् 1 P. 2 छद्म-छलं-कृ, दृश् c., धृ c.; *See* **Pretend;** oft. by नाम; तव कन्या नाम भवेयं (D. K. II. 5) 'I shall p. myself to be your daughter'. 3 उपास् 1 A, सेव् 1 A. **-ed,** *a.* स्वीकृत, अंगीकृत, प्रकाशित, प्रकटित, स्पष्टोदित, प्रकाश. **-edly,** *adv.* प्रतिज्ञापूर्वं, प्रकाशमेव, सप्रतिज्ञं. **-ion,** *s.* प्रतिज्ञा, उक्ति *f.*, वचनं, अंगी-स्वी-कारः, प्रकाशवादः-वचनं, ख्यापनं. 2 **Pretension,** q. v.; 'p. s of love' कृत्रिमप्रीतिः, अलीकः रागाविर्भावः. 3 वृत्ति *f.*, आ-उप-जीविका, आजीवः, व्यवसायः, व्यापारः; 'military p.' शस्त्राजीवः, शस्त्रवृत्तिः. **-ional,** *a.* वृत्तिमत्, व्यवसायिन्, (*s.*) in comp. **-or,** *s.* अध्यापकः, गुरुः. 2 कथयकः, प्रकाशकः, प्रतिज्ञातृ *m.*, स्वीकर्तृ *m.* **-orship,** *s.* अध्यापकपदं-पदवी.

Proffer, *v.* *See* **Offer.**

Proficient, *a.* प्रवीण, कुशल, निपुण, अभिज्ञ, विचक्षण, पारंगत, अभ्यंतर, निष्णात, व्युत्पन्न, लब्धप्रतिष्ठ, पटु. **-Proficience,-cy,** *s.* प्रावीण्यं, वैचक्षण्यं, प्रतिष्ठा, कौशलं, पाटवं; 'has attained p. in all sciences' सर्वशास्त्रेषु परां प्रतिष्ठां गतः, परं कौशलमवाप, सकलशास्त्रपारंगतः.

Profile, *s.* पार्श्वरूपं, अर्धमुखदर्शनं.

Profit, *s.* लाभः, हितं, उपकारः, अर्थः, कल्याणं. 2 फलं, लाभः, आयः, उदयः, वृद्धि *f.*, फलोदयं, लब्धं; 'p. and loss' लाभालाभौ; 'capital with p. thereon' मूलफलोदयं. —*v. t.* हितमावह् 1 P, उपकृ 8 U, हिताय भू 1 P. —*v. i.* (Oneself) फलं-लाभं-आप् 5 P or विद् 6 U. 2 वृध् 1 A, उन्नतिं-उत्कर्षं-या 2 P, प्र-उप-चि pass.; *See* **Improve.** **-able,** *a.* लाभ-अर्थ-कर (री *f.*), लाभमद्, लाभ-फल-द, फल-लाभ-आवह. 2 हित, हितकर, हितावह, उपयुक्त, उपकारिन्, सोपकार. **-ableness,** *s.* साफल्यं, फलवत्ता, उपयुक्तता. **-ably,** *adv.* साफल्यं, सफलं, सहितं, उपयुक्तं. **-less,** *a.* निष्फल, अफल, अहित, व्यर्थ, निरर्थक.

Profligate, *a.* कलंकितवृत्त, दुश्चरित, दुराचार, पाप-नित्य-अभिनिविष्ट, व्यसनिन्, दुर्वृत्त, भ्रष्ट-नष्ट-चरित्र, भोग-विषय-आसक्त. —*s.* व्यसनिन् *m.* लंपटः, विषयिन् *m.* भोगासक्तः. **-ly,** *adv.* सव्यसनं, दुर्वृत्ततया. **Profligacy,** *s.* व्यसनिता, भ्रष्टचरितं, दुराचारः, भ्रष्टता, भोगासक्ति *f.*, दुर्वृत्तता.

Profound, *a.* प्र-,गाढ, अतिग(गं)भीर, घन, अगाध. 2 परम, गाढ, घन, अत्यंत, सु-अति pr.; 'p. respect' परमादरः, आदरातिशयः. 3 गहन, नि-,गूढ, गूढार्थ, दुर्बोध, दुर्ज्ञेय, परमगहन. 4 (Of persons) निष्णात, पारंगत, परम, व्युत्पन्न, अभिनिविष्ट, सूक्ष्मज्ञ. **-ly,** *adv.* गंभीरं, गाढं, अत्यंतं, भृशं, सु-अति pr. **-ness,-Profundity,** *s.* गांभीर्यं, अगाधता. 2 घनता, गाढता. 3 गहनता, गूढता. 4 अभिनिवेशः.

Profuse, *a.* प्रचुर, प्रभूत, अपरिमित, विपुल, बहु, अत्यधिक, अतिरिक्त, समृद्ध, उद्रिक्त, अतिशय-सु-अति in comp. 2 मुक्तहस्त, अतिव्ययिन्, व्ययपर, *See* **Prodigal;** 'he is a p. writer' बाहुल्यव्ययप्रियः, प्रचुरवाक्यानि लेखे प्रयोजयति. **-ly,** *adv.* प्रचुरं, भृशं, भूरि, बाहुल्येन, अत्यंतं, सु-अति pr.; अतिशयेन, अपरिमितं. **-ness,-Profusion,** *s.* अतिव्ययः, अमितव्ययः, अत्युत्सर्गः. 2 समृद्धि *f.*, प्राचुर्यं, उद्रेकः, अतिरेकः, उपचयः, बाहुल्यं.

Pr… भोजनं, अन्नं, भैक्ष्यं.

Prog…r, *s.* पितृ *m.* प्रजापतिः, पूर्वजः, पूर्व… पुरुषः, अग्रजः, जनयितृ *m.* *See* **Ancestor.**

Progeny, *s.* संतानः, अपत्यं, संतति *f.*, प्रजा.

Prognostic, *s.* निमित्तं, अजन्यं, शकुनः-नं, लक्षणं; *See* **Omen.** —*a.* प्र-उद्-बोधक, अग्रसूचक. **-ate,** *v. t.* पूर्व-अग्रे-सूच् 10 or दृश् c.; *See* **Forebode.** **-ation,** *s.* पूर्वसूचनं-ना. **-ator,** *s.* पूर्वलक्षणज्ञः, अग्रसूचकः.

Programme, *s.* सूचिपत्रं; कार्यक्रमः-परिपाटी.

Progress, *s.* प्र-,वृद्धि *f.*, उत्कर्षः, क्रमशः वृद्धिः, उत्कर्षक्रमः. 2 प्राप्ति *f.*, आगमः; 'p. in learning' विद्यागमः, विद्याभिनिवेशः. 3 प्र-गमनं, प्रयाणं, यानं, यात्रा, प्रस्थानं, प्रसरः, क्रमः-मणं, अयनं; *See* **March;** 'difficult p.' संक्रमः, दुर्गसंचरः. —*v. i.* उत्कृष् pass., वृद्धिं-उन्नतिं-या 2 P, प्र-वृध् 1 A, प्र-उप-चि pass.; *See* **Improve.** 2 प्रगम्-चल्-सृ- 1 P, प्रया 2 P, प्रस्था 1 A; *See* **Advance.** **-ion,** *s.* श्रेढी, श्रेढीव्यवहारः; 'first term' मुखं, वदनं, आदिः; 'common difference' चयः; 'geometric mean' चयो गुणः; 'sum' श्रेढीफलं; 'number of terms' गच्छः. **-ive,** *a.* आनुक्रमिक (की *f.*),

क्रमिक, अधिकाधिक, उत्तरोत्तर, क्रमशः वर्धमान. **-ively**, *adv.* क्रमशः, अनुक्रमेण, उत्तरोत्तरं, अधिकाधिकं.

Prohibit, *v. t.* नि-प्रति-षिध् 1 P, प्रत्यादिश् 6 P, निवृ c., प्रत्या-चक्ष् 2 P, नि-अव-रुध् 7 U. **-ion**, *s.* नि-प्र ति-षेधः, प्रत्यादेशः, निरोधः, निवारणं, बाधा. **-or**, *s.* निवारकः, निषेधकः. **-ive**, **-ory**, *a.* निषेधक, निवारक, नि-प्रति-षेधिन्, निषेधार्थक, निषेधवाचिन्.

Project, *s.* उपायः, प्र-,युक्ति *f.*, कल्पना, प्रयोगः, संकल्पः, प्रबंधः. 2 अभिप्रायः, आशयः, उद्देशः. **-v. i.** प्रलंब् 1 A, बहिर्लंब्, उपरि लंब्, बहिः स्था 1 P or भू 1 P or वृत् 1 A. **-v. t.** प्र-,क्षिप् 6 P, अस् 4 U, निपत् c., प्रमुच् 6 P; *See* **Throw.** 2 (मनसा) कल्प् c., निरूप् 10, चिंत् 10, युज् 10, आलोच् 10, अनुसं-धा 3 U. **-ile**, *a.* प्रक्षेपणीय, दूरवेधिन्. **-s.** अस्त्रं; *See* **Missile.** **-ing**, *a.* प्र-,लंब, उन्नत, उदग्र, उत्तुंग, बहिर्वर्तिन्; oft. by उत्सेध, उत्सेधिन्; 'with a p. nose' प्रलंबनास, घोणोन्नत, उन्नस; 'having p. teeth' उदग्रदत्, करालदंष्ट्र; 'having p. breasts' स्तनाभोगवती, उन्नतस्तनी; 'shattered by falling over (her) p. breasts' पयोधरोत्सेधनिपातचूर्णिताः (K. v. 24). **-ion**, *s.* प्रलंबता, उदग्रता. 2 आभोगः, उत्सेधः, निर्यूहः, वृंतकः. 3 क्षेपणं. **-or**, *s.* चिंतकः, योजकः.

Prolapse, Prolapsus, *s.* भ्रंशः. **-v. i.** भ्रंश् 1 A, 4 P.

Prolated, *a.* प्लुत (vowel), दीर्घोच्चारित.

Prolegomenon, *s.* प्रस्तावना, उपोद्घातः.

Prolepsis, *s.* पूर्वग्रहणं, पूर्वादानं.

Prolific, *a.* अवंध्य, बहुप्रज-प्रसव-अपत्य, प्रसवशील, सुतिन्, बहुसंतान. 2 बहुफलप्रद, बहुफल; *See* **Productive.** **-ally**, *adv.* प्राचुर्येण, विपुलं.

Prolix, *a.* सु-अति-विस्तर, प्रपंचित, सुदीर्घ, दीर्घसूत्रिन्, अत्यायत. **-ity**, *s.* अतिविस्तरः, प्रपंचः, वाग्विस्तरः-प्रपंचः, वाग्बाहुल्यः; दीर्घसूत्रता, अतिविस्तारः. **-ly**, *adv.* विस्तरशः, अतिविस्तरेण, सप्रपंचं.

Prologue, *s.* प्रस्तावना, आमुखं, प्रास्ताविकी विज्ञप्तिः; 'benedictory p.' नांदी.

Prolong, *v. t.* दीर्घीकृ 8 U, प्र-वि-तन् 8 U, वि-प्र-सृ c., विस्तॄ c., आयम् 1 A or c. 2 व्याक्षिप् 6 P or विलंब् c.; 'a p. ed note' तानः. **-ation**, *s.* विस्तारः, विततिः *f.*, आयतिः, दीर्घीकरणं.

Prolusion, *s.* *See* **Prelude.**

Promenade, *v. i.* विहृ 1 P, विचर् 1 P, विहारार्थं परिक्रम् 1, 4 P. **-s.** विहारः, परिक्रमणं. 2 विहारस्थानं.

Prominent, *a.* प्रधान, प्रमुख, श्रेष्ठ, मुख्य, विशिष्ट, परम; *See* **Principal.** 2 सुस्पष्ट, सुप्रकाश, सुव्यक्त, सुदृश्य. 2 उन्नत, उदग्र, उत्तुंग, प्रलंब, सापीड, उद् प्र.; *See* **Projecting.** **-ly**, *adv.* प्राधान्येन, विशेषतः, सुप्रकाशं, सुस्पष्टं, उच्चैः. **-Prominence**, *s.* प्राधान्यं, विशिष्टता, श्रेष्ठता, उत्कर्षः, प्रत्यक्षत्वं. 2 उन्नतिः *f.*, उत्सेधः, उत्तुंगता, आभोगः.

Promiscuous, *a.* प्र-सं-कीर्ण, संकुल, अविविक्त, निर्विशेष, अपरिच्छेद्य, अभेद्य, संमिश्रित 'p. union' संकरः, सांकर्यं. **-ly**, *adv.* निर्विशेषं-षेण, संकीर्णं, अभेदेन, अक्रमेण, अपरिच्छेदेन. **-ness**, *s.* संकीर्णता, संकुलता, अभेदः, संकरः.

Promise, *v. t.* सं-प्रति-आ-श्रु 5 P, प्रति-ज्ञा 9 A, (with dat. of persons); स्वी-अंगी-कृ 8 U, अभ्युपगम् 1 P, अभ्युप-इ 2 P, संविद् 2 A, संगॄ 6 A, उररीकृ, उरीकृ, परि-,पण् 1 A; 'the plan p. s to succeed' उपायः सफलो भवेदित्यनुमीयते or अहं आशंसे; 'a p. ing boy' वर्धिष्णुर्बालः, आशानिबंधनं. **-s.** प्रतिज्ञा, समयः, सं-प्रति-श्रवः, वचनं, संविद् *f.*, नियमः, संगरः, संकेतः, अभिसंधा, अभ्युपगमः, स्वीकारः, उरीकारः, अंगीकारः, परिपणनं. 2 आशा, आशंसा; 'hollow p.' मुधावचनं, शब्दपांडित्यं, 'breaking a p.' प्रतिज्ञा-वचन-भंगः, संविद्-व्यतिक्रमः; विसंवादः; keep or fulfil a p.' प्रतिज्ञां पा c. (पालयति) or पुष् c., *See* **Keep, Fulfil**: 'p. breaker प्रतिज्ञालंघिन्-व्यतिक्रामिन्, विसंवादिन्; give a p. orally' वाचा प्रतिज्ञा, वाग्दानं कृ. **-ory**, *a.* प्रतिज्ञाविशिष्ट.

Promontory, *a.* उदग्रभूमि *f.*, भूशिरस्नासिका.

Promote, *v. t.* वि-,वृध् c., उपकृ 8 U, पुरस्कृ, प्रवृत् c., साध् c., उपचि 5 U, प्रयुज् 10; (a person) सं-,उन्नम् c. (नमयति), उन्नतिं नी 1 P or प्राप् c., पदं वृध् c. पदोत्कर्ष-प्रतिपत्ति-प्राप् c., अधिकपदे नियुज्. 3 **Prompt**, q. v. **-er**, *s.* प्रवर्तकः, उपकर्तृ *m.* *See* **Patron.** **-ion**, *s.* उपकारः, पुरस्कारः, प्रवर्तनं, साहाय्यं, वर्धनं, वृद्धि *f.*, उपचयः, उन्नतिः, उत्कर्षः, पदवृद्धिः, पदोन्नतिः, प्रतिपत्ति *f.*, श्रेष्ठपदप्राप्ति *f.* **-ive**, *a.* प्रवर्तक, साधक, उपकारिन्.

Prompt, *a.* सत्वर, अविलंब; क्षिप्र, अविलंबित, अदीर्घसूत्र, (of persons) उद्यत, उद्युक्त, अविलंबिन्, आशुकारिन्, प्रत्युत्पन्नमति, सप्रतिभ, पटु, उद्यमिन्, उद्योगिन्. **-v. t.** प्र-उत्सह् c., प्रणुद् 6 P or c., प्रेर् 10, प्रवृत् c., प्र-उद्-युज् 10 उत्तिज् c., प्र-चुद् c., आकृ c., उद्दीप् c., उत्था c. (उत्थापयति), प्र-उद्-बुध् c.; 'p. ed by hunger' क्षुत्प्रेरित. 2 प्र-अनु-बुध् c., सूच् 10. **-er**, *s.* प्रोत्साहकः, प्रवर्तयितृ m., प्रयोजकः, &c. 2 अनु-प्र-बोधकः, सूचकः; 'who seldom wanted a p.' यः सदा प्रत्युत्पन्नमतिः, प्रयो-

प्रणिधेयः. -ing, s. प्रेरणं, प्रोत्साहनं, उत्तेजनं, &c. 2 सूचना, प्रबोधनं. -ness, -itude, s. औत्सुक्यं, अविलंबः, उत्साहः, क्षिप्रता. 2 प्रतिभा, प्रत्युत्पन्नमति f., पटुत्वं 3 उद्यमः, उद्योगः. -ly, adv. सत्वरं, अविलंबेन, क्षिप्रं, सद्यः, आशु, अचिरात्, समनंतरं.

Promulgate, v. t. प्रकाश् c., वि-,घुष् 10, घुष् 10, प्र-ख्या c. (ख्यापयति), See **Proclaim.** -ion, s. प्रकाशनं, घोषणं, कीर्तनं. -or, s. प्रकाशकः, घोषकः.

Prone, a. प्रवण, शील, आलु in comp., उद्यत, उन्मुख, See **Inclined, Apt;** 'p. to fall' पतयालु, पातुक, पतनशील. 2 (Bent) नत, नम्र, अधोवदन, अधोमुख-अवाङ्मुख-(खी f.). -ness, s. प्रावण्यं, प्रवृत्ति f., उन्मुखता, शीलता, आलुता in comp. 2 अधोमुखता, नम्रता.

Prong, s. शूलः-लं, कंटकः, अग्रं, शिखा.

Pronoun, s. सर्वनामन् n.

Pronounce, v. t. उच्चर् c., उदीर् c., उदा-व्या-हृ 1 P, गद् 1 P, वद् 1 P प्र-,वच् 2 P, प्र-ख्या 2 P, कृत् 10; 'p. judgment' निर्णयं कथ् 10; उत्तरं दा 3 U, &c. 2 निश्चयेन वद्, दृढं प्रति-ज्ञा 9 A; 'imperfectly p. ed' ग्रस्त, असंपूर्णोच्चरित, लुप्तवर्ण-पद. -Pronunciation, s. उच्चारणं, उदाहरणं, उदीरणं; 'science of p.' शिक्षा; 'easy of p.' सुखोच्चार्य.

Proof, s. See under **Prove.**

Prop, s. आश्रयः, शरणं, आधारः, अवष्टंभः, आ-अव-लंबः-बनं, उपघ्नः. -v. t. धृ 1 P, 10, आ-अव-लंब् 1 A, अवष्टंभ् 9 P; 'a tree that p. s another creeper' उपघ्नतरु.

Propaganda, s. धर्मप्रसारकसंस्था.

Propagate, v. t. विस्तृ c., प्रसृ c., वि-प्र-तन् 8 U; वि-प्र-सृ c.; (opinions) प्रचर्-ल् c., प्रवृत् c. or संचर् c., प्रचलीकृ, प्रथ् c. 2 परंपरया उत्पद् c. or प्र-सू 2 A, प्रसवपरंपरया जातिं वृध् c. शाश्वकालं प्रसू or जन् c. or उत्पद् c. -ion, s. प्र-,वर्धनं, प्रसारः, विस्तारः, विततिf., प्र-,वृद्धि f., प्रचारः-रणं. 2 परंपरोत्पत्ति f., प्रसूतिपारंपर्य-क्रमः; प्रजा-संतान-वृद्धि f. -or, s. प्रचारकः, प्रवर्तकः.

Propel, v. t. प्रेर् c., प्र-,नुद् 6 P, or c., संचल् c., प्रेर् 10, सं-,चर् c., क्षिप् 1 P; See **Prompt.**

Propense, a. प्रवण, उन्मुख, आसक्त, उद्यत. -ity, s. प्रवणता, प्रवृत्ति f., उन्मुखता, प्रावण्यं, स्वभावः, शीलता-आलुता in comp.; 'p. to fall' पतयालुता; 'good p.' सुशीलं, साधुप्रवृत्तिः; 'evil p.' व्यसनं, दुर्वृत्तः, दुःशीलं.

Proper, a. स्वीय, निज, आत्मीय, स्व-आत्म in comp. 2 युक्त, योग्य, उचित, उपयुक्त, अनुरूप, न्याय्य, संगत, सदृश (शी f.), यथार्ह, यथोचित, धर्म्य-म्य, युक्त, सामयिक (की f.); oft. ex. by pot. pass. part.; 'to be p.' युज् pass., उपपद् 4 A; 'it is p.' स्थाने, स्थाने प्रोक्षिता अभ्युदयः (V. 1.), स्थाने भवान् आर्कीर्तनर्त्ये कार्येषु (R. v. 16). -ly, adv. युक्तं, उचितं, यथार्हं, सम्यक्, स्थाने, न्यायतः, धर्मतः, यथायोग्यं, धर्मेण. 2 यथार्थतः, परमार्थतः, वस्तुतः, वस्तुतः; 'p. speaking' वस्तुतः, यथार्थरूपेण. -ty, s. धर्मः, गुणः, लक्षणं, स्वभावः, विशेषः, रूपं, स्वरूपं, धर्मः, सहज-प्रकृति-गुणः. 2 स्वत्वं, स्वाम्यं, अधिकारः, प्रभुत्वं. 3 संपत्ति f., द्रव्यं, अर्थः, धनं, वित्तं, वसु n., विभवः; द्रव्य-अर्थ-जातं, रिक्थं; 'woman's p.' स्त्रीधनं, 'landed p.' भूमिधनं, भूमिः, स्थावरं धनं; 'public p.' गण-सामान्य-द्रव्यं; 'p. in cattle' गोधनं. -Propriety, s. युक्तता, औचित्यं, उपपत्ति f., न्यायः, सामंजस्यं, योग्यता, यथार्थता, पात्रता, संगति f., 'p. of conduct' विनयः, मर्यादा, अनतिक्रमः, सुचरितं.

Prophesy, v. t. भावि कथ् 10 or सूच् 10 or प्रकश् c., अनागतं नि-आ-विद् c.; See **Predict.** -Prophecy, s. भाविकथनं-सूचनं, भविष्यद्वादः, आदेशः, भविष्यार्थः, सिद्धादेशः. -Prophet, s. सिद्धः, भविष्यद्वादिन् m., अनागतकथकः, भाविकथकः, अनागतविद्-दर्शिन्; 'saying of a p.' सिद्धादेशः. -ess, s. अनागतदर्शिनी, भविष्यद्वादिनी. -ic,-ical, a. (s.) in comp.

Prophylactic, a. रोगहारिन्-हृत्.

Propinquity, s. सन्निधिः, संनिकर्षः, सामीप्यं; See **Nearness.**

Propitiate, v. t. प्रसद् c., आराध् c., अनुरंज् c., सांत्व् 10, अनुनी 1 P, प्र-,शम् c. (शमयति), सं-परि-तुष् c. -ion, s. प्रसादनं, आराधनं, अनुरंजनं, सांत्वनं, अनुनयः; प्र-उप-शमः-मनं. -or, s. प्रसादकः, आराधयितृ m., अनुरंजकः &c. -ory, a. शमक, सांत्वक, शांतिकर (री f.), शांतिमत्; 'p. rite' शांतिक्रिया. -propitious, a. सु-प्रसन्न, सदय, अनुकूल, हितकाम - इच्छु, अभिमुख (खी f.), प्रणयीकृत, अनुग्राहिन्, वरद. 2 शुभ, मंगल, कल्याण (णी f.), शर्मद, शुभंकर. -ly, adv. प्रसन्नं, अनुकूलं, सदयं, सानुग्रहं. -ness, s. प्रसादः, आनुकूल्यं, आभिमुख्यं; शुभता.

Proportion, s. प्रमाणं, परिमाणं; आनुगुण्यं, आनुकूल्यं, परस्पर-अन्योन्य-संबंधः-अन्वयः-अनुबंधः-सादृश्यं-समता; अन्वयः, संबंधः; संघातं, संयोगः, संमिति f. (of limbs &c.) 2 अंशः, विभागः; See **Part.** 3 अनुपातः, संबंधसाम्यं; 'in p. to' ex. by अनुगुण, अनुसार, अनुरूप, प्रमाणतः, अनुसारेण, यथा in comp.; 'in p. to one's strength' यथाशक्ति, शक्त्यनुसारेण, शक्तितः; 'spend

in p. to your gains' आयप्रमाणेन व्ययं कुरु; 'p. of limbs' अंगसंयोगः, अवयवसंगतिः. -v. t., -ate, v. t. अनुरूपी-सदृशी-कृ 8 U, समीकृ, संमा 3 A, 2 P. -al, a. समप्रमाण, परस्परानुगुण. -ate,-able,-ed, a. अनुरूप, अनुगुण, सदृश, संमित, सम, तुल्य, अनुसारिन्; 'with jars p. to their size (strength)' स्वप्रमाणानुरूपैर्घटैः (S. 1), 'her body beautiful, being p.' चतुरश्रशोभि तस्या वपुः (K. I. 32). -ately, -ably, adv. अनुरूपं-पेण, अनुगुणं, अनुसारेण, सदृशं, यथाप्रमाणं, यथाभागशः.

Propose, v. t. प्र-स्तु 2 U, उपन्यस् 4 U, उपक्षिप् 6 P, प्रति-ज्ञा 9 A, सूच् 10, कर्तव्यं निर्दिश् 6 P or अभि-धा 3 U. 2 उद्दिश्, आकांक्ष् 6 P; *See* **Intend.** -al, s. प्रस्तावः, उपन्यासः, उपक्षेपः, अभिधानं, प्रतिज्ञा, वचनं, कर्तव्यनिर्देशः. -ition, s. **Proposal,** q. v. 2 प्रतिज्ञा, सिद्धांतः, प्रमेयं.

Propound, v. t. प्रति-पद् c., उपन्यस् 4 U, उपक्षिप् 6 P, निर्दिश् 6 P, प्रति-ज्ञा 9 A.

Proprietor, s. स्वामिन् m. प्रभुः, ईशः, पतिः, अधिकारिन् m. *See* **Owner.** -ship, s. स्वाम्यं, प्रभुत्वं, स्वामित्वं, अधिकारः. -**Proprietary,** a. स्वाम्यधीन, प्रभुनिष्ठ, स्वामिगत; 'p. right' स्वाम्यं, अधिकारः, स्वत्वं.

Propulsion, s. प्रेरणा, चोदना.

Prorogue, v. t. व्याक्षिप् 6 P. (नियतकालं यावत्) विसृज् 6 P or त्यज् 1 P. -**Prorogation,** s. कार्यत्यागः-निवृत्ति f., व्याक्षेपः.

Proscribe, v. t. घोषणापूर्वं दंडं आदिश् 6 P or बहिष्कृ 8 U or निर्वस् c., 'here is Jivasiddhi being disgraced and p.ed from the city' एष जीवसिद्धिः सनिकारं नगरान्निर्वास्यते (Mu. 1). 2 निषिध् 1 P, निवृ c. -**Proscription,** s. सघोषण दंडाज्ञा.

Prose, s. गद्य. -a. गद्यात्मक, गद्यरूप, गद्य in comp -**Prosaic,** a. गद्यरूप, गद्यात्मक, गद्य in comp. 2 नीरस, विरस, रस-सत्त्वहीन.

Prosecute, v. t. (नित्यं-अनवरतं) प्रवृत् c., अनुसृ 1 P, अनु-ष्ठा 1 P, अनु-सेव् 1 A, निर्वह् c., अनुशील् 10; 'p. studies' अध्ययनक्रममनुसृ; 'p. one's efforts' अनवरतं उद्यम् 1 A or प्रयत् 1 A; 'p. one's undertaking' प्रारब्धं उद्वह् 1 P, प्रतिपन्नं निर्वह् c. 2 अभियुज् 7 A, 10, अभिसंधा 1 P; सूच् 10, निविद् c. -ion, s. अनुशीलनं, प्रवर्तनं, नित्यानुष्ठानं, नित्यप्रवृत्ति f., निर्वाहणं, अविरतानुसरणं. 2 अभियोगः, निवेदनं; 'p. of effort' नित्योद्योगः; 'p. of study' नित्याध्ययनं, अध्ययनक्रमः.

-or, s. निर्वाहकः. 2 अभियोक्तृ m., वादिन् m., अर्थिन् m., अभिशंसकः.

Proselyte, s. परधर्मश्रयिन्, स्वधर्मत्यागिन्, पक्षांतर-मतांतर-ग्राहिन्; *See* **Convert.** -ize, v. i. स्वधर्मं ग्रह् c., -ism, s. मतांतरग्रहणं, धर्मांतरस्वीकारः.

Prosody, s. छंदस् n., छंदःशास्त्रं. -al,-ical, a. छांदस (सी f.), छंदः in comp. -ian, s. छंदःशास्त्रज्ञः.

Prospect, s. आलोकः, दर्शनं, चक्षुर्विषयः, दृग्गोचर-प्रवेशः-विषयः. 2 आयति f., उत्तरापेक्षा; 'he has good p.s before him' शुभा तस्यायतिः. 3 आशा, प्रत्याशा, आशंसा, अपेक्षा. -ive, a. उत्तर, उत्तरकालीन, भाविकालभाव्य, उत्तरकालसापेक्ष; *See* **Future.** -ively, adv. उत्तरकालापेक्षया.

Prosper, v. i. सं-ऋध् 4, 5 P, प्र-वि-वृध् 1 A, स्फाय् 1 A, एध् 1 A, प्र-उप-चि pass., समृद्धि-वृद्धिं या 2 P or उप-इ 2 P; 'I hope your (commercial) business is p.ing' अपि प्रचीयंते संव्यवहाराणां लाभाः (Mu. 1). 2 सिध् 4 P, सं-पद् 4 A, सफलीभू 1 P, कृतार्थीभू. -v. t. वृध् c., प्र-उप-चि 5 U. एध् c., उपकृ 8 U, अनुग्रह् 9 P, सफलीकृ, साध् c., सिद्धिं नी 1 P. -ity, s. सं-, ऋद्धि f., संपद् f., संपत्ति f., अभ्युदयः, श्रीः, लक्ष्मीः, वि-, भूति f., सौभाग्यं, वैभवं, पुण्योदयः, ऐश्वर्यं; 'time of p.' संपत्-समृद्धि-उदय-कालः-समयः. 2 समृद्धिः, उत्कर्षः, उन्नति f., उदयः, प्र-उप-चयः, वि-सं-वृद्धि f., साफल्यं, कृतार्थता, सिद्धि f. 3 क्षेमः-मं, कौशल्यं, कल्याणं, शुभं, शिवं, हितं, भद्रं. -ous, a. समृद्ध, श्रीमत्, समृद्धिमत्, लक्ष्मीवत्, सश्रीक, ऐश्वर्यशालिन्; (state &c.) वर्धिष्णु, प्र-उप-चीयमान, एधमान, वर्धमान; 'in p. days' संपत्सु, अभ्युदयकाले, भूतिसमये, समृद्धिकाले. 2 सफल, सिद्ध, कृतार्थ, सिद्धार्थ; (happy) सुस्थ, निरापद्, क्षेम, कुशल, कल्याण (णी f.), शिव, भद्र, मंगल, शुभ, सौभाग्यवत्, धन्य. -ously, adv. समृद्ध्या, अभ्युदयेन, सुसंपदा, सौभाग्येन, शुभं, भद्रं.

Prostitute, s. वेश्या, वेशवधूः, गणिका, वारपण्य-स्त्री-अंगना-योषित्, भोग्या, सामान्यस्त्री, रूपाजीवा; (false to her husband) पुंश्चली, बंधकी, असती, कुलटा, स्वैरिणी, पांसु(शु)ला, धर्षिणी, इत्वरी. -v. t. निंद्यकर्मार्थं प्र-उप-विनि-युज् 1 A, 10 or व्यापृ c. -ion, s. वेश्याजीवः, वेश्या-गणिका-वृत्ति f., वारसेवा, बंधकीत्वं, पौंश्चल्यं, &c.

Prostrate, a. प्रणत, भूमिगत, साष्टांगप्रणतपतित, 'lie or fall p.' *See* (v.); 'p. on the bed' शयनगत, शयने अवमूर्धशय; 'lying p. at the feet' चरण or पाद-पतित or प्रणत. 2 अवसन्न, क्षीण. -v. t. (Oneself)

दंडवत्प्रणामेन-साष्टांगं-भूमौ-नम् 1 P or प्रणिपत् 1 P, दंडवत् पत्, शीर्षैः प्रणम् or प्रणिपत्. 2 नि-अव-पत् c.; भूमिं गम् c. (गमयति). 3 (Strength) अवसद् c; ध्वंस् c., प्र-वि-नश् c., ह्र 1 P; क्षि 1, 5 P. -ed, a. प्रणिपतित, भूमिगत, निपतित, &c. 2 क्षीणबल-शक्ति, हृत or नष्ट-शक्ति or ओजस्. -ion s.दंडप्रणामः अष्टांगप्रणामः-प्रणिपातः, साष्टांगप्रणामः-वंदनं, प्रणिपातः, प्रणामः. 2 (Of spirits) अवसादः, ग्लानि f., विषण्णता, उद्वेगः; 'p. of strength' शक्तिपातः-क्षयः, सत्त्वहानि f.

Protect, v. t. रक्ष् 1 P, अव् 1 P, परि-,त्रै 1 A, गुप् 1 P, पा 2 P, पा c (पालयति), परि-प्रति°-; वृ c. 2 संवृ c., परि-,वृ c. -ion, s. गोपनं, गुप्ति f., पालनं, त्राणं, रक्षा, रक्षणं, अभ्युपपत्ति f., संवर्धनं, परिपोषणं. 2 शरणं, आ-संश्रयः, आ-अव-लंबः, आधारः; 'go for p.' आश्रि 1 U, आलंब् 1 A, शरणं गम् 1 P or प्रपद् 4 A; 'paper granting p.' अभयपत्रं. -or, s. रक्षकः, गोप्तृ m., पालयिता, रक्षिता, रक्षिन्, पालकः, त्राता, शरणं, शरण्यः; आश्रयः, पः-पालः in comp. -**Protege,** s. आश्रितः, पालितः, उपजीविन् m., पोष्यः, शरणं गतः.

Protend, v. t. विस्तृ c., प्रसृ c.; *See* **Extend.**

Protest, v. i. दृढं-दृढोक्तिपूर्वं-वद् 1 P or आख्या 2 P; 'p. against दृढं विरुद्धं वद्, दृढं-दृढोक्तिपूर्वं नि-प्रति-षिध् 1 P, दृढं असंमतिं प्रकाश् c. or ज्ञा c.; 'I strongly p. against this order' अयमादेशोऽन्याय्य इति सनिश्चयं वदामि 'p. in writing' असंमतिलेखं-विप्रतिपत्ति-पत्रं-प्रकाश् c. -s. दृढनिषेधवाक्यं, अस्वीकार-असंमति-वादः, विरुद्धवादः, अस्वीकारप्रकाशनं; 'written p.' असंमतिपत्रं. -ant, s. रोमीयमतविरुद्धः. -ation,s. दृढवचनं-उक्तिः-वादः, विरुद्धवचनं, निषेधोक्तिः.

Proteus, s. कामरूपः.

Prototype, s. आदर्शः, मूलं, मूलप्रतिमा.

Protract, v. t. विलंब् c., व्याक्षिप् 6 P; *See* **Delay.** 2 प्र-,तन् 8 U; प्रसृ c., दीर्घीकृ 8 U. -ed, a. सुदीर्घ, विलंबित, चिरस्थित, चिर in comp.; 'p. note' तानः; 'p. sound' प्लुतः. -ion, s. विलंबः, व्याक्षेपः.

Protrude, v. i. प्रः-निः-सृ 1 P, निर्गम् 1 P, उद्भिद् pass., प्रलंब् 1 A, बहिर्वृत् 1 A or स्था 1 P. -v. t. Causal of roots above. -ing, a. बहिर्लंब, बहिःस्थ. -**Protrusion,** निःसरणं, उद्भेदः,प्रलंबनं. -**Protuberance,** s. वि-,स्फोटः, गंडः, शोथः, शोफः, श्वयथुः, (on the skin). 2 प्रलंबनं, उत्सेधः, उत्तुंगता, आभोगः, उन्नति f. -**Protuberant,** a. उन्नत, उत्तुंग, उच्छ्रित, उच्छून, प्रलंब; 'having p. breasts' तुंग-उन्नत-स्तनी, घन-कुंभ-स्तनी; oft. ex. by उत्सेधः; पयोधरोत्सेधविशीर्णसंहति (K. v. 8) the continuity being broken by her p. breasts.' -**Protuberate,** v. i. प्रलंब् 1 A; *See* **Project,-ing** &c.

Proud, a. *See* under **Pride.**

Prove, v. t. उप-प्रति-पद् c., साध् c., वि-भू c., प्र-ख्या 3 A, 2 P, प्रमाणीकृ 8 U, सत्याकृ, स्था c. (स्थापयति). 2 प्र-,दृश् c., सूच् 10, निर्दिश् 6 P, प्रकाश् c., व्यंज् 7 P or c.; 'he was p. ed guilty' अपराधी स्थापितः; 'good men p. their usefulness by deeds, not by words' प्रव्यक्ति फलेन साधवो न तु कंठेन निजोपयोगिता (N. ii. 48), कर्मणा न तु वाङ्मात्रेण दर्शयंति. 3 परीक्ष् 1 A निरूप् 10, निर्णी 1 P, निश्चि 5 U, प्रति-इ c.; *See* **Test.** -v. i. सं-उत्-पद् 4 A, वृत् 1 A, सं-,भू 1 P; निर्णी-निश्चि-प्रतीत pass.; 'the tilled ground p. ed a treasure indeed' कृष्टा भूमिरेव कोषस्थाने बभूव, कोषत्वमापद्यत. -er, s. साधकः, विभावकः. -**Proof,** s. साधनं, प्रमाणं, उपपत्ति f., उप-प्रति-पादनं; 'written p.' लेख्यप्रमाणं, साधनपत्रं; 'burden of p.' साधनधर्मः, क्रियानिर्णयः; 'the burden of p. lies on both parties' द्वयोरपि वादिनोः क्रिया प्राप्नोति (V. M. 6.). 2 लक्षणं, चिह्नं. 3 परीक्षा-क्षणं, निर्णयः, निश्चयः; 'to put to the p.' परीक्ष्. 4 स्थूल-प्रथम-मुद्रणं. 5 अभेद्यता, अहार्यता, अविकार्यता; 'p. against advice' उपदेशाहार्य; 'water p.' जलेनाभेद्य. -less, a. निष्प्रमाण, साधनहीन.

Provenance, s. उत्पत्ति f., संभवः,उद्भवस्थानं.

Provender, s. पाथेयं; खाद्यं, पशुभोज्यं, शुष्कतृणादि n.

Proverb, s.जनप्रवादः, लोकवादः, आभाणकः, जनोक्ति f., न्यायः, वचनं, उक्तिः. -ial, a. लौकिक (की f.), लोकप्रसिद्ध-प्रचलित, लोक-जन in comp., न्यायरूप. -ially, adv. लोके, जनरूढ्या.

Provide, v. t. (पूर्वं) सं-,युज् 7 U, 10, संधा 3 U, प्र-उप-क्लृप् c., समाधीकृ 8 U, द्रव्यसामग्रीं उपपद् c. or वि-धा 3 U or कृ; *See* **Prepare.** 2 (पूर्वं) नियम् 1 P, प्रति-ज्ञा 9 A, परिपण् 1 A, संकेतं-समयं-कृ; निर्दिश् 6 P; *See*: **Enjoin, Ordain;** (for, against) gen. ex. by अर्थं-अर्थे in comp.; 'should p. wealth against times of want' आपदर्थं धनं रक्षेत्; 'who p. s for the future' अनागतविधाता; 'p. against' निवारणाय सज्जीभू, प्रतिकारोपायं क्लृप् c. -ed, a. (पूर्वं) संभृत, परिकल्पित, युक्त, उपेत, सहित, अन्वित,

सनाथ, सनाथीकृत, 'he is duly p. for' तस्य समुचिताः संविधाः कृताः, उपकरणसामग्रीयुक्तः, भक्ष्यपानादियुक्तः. 2 पूर्वं निर्दिष्ट, परिपणित, पूर्वं संकेतित; 'p. that' यदि, चेत्, एतेन समयेन. -ence, s. विधिः, परमेश्वरः; *See* **God.** 2 सुविमर्शः, दूरदर्शित्वं, पर्यवेक्षणं, पूर्वविवेकः-विचारः, सुसमीक्षा, दूर-दीर्घ-बुद्धि *f.* -ent, *a.* दूरदर्शिन्, विमृश्यकारिन्, विवेकिन्, दूर-दीर्घ-बुद्धि.-ential, *a.* ईश्वर-विधातृ-कृत-प्रयुक्त-घटित. -entially, *adv.* विधिवशात्, ईश्वरेच्छया, दैवात्, दिष्ट्या. -ently, *adv.* सविवेकं, सुसमीक्ष्य, सुविमृश्य, दूरबुद्ध्या. -**Provision,** *s.* परिकल्पनं, विधानं, उपपादनं. 2 पूर्वोपायः, पूर्वकल्पना, संविधा-धानं. 3 समयः, संकेतः, प्रतिज्ञा, पणः, नियमः, अभिसंधिः. 4 (P. s.) सामग्री, संभारः, संचयः, संग्रहः, साहित्यं, संविधा, उपस्करः, उपकरणजातं; (for journey) पाथेयं, भोज्यं, भक्ष्यं, भक्ष्यादिसामग्री, गमनसंविधा; (for army) वीवधः. -*v. t.* **Provide,** q. v. -al,-ary, *a.* सामयिक (की *f.*), अल्पकालस्थायिन्, आपात in comp., आपाततः नियुक्त. -ally, *adv.* आपाततः, समयानुरूपेण, स्तोककालं. -**Provisory,** *a.* सप्रतिज्ञ, सामयिक. -**Proviso,** *s. See* (*s.*) (3).

Province, *s.* विषयः, राष्ट्रं, देशः, वर्षः, मंडलं. 2 नियोगः, कार्यं, कर्मन् *n.*, कर्तव्यं, अधिकारः. 3 प्रकरणं, अंगं, विषयः (fig. also), (सर्वलौकिकस्याभ्यवहार्यस्यैव विषयः V. 3. -ial, *a.* देशीय, देश्य, राष्ट्रीय, राष्ट्रिक-दैशिक-(की *f.*), देश-राष्ट्र in comp. -*s.* देशस्थः, ग्रामस्थः. -ialism, *s.* ग्रामीणभाषा, असंस्कृतभाषा.

Provoke, *v. t.* प्र-,कुप् *c.*, क्रुध् *c.*, क्रोधं-कोपं-उत्पद् *c.* or उद्दीप् or उत्तिज् *c.* 2 उत्पद् *c.*, जन् *c.*, (जनयति), प्रवृत् *c.*, उत्तिज् *c.*; *See* **Excite, Cause.** 3 क्षुभ् 5 P, आह्वे 1 A. -ing, *a.* प्रकोपक, उद्दीपक, उत्तेजक, कोपावह, संतापकारिन्, संतापक. -ingly, *adv.* Ex. by (*v.*). -**Provocation,** *s.* प्रकोपः, क्रोधोद्दीपनं, कोपोत्तेजनं,कोपकारणं-हेतुः. 2 उद्दीपनं, उद्बोधनं. -**Provocative,** *a.* उद्दीपक, उद्बोधक. -*s.* दीपनं, अग्निवर्धनं, क्षुद्बोधनं, प्ररोचनं.

Provost, *s.* अध्यक्षः, अधिकारिन् *m.*, अधीशः.

Prow, *s.* पोताग्रभागः,

Prowess, *s.* शौर्यं, वीर्यं, वि-परा-क्रमः, पौरुषं, ओजस् *n.*, रणोत्साहः-शौर्यं; 'personal बाहुवीर्यं, भुजबलं.

Prowl, *v. i.* (भक्ष्यार्थं); परि-,भ्रम् 1, 4 P, पर्यट् 1 P. -ing, *s.* परिभ्रमणं, पर्यटनं.

Proximate, *a.* समीप, निकट, आसन्न, संसक्त, संनिकृष्ट. -ly, *adv.* समीपं, संसक्तं. -**Proximity,** *s.* सन्निधिः, सन्निकर्षः, सान्निध्यं, नैकट्यं, संसक्ति *f.*; *See* **Nearness.**

Proximo, *adv.* आगामिनि (मासे)

Proxy, *s.* प्रतिनिधिः-पुरुषः, प्रतिहस्तः; 'by p.' प्रतिनिधिद्वारा.

Prude, *a.* (Woman) अतिविनीता, विनयाभिमानिनी, सूक्ष्माचारनिष्ठा. -ry, *s.* अतिविनीतता, विनयाभिमानः, मिथ्याविनयः. -ish, *a. See* (*a.*).

Prudent, *a.* दूरदर्शिन्, विमृश्य-समीक्ष्य-कारिन्, विवेकिन्, दूर-दीर्घ-बुद्धि, परिणामदर्शिन्, सदसद्विवेकिन्; बुध, मनस्विन्, नीतिज्ञ, विज्ञ, प्र(प्रा)ज्ञ, मनीषिन्, सावधान, कृतधी; *See* **Wise,** also. 2 (Of acts) समीचीन, श्रेयस्, वरं *ind.* -ial, *a.* सविवेक, विवेक-समीक्षा-प्रयुक्त. -ly, *adv.* विमृश्य, समीक्ष्य, सविवेकं, दूरदर्शितया, परिणामबुद्ध्या, प्रज्ञवत्. -**Prudence,** *s.* दूरदर्शिता, दूर-दीर्घ-बुद्धि *f.*, विवेकः, प्रसमीक्षा, समीक्ष्य-विमृश्य-कारित्वं, सदसद्विवेकः, नीति *f.*, मनीषा, मति-बुद्धि *f.*

Prune, *v. t.* अग्राणि लू 9 U or अव-छिद् 7 P or निकृत् 6 P. -ing, *s.* अवच्छेदः, निकृंतनं; 'p.- knife' विटपच्छेदनी छुरिका.

Prurigo, Prurient, *See* **Itch,-y.**

Pry, *v.* (Into) सूक्ष्मं निरीक्ष् 1 A or निरूप् 10 or दृश् 1 P; निपुणं अनुसं-धा 3 U or अन्विष् 4 P or चर्च् 6 P. -ing, *s.* सूक्ष्मनिरूपणं-अन्वेषणं, सूक्ष्मचर्चा.

Prythee, *adv.* अपि, ननु, (ननु मां प्रापय पत्युरंतिकं K. IV. 32).

Psalm, *s.* स्तोत्रं, गेयं, गीतं, भक्ति-धर्म-गीतं. -ist, *s.* गीत-स्तोत्र-कारः. -**Psalter,** *s.* गीतसंहिता-संग्रहः.

Pseudo, prefix, Ex. by मिथ्या, कपट, कूट-छद्म, कृतक, कृत्रिम in comp.; *See* **False.** -nym, *s.* कृतकनामन्, *n.*

Pshaw, *interj.* धिक्, अपेहि.

Psychic, *a.* आध्यात्मिक.

Psychology, *s.* अध्यात्मविद्या, आन्वीक्षिकी.

Puberty, *s.* यौवनं, वयस् *n.*, तारुण्यं, यौवनदशा-अवस्था, प्रौढदशा; 'a woman attained to p.' स्त्रीधर्मिणी, उदक्या; *See* under **Menstrual.** -**Pubescent,** *a.* प्राप्तयौवन, प्रौढ, तरुण.

Public, *s.* लोकाः, जनाः, प्रजाः, प्रकृतयः, (pl.); लोकः, जनः, प्रजा; 'in p.' प्रकाशं, लोकसमक्षं, प्रकटं, सर्वप्रत्यक्षं. -*a.* प्रजालोक-संबंधिन्, साधारण (णी *f.*,) सामान्य, सर्वजनीन-य, सार्वलौकिक (की *f.*), लोक-जन-प्रजा in comp.; 'p. odium' जनद्वेषः, 'p. good' लोकहितं; 'p. property' प्रजाद्रव्यं. 2 प्रसिद्ध, लोक-जन-प्रसिद्ध, सर्वत्र प्रख्यात, बहुलीकृत, लोकविश्रुत, प्रकाशीकृत,

सार्वलौकिक (की *f.*) 3 प्रकाश, अगूढ, अच्छन्न, अविविक्त, सर्वप्रकाश, राज in comp.; 'p. road' राजमार्गः; 'p. sale' प्रकाशविक्रयः; 'p. house' शुंडा, पानं, शुंडापानं, सुरालयः, सुरापणः; *See* under **Liquor**; 'p.-minded', 'p.-spirited' उपकारशील, जनहितबुद्धि, सर्वजनहितपरायण,लोकहित, जनहितैषिन्. **-an,** *s.* शौंडिकः, सुरापणिकः. 2 कर-शुल्क-ग्राहिन् *m.* **-ity,** *s.* प्रकाशता, प्राकाश्यं, प्रख्याति *f.*, प्रसिद्धि *f.*, विश्रुति *f.*, जन-लोक-प्रसिद्धिः, स्पष्टता; 'give p.' **Publish,** q. v. **-ly,** *adv.* प्रकाशं-शतः, प्रासङ्, प्रकटं, सर्वप्रकाशं-संमुखं-समक्षं; अगूढं, अच्छन्नं, लुप्यकं, स्पष्टं. **-Publish,** *v. t.* प्रकाश् c., प्रथ् 10, कथा c. (कथापयति), प्र-वि-घुष् 10, ज्ञा c. (ज्ञापयति), प्रचर् c., घुष् c., प्रकाशीकृ 8 U, प्रकटीकृ, आविष्कृ, प्रकटयति, (:D.), प्रकटी-प्रसिद्धी-कृ; (books &c.) प्रकाश् c. **-er,** *s.* प्रकाशकः, प्रकाशयितृ *m.*, ख्यापकः. **-Publication,** *s.* प्रकाशनं,घोषणं, कथापनं. 2 प्रकाशितपुस्तकं-ग्रंथः.

Pucker, *v. t.* संकुच् 1 P, आकुंच् c., संह 1 P, पुटीकृ 8 U. **-s., -ing,** *s.* संकोचः, पुटः, वलि-ली *f.* **-ed,** *a.* संकुचित, पुटीकृत. 2 **Wrinkled,** q. v.

Puddle, *s.* पंकिलजलं, पंकगुल्मः,पंकजलाशयः, **-v. t.** आविली-कलुषी-कृ 8 U; *See* **Spoil.**

Pudency, *s. See* **Modesty.**

Pudendum, Pudenda, *s.* योनि *f.*, भगं, उपस्थः.

Puerile, *a.* बालिश, बालोचित, बालेय,बाल-शिशु-योग्य. **-ity,** *s.* बालिश्यं, बालधर्मः.

Puerperal *a.* प्रसव-प्रसूति in comp. **-Puerperous,** *a.* बालप्रसविनी.

Puff, *v. t.* ध्मा 1 P, आ-उप-°, उत्-,श्वि c., (lit. & fig.); वातेन पूर् 10, उद्-हन् 2 P, स्फाय् c. (स्फावयति). **-v. i.** श्वस् 2 P, कृच्छ्रेण श्वस्, उद्-ध्मा. 2 वा 2 P. 3 फुत्कृ 8 U, मार्वतं निः सृ c.,4 श्वि-उज्जून्-ध्मा-pass., स्फीत-आध्मात-उच्छून- *a.* भू 1 P; 'do not p. up, when praised' स्तूयमाना मोत्सिक्यंते (Ka. 329). **-s.** श्वासः, मुखमारुतः. 2 फूत्कारः, फूत्कृतं. 3 वात्या, वातवेगः; *See* **Gust.** 4 अतिप्रशंसा. **-ed,** *a.* आध्मात, उच्छून, स्फीत, उद्धत, मारुतपूर्ण, श्वासपूरित; 'p. up with pride' दर्पाध्मात, उत्सिक्त, मदोद्धत, उद्धत. **-ing,** *s.* उत्सेकः, *See* **Pride.**

Pug-faced, *a.* वानरवदन, कपिमुख.

Pug-nose, *s. See* under **Flat.**

Pugilist, *s.* मुष्टियोधः, मल्लः. **-Pugilism,** *s.* मुष्टि-मल्ल-युद्धं, मुष्टीमुष्टि युद्धं.

Pugnacious, *a.* कलह-युद्ध-प्रिय, रणोत्सुक, युयुत्सु, रण-युद्ध-कलह-काम. **-Pugnacity,** *s.* युयुत्सा, कलहेच्छा, कलह-युद्ध-कामः.

Puisne, *a.* अवर, अवरपदस्थ.

Puissant, *a.* शूर, विक्रांत, वीर्यवत्, प्रबल. **-Puissance,** *s.* शौर्यं, वि-परा-क्रमः, वीर्य; *See* **Bravery.**

Puke, *v. i.* वम् 1 P, छर्द् 10. **-s.** (वांतिकृत्) औषधं.

Pulchritude, *s. See* **Beauty.**

Pule, *v. i.* बालकवत् रु 2 P or कूज् 1 P.

Pull, *s.* कर्षणं, आकर्षः; ग्रहणं, धारणं. **-v. t.** कृष् 1 P, आ-स-°. 2 ग्रह् 9 U, आ-धृ 3 A, धृ 1 P, 10. **-down,** नि-,पत् c., अधः पत् c., अवकृष्; (in strength) अव-सद् c., अप-चि 5 U, क्षि 5 P, अपकृष्. **-off,** अप-नी 1 P, अप-उत्-कृष्, अवतॄ c., उन्मुच् 6 P, अपह 1 P; निष्कृष्, निर्ह. **-out,** उद्धृ, निष्कृष्, वि-उत्-पट् 10, उत्खन् 1 P, निर्ह; (hair) उत्-, लुंच् 1 P. **-towards,** आ-समा-कृष्. **-up,** उन्मूल् 10, उद्धृ, उच्छिद् 7 P, उत्पट्; *See* **Eradicate.** **-ing,** *s.* आकर्षणं, ग्रहणं, &c.; 'p. by the hair' केशग्रहः-हणं; 'mutual p. of the hair' केशाकेशि युद्धं.

Pullet, *s.* कुक्कुटशावः.

Pulmonary, *a* तिलक-फुप्फुस in comp.

Pulp, *s.* मज्जा, सारः, वसा. 2 गर्भः, बीजं. **-ous,-y,** *a.* मज्जाबहुल, मज्जाद्युपेत,मांसल, मज्जोपम, कोमल.

Pulpit, *s.* पीठं, आसनं.

Pulse, *s.* नाडि-डी *f.*; (beating) नाडीस्फुरणं-स्पंदनं; 'feel the p.' नाडीं स्पृश् 1 P or स्पृश् 6 P. or परीक्ष् 1 A, 'the p. is quick' लघुगतिः नाडी; 'the p. is low on account of phlegm' कफात्संकुचितैवा (नाडी). 2 वैदलः, शमी-शिंबी-धान्यं; शमीजः. **-Pulsate,** *v. i.* स्पंद् 1 A, स्फुर् 6 P; *See* **Throb.** **-ion,** *s.* गति *f.*, स्फुरणं, आघातः, स्पंदनं; 'p. of the heart' हृदयोत्कर्षः.

Pulverize, *v. t.* चूर्ण् 10, क्षुद् 7 P, पिष् 7 P. **-Pulverulent,** *a.* चूर्ण-क्षोद-मय (यी *f.*).

Pummel, *s.* वंका.

Pump, *s.* उत्तोलनयंत्रं, जलोत्क्षेपणं. **-v. t.** (जलादि) उत्तुल् 10, उत्क्षिप् 6 P. 2 (Out) निष्कृष् 1 P, रिच् 7 P, or c., रिक्तीकृ 8 U.

Pumpkin, *s.* कूष्मांडः-डकः, कर्कारुः.

Pun, *s.* श्लेषः **-v. t.** श्लेषं प्रयुज् 7/A, 10.

Punch, *s.* प्रहारः, आ-अभि-घातः. 2 विद्धकः, भंगः. 3 वेधनिका. —*v. t.* तड् 10 or प्रह् 1 P. 2 Perforate q. v.

Punchy, *a* स्थूलकाय; *See* Fat.

Punctilio, *s* सूक्ष्मता, अतिसौक्ष्म्यं; सूक्ष्मविषयः-नियमः. —**Punctilious,** *a.* सूक्ष्मनियमनिष्ठ-निरत, सूक्ष्माचारनिष्ठ, अतिसूक्ष्मदृष्टि *f.* —**ness** *s.* सूक्ष्मनियमनिष्ठा; अतिसूक्ष्मदृष्टि *f.*

Punctual, *a* सामयिक (की *f.*), संकेतसमय-निष्ठ अनुवर्तिन्; 'let us be p.' सामयिका भवामः (M. 1). —**ity,-ness,** *s.* समय-संकेत-पालनं-निष्ठा-अनुवर्तनं, सामयिकता. —**ly,** *adv.* यथासमयं-संकेतं-कालं.

Punctuate, *v. t.* विरामचिह्नानि लिख् 6 P: चिह्नैः अंक् 10.

Puncture, *v. t.* कीलाग्रेण व्यध् 4 P or भिद् 7 P. —*s.* वेधः-धनं, *See* Prick.

Pungent, *a.* तीव्र, तीक्ष्ण, प्रखर, तिग्म, उग्र, चंड. 2 मर्मभिद्, अरुंतुद, मर्मविद्, कटु. 3 (To the taste) तीक्ष्ण, तिक्त, तीव्र, कटु, उष्ण. —**Pungency,** *s.* प्रखरता, उग्रता, चंडता, तीक्ष्णता, कटुता, तीव्रता *&c.*

Punish, *v. t.* दंड् 10, शास् 2 P, (with two acc.); निग्रह् 9 P, दम् c. (दमयति); तड् 10 (by beating); 'p. ed him by an unjust death' अन्यायेन तं जघान. अन्याय्यवधं तमदंडयत्; 'should p. as a thief' चौरदंडेन दंडयेत् (Y. II. 269). 2 Plain, q. v. —**er,** *s.* शास्तृ *m.*, शासकः, दंडयिता. —**ment,** *s.* दंडः, शासनं, निग्रहः; साहसं; दमः. —**Punitive, Punitory,** *a.* दंड in comp.

Punt, *s.* तराशुः, तरांधुः.

Puny, *s.* क्षुद्र, अत्यल्प, अतिलघु.

Pupil, *s.* शिष्यः, छात्रः, अंतेवासिन् *m.*, अध्येतृ *m.*, विद्यार्थिन् *m.* 2 कनीनिका, तारा, तारका. —**age,** *s.* शिष्यदशा-अवस्था. अंतेवासित्वं.

Puppet, *s.* पुत्रिका, पांचालिका; *See* Doll; 'p.-show' पुत्रिकाक्रीडा.

Puppy, Pup, *s.* कुक्कुरशावः-शिशुः.

Purblind, *a.* हतदृष्टि, ईषदंध.

Purchase, *v. t.* क्री 9 U. 2 व्ययेन-श्रमेण प्राप् 5 P or लभ् 1 A. —*s.* क्रयः. 2 क्रीतद्रव्यं. 3 संग्रहणं. ग्राहः; 'p.-money' क्रयमूल्यं, अर्घः, मूल्यं. —**er,** *s.* क्रयिन् *m.*, क्रेतृ *m.*

Pure, *a.* वि-, शुद्ध, शुचि (in all senses); स्वच्छ, विशद, निर्-वि-अ-मल, प्रसन्न, अनाविल, अकलुष. 2 पुण्य, अनघ, निष्पाप, साधु, अपाप, अलिप्त, निष्कलंक, अकल्मष. 3 पवित्र, पावन, मेध्य, परि-,पूत, प्रयत, तीर्थ in comp. 4 केवल, शुद्ध, मात्र in comp. 5 अदुष्ट, अभ्रष्ट, असंसृष्ट. अविकृत. 6 (Language) अपभ्रष्टहीन-रहित, असंकीर्ण. 7 (Woman) सती, साध्वी, अक्षतब्रह्मचर्या, कुमारिका, अस्पृष्टा, अक्षतयोनिः, पुरुषास्पृष्टा; 'of p. descent' सद्वंश, शुद्धान्वय; of p. heart', 'p.-minded' शुद्धात्मन्, विमलात्मन्, शुद्धमति, शुद्धहृदय; प्रयतात्मन्; 'to be p.' शुध् 4 P. —**ly,** *adv.* निर्मलं, विशुद्धं, शुचि; निष्पापं, *&c.*; मात्रं, केवलं *&c.* —**ness,-Purity,** *s.* वैमल्यं, वि-,शुद्धि, *f.*, शुद्धता, प्रसादः, वैशद्यं, शुचिता, शौचं, पुण्यता, साधुता, अपापता, पवित्रता, पूतता, साध्वीत्वं, *&c.* —**Purify,** *v. t.* परि-,पू 9 U or c., शुध् c., वि-परि-,° शुचीकृ 8 U, निर्मलीकृ, पवित्रीकृ, संस्कृ; प्र-,क्षल् 2 P, निर्णिज् 3 U, प्रक्षल् 10, धाव् 10. —**ed,** *a.* परि-,पूत, शुद्ध, शोधित, प्रक्षालित, धौत, निर्णिक्त, *&c.*; 'p by penance' प्रयतात्मन्. —**ication,** *s.* परि-,पूति *f.*, वि-परि-शुद्धि *f.*, शौचं, संस्कारः, पावनं, शोधनं, निर्मलीकरणं, प्रक्षालनं, धावनं, मार्जनं. —**icative,-icatory,** *a.* पावन, पवित्र, पावक, तीर्थ in comp.; अघपाप-नाशिन्, अघमर्षण; *See* Pure, 'p.rites' शांतिक्रिया, संस्कारः. —**ing,** *a.* पावन, पावक, पवित्र, *&c.*

Purge, *v. t.* शुध् c., वि-,रिच् 7 P or c., मलं निःसृ c. or शुध् c. 2 परि-,पू 9 U, शुध् c., 2 पापं-अघं-शुध्; *See* Purify. —*s.* वि-,रेचनं-कं; उदरशोधनं. —**ation,** *s.* वि-, रेचनं, वि-,रेकः, शोधनं, शुद्धि *f.* —**ative,** *a.* वि-,रेचक-न, सारक, शोधन. —*s.* वि-, रेचनं-कं, सारकं. —**atory,** *s.* शोधक, पावन, अघनाशन-मर्षण. —*s.* पापमोचक स्थानं.

Purlieu, *s. See* Border.

Purloin, *v. See* Rob, Steal.

Purple, *a.* धूम्र, धूमल, नीललोहित, धूम्रवर्ण. —*s.* धूम्रः, धूमलः, धूम्रवर्णः, नीललोहितः. —*v. t.* धूम्रीकृ 8 U. —**ish,** *a.* आधूम्र, ईषद्धूमल.

Purport, *s.* भावः, अभिप्रायः, तात्पर्यं, अर्थः आशयः, भावार्थः, तात्पर्यार्थः. —*v. t.* अभिप्र-इ 2 P; उद्दिश् 6 P; *See* Intend, Mean.

Silk, *s.* कौशेयं, कौशं, कीटसूत्रं; पट्टः, क्षौमं, दुकूलं, कौशांबरं, कौशिकं (s.-cloth); China s.' चीनांशुकं; 'bleached s.' पत्रोर्ण, धौतकौशेयं; 's.-cotton tree' शाल्मलिः-लः, शाल्मलिवृक्षः, पिच्छिला; 's.-worm' कोश(ष)कारः, पट्टकीटः, तंतुकीटः-कृमिः, कोशस्थः. **-en,** *a.* कौशेय (यी *f.*), क्षौम (मी *f.*), कौशिक (की *f.*), कौश (शी *f.*); 's.-cloth' दुकूलं, कौशांबरं, क्षौमं, &c. 2 मृदु, कोमल.

Sill, *s.* देहली, शिला, गृहावग्रहणी.

Silly, *a.* मूर्ख, बालिश, मूढ, अल्पधी-मति, दुर्मति, निर्बुद्धि; *See* **Foolish;** 'what a s. boy' अहो मूढो बालकः.

Silt, *v. t.* (up) अवरुध् 7 U, अवबंध् 9 P.

Silvan, *a.* वन in comp., वन्य, वनस्थ, अरण्यज; 's. goddess' वनदेवता; 's. scenery' वनशोभा-श्रीः.

Silver, *s.* रूप्यं, रजतं, श्वेतं, दुर्वर्णं, खर्जूरं, कलधौतं; s. leaf रूप्यपत्रं 's.-smith' रूप्यकारः, स्वर्णकारः. **Silver wedding,** *s.* पंचविंशा विवाहतिथिः. -*a.* राजत (ती *f.*) (*s.*) in comp., रजतनिर्मित-कृत, रौप्य (प्यी *f.*). -*v. t.* आच्छद् 10, रजतयति (D.), श्वेतवर्णीकृ 8 U. **-y,** *a.* रजतोपम, रूप्यवर्ण, श्वेत-शुक्ल-वर्ण, अतिधवल.

Similar, *a.* सम, समान, तुल्य, अनुगुण, अनुरूप, सधर्मन्; *See* **Like. -ity,** *s.* साम्यं, सादृश्यं, तुल्यत्वं. **-ly,** *adv.* तद्वत्, तथैव, एवं.

Simile, *s.* उपमा, निदर्शनं. **-Similitude,** *s.* औपम्यं, सादृश्यं. 2 आकारः, रूपं, मूर्ति *f.*

Simmer, *v. i.* शनैः पच्-क्वथ् pass.

Simper, *v. i.* विकृतं स्मि 1 A, कुस्मितं कृ 8 U, अनर्थकं हस् 1 P.

Simple, *a.* निरवयव, असंकीर्ण, असमस्त, शुद्ध, केवल, अमिश्र. 2 सरल, ऋजु, अमाय, शुद्धात्मन्, अवक्र, निर्व्याज, निष्कपट, मायाहीन. 3 (Dress) विनीत, (विनीतवेषेण प्रवेष्टव्यानि तपोवनानि S. 1). 4 स्पष्ट, व्यक्त, सुगम, सुबोध, भिन्नार्थ, अगूढार्थ; *See* **Plain. 5** मुग्ध, बालिश, मूढ, दुर्मति. -*s.* ओषधि-धी *f.* **-Simpleton,** *s.* मूढः, मूढधीः, सुविश्वास्यः, मुग्धः, मुग्धमतिः. **-Simplicity,** *s.* शुद्धता, अमिश्रता, सरलता,

आर्जवं, सारल्यं, निर्व्याजता, अनुपधित्वं, अमाया, अव्याजः, निष्कापट्यं. 2 विनीतत्वं, ऋजुता. 3 स्पष्टता, सुबोधता, सुगमत्वं. 4 बालिश्यं, मूढता. **-Simplify,** *v. t.* ऋजूकृ 8 U, विशदीकृ, सुगमीकृ, व्यक्तीकृ; *See* **Explain.** **-Simply,** *adv.* एव, केवलं, मात्र in comp.

Simulate, *v. t. See* **Pretend.**

Simultaneous, *a.* एक-सम-कालिक (की *f.*), यौगपदिक. **-ly,** *adv.* समं, युगपत्, एक-सम-कालं-ले, यौगपद्येन, एकदैव, सममेव. **-ness,** *s.* यौगपद्यं, एक-सम-कालता, युगपद्भावः.

Sin, *s.* पापं, पातकं, एनस् *n.*, कल्मषं, दुरितं, अघं, दुष्कृतं, वृजिनं, अंहस् *n.*, किल्बिषं, पंकः-कं, पाप्मन् *m.*, कलुषं; दोषः, अपराधः, पाप-अप-कर्म *n.*, कुकर्मन्, दुष्कृति *f.*-त्यं; 'heinous s.' महा-घोर-पातकं; 'destroying s.' पापनाशन-नाशिन्, अघमर्षण, पापापह. **-**v. *i.* पापं &c. आचर् 1 P or कृ, अपराध् 4, 5 P, दुष् 4 P. **-ner,** *s. See* **Sinful** below; 'an atrocious s.' महा-घोर-पातकिन्-पापिन्, पापराशिः-निधिः. **-ful,** *a.* पापिन्, पातकिन्, पापकर (री *f.*), पाप्मन्, पापकृत्, पापात्मन्, कुकर्मन्, दुष्कर्मन्, एनस्विन्, पाप-दुष्ट-कर्मन्, अपराधिन्, किल्बिषिन्, पाप-निरत-बुद्धि-मति, पापात्मक. 2 (Of acts) पाप in comp., दुष्ट; कलुष; 's. act' पापं, दुष्कर्म; *See* (*s.*). **-fully,** *adv.* पापवत्, सपापं, दुष्टवत्. **-fulness,** *s.* सपापता, पापमति-निरति *f.*, दुष्टता, &c. **-less,** *a.* अनघ, निष्पाप, अपाप, अकल्मष, पापरहित, निर्दोष, निरपराध, and sim. comp.

Since, *prep.* प्रभृति, आरभ्य, (with abl.), आ with abl. or in comp.; sometimes also ex. by gen. abs.: अस्य कतिपये संवत्सरास्तपस्तप्यमानस्य (U. 4) 'it is several years s. he began to practise penance'; 's. then' तदाप्रभृति; '4 years s.' इतः पूर्वं चतुर्वर्षे; 'long s.' चिरं; 'ever s.' यतः प्रभृति. 2 पूर्वं, प्राक्, गत-पूर्व-काले. **-***conj.* यतः, यस्मात्, यत्, हि (not at beginning); by abl. of abstract noun; *See* **Because.**

Sincere, *a.* अकृत्रिम, निर्व्याज, निष्कपट, निर्व्यलीक, दक्षिण, ऋजु, सरल, विशुद्ध, अमाय; यथार्थ, सत्य, तात्त्विक-वास्तविक (की *f.*); (of persons only) शुद्धमति-भाव, शुद्धात्मन्, विमलात्मन्, शुचि, सत्यशील-व्रत-वादिन्; *See* **Frank, Honest.** **-ly,** *adv.* निर्व्याजं, निर्व्यलीकं, अमायया, शुद्धहृदयेन-भावेन, विमलात्मना. **-ity, -ness,** *s.* सारल्यं, दाक्षिण्यं, आर्जवं, निष्कापट्यं, अमाया, विमलात्मता, शौचं, यथार्थता, &c.

Sine, *s.* ज्या, ज्यार्धपिंडः.

Sinecure, *a.* अकर्माधिकृत, कर्मशून्याधिकारिन्.

Sinew, *s.* स्नायु *f.*, स्नसा; (s. s) बलं, शक्ति *f.*, सामर्थ्यं. **-y,** *a.* स्नायुमय (यी *f.*). 2 प्र-स-बल.

Sing, *v. i.* गै 1 P; (of birds) कूज् 1 P, रु 2 P. **-***v. t.* गै, गानेन वर्ण् or कृत् 10, उत्कृत्, अभिगै; 'they sang his praises' तं स्तुतिभिरुपतस्थिरे. **-er, -Songster,** *s.* गायकः, गातृ *m.* **-ing, -Song,** *s.* गीतं, गीति *f.*, गेयं, गानं. 2 कूजनं, रुतं, रावः, रवः.

Singe, *v. t.* ईषद् दह् 1 P, अग्निना स्पृश् 6 P.

Single, *a.* एक, एकाकिन्, अद्वितीय, केवल, असहाय; अद्वैध (धी *f.*). 2 भिन्न, व्यक्त, अविभक्त. 3 **Simple,** q. v. 4 अनूढ, अविवाहित, अकृतोद्वाह, निःसंग; 's. combat' द्वंद्वयुद्धं, नियुद्धं, बाहुयुद्धं; 's.-handed' एक, एकाकिन्, बाहुसहाय, भुजमात्रसहाय; 's.-hearted' अनन्यवृत्ति, एकचित्त; 's. stick' यष्टि *f.*, दंडः. **-***v. t.* (Out) (बहूनां मध्यात्) वृ 5 U, उद्धृ 1 P, उद्-ग्रह् 9 P; निरूप् 10, निर्दिश् 6 P. **-ness,** *s.* कैवल्यं, अद्वितीयता, &c. 2 शुद्धि *f.*, अनन्यता, अनन्यभावः. **-Singly,** *adv.* Ex. by (*a.*). 2 एकैकं, एकैकशः, प्रत्येकं, एकशः, पृथक्, पृथक् पृथक्; *See* **Separately.**

Singular, *a.* अपूर्व, अप्रतिम, अद्वितीय, अप्रतिरूप, अनुपम. 2 अनन्यसाधारण (णी *f.*), लोकोत्तर, अनन्यसामान्य; अपरूप, विलक्षण, अद्भुत, लोकबाह्य, अलौकिक (की *f.*); 's. number' एकवचनं. **-ity,** *s.* अपूर्वता, अप्रतिमता, असामान्यता, वैलक्षण्यं, वैचित्र्यं, असंगति *f.*, लोकोत्तरता. **-ly,** *adv.* अपूर्वं, विशेषतः, अद्भुतं, लोकोत्तरप्रकारेण.

Sinister, *a.* अमंगल, अशुभ, अकल्याण (णी *f.*), अभद्र. 2 दुष्ट, वक्र, वाम, कुटिल, अनृजु. 3 वाम, सव्य; 'of s. motives' दुराशय, पापमति; उमां स पश्यन्नृजुनैव चक्षुषा (K. v. 32) 'looking at Umā with no s. eye'. **-Sinistrally,** *adv.* वामतः, वामदिशि. **-Sinistrous,** *a.* वामस्थ, वामपार्श्ववर्तिन्.

Sink, *v. i.* नि-मस्ज् 6 P; 'sank in deep mire' महापंके निमग्नः; सद् 1 P, अव-नि-°, अधः गम् 1 P or पत् 1 P or या 2 P, अवपत्. 2 ह्रासं-क्षयं या-इ 2 P, क्षि pass., ध्वंस् 1 A; *See* **Decay, Decline.** 3 (Down) अव-वि-सद्, परि-, म्लै-ग्लै 1 P, स्रंस् 1 A; *See* **Droop;** 'my heart s. s down' सीदति मे हृदयं; 'limbs, s. ing down through excessive thirst' प्रबल-पिपासावसन्नानि अंगकानि (Ka. 36); 'his heart sank within him' तस्य धैर्यमही-

पत; स लुप्त-स्खलित-धैर्यः. —*v. t.* नि-मस्ज् c. (मज्जयति); अधः गम् c. or पत् c. 2 (A well &c.) खन् 1 P. 3 अवसद् c, परि-, म्लै c. (spirits &c.) 4 न्यूनीकृ 8 U. अल्पीकृ, लघयति ((D.), ह्रस् c., अपचि 5 U: क्षि 5 P. —*s.* जलनिर्गमः, सुसनाली.

Sinuous, *a.* कुटिल, वक्र, अराल, जिह्म. —**Sinuosity,** *s.* वक्रिमन् *m.*, कौटिल्यं.

Sinus, *s.* नाडि-डी-लि-ली *f.*

Sip, *v. t.* आचम् 1 P: उपस्पृश् 6 P. ईषत्-अल्पशः-पा 1 P. —*s.* आचमनं, उपस्पर्शः, ईषत्पानं.

Siphon, *s.* उत्क्षेपणी, वक्रनाली.

Sir, (Voc.) आर्य; भवन्, भोः; 'holy s.' भगवन्; 'gentle or good s.' भद्र, भद्रमुख.

Sirdar, *s.* मांडलिकः, सामंतः. 2 सेनानी *m.*

Sire, *s.* (In addressing) देव, श्रीमद्देव, महाराज, राजन्. 2 भगवन् (of holy men). 3 तातः, जनकः, पितृ *m.*

Siren, *s.* वि-,मोहिनी, (गानेन) लोभयित्री, मायिनी.

Sirrah, *interj.* रे, अरे, अरेरे.

Sirrup, *s.* स्वादु or मधुर-रसः or पेयं

Sister, *s.* स्वसृ *f.*, भगिनी, सोदर्या, जा(या)मिः-मी. 2 धर्मभगिनी; 'elder s.' अग्रजा; 'younger s.' अवरजा; 's.'s son' भागिनेयः, स्वस्रीयः; 's.'s daughter' स्वस्रीया, भागिनेयी; 's.'s husband' आवुत्तः; 's.-in-law' यातृ, ननांदृ, श्याली. भ्रातृजाया, प्रजावती (expressing different relations). —**hood,** *s.* भगिनीत्वं, भगिनीसंबंधः. 2 भगिनीसमाजः, स्त्रीगणः. —**ly,** *a.* भगिन्यनुरूप, स्वस्रीय, स्वसृयोग्य.

Sit, *v. i.* आस् 2 A, नि-,सद् 1 P, उपविश् 6 P: 'please s. here' अत्रास्यतां, इदमासनमलंकरोतु भवान्. 2 कार्य निर्वह् c. 3 (Fit) Ex. by शुभ् 1 A; 'this crown s. s well on you' नितरां तवेदं मुकुटं शोभते, शोभसे एतेन मुकुटेन; 's. by' उपास्, अन्वास्; 's. up' स्था 1 P, सम्यक् (अनतकायं) स्था; 'half s. ing up in the bed' पूर्वार्धविसृष्टतल्पः (R. xvi. 6); जागृ 2 P.

Site, *s.* सन्निवेशः, सं-,स्थिति *f.*, स्थानं, पदं, स्थलं, आस्पदं, भूमि *f.*; (of a house) वास्तु *m. n.*, वेश्मभूः, गृहपोटः; 'purificatory ceremony of a s.' वास्तुशमनं.

Situate,-ed, *a.* अव-,स्थित, निविष्ट; दिश्य, स्थ, वर्तिन् in comp.; 's. to the east' पूर्वदिश्य,पूर्वस्थ;(of persons)स्थ,स्थित, अवस्थ in comp.. अवस्थापन्न; 'so s.' एतदवस्थ; 'badly s.' दुःस्थ, दुःस्थित, कृच्छ्रगत, कष्टदशापन्न. —**ion,** *s.* सन्निवेशः, अवस्थानं, अव-,स्थितिः. 2 पदं, नियोगः, अधिकारः, पद्धवि-वी *f.* 3 अवस्था, दशा, स्थितिः, भावः, वृत्ति *f.*, आस्पदं.

Sitz-Bath, *s.* कटिस्नानं.

Six, *a.* षष्; 's.-fold' षड्गुण; 's.-faced' षण्मुखः, षडाननः; 'having s. mothers' षाण्मातुरः; 'collection of s.' षट्कं; 'in s. ways' षड्धा, षोढा; 'of s. months standing' षाण्मासिक (की *f.*), षण्मास्य. —**th,** *a.* षष्ठ (ष्ठी *f.*). —**Sixteen,** *a.* षोडशन्. —**th,** *a.* षोडश (शी *f.*). —**Sixty,** *a.* षष्टि *f.* —**ieth,** *a.* षष्टितम (मी *f.*).

Size, *s.* प्र-परि-माणं, मानं; 'of great s.' महाप्रमाण, पृथु; 'of a big s.' बृहत्प्रमाण. 2 आकारः, आकृति *f.*, रूपं, आकारमानं; 'of the s. of' ex. by (*s.*) or मात्र in comp.: 'of the s. of a mustard seed' सर्षपमात्र (छिद्रं); बिल्वमात्रं, अंडपरिमाणं, &c. 3 लेपः.

Skain, Skein, *s.* पं (पिं) जि-जी *f.*-जिका.

Skate, *s.* हिमविसर्पणपादुका.

Skeleton, *s.* कंकालः; 'mules reduced to s. s' कंकालशेषाः खराः (U.3); अस्थिपंजरः. 2 आकारः, संस्थानं. 3 वस्तुमात्रं.

Sketch, *v. t.* वर्ण् 10, आलिख् 6 P, स्थूलवर्णनं-पांडुलेख्यं-कृ 8 U. —*s.* वर्णनं; आलेख्यं; 'rough s.' स्थूललेख्यं, पांडुलेखः; 's. of a painting' पांडुचित्रं, चित्रारंभः, रेखामात्रं. 2 वस्तुमात्रं.

Skew, *a.* तिर्यञ्च्, अनृजु, विषम. —*v. i.* तिर्यक् निरीक्ष् 1 A.

Skewer, *s.* शलाका, कीलः-लकः, शंकुः.

Skiff, *s.* तरीः, नौ *f.*, लघुनौका.

Skill, *s.* कौशलं, नैपुण्यं, पटुता, पाटवं, प्राविण्यं, चातुर्यं, वैदग्ध्यं, युक्ति *f.*, विज्ञता, &c. —**ful, —ed,** *a.* कुशल, निपुण, प्रवीण, पटु. विचक्षण, दक्ष, विदग्ध, चतुर, विशारद, पेशल, युक्तिमत्, कृतिन्, विज्ञ, अभिज्ञ-ज्ञ-विद् in comp. —**ly,** *adv.* सपाटवं, सनैपुण्यं, दक्षतया, चतुरं, कुशलतया, विज्ञवत्, सवैदग्ध्यं, &c. —**ness,** *See* (*s.*) above.

Skim, *s.* मंडः-डं, फेनः-णः. —*v. t.* फेनं गल् c. or अपनी 1 P or निर्हृ 1 P. —*v. i.* जवेन-वेगात् परिसृप् 1 P or परि-द्रु 1 P, लघुगत्या विसृप्. —**med,** *a.* हृत-मंड-फेन; 's. milk' घोलं,मथिततक्रं. —**mer,** *s.* झर्झरी-रं, स्रजः-कः.

Skimp, *v. i.* कार्पण्यं समाचर् 1 P. 2 निरवधानं कृ 8 U.

Skin, *s.* चर्मन् *n.* (of animals), त्वच् *f.*; (hide) अजिन,दृतिः, कृत्ति *f.*, (of snakes) निर्मोकः, कंचुकः; 'reduced to mere s. and bones' त्वगस्थिमात्रशेष. 2 **Rind,** q. v.; 's.-deep' चर्मगत; *See* **Superficial;** 's-flint' अतिकृपणः, कदर्यः; *See* **Miser.** —*v. t.* चर्म-त्वचं-अपनी 1 P or निर्हृ 1 P or उल्लिख् 6 P. निस्त्वचीकृ 8 U.

-ny, *a.* चर्मभूत, त्वङ्मात्र, चर्ममात्रावशेष, क्षीण, कृश; *See* **Lean.**

Skip, *v. i.* प्लु 1 A, वल्ग् 1 P, नृत् 4 P. -s., -**ping,** *s.* प्लुत-ति *f.*, प्लवनं, प्लुतगति *f.* -**ping,** *a.* प्लुतगति-गामिन्.

Skipper, *s.* नौकाधिपः.

Skirmish, *s.* डिंबाहवः, डिंबः, डिंबयुद्धं. -*v. i.* कृ 8 U with (*s.*).

Skirt, *s.* प्रांतः, पर्यंतः, अंतः, प्रांत-पर्यंत-भागः, परिसरः, सीमा, धारा; 's. s of a mountain' पर्वतप्रस्थः. 2 अंचलः, दशा-वस्ति *m.* *f.* (pl.); वस्त्रांचलः, वसनांतः. -*v.* Ex. by (*s.*), प्रांतयति (D.); *See* **Border.**

Skittish, *a.* चंचल, चपल, तरल. 2 क्रीडा or खेला-शील or पर.

Skulk, *v. i.* निभृतं-अलक्षितं-स्था 1 P or वृत् 1 A, प्रच्छन्नं आस् 2 A.

Skull, *s.* कपालः-लं, कर्परः, शिरोस्थि *n.*; 's. for alms' भिक्षाकपालं; *See* **Scull.**

Sky, *s.* नभस् *n.*, वियत् *n.*, व्योमन् *n.*, गगनं-णं, आकाशः-शं, अंबरं, अंतरि(री)क्षं, खं, नाकः, दिव् *f.*, द्यो *f.*, विहायस् *m. n.*, विहायसः, अभ्रं, पुष्करं, अनंतं, सुरवर्त्मन् *n.*, विष्णुपदं, तारापथः; 'roaming through the s.' नभश्चरः, खेचरः, &c. 's.-coloured' व्योम-नील-वर्ण; 's.-lark' भ(भा)रद्वाजः; व्याघ्राटः; 's.-light' आकाशप्रकाशः; 's.-touching' अभ्रंलिह्-लिख्, नभोलिह्, व्योमस्पृश्, गगनचुंबिन्.

Slab, *s.* शिला, शिलातलं-पट्टः-फलकः.

Slabber, *v. i.* लालायते (D.), लालां स्रु c.

Slack, *a.* शिथिल, प्र-,श्लथ, स्रस्त, गलित. 2 मंद, अतीव्र, अतीक्ष्ण, प्रमत्त, अनवहित; *See* **Remiss.** -**en,** *v. t.* शिथिलयति (D.), श्लथ् 10, शिथिली-श्लथी-कृ 8 U, मंदीकृ; रथस्य मंदीकृतो वेगः (S. 1.) 'I have s.-ed the speed' &c.; प्र-शम् c. (शमयति) 'will not s. (the bonds of) her love' न अनुरागं शिथिलयति (V. 2.); 's. your pace a little' गतिवेगं किंचित् शिथिलय; 'who have s. ed their efforts' शिथिलितप्रयत्नाः, श्लथोद्यमाः. -*v. i.* शिथिली-श्लथी-भू, शिथिलायते (D.), मंदीभू; *See* **Relax.** -**ened,** *a.* शिथिलित, शांतवेग-रय. -**ly,** *adv.* शिथिलं, प्रमादतः, अनवधानेन. -**ness,** *s.* शैथिल्यं, &c.

Slake, *v. t.* प्र-,शम् c. (शमयति), छिद् 7 P, (thirst). 2 जलेन संमिश्र् 10 or संसृज् 6 P. -*v. i.* प्र-,शम् 4 P.

Slam, *v. t.* (Door) तीव्राघातेन पि-धा 3 U or बंध् 9 P.

Slander, *s.* अप-परि-वादः, पैशुन्यं, पिशुनवचनं, अभि-,असूया, निर्वादः; *See* **Scandal.** -*v. t.* परि-अप-वद् 1 A, असूयति (with dat); अपभाष् 1 A, कलंकयति (D.), अभिशंस् 1 P: *See* **Defame, Libel.** 2 सूच् 10, उपजप् 1 P, कर्णे जप्. -**er,** *s.* परि-अप-वादकः, अभि-,असूयकः, पिशुनः, सूचकः, कर्णेजपः, उपजापकः. -**ous,** *a.* पिशुन, साभ्यसूय, सपरिवाद, सापवाद, परिवाद-अपवाद-गर्भ, परिवादात्मक. -**ously,** *adv.* सापवादं, पिशुनं, सपरिवादं.

Slang, *s.* प्रलापः, अपभाषा, अश्लीलं-भाषणं, खलोक्ति *f.*

Slant,-ing, *a.* तिर्यच्, वक्र, कुटिल, तिरश्चीन; अवसर्पिन्, प्रवण; 'striking s.-ly with the tusks' तिर्यग्दंतप्रहारिन्; 's. blow' तिर्यक्प्रहारः. -*v. t.* आवृज् 10, वक्रीकृ 8 U, प्रवणीकृ. -*v. i.* वक्रीभू, अवसृप् 1 P, प्रवणीभू, आनम् 1 P. -**ingly,** *adv.* तिर्यक्, तिरः, साचि, तिरश्चीनं.

Slap, *s.* चपेटिका, चपेटः, तल or चपेट-प्रहारः or आघातः, आस्फोटनं. -*v. t.* चपेटेन प्रहृ 1 P or तड् 10 or आहन् 2 U, आस्फुट् c.

Slash, *v. t.* दीर्घं छिद् 7 P or कृत् 6 P, व्यवच्छिद्, विनि-कृत्, क्षतविक्षतीकृ 8 U. -**s.** दीर्घ-महा-छेदः, महाक्षतं-ति *f.* -**ing,** *a.* दीर्घच्छेदकारिन्; (fig.) अरुंतुद, मर्मच्छिद्-भिद्, तीक्ष्ण; *See* **Sharp.**

Slattern, *s.* वेशप्रमत्ता, अपरिष्कृतवेशा.

Slaughter, *v. t.* विशस् 1 P, हन्, 2 P or c.(घातयति), व्या-पद् c., प्र-मी 9 U, आलभ् 1 A (beast); *See* **Kill.** -*s.* विशसनं, वैशसं, घातनं, प्रमाथः, कदनं, संहारः, प्रमापणं; *See* **Killing;** 's.-house' सू(शू)ना, वध्यस्थानं वधभूमि *f.*, घातस्थानं. -**er,** *s.* घातकः, विशसितृ *m.*, सौ(शौ)निकः.

Slave, *s.* दासः, प्रेष्यः, चेटः, किंकरः, भृत्यः, दासेयः-रः, भुजिष्यः; *See* **Servant;** 'born a s.' गर्भदासः; 'domestic s.' गृहदासः; 'a female s.' दासी, चेटी, भुजिष्या; 's.-trade' दासविक्रयः; 's.-dealer' दासविक्रायिन् *m.*; (fig.) दासः, or ex. by वश, अधीन in comp.; 'a s. to carnal passions' इंद्रियसुखवशगः, विषयसुखाधीनः; 's. to love' कामपरवशः. -**ry,** *s.* दास्यं, दासत्वं, दासभावः, दास्यवृत्ति *f.* -**ish,** *a.* दासवत् *adv.*, दास in comp., दासोचित; *See* **Servile.**

Slaver, *s. See* **Saliva**

Slay, *v. t.* विशस् 1 P, हन् 2 P, व्या-पद् c., मृ c. -**er,** *s.* घातकः, हंतृ *m.*, हन् in comp.; *See* **Kill,-er.**

Sledge, *s.* अचक्रयानं.

Sledge-hammer, *s.* मुद्गरः, महाघनः.

Sleek, *a.* मृदु, श्लक्ष्ण, स्निग्ध, सुखस्पर्श.

Sleep, *v. i.* स्वप् 2 P, शी 2 A, संविश् 6 P, नि-द्रा 2 P, निद्रायते (D.); 'I also do not s. over this matter' मयाप्यस्मिन् वस्तुनि न शयानेन स्थीयते (Mu. 1.). **-s.** निद्रा, स्वप्नः, स्वापः, सुप्ति *f.*, शयनं, संवेशः; 'go to s.' निद्रां या 2 P; *See* (*v.*). 'fall into s.' निद्रया अभिभू pass. or आक्रम् pass.: 'he fell into a deep s.' गाढ-निद्राभिभूतः-विधेयः-बभूव; 'death-s.' घोर-काल-निद्रा; 'roused from s.' विनिद्र, भग्ननिद्र, प्रबोधित. **-er,** *s.* निद्रालुः, शयालुः, better by (*v.*). **-ing,** *s.* शयनं, निद्रा, &c.: 's.-house' शयनमंदिरं-गृहं. **-a.** निद्राण, शयित, शयान, सुप्त; 's. draught' निद्राकरमौषधं. **-less,** *a.* नष्टनिद्र, उन्निद्र, अ-वि-निद्र, निर्णिद्र; 'passes s. nights' उन्निद्राः-उत्सन्ननिद्राः-क्षपा गमयति. **-lessness,** *s.* निद्रानाशः, निर्णिद्रता, निद्राभावः. **-y,** *a.* निद्रालु, शयालु, तंद्रालु, निद्राशील. **2** निद्राक्रांत, निद्रापर-वश-विधेय-अभिभूत-आकुल-ग्रस्त. **3** निद्रामद-जनन (नी *f.*), स्वापकर (री *f.*). **4** सुषुप्सु, शिशयिषु, शयनेच्छु; 'to feel s.' स्वप्-शी-desid.: 'I feel s.' निद्रयाऽपन्हियेपराभूये, सुषुप्सामि.

Sleet, *s.* शीकरः, तुषार or शीकर-वर्षः or आसारः.

Sleeve, *s.* पिप्पलः; 'to laugh in one's s.' अंतर् हस् 1 P.

Sleigh, *s.* *See* **Sledge.**

Sleight, *s.* (Of hand) हस्तलाघवं-कौशलं, माया, इंद्रजालं.

Slender, *a.* प्र-,तनु, कृश, क्षीण, क्षाम; 'having a s. waist', 's.-waisted' क्षीण or तनु-मध्य or मध्यम, कृशोदर, मृग or सिंह-कटि or मध्य; 's.-waisted woman' सुमध्यमा, कृशोदरी, तनुमध्या, वेदिविलग्नमध्या. **2** अल्प, क्षुद्र, लघु, तनु; 'possessed of s. means' क्षीणविभव. **-ness,** *s.* तनुता, कृशता, कार्श्यं, तानवं, अल्पता.

Sleuth, *s.* पदवी, पद्धति *f.*

Slice, *s.* खंडः-डं, शकलः-लं, छेदः, भागः, लवः. **-v.** *t.* खंड् 10, छिद् 7 P, खंडशः छिद्.

Slide, *v. i.* अव-वि-सृप् 1 P; 's. up and down' आरोहावरोहं कृ 8 U. **2** च्यु 1 A, स्खल् 1 P, भ्रंश् 1 A, 4 P. **-ing,** *s.* विसर्पः, अवसर्पणं, स्खलनं.

Slight, *a.* सु-,अल्प, स्तोक, क्षुद्र, तनु, लघु, ईषत् in comp.; 'a s. blow' लघुप्रहारः, ईषदाघातः; 'in a s. degree' ईषत्, किंचित्, मनाक्, स्तोकं, कियत्; 'not in the s. est degree' न मनागपि-किंचिदपि-स्तोकमपि. **-v.** *t.* उपेक्ष् 1 A, अवधीर् 10, अव-ज्ञा 9 U, तृणीकृ 8 U, तृणाय मन् 4 A, अवमन् 4 A, अवगण् 10; *See* **Contemn.** **-s.** उपेक्षा, अवधीरणं-णा, अवज्ञा, अवमानः, अनादरः, अवगणनं-ना. **-er,** *s.* उपेक्षकः, अनादरः. **-ing,** *a.* सावज्ञ, अनादरपूर्वक, सावमान. **-ingly,** *adv.* सोपेक्षं, अनादरेण. **-ly,** *adv.* ईषत्, मनाक्, किंचित्, स्तोकं, अल्पमात्रं, by आ pr.: 's. blue' आनील, ईषन्नील.

Slim, *a.* *See* **Slender.**

Slime, *s.* पंकः, श्यानकर्दमः, सांद्र-श्यान-पंकः. **-y,** *a.* श्यान, पंकिल, चिक्कण, सांद्र.

Sling, *s.* क्षुमः, भिंदि(दि)पालः, गोफणा. **2** दोला, काचः, शिक्यं, भारयष्टि *f.* **-v.** *t.* क्षुमेण क्षिप् 6 P or प्रास् 4 P. **2** उद्-बंध् 9 P, काचयति-आंदोलयति (D.).

Slink, *v. i.* अलक्षितं-निभृतं-अपया 2 P or अपगम् 1 P or अपसृप् 1 P or अपक्रम् 1 U, 4 P, छलेन अप-या, &c.

Slip, *v. i.* प्र-,स्खल् 1 P, (fig. also): वचनानि स्खलयन् पदे पदे (K. iv. 12) 'making their words slip.' &c.; चल् 1 P. **2** सहसा-अलक्षितं-अज्ञातः-निर्गम् 1 P or अपसृप् 1 P. **3** (Off) च्यु 1 A, प्र-,भ्रंश् 1 A, 4 P, स्रंस् 1 A, निर्-,गल् 1 P, पत् 1 P; 's. away' व्यप-या 2 P, अपसृप्-गम्; *See* **Slink;** 's. in' अलक्षितं आ-प्र-विश् 6 P; 'let s. an opportunity' अवसरं-समयं न ग्रह् 9 U or अवाक्षिप् 6 P. **-v.** *t.* अलक्षितं नि-धा 3 U or प्र-नि-विश् c. **2** वि-,मुच् 6 P, क्षिप्, भ्रंश् c.; अवगण् 10, उपेक्ष् 1 A, च्यु c, त्यज् 1 P, *See* **Neglect.** **3** शिथिलीकृ 8 U. स्रंस् c., शिथिलयति (D.); *See* **Loose.** **-s.** स्खलनं, स्खलितं, (fig. also); 's. as to names' गोत्रस्खलितं; प्र-,भ्रंशः, च्युति *f.*, पतनं. **2** दोषः, प्रमादः, अपराधः, भ्रमः, स्खलितं. **3** विटपः, शाखा, पल्लवः, कांडः. **4** खंडः-डं. **-pery,** *a.* पिच्छिल, मेदुर, चिक्कण, स्निग्ध, श्लक्ष्ण; 's. ground' निपत्या, पिच्छिलभूमिः. **2** अस्थिर, चल, लोल, तरल, अनवस्थित, चपल, चंचल; *See* **Fickle.**

Slipper, *s.* (लघु) पादुका, पादत्रं, उपानह् *f.*

Slit, *s.* दीर्घच्छेदः-वेधः-छिद्रं.

Slobber, *v. i.* लालां स्रु c.

Slop, *s.* (S. s) अधोंशुकं, अधोवसनं. **2** अमेध्यं-अपवित्रं-जलं, मलिनं-समलं-जलं. **3** कर्दमः, पंकः. **-v.** *t.* इतस्ततः प्रमादात् पत् c. or क्षिप् 6 P. **-py,** *a.* पंकिल, अनूप, सकर्दम.

Slope, *v. i.* अवसृप् 1 P, प्रवणीभू 1 P, क्रमशः निम्नीभू. **-v.** *t.* आनुच् 10, प्रवणीकृ 8 U. **-s.** प्रावण्यं; प्रवणभूमिः, अवसर्पिणी भूमिः; क्रमशः निम्नता. **2** (Of a mountain) नितंबः, उत्संगः, कटकः-कं; 'mountain s.' गिरिनितंबः; अवसर्पिणी भूः. **-ing,** *a.* प्रवण, अवसार्पिन्, क्रमशः निम्न, पातुक.

Slot, *s.* छिद्रं. **2** कीलकः.

Sloth, *s.* तंद्रा, आलस्यं, तांद्रि-द्री *f*., तंद्रिका, कार्यविमुखता. **-ful,** *a.* अलस, तंद्रिल, तंद्रालु; *See* **Lazy.**

Slouch, *v. i.* अलसं चल् or गम् 1 P. **-ing,** *a.* प्रलंब, निम्न

Slough, *s.* निर्मोकः, कंचुकः, अहि-भुजंग-त्वच् *f*. **2** महापंकः, पंकिलस्थानं, पंकाढ्य-स्थलं.

Sloven, *s.* अविनीत-अपरिष्कृत-वेशः. **-ly,** *a.* मलिन, अव्यवस्थित; अविनीत, अपरिष्कृत, अविनीत-अपरिष्कृत-वेश. **-liness,** *s.* अव्यवस्था, अपरिष्कारः, मालिन्यं.

Slow, *a.* मंद, (in all senses); मंदाग्निः, मंदगतिः, मंदमतिः, मंदविर्य, &c.; मंदगति-गामिन्, अद्रुत; अक्षिप्र, अशीघ्र; मंथर, 'a mind s. to discriminate' मंथरविवेकं चेतः, 's. in recognizing' प्रत्यभिज्ञान-मंथर (S. 4.). **2** विलंबित; कालातीत अतीतसमय; *See* **Late.** **3** मंदमति-धी-बुद्धि, जड or स्थूल-बुद्धि or मति, &c.; *See* **Dull.** **4** दीर्घसूत्र-त्रिन्, चिरक्रिय; 's. time' विलंबितवृत्ति *f*.; 's. fever' जीर्णज्वरः. **-ly,** *adv.* मंदं, मंदं मंदं, मंथरं; शनैः, शनैः शनैः, अशीघ्रं, अद्रुतं, विलंबेन. **-ness,** *s.* मांद्यं, मंदता; विलंबः, दीर्घसूत्रता, &c.

Sludge, *s.* पंकः.

Slug, *s.* प्रक्षेपणीय गुलिका. **2** मंदः, अलसः, जडः, तुंदपरिमृजः, शीतकः, आलस्यशीलः, तंद्रालुः, स्थूल-जड-मतिः. **-gard,** *s.* *See* **s. 2** above. **-gish,** *a.* मंद, अलस, तंद्रालु, मंदगति, आलस्यशील; *See* **Dull.** **-ly,** *adv.* मंदं, अलसवत्. **-ness,** *s.* मांद्यं, आलस्यं, तंद्रा, जाड्यं.

Sluice, *s.* (जल-) प्रवाहः, प्रपातः. **2** द्वारं, परि(री)वाहः, जलनिर्गमः.

Slumber, *v. i.* प्र-,स्वप् 2 P; अभिमरं स्वप्; (fig.) अनुपयुक्त-अव्यापृत-*a.* स्था or भू 1 P. **-s.** लघु-अल्प-अगाढ-निद्रा.

Slur, *s.* कलंकः, दूषणं, अकीर्तिचिह्नं. **-v. t.** 'cast a s. on' कलंकयति-मलिनयति- (D.), मलिनीकृ 8 U, दुष् c. (दूषयति). **2** प्र-,छद् 10, गुह् 1 U.

Slush, *s.* कर्दमः, सजलपंकः.

Slut, *s.* बंधकी, अविनीता, पुंश्चली; *See* **Prostitute.** **-tish,** *a.* अविनीत. अपरिष्कृतवेश.

Sly, *a.* धूर्त, कितव, कापटिक-छाद्मिक-(की *f*), समाय, सव्याज, वंचन-कपट-पटु. **2** चतुर, विदग्ध, 's. laugh' अंतर्हासः. **-ly,** *adv.* चतुरं, धूर्ततया, वैदग्ध्येन, सव्याजं, समायं. **2** निभृतं, अलक्षितं. **-ness,** *s.* व्याजः, छलं, छद्मन् *n.*, कापट्यं, माया, धूर्तता, वैदग्ध्यं, चातुर्यं.

Smack, *v. t.* Ex. by गंध, स्वाद in comp.; आ-अव-भास् 1 A; *See* **Savour.** **-v. t.** आ-,स्फुट् c.; आस्फल् c. **2** सशब्दं चुंब् 1 P. **-s.** आ-,स्वादः, रसः, गंधः. **2** आस्फोटनं, आस्फालनं; पक्षपक्षवनः. **3** सशब्दचुंबनं.

Small, *a.* अल्प, स्तोक, (of quantity). **2** लघु, तनु, अणु, क्षुद्र; अल्प-क्षुद्र-तनु, अल्पशरीर, अणुक, अप्रहस्व, अमहत्; oft. ex. by क affixed; *See* **Little;** 's. tree' वृक्षकः; 's. boy' बालकः &c. **3** (Voice) नीच, अगुरु; 's.-pox' मसूरी-रिका, विस्फोटकः; शीतला, वसंतरोगः (modern names).

Smart, *a.* तीक्ष्णमति, कुशाग्रबुद्धि, पटुसमग्र, चतुर; विदग्ध. **2** तीव्र, तीक्ष्ण, शीघ्र, द्रुत, लघु; आशु-शीघ्र-कारिन्. **3** (Speech &c.) सरस, मार्मिक (की *f*.), रसिक, रसगर्भ. **4** शोभन, सुवेश, प्रफुल्ल, सु pr. **5** (Pain &c.) तीव्र, तीक्ष्ण, उग्र, दुर्विषह; वेगवत्. **-s.** तीव्रवेदना, तीक्ष्णव्यथा-वेदना; शूलः-लं. **-v. i.** व्यथ् 1 A, तप् pass., तीक्ष्णव्यथां अनुभू 1 P; 'I am s. ing under the defeat' पराभवो मम हृदि प्रत्युप्तं शल्यमिव; न्यक्कारो हृदि वज्रकील इव मे तीव्रं परिस्पंदते (Vi. 5.). **-ly,** *adv.* तीक्ष्णं, तीव्रं, शीघ्रं, द्रुतं; लाघवेन, शोभनं, सु pr. **-ness,** *s.* तीव्रता, तीक्ष्णता; शीघ्रमतित्वं, मार्मिकता, सरसता; शोभा, &c.

Smash, *v. t.* चूर्ण् 10, वि-,मृद् 9 P, निष्पिष् 7 P, भंज् 7 P, प्रमथ् 9 P, निर्दल् c. (दलयति); *See* **Break.** **-s.** प्रमाथः, निर्दलनं, विमर्दः, चूर्णनं, निष्पेषः-षणं.

Smatter, *v. i.* अल्पं ज्ञा 9 U, पल्लवाग्राहि पांडित्यं कृ 8 U, किंचित् अवगम् 1 P. **-er,** *s.* चुंबकः, पल्लवाग्राहिपंडितः; अल्पज्ञः. **-ing,** *s.* अल्पज्ञानं, पल्लवाग्राहि पांडित्यं; oft. ex. by किंचित्, अल्पमात्रं; 's. of knowledge' अल्पत्वं ज्ञानं.

Smear, *v. t.* लिप् 6 P, वि-प्र-आ-अव-°, अभि-, अंज् 7 P or c., दिह् 2 U. **-ing,** *s.* लेपः-पनं, अंजनं.

Smell, *s.* घ्राणं; 'sense of s.' घ्राणेंद्रियं, घ्राणशक्ति *f*., गंधग्रहणशक्तिः. **2** आ-,घ्राणं, गंधग्रहणं. **3** गंधः, वासः, आमोदः; *See* **Odour, Fragrance.** **-v. t.** घ्रा 1 P, आ-उपा-° **-v. i.** Ex. by गंध in comp. or सगंध-तुल्यगंध-*a.*; 's. ing of honey' मधुगंधि; 's. ing like fat' वसागंधि; 'the flower s. s sweet' मधुरोस्य कुसुमस्य गंधः; 'it s. s of smoke' धूमसगंधमेतत्. **-ing,** *a.* गंधग्राहिन्. **2** गंधयुत, सगंध, वासयुक्त.

Smelt, *v. t.* वि-ली c., वि-द्रु c. **-er,** *s.* लोहद्रावकः; लोहकारः.

Smile, *v. i.* स्मि 1 A, मंदं विहस् 1 P, ईषद् हस्, मंदस्मितं-मंदहास्यं-कृ 8 U; 's. on' अनुग्रह् 9 P; प्र-सद् 1 P, प्रसन्न-कृपार्द्रदृष्टि-*a.* भू (with loc.); 'fortune s. s on you' [illegible]

—*s.* स्मितं, मंदहासः-हास्यं-स्मितं, विहसितं, विहसनं; 'speaking with a s.' स्मितपूर्वाभिभाषिन्; 'with a s.' सस्मितं. **-ing,** *a.* स्मेर, सस्मित, स्मयमान, प्रसन्न, प्रफुल्ल; 's. sweetly' शुचिस्मित, चारुहासिन्; 'a s. countenance' स्मेर-हास्य-मुखं, प्रसन्न-प्रफुल्ल-वदनं. **-ingly,** *adv.* सस्मितं, विहस्य.

Smirch, *v. t.* मलिनीकृ 8 U

Smirk, *s.* विकृतहासः, विलक्षस्मित. —*v. i.* कृ 8 U with (*s.*)

Smite, *v. t.* हन् 2 P, प्र-हृ 1 P, तड् 10, नि-अप-कृ 8 U, तुद् 6 P; 's. en with anxiety' संस्पृष्टमुत्कंठया (S. 4): 's. en by love' मदनबाणहत, कामोपहत, कामार्त, मदनसंतप्त, अनंगपीडित. **2** हन्, मृ c., सूद् 10; *See* **Kill. -er,** *s.* हंतृ *m.* सूदनः, घातकः.

Smith, *s.* शिल्पिन् *m.*, कारः in comp.: 'iron s.' लोहकारः, अयस्कारः; स्वर्णकारः, &c. **-ery,-y.** *s.* शिल्प-कर्म-शाला; लोहकारशाला.

Smock, *s.* (स्थूल) शाटकः, अधोवसनं.

Smoke, *s.* धूमः-मिका, धूपः-पिका; 'a quantity of s.' धूम्या; 'cloud of s.' धूमपटलं-ओघः. —*v. t.* (धूमनालीं) पा 1 P, सेव् 1 A. **2** धूमेन शुध् c. or शुष् c., धूप् 1 P, 10, धूपयति-धूमयाति-(D.). —*v. i.* धूमायते (D.), धूमं उत्क्षिप् 6 P or उद्-गृ 6 P or निः-सृ c. or उत्सृज् 6 P; 's. ing food' धूमं विसृजत् (मोष्णं) अन्नं. **2** धूमनालीं पा. **-er,** *s.* धूमपाः, धूमपायिन्-सेविन् *m.* **-ing,** *s.* धूमपानं. **2** धूमोत्क्षेपः-पणं. **-less,** *a.* निर्धूम, धूमहीन-रहित. **-y,** *a.* सधूम, धूमावरुद्ध, धूमबहुल. **2** धूम्र, धूमाभ, धूमल, धूमाकार. **3** धूमगंध-स्वाद.

Smooth, *a.* सम; श्लक्ष्ण, मृदु (fig. also); स्निग्ध, मसृण, अरूक्ष; अपरुष, अकटु, अकर्कश (sound); 'by s. words' श्लक्ष्णया गिरा, सांत्ववादेन, मृदुभिर्वचोभिः; 'by s. remedies' सामोपायैः. **2** धारावाहिन्, विसारिन्, सततप्रवाहिन्; निरुपप्लव, निर्विघ्न, निरंतराय, निराबाध, (business &c.); शांत, अक्षुब्ध, प्रसन्न, अक्षुत्तरंग, निर्वात (water). —*v. t.* समीकृ 8 U, श्लक्ष्णीकृ. **2** आविघ्न-*a.* &c. कृ, निर्विघ्नीकृ. **-ly,** *adv.* सुखेन, निर्विघ्नं, निरंतरायं, अनायासेन. **-ness,** *s.* श्लक्ष्णता, स्निग्धता, मृदुता, अक्षोभः, प्रसादः, &c.

Smother, *v. t.* श्वासं अव-नि-रुध् 7 U, श्वासावरोधं कृ 8 U. **2** प्रति-,स्तंभ् 9 P, निग्रह् 9 P, नियंत्र् 10, नियम् 1 P. **-ed,** *a.* रुद्धश्वास-प्राण.

Smoulder, *v. i.* अंतः ज्वल् 1 P or स्फुर् 6 P or दह् pass., better by 's. ing'; 'just as a s.-ing tree bursts into flame' अंतःप्रसुप्तदहनो ज्वलतीव वनस्पतिः (U. 4). **-ing,** *a.* अंतर्दाहिन्-ज्वालिन्, गूढदाहवत्, प्रसुप्तदहन.

Smudge, *v. t.* मलिनयति (D); कृष्णी-अस्पष्टी-कृ 8 U, दिह् 2 U; —*s.* मलं, कलुषं, कलंकः.

Smug, *a.* शोभन, सुवेश.

Smuggle, *v. i.* प्रतिषिद्धानि भांडानि आहृ 1 P or आनी 1 P.

Smut, *s.* मषी, मलं. **2** अश्लीलवाच् *f.*, दुरुक्तं, दुर्वचनं. —*v. t.*, **Smutch,** *v. t.* मलिनीकृ 8 U, मलीमसीकृ, मलिनयति (D.). **-ty,** *a.* मलिन, मलीमस. **2** अश्लील, दुरुक्त, अवाच्य.

Snack, *s. See* **Share, Repast.**

Snaffle, *s.* लघुवल्गा.

Snail, *s.* शंबूकः, कोष-कवच-स्थः. **2** मंथरः.

Snake, *s.* सर्पः, भुजगः, भुजंगः-गमः, पन्नगः, अहिः, नागः, उरगः, उरंगमः, विषधरः, भोगिन् *m.*, व्यालः, आशीविषः, फणिन् *m.*, दर्वीकरः, जिह्मगः, पवनाशनः, कुंभीनसः, दंदशूकः, चक्रिन् *m.*, द्विजिह्वः, द्विरसनः, सरीसृपः, कुंडलिन् *m.*, गूढपाद् *m.*, चक्षुःश्रवस् *m.*, काकोदरः, दीर्घपृष्ठः, बिलेशयः; 'hooded s.' फणभृत् *m.* भोगधरः, भोगिन् *m.*; 's. without poison' राजि(जी)लः, डुंडुभः; 's. with a spotted skin' मालुधानः, मातुलाहिः; चित्रसर्पः; 'that has cast off his slough' निर्मुक्तः, मुक्तकंचुकः; 'his venom' क्ष्वेडः, गरलं, विषं; 'his hood' स्फटा, फटा, फणा, स्फोटा दर्वी; 'charmer of s. s' अ(आ)हितुंडिकः, व्यालग्राहिन् *m.* **-y,** *a.* (*s.*) in comp.; आहेय (यी *f.*).

Snap, *v. t.* (अकस्मात्) त्रुट् c., भंज् 7 P, खंड् 10, छिद् 7 P. **2** आ-,स्फल् c., सहसा ग्रह् 9 U or उद्-हृ 1 P. **3** अकस्मात् दंश् 1 P; 's. the fingers' अंगुली स्फुट् c., छोटिकां दा 3 U or कृ 8 U. —*v. i.* (सहसा) त्रुट् 4, 6 P, दल् 1 P स्फुट् 6 P. भंज्-भिद्-pass. **2** क्वण् 1 P. **3** भष् 1 P **4** दंश् 1 P. दंतैः ग्रह् 9 U. —*s.*, **-ping,** *s.* त्रोटनं, आस्फालनं, आस्फोटनं, आकस्मिकभंग.. **2** छोटिका, मुकु(चु)टी, अंगुलिभंगः. **3** आकस्मिकदंशः. **-pish,** *a.* दंशनशील, दिदंक्षु. **2** कर्कश, परुष, दुःशील, कुक्कुरस्वभाव.

Snare, *s.* पाशः, वागुरा, जालं; 'take in a s'. जाले बंध् 9 P; (fig.) उन्मार्गेण-अपथेन-प्रवृत् c. or गम् c. (गमयति) —*v. t.* पाशे पत् c., पातयित्वा बंध् 9 P. पाशीकृ 8 U; जाले बंध्.

Snarl, *v. i.* भष् 1 P, रै 1 P; गर्ज् 1 P. **2** परुष-कर्कशं-वद् 1 P. **-er,** *s.* भषकः, कर्कशः, भषशीलः-स्वभावः.

Snatch, *v. t.* (away) आच्छिद् 7 P, (कृपाणगतविषयात आछिंदतः प्रेयसीं Mal.

5); आक्षिप्य ग्रह् 9 U, झटिति ग्रह् or हृ 1 P or हृ 1 P or धृ 1 P, 10 or आ-कल् 10 (कलयति). **-at,** ग्रहीतुं यत् 1 A, सवेगं ग्रह् desid. (जिघृक्षति). **-off,** अपहृ, मुष् 9 P, चुर् 10. **-out,** उत्-कृष्, निर्हृ, उद्धृ, उन्मूल् 10, वि-उत्-पट् 10. **-up,** उत्क्षिप् 6 P, (उत्क्षिप्यैनां ज्योतिरेकं जगाम S. 5.). **-s., -ing,** *s.* आकस्मिकग्रहणं-धरणं; आच्छेदः, सहसा आकलनं. **2** अल्पांतरं, अल्पावकाशः. **3** क्षण-आकस्मिक-प्रवृत्ति *f.*; ' by s. es ' खंडशः; s. es of moonlight ' कदाचित्कः चंद्रप्रकाशः. **-ing,** *a.* लोलुप, गृध्नु; *See* **Greedy.**

Sneak, *v. i. See* **Slink. -ing,** *a.* कुत्सितवृत्ति, अधम, कापुरुषवृत्ति; *See* **Mean.**

Sneer, *v. i.* (at) अव-उप-हस् 1 P (with acc.), सहासं अवज्ञां सूच् 10; अव-ज्ञा 9 U, अवमन् 4 A; *See* **Deride. -s.** अव-उपहासः; अवज्ञाहासः. **-ingly,** *adv.* सोपहासं, सावज्ञं.

Sneeze, *v. i.* क्षु 2 P, कृ 8 U with (*s.*) **-s., -ing,** *s.* क्षुतं, क्षवः, क्षवथुः, क्षुत् *f.*, हंजिः, छिक्का.

Snicker, Snigger, *v. i.* अंतर् हस् 1 P

Sniff, *v. t.* नासाघ्राणेन जिघ्र्, श्वस् 2 P.

Snip, *v. t.* अग्रभागं-अग्रं-लू 9 U; *See* **Nip.**

Snipe, *s.* दीर्घचंचुः. **2 Fool,** q. v.

Snivel, *s.* नासामलं, सिंहाण(घा)णं-नं. **-***v. i.* मलं स्रु c.; ' he s. s ' तस्य नसः मलं स्रवति.

Snob, *s.* सभ्यंमन्यः, भद्रमानिन् *m.*

Snooze, *See* **Nap.**

Snore, *v. t.* घर्घरायते (D.), घर्घररवं कृ 8 U. **-ings.** *s.* घर्घरः, घर्घररवः, क्रथनं.

Snort, *s.* फू(फु)त्कारः. **-***v. i.* फूत्कृ 8 U. फुत्कारं मुच् 6 P.

Snot, *See* **Snivel.**

Snout, *s.* प्रोथः, नासा, पोत्रं.

Snow, *s.* हिमं, तुषारः, तुहिनं, प्रालेयं, अवश्यायः, नीहारः, मिहिका; ' flow of s. ' तुषारस्रुति *f.*, हिमनिष्यंदः; ' s.-drift, ' ' mass of s. ' हिमानी, हिमसंहति *f.*, हिमराशिः; ' s.-capped ' हिमावृतशिखर; ' s - storm ' हिमवर्षः-संपातः. **-***v. i.* हिमं वृष् 1 P, हिमकणान् मुच् 6 P. **-y,** *a.* हिमवत्, हैम(मी *f.*); तुषार-हिम-मय (यी *f.*), हिमावृत, (*s.*) in comp.; ' s. mountain ' हिमाद्रिः, तुहिनाचलः, &c. **2** हिमाभ, हिमवर्ण.

Snub, *v. t.* पराभू 1 P, अधिक्षिप् 6 P; प्रत्यादिश् 6 P, अधरीकृ 8 U, अपकृष् 1 P, वाचं बध् 7 U; ' s. nose ' चिपिटनासा, नतनासिका; 's.-nosed' अवटीट, अवनाट, अवभ्रट, नतनासिक, चिपिट.

28

Snuff, *s.* नस्यं, नासाचूर्णं, क्षुत्करी; ' s.-box ' नस्यधानी, नस्याधारः. **2** दग्धवर्ति *f.*-तूला, छत्रं. **-***v. t.* निश्वस् 2 P, अंतर् ग्रह् 9 U. **2** दग्धवर्ति अवच्छिद् 7 P, छत्रं अपनी 1 P; ' s. out ' निर्वा *See* **Extinguish. -ers,** *s.* वर्तिकर्तनी-छेदनी. **-y,** *a.* नस्यदूषितमलिन.

Snuffle, *See* **Snort.**

Snug, *a.* सु-,संहत, सु-,प्रच्छन्न, सुगुप्त, आवृत, सुगूढ, सुसंश्लिष्ट, सुरक्षित. **2** सुखावह, हितकर (री *f.*), सुस्थ, सुस्थित, सुख, स्वस्थ. **3** निकटशायिन्. **-ly,** *adv.* सुखेन, यथासुखं, सुसंहतं, सुसंश्लिष्टं, सुगुप्तं. **-Snuggle,** *v. i.* निकटे-पार्श्वतः-शी 2 A.

So, *adv.* तथा, एवं, तद्वत्, एवंविधं; इति, इत्थं. **2** ईदृक्, एतावत्, इयत्, तथा, एतादृशं. **3** तत्, तेन, तस्मात्, ततः ' as-s. ' यथा-तथा; ' s.-that ' तथा-यथा; ' s. and so ' अमुक (की *f.*); मया अमुकसूनुना लिखितं अमुकेन (Y. II. 88) ' written by me s. and s., the son of s. and s. '; ' s.-called ' नाम, नामन् in comp.; ' s. far ' एतावत्, एतदवधि; एतावत्पर्यंतं; ' s. far as' तावत्, oft. ex. by इति; *See* **As;** ' s. forth ' इत्यादि, एवमादि; ' s. long ' एतावत्कालं यावत्, इयतो दिवसान्, इयंतं कालं; ' s. long as ' यावत्-तावत्; ' s. many ' इयत्, एतावत्; ' as many ' ' s. many ' यावत्-तावत्; ' s. much ' (*adv.*) तादृक्, ईदृक्, तथा; (*a.*) एतावत् इयत्; ' s. that ' येन, यथा; ' s. then ' एवं तर्हि, एतावता, एवं च; ' s. much as ' अपि, अपि तावत्; ' could not s. much as wet the tip of his bill ' चंच्वग्रमपि तावत् जलक्लिन्नं कर्तुं नाशकत्.

Soak, *v. t.* (चिरं) मस्ज् c. (मज्जयति), जलेन सिच् 6 P, क्लिद् c., आ-प्लु c., अभ्युक्ष् 1 P. **-ed,** *a.* जल-सिक्त-क्लिन्न, अभ्युक्षित.

Soap, *s.* मार्जनलेपः; perhaps अरिष्टः. फेनिलः (s. berry plant). **-y,** *a.* चिक्कण, स्निग्ध.

Soar, *v. t.* उत्पत्-उद्गम् 1 P, उड्डी 1 A, ऊर्ध्वं विसृप् 1 P or डी; ' the aspirations of the great s. high ' उत्सर्पिणी महतां प्रार्थना (S. 7); ' high-s. ing hope ' दूराधिरोहिणी आशा (S. 5) **-er,** *s.* उड्डयनकृत् *m.* **-ing,** *s.* ऊर्ध्वगमनं, उड्डयनं, ऊर्ध्वारोहणं, दूराधिरोहणं.

Sob, *v. i.* सगद्गदं रुद् 2 P or क्रन्द् 1 P, फु(फू)त्कृ 8 U. **-bing,** *s.* फु(फू)त्कारः, गद्गदः, सगद्गदाक्रंदनं. **-bingly,** *adv.* सगद्गदं, गद्गदगिरा.

Sober, *a.* शांत, धीर, गंभीर, स्थिर, स्थिरमति-बुद्धि, विचारशील. **2** अमत्त, अक्षीव, निर्मद. **3** (In drinking) पानाप्रसक्त, पानसंय-

मित, अनतिपायिन्. 4 मित, परिमित, नियत, समर्याद. —*v. t* निर्मदीकृ 8 U, स्थिरीकृ, मदं अपनी 1 P, स्थैर्यं आ-पद् c. —**ed,** *a.* विगतमद, निर्मद, नष्टमद. —**ly,** *adv.* धीरवत्, गंभीरं, शांतचेतसा, विचारपूर्वं, सविवेकं. —**ness, Sobriety,** *s.* धीरता, गांभीर्यं, स्थैर्यं, विचारशीलता, सुविचारः; शांति *f.*, अनुद्वेगः, अरभसः. 2 अमत्तता, मद्याभावः. 3 संयमः, निग्रहः, पानामसक्ति *f.*, मितपानं.

Sobriquet, *s.* उपाधिः, उपनामन् *n.*

Sociable, *a.* संगमप्रिय, संसर्गप्रिय-शील, जनसंगशील, संवासप्रिय-शील. 2 सुजन, मधुरालाप, सुशील, संलापप्रिय, स्नेहबुद्धि. —**ness, Sociability,** *s.* संसर्गशीलता, जनसंगमप्रीति *f.*; सौजन्यं, सुशीलं, संलापप्रियताशीलता

Society, *s.* संगमः, संगः, संसर्गः, समागमः, सहवासः, संगति *f.*, संवासः, साहचर्यं. 2 श्रेणी, संघः. 3 समाजः, लोक or जन-समूहः or संघः, पंक्ति *f.*, सभा-संसद्-परिषद् *f.*; admissible into s ' पांक्तेय, पांक्तेय, सभ्य. —**Social,** *a.* सामाजिक, सांसर्गिक (की *f.*); oft. ex. by (*s.*) in comp.; 's. interest' समाजहितं; 's. intercourse ' अन्योन्यसंघट्टनं, अन्योन्यसंसर्गः-व्यवहारः. 2 **Sociable,** q. v. 3 संसर्गी or संगम-रूप or आत्मक.

Sociology, *s* समाजशास्त्रं.

Sock, *s.* पादत्रं, (और्ण) पादत्राणं.

Socket, *s.* आधारः, पात्रं, भाजनं.

Sod, *s.* शाद्वलं, तृणावृतभूभागः.

Sodality, *s.* मंडलं, संघः. 2 धर्मपथः

Sodden. *a.* अति-सिक्त-क्लिन्न; शून.

Sodomy, *s.* पुंमैथुनं, पुरुषमेहः, पायु-गुद-मैथुनं. —**Sodomite,** *s.* पुरुषमेहिन् *m.*, गुदमैथुनकृत्

Sofa, *s.* पर्यंकः, मंचः, शय्या; शयनं, आसनं.

Soft, *a.* मृदु (in all senses); प्रकृत्या मृदुः, मृदुगीः, मृदु पुष्पं, मृदुरुपायः. &c.; ' even red-hot iron becomes s. ' अभितप्तमयोऽपि मार्दवं भजते (R. VIII. 43); ' neither very severe nor very s. ' न खरो न च भूयसा मृदुः (R. VIII. 9); कोमल, मृदुल, पेलव, सुकुमार, अप्रखर, अपरुष, अकठोर, अनुग्र, अकठिन, अकर्कश, सौम्य (disposition). 2 स्निग्ध, श्लक्ष्ण, मसृण, मृदु-सुख-स्पर्श; आशिथिल, अदृढ, अघन; (voice) मधुर, मृदु, मंजुल; (in mind) सुमतार्थ, अल्पबुद्धि, बालिश. —*interj.* तूष्णीं भव, तूष्णीं, शांतं, शनैः. —**en,** *v. t.* मृदूकृ 8 U, कृ with (*a.*) (with pity) दयार्द्रीकृ, वि-,द्रु c., करुणया द्रु c. 2 शम् c. (शमयति), प्र-,उप-°, सांत्व् 10, लघूकृ, लघयति (D.); See **Alleviate.** —*v. i.* मार्दवं भज् 1 A, भू 1 P with (*a.*); मृदूभू, दयार्द्रीभू; प्र-,शम् 4 P, See **Melt.** —**ening,** *a.* शांतिद, शांतिकर (री *f.*), शमक-न. —**ly,** *adv.* मृदु, कोमलं, समार्दवं, &c. 2 लघुगत्या, चपलं. 3 निःशब्दं, निभृतं, मंद, शनैः, शनैः शनैः. —**ness,** *s.* म्रदिमन् *m.*, मार्दवं, सौकुमार्यं, कोमलता, शैथिल्यं, मसृणता, माधुर्यं, &c.

So-ho, *interj.* हंहो, भो भोः.

Soil, *s.* भूः, भूमि *f.*, प्र-,देशः, स्थलं-ली; (earth) मृद् *f.*, मृत्तिका; ' native s. ' जन्मभूमिः; ' fertile s. ' उर्वरा, सर्वसस्याढ्या; ' dry s. ' मरुः, धन्वन् *m.*; ' barren and salt s. ' इ(ई)रिणं; ' waste s ' खिलं, अप्रहतभूमिः; ' stony s. ' शार्करिलभूमिः. 2 मलः-लं, कल्कं, कलुषं-किट्टं, कलंकः. —*v. t.* मलिनीकृ 8 U, कलुषयति-मलिनयति-कलंकयति- (D.), दुष् c. (दूषयति). —**ed,** *a.* मलिनित; कलुषित, &c.; कल्किन, मलिन, समल, लिप्त.

Sojourn, *v. i.* अव-स्था 1 A, स्वल्पकालं निवस् 1 P, प्रवस्, देशांतरं अधि-आ-वस्. प्रवासं-यात्रां-कृ 8 U. —*s.*, —**ing,** *s.* अवस्थानं, अवस्थिति *f.*, यात्रा, प्रवासः, अल्पकालनिवासः; 'the s. of life ' संसारवृत्तिः, संसारयात्रा. —**er,** *s.* आगंतुकः, अवस्थायिन् *m.*, प्रवासी, यात्रिकः, परदेशसेवी.

Solace, *v. t.* सां(शां)त्व् 10, आ-समाश्वस् c.; परितुष् c.; (oneself) विनुद् c., वि-हृ 1 P. —*s.* सांत्वनं-ना, आश्वासनं, विनोदः-दनं, क्लेश or शोक-शांति *f.* or अपहरणं; See **Comfort, Console.**

Solar, *a.* सौर (री *f.*), सावन (नी *f.*) सूर्य, अर्क (**Sun,** q. v.) in comp.; ' s heat ' सूर्यातपः; सूर्यवंशः, सूर्यग्रहणं, अर्कबिंबं, &c.

Solder, *v. t.* सं-धा 3 U. —*s.* संधिः,धातुलेपः

Soldier, *s.* सैनिकः, योधः, भटः, आयुधिकः योद्धृ *m.* शस्त्र or अस्त्र-धरः-भृत् *m.* जीविन् *m.* -आजीवः, शस्त्र-युद्ध-उपजीवी. —**like,-ly,** *a.* सैनिकवत्, सैनिक इव, सैनिकयोग्य. 2 शूर विक्रांत; See **Brave.** —**y,** *s.* सेना, बलं, सैन्यं योध-सैनिक-समूहः, भटगणः.

Sole, *a.* एक with एव; एकाकिन्, केवल. —*s* तलं, पादतलं; (of shoe) पादुकातलं. —**ly** *adv.* एक-*a.* with एव or simply एव;केवलं

Solecism, *s.* संस्कारच्युति *f.*, अपप्रयोगः, अशुद्धप्रयोगः, म्लेच्छितं.

Solemn, *a.* पुण्य, पवित्र; विधिपूर्वं, संस्कारसहित, धर्मसंस्कारयुक्त. 2 गुरु, गंभीर, धीर उदात्त; (occasion) अलघु, गुर्वर्थ; oft. ex by उत्सव in comp.; ' s. occasions उत्सवदिवसाः; 's. procession' यात्रोत्सवः. दृढ, दृढप्रतिज्ञापूर्व, सप्रिश्रय, स्थिरनिश्चयात्मक; ' a s. promise ' दृढप्रतिज्ञा. —**ity** —**ness,** *s.* क्रिया, संस्कारः, धर्म-पुण्य-क्रियाविधिः, उत्सवः. 2 गांभीर्यं; गुरुत्वं, गौरवं.

औद्धत्यः. -ize, v. t. यथाविधि अनु-ष्ठा 1 P or सं-पद् c., यथाकार्यं निर्वह् c. 2 गौरवं उत्पद् c. or आह् 1 P. -ly, adv. यथाविधि, विधिवत्, यथाकार्यं, विधिपूर्वं. 2 सादरं; धीरं, गौरवेण, सगौरवं, गंभीरं, &c.

Solicit, v. t. याच् 1 A, प्र-अभि-अर्थ् 10 A, सविनयं याच् or प्रच्छ् 6 P. -ation, s. याच्ञा, प्रार्थना-ना, याचना, सविनययाचना. -or, s. याचकः, अर्थिन्, m., प्रार्थयितृ m., प्रार्थकः. -ous, a. उत्सुक, सचिंत, सोत्कंठ, व्यग्र, उत्क in comp.; उद्विग्न, चिंताकांत. -ously, adv. सस्पृहं, सोत्कंठं. -ude, s. व्यग्रता, चिंता, उत्कंठा, औत्सुक्यं, उद्वेगः.

Solid, a. ससार, सारवत्, वास्तविक (की f). 2 अशून्य, सगर्भ, पूर्णगर्भ. 3 घन, सु-,दृढ, दृढसंधि; सु-,संहत, स्थूल, कठिन, संघातवत्; अद्रव; अग्निसंयोगाद् द्रवभावापन्ना काठिन्यविनाशो भवति (S. B. 545) 'lose their s. state' &c. 4 (Knowledge) अबाध, परिपक्व, सुदृढ, सुपरिणत -s. घनः; 's. contents' घनफलं. 2 संघातः, घन-अद्रव-द्रव्यं. -ify, v. t. घनीकृ 8 U, कठिनीकृ. -ity, -ness, s. घनता, काठिन्यं-दृढता, &c.

Soliloquy, s. स्वगत or आत्मगत-भाषण or वचः. -**Soliloquize,** v. i. स्वगत &c. वच् 2 P, (Say q. v.)

Solitary, a. विविक्त, निर्जन, विजन, निभृत, एकांत; (of persons) विविक्त or एकांत वासिन् or सेविन्, विविक्तप्रिय, एकचर, निःसंग; एक, एकाकिन्, असहाय. 2 **Single,** q. v. -s. विविक्तवासिन् m., परिव्राज् m. -ily, adv. विविक्त, निभृतं, रहः, उपांशु. -iness, -**Solitude,** s. विविक्तं, निर्जनं-विजनं-स्थानं, रहःस्थानं, विजनं, अरण्यं. 2 विजनता, निर्जनता, विविक्तता. 3 विविक्ताधिवासः, विविक्तवृत्ति f.-सेवा, संसर्गाभावः.

Solstice, s. अयनांतः, अयनं, अयनकालः-संधिः, क्रांति f.-कालः; 'summer s.' कर्कसंक्रांतिः, उत्तरायणं; 'winter s.' मकरसंक्रांतिः, दक्षिणायनं. -**Solstitial,** a. (s.) n comp.; 's. point' अयनांतः.

Solve, v. t. व्याकृ 8 U, विवृ 5 U; शुध् c., वि-परि-,° व्या-ख्या 2 P, विशदीकृ, साध्-सिध् c. (साधयति), उप-प्रति-पद् c.; 's. s the difficulties' विषमपदानि शोधयति-विमर्शयति. 2 (Question) उत्तरं दा 3 U or वद् 1 P; 's. doubt' संशयं छिद् 7 P or निराकृ or निरस् 4 U or अपनी 1 P. 3 वि-,द्रु c., वि-,ली c. -ency, s. समृद्धता, ऋणशोधनक्षमता. -ent, a. समृद्ध, सधन, ऋणशोधनक्षम. 2 द्रावण (णी f.), द्रावक. -s. द्रावणं. -**Soluble,** a. वि-,द्राव्य, विलाप्य, द्रवार्ह. -**Solution,** s. साधनं, निर्णयं, &c.; व्याख्या, व्याकरणं, सिद्धि f., उपपत्ति f. 2 द्रावणं, विलयनं. 3 सं-,योगः.

Sombre, a. श्याम, मलिन, धूसर, मंद-मलिन-प्रभ.

Some, a. किम् (कः-का-किं) with चित्, चन, अपि, or अमुक in comp.; 'the son of s. one' अमुकसुतः. 2 (Quantity) किंचित्, कियत्, ईषत्, अल्प, स्वल्प, स्तोक; 'to s. extent' किंचित्, ईषत्, कियतांशेन, स्तोकांशेन; 's.-others' एके or केचित्-अन्ये-अपरे. 3 (Number) कतिचित्, कतिपय (यी-या f.); 'going s. steps' कतिचित् पदानि गत्वा; 's. how' कथमपि, केनापि प्रकारेण, कथं कथमपि, कथंचित्, यथाकथंचित्; 's. how or other' येन केन प्रकारेण; 's. one,' 's.-body' कश्चित्, कोऽपि, यःकश्चन; अमुकः, &c.; 's. thing' यत्किंचित्, किमपि, किंचन, किंचित्; 's.-thing is better than nothing' अकिंचित्करात्किंचित्करः श्रेयान्; 's.-time' पूर्वं, एकदा, पुरा, प्राक्, गतकाले, पूर्वकाले; 's.-times' क्वचित्, कदाचित्, कदापि, कर्हिचित्; कदा कदा, काले काले; 's.-what' किंचित्; किंचन, अल्पं, स्तोकं; (adv.) किंचित्, ईषत्, स्तोकं, आ pr., देश्य-देशीय-कल्प in comp.; or by doubling adj.; 's--what red' आताम्र, ताम्रकल्प, ईषद्रक्त; 's.-what afraid' भीतभीत इव; 's.-where' क्वापि. कुत्रचित्, कुत्रापि, यत्र कुत्रचित्, यत्र कुत्रापि.

Somer-sault, -set, s. ऊर्ध्वपादलंघनं.

Somnambulate, v. t. निद्रायां or स्वप्ने चर् 1 P. -**Somnambulism,** s. निद्राचारः-भ्रमणं, स्वप्नचारः. -**Somnambulist,** s. निद्राचारः, स्वप्नचारिन् m.

Somniferous, a. स्वाप-निद्रा-जनन (नी f.), निद्राकृत्, स्वापकर (री f.).

Somniloquist, s. निद्रालापिन् m., निद्राभाषी.

Somnolent, a. निद्रालु, निद्रालस; See **Sleepy.**

Son, s. पुत्रः, सुतः, तनयः, सूनुः, आत्मजः, आत्मसंभवः, नंदनः, अंगजः, तनु(नू)जः, दारकः, कुमारः; oft. ex. by deriv.; 's. of Dasaratha' दाशरथिः; गांगेयः, पांडवः, &c.; 's.-in-law' जामातृ m. -less, a. अपुत्र, निपुत्रिक, निःसंतान.

Song, -ster. s. See under **Sing.**

Sonnet, s. गीतिका, गाथा, लघुगीतं-काव्यं.

Sonorous, a. मधुर, मंजुल. 2 व्यक्त, स्पष्ट, पारेस्फुट, व्यक्तवर्ण. 3 विरावित, उच्च, सुस्वर, झञ्झन, घोषण, शब्द-ध्वनि-कर (री f.). -ly, adv. मधुरं, स्पष्टं; उच्चैः; महाध्वनेन. -ness, s. माधुर्यं, स्पष्टता, उच्चता, सुस्वरता.

Soon, *adv.* अचिरेण, अचिरात्, अविलंबं, आशु, सद्यः, झटिति, सपदि, द्राक्, सूतं; *See* **Quickly**; 'as s. as' (so s.), 'no s.-er than' ex. by यावत्-तावत्, च-च, मात्र in comp.; *See* **Scarcely.** **-er,** *adv.* वरं; शीघ्रं; 's. or later' अद्य श्वो वा; 'this is s. said than done' वक्तुं सुकरमिदं न तु कर्तुं.

Soot, *s.* कज्जलं, किट्टं, मसी-षी. **-y,** *a.* कज्जलमय (यी *f.*), धूमश्याम.

Sooth, *s.* सत्यं, तथ्यं; 'in s.' सत्यं, नाम, यत्सत्यं, नूनं खलु, सत्यमेव; 's.-sayer' दैवज्ञः, गणकः, मौहूर्तिकः. 's.-saying' शुभाशुभकथनं, दैवपरीक्षा-चिंतनं.

Soothe, *v. t.* शम् c. (शमयति), प्र-उप-°, लघूकृ 8 U, लघयति (D.), निर्वा c. (वापयति); (persons) लल् 10, अनुनी 1 P, सांत्व् 10, प्र-सद् c., परि-तुष् c., आराध् c., परामृश् 6 P (by stroking), आश्वस् c. **-ing,** *a.* शमन (नी *f.*), शांतिकर (री *f.*), शांतिप्रद, निर्वापयितृ, तापहर-हारिन्. **2** सांत्वक, आश्वासनशील; 'by s. words' सांत्वनीगरा, सामवचोभिः. **-s.** प्र-उप-शमनं, निर्वापणं, सांत्वनं, अनुनयः, लालनं.

Sop, *s.* पिंडः, अंशः, पिष्टकखंडः.

Sophism, Sophistry, *s.* हेत्वाभासः, युक्त्याभासः, पक्षाभासः, आभासः, सत्याभासः, वाक्छलं. **-Sophist,-er,** *s.* हेत्वाभासवादिन् *m.*, तार्किकः. **-ic,-ical,** *a.* आभासरूप, हेत्वाभासरूप, सत्याभास. **-Sophisticate,** *v. t.* **Adulterate,** q. v.

Soporific, Soporiferous, *a.* निद्राजनन-स्वापन-(नी *f.*), निद्रा-स्वाप-कर (री *f.*), निद्रावह.

Sorcery, *s.* इंद्रजालं, माया, कुसृति *f.*, यातु, अभिचारः (black art). **-er,** *s.* ऐंद्रजालिकः, मायाकरः, अभिचारविद्. **-ess.** *s.* योगिनी, मायिनी, अभिचारिणी.

Sordid, *a.* नीच, कृपण, कुत्सित, अधम, दीन, जघन्य, निंद्य; *See* **Mean.** **2** मलिन, मलीमस.

Sore, *s.* क्षतं, व्रणः-णं, अरुस् *n.*, ईर्मं. **-a.** सरुज, जातव्यथ, दुःखित, क्षत, सव्रण; सवेदन, सव्यथ, स्पर्शासह. **2** पीडाकर (री *f.*), कष्ट-क्लेश-प्रद, दुःखद. **3** उग्र, तीव्र, दारुण, गुरु; 's. throat' कंठपाकः, कंठरुज् *f.* **-ly,** *adv.* भृशं, अतीव, नितांतं, उग्रं, दारुणं, सुतरां, बलवत्.

Sorrel, *s.* चुक्रः, सहस्रवेधिन् *m.*, अम्लवेतसः शतवेधी. **-a.** पिंगल, पिशंग.

Sorrow, *s.* शोकः, शुच् *f.*, दुःखं, खेदः. क्लेशः, आधिः, संतापः, आर्ति *f.*, व्यथा; *See* **Grief.** **-v.** *i.* शुच् 1 P, खिद् pass., व्यथ् 1 A; *See* **Grieve.** **-ful,** *a.* सशोक, शोकार्त-आकुल-अन्वित-उपहत-आविष्ट, दुःखित, संतप्त, दुःखिन्, दुःखार्त, उद्विग्न, विषण्ण, दीन, दुर्मनस्, खिन्न, अवसन्न, म्लान, विमनस्. **2** शोच्य, शोचनीय, शोकास्पदीभूत, दुःखावह. **-fully,** *adv.* सशोकं, सखेदं, सोद्वेगं, सदुःखं. **-Sorry,** *a.* दुःखित, दुःखिन्, खिन्न, कष्टापन्न, &c.; *See* **Sorrowful.** **2** दीन, अनु-,शोच्य, कृपण, अनुकंप्य; 's. for one's past conduct' सानुशय, अनुतप्त; 'I am s. to hear this' इदं श्रुत्वा दुःखितोस्मि; 'I am s. to inform you' &c. इति भवते निवेदनं मे दुःखमावहति, निवेदयन्नहं कष्टापन्नोस्मि; 's. horse' कदश्वः; 's. fare' कदन्नं.

Sort, *s.* प्रकारः; विशेषः, भेदः in comp.; जाति *f.*, विधा in comp.; *See* **Manner;** 'a s. of tree' वृक्षविशेषः-भेदः; 'out of s. s' असुस्थ-अस्वस्थ-शरीर. **-v. t.** यथाक्रमं-यथावर्गं रच् 10 or विन्यस् 4 U, वर्गक्रमेण न्यस्. **-v. i.** युज्-उपपद्-pass., ex. by अनुरूप, युक्त; *See* **Becoming, Proper.**

Sortie, *s.* अवस्कंदः, अवपातः; *See* **Sally.**

Sot,-Sottish, *a.* पानमूढ, पानासक्त, मदोन्मत्त, सदापानरत. **2** **Foolish,** q. v.

Soul, *s.* आत्मन् *m.*; 'individual s.' प्रत्यगात्मा, विज्ञानात्मा; 'rational s.' चिदात्मा 'supreme s.' परमात्मा, ब्रह्मन् *n.*; 'animating s.' जीवात्मा, प्राणः, चेतनः, जीवः; 'embodied s.' देहिन् *m.*, शारीरात्मा, शरीरिन् *m.*, प्राणात्मा, क्षेत्रज्ञः. **2** आत्मा, चेतस् *n.*, चित्तं, मनस् *n.*, हृदयं; *See* **Mind;** 'possessed of a large s. महात्मन्, उदारचेतस्; 'oneness of s.' चित्तैक्यं, ऐक्यभावः; 'the whole s.' सर्वात्मा, सर्वभावः. **3** जीवनं, सारः; तत्त्वं, सार or तत्त्व-भागः or अंशः, सारभूतः. **4** (Self) आत्मा, स्वः. **5** वीर्यं, बलं, उत्साहः, तेजस्. **6** **Person,** q. v. 'the departed s.' प्रेतः, प्रेतनरः; 'heart and s.' प्र-नि-कामं, सर्वात्मना, सर्वभावेन; *See* **Heart;** 'he throws his heart and s. into the work' सुसमाहितेन चेतसा-सर्वात्मना कार्ये प्रवर्तते-व्याप्रियते

Sound, *s.* शब्दः, नि-,नादः, ध्वनिः, नि-,स्व (स्वा)नः, निर्ह्रादः, स्वरः, निनदः, निर्-,घोषः रावः, रवः, वि-संरावः नि-,स्वा(स्व)नः, स्वनितं; 'musical s.' निक्वा(क्व)णः, क्वणितं; 'confused s.' कोलाहलः, कलकलः, तुमुलरवः; 'rattling s.' रणः, रणितं. **2** संधिसागरः. **-a.** सुस्थ, अरुग्ण, कल्य, निरामय, अनामय, नीरोग, नीरुज, प्रकृतिस्थ व्याधिरहित; (in body) अक्षतशरीर, अविकलेंद्रिय (in mind) अनुपहतचित्त, अविप्लुत अनातुल, अविक्षिप्त. **2** अक्षत, अजातक्षत. अ

निर्-व्रण, क्षत-व्रण-हीन. 3 ससार, सारवत्, सारगर्भ. 4 अविकल, अन्यून, अखंड, अभिन्न. 5 तीक्ष्ण, तीव्र; निर्भर, प्र-,गाढ, सु-अति pr.; 's. sleep' गाढनिद्रा; 's. beating' तीक्ष्णदंडः, अभिताडनं. 6 निर्दोष, निश्छिद्र, विशुद्ध, दोषहीन. 7 गाढ, ध(धं)धीर, अगाध, सुपरिणत, परिपक्व. 8 (Argument &c.) अखंडनीय, सप्रमाण, दृढ-सु-प्रमाण, न्याय्य, धर्म्य, युक्तिसिद्ध. 9 (In views) विशुद्धाचार, सत्यमार्गानुयायिन् —v. i. नि-,नद् 1 P, ध्वन् 1 P, स्वन् 1 P, कण् 1 P, ह्राद् 1 A, वि-,रु 2 P, स्तन्-रस्-1 P, शब्दं कृ 8 U, शब्दायते (D.). —v. t. ध्वन् c., स्वन् c., नद् c.; वद् c., आ-ध्मा 1 P, सुखमाकंतेन पूर् 10, (trumpet, conch &c.); (drum) तड् 10, आहन् 2 U; 'the drum being s. ed' आहतायां भेर्यां; (bow) आस्फल् c. 2 परीक्ष् 1 A, सूक्ष्मं-निपुणं-निरूप् 10 or अनुसं-धा 3 U, ज्ञा desid. (जिज्ञासते). 3 उद्-घुष् 10, प्र-ख्या c. (ख्यापयति), प्रकाश् c., प्रकटीकृ; 's. the depth' तलं अवगाह् 1 A; 's. the depth of water' जलवेधं परि-मा 3 A, 2 P. —ing, a. शब्दन, सुस्वर, शब्दायमान, निनादिन्, निनदत्, घोषण, गर्जत्, निर्ह्रादिन्, शब्दकर (री f.); 's.-lead' लंबः, लंबसीसकं. —s. ध्वाननं, शब्दनं, वादनं. 2 वेधपरिमाण, तलावगाहनं. —ly, adv. तीव्रं, तीक्ष्णं, अत्यंतं, प्र-,गाढं; निर्भरं, दृढं, सुखेन, सु—अति pr. —ness, s. स्वास्थ्यं, कल्यता, आरोग्यं, अक्षतत्वं, निर्व्रणत्वं, अवैकल्यं, अन्यूनता, अखंडता, निर्दोषता, &c.; 's. of mind' चित्तस्वास्थ्यं, अविप्लवः.

Soup, s. जू(यू)षः-षं.

Sour, a. अम्ल, शुक्त, अम्लरस; 's to the teeth' दंतशठ. 2 कर्कश, परुष, दारुण, रूक्ष, अरुंतुद; सद्वाधक, वक्र-वाम-शील, कर्कशस्वभाव, दुष्प्रकृति. —v. t. अम्लीकृ 8 U. 2 कर्कशीकृ, वक्रीकृ. —v. i. अम्लीभू 1 P, कर्कशीभू. —ness, s. अम्लता, कार्कश्यं &c.

Source, s. प्रभवः, योनि f., मूलं, कारणं, हेतुः, प्रकृति f., उद्भवः, संभवः, आदिः, उद्गमस्थानं; See **Origin**; 'to have s. in' प्र-भू 1 P, प्र-,जन् 4 A, उत्पद् 4 A (with abl.); लोभात्क्रोधः प्रभवति, लोभात्कामः प्रजायते (H. 1); 'the s. of the Ganges is in the Himalaya' हिमवतो गंगा प्रभवति (S. K.).

Souse, v. t. सहसा हृ c. or मस्ज् c. (मज्जयति) or जलेन सिच् 6 P. —v. i. **Pounce,** q. v.

South, s. दक्षिणा, दक्षिणादिक्-दिशा-आशा, अवाची; 'to the s.' दक्षिणतः, (with gen.). —a., —ern, —erly, a. दक्षिण, अवाच्, अवाचीन, अवाच्य, दाक्षिणात्य; 'in a s. direction' दक्षिणेन (with acc. or gen.); 's. country' दक्षिणापथः; 's.-east' दक्षिणपूर्वा, आग्नेयी; (a., -ern-erly,) दक्षिणपूर्व, आग्नेय; 's.-west' दक्षिणपश्चिमा, नैर्ऋती; (a.,-ern, -erly) दक्षिणपश्चिम, नैर्ऋत. —ward, —wards, adv. दक्षिणाभिमुखं, दक्षिणतः, दक्षिणस्यां दिशि.

Souvenir, s. See **Memorial.**

Swaddle, *v. t.* क्षौमेण परिवृ c. or परि-वेष्ट् c.; 's -ing clothes' बालपरिवेष्टनं.

Swagger, *v. i.* प्र-, गल्भ् 1 A, विकत्थ् 1 A; *See* **Boast.**

Swain, *s.* ग्रामिकः, असभ्यः, ग्रामीणः. **2 Agriculturist,** q. v.

Swallow, *v. t.* ग्रस् 1 A, नि-, गृ 6 P. **—s.** ग्रासः, गिलनं. **2** भिंगरणचटक(?) *n.*, अभ्रगामी; 's.-wort' अर्कः, वसु(सु)कः, आस्फोटः, गणरूपः, विकी(कि)रणः, मंदारः, अर्कपर्णः.

Swamp, *s.* कच्छभूः, अनूपो देशः, अनूपभूः. **—***v. t.* आ-प्लु c.; *See* **Plunge. —y,** *a.* कच्छ, अनूप.

Swan, *s.* मरालः, राजहंसः, श्वेतगरुत् *m.*

Sward, *s.* शाद्वलं, सतृणभूमि *f.*

Swarm, *s.* संघः, समूहः, व्रजः, वृंदं, कुलं, *See* **Multitude. —***v. i.* गणशः संनिपत् 1 P or संमिल् 6 P, संघशः गम् 1 P or या 2 P. **—ing,** *a.* (with) व्याप्त, संकुल, आ-सं-कीर्ण, जुष्ट, उपसेवित.

Swarthy, *a.* श्याम, कृष्ण, कृष्णवर्ण.

Swathe, *s.* पट्टः, दीर्घखंडः. **—***v. t.* (पट्टेन) वेष्ट् 1 A or c., परिवृ c., परिच्छद् 10.

Sway, *s.* शासनं, आधिपत्यं, ईशत्वं, प्रभुत्वं, वशः-शी, अधीनता. **—***v. t.* शास् 2 P. **2** प्रवृत् c., प्र-, नी 1 P, प्रेर् c., प्रयुज् 10, प्रणुद् 10; *See* **Influence, Subject;** 'not s. ed by avarice' अवशो लोभस्य, अनाकृष्टः लोभेन, लोभाप्रेरित, &c. **—***v. i.* प्रेंख् 1 P, इतस्ततः चल् 1 P or कंप् 1 A, नम् 1 P, आ-प्र-लंब् 1 A.

Swear, *v. i.* शप् 1, 4 U, शपथं शप्. **—***v. t.* शप् c., शपथं ग्रह् c. **—er,** *s.* शपथकृत् *m.* **—ing,** *s.* शपथं, शापः.

Sweat, *v. i.* प्र-, स्विद् 4 P; *See* **Perspire. 2** परिश्रम् 4 P; तम् 4 P (tire). **—***v. t.* स्विद् c. **—s.** स्वेदः, घर्मः, स्वेदजलं. **2** परिश्रमः, आयासः; 'by the s of thy brow' आत्मनः परिश्रमेण. **—ing, —y,** *a.* सस्वेद, घर्मलिप्त, स्वेदवत्.

Sweep, *v. t.* मृज् 2 P or c., सं-परि-प्र-°; 's. away' अप-अप-मृज्, अपवह् c., (रयेण) अपनी; 's. across', 's. over' जवेन अतिक्रम् 1 U, 4 P or अति-इ 2 P. **—s.** प्रसरः, गोचरः, विषयः; *See* **Range. —er,** *s.* संमार्जकः, खलपूः, बहुकरः. **—ing,** *s.* सं-, मार्जनं-ना, मलापहरणं. **—ings,** *s.* अवकरः, अव(प)स्करः, मलं, संकरः, उच्छिष्टं.

Sweet, *a.* मधुर, मिष्ट, सुरस, स्वादु, मधुमय (यी *f.*), (of taste only). **2** चारु, मंजुल, ललित, कोमल, मनोज्ञ; *See* **Pleasant,** 's. smile' चारु-मधुर-स्मितं, 's. song' चारुगीतं, &c. **—s.** मधु *n.*, मिष्टं, आस्वादः. **2** सुखं, सौख्यं; 's. s of royalty' राज्य-सुखानि; 's.-heart' वल्लभ, प्रणयिन्, दयित कांत, रमण (णी *f.*), प्रियतम; 's.-meat

मिष्टान्नं, मोदकः, वायनं; 's.-smelling' सुगंधि, सुरभि; 's.-speaking, -toned, voiced' मंजुलस्वन, चाटुभाषिन्, प्रियंवद, मधुरवाक्. -en, v. t. मधुरीकृ 8 U, मिष्टीकृ स्वादूकृ. -v. i. मधुरीभू. -ly, adv. मधुरं, चारु, मधुर in comp.; 'smiling s.' चारुहासिन्. -ness, s. माधुर्यं, स्वादुता, &c.

Swell, v. i. श्वि 1 P or pass., प्र-उत्-°, स्फाय् 1 A, वृध् 1 A, उत्सृप् 1 P; प्र-उप-चि pass., बहुली-भू 1 P; 'a heart s. ing with joy' हर्षोत्फुल्लं हृदयं; *See* **Increase.** -v. t. श्वि c., स्फाय् c. (स्फावयति), वृध् c. (with air), उद्-प्र-आ-ध्मा 1 P; *See* **Puff.** -s., -ing, s. स्फीति f., वृद्धि f., उपचयः. 2 श्वयथुः; शोथः; शोफः, गंडः. 3 (Of the sea) ऊर्मिप्रलोठनं, संक्षोभः. -ing, a. श्वयमान, उत्सर्पिन्; 'a s. sea' प्रचलदूर्मिमालाकुल. -Swollen, a. शून, स्फीत, प्रवृद्ध, &c.

Swelter, v. i. घर्मेण अभिभू or बाध् pass.

Swerve, v. i. प्र-वि-चल् 1 P, भ्रंश् 4 P, 1 A, पराङ्मुखीभू 1 P, च्यु 1 A, व्यति-इ 2 P व्यतिक्रम् 1 U, 4 P, (with abl.); अपसृ 1 P, अति-वृत् 1 A (with acc.): *See* **Deviate;** 's. ing from the right path' सन्मार्गभ्रष्ट, &c

Swift, a. जवन, वेगवत्, त्वरित, सत्वर, शीघ्र-द्रुत-लघु-गामिन्, प्र-,जविन्, शीघ्रग, प्रजवन, तरस्विन्, महावेग; 's. of foot' धावने महाजव; 'as s. as the wind' वायुगति, वायुवेग. -ly, adv. शीघ्रं, जवेन, सवेगं, सत्वरं. -ness, s. शीघ्रता, वेगः, तरस् n.

Swig, Swill, v. अतिपानं कृ 8 U.

Swim, v. i. तॄ 1 P; प्लु 1 A: 'swam across the sea with their arms' पयः अतारिषुर्भुजैः (Si. xii. 77): 's. ing against the waves' बाहुभ्यां लहरीर्भिन्दन्; 'the Earth s. s in blood' रुधिरप्लाविता मही. -v. t. तॄ (with acc.), पारं गम् 1 P. -mer, s. तरण-प्लवन-कृत् m. -ming, s. तरणं, प्लवनं; 's. against the current' प्रतीपतरणं.

Swindle,-er, *See* **Cheat.**

Swine, s. शू(सू)करः, वराहः. -ish, a. सौकर (री f.), सूकरशील-वृत्ति.

Swing, s. दोला-ली, प्रेंखा, प्रेंखोलनं, हिंदोलः; काचं, शिक्यं (with a loop). 2 दोलनं, प्रेंखणं. 3 रयः, वेगः, गति f. -v. t. प्रेंख् 1 P, दोलायते (D.), इतस्ततः सं-वि-चल् 1 P. -v. t. प्रेंख् c., आंदोलयति-प्रेंखोलयति (D.), इतस्ततः सं-वि-चल् c. -ing, a. प्रेंखत, दोलायमान; काचित, शिक्यित.

Swinge, v. t. बलवत् तड् 10. प्रहृ 6 P, वधं प्रहृ 1 P.

Swirl, v. i. घूर्ण् 6 P, 1 A, भ्रम् 1, 4 P.

Swish v. t. वेत्रेण तड् 10 or हन् 2 P or प्र-हृ 1 P.

Switch, s. पिंजा, पल्लवः.

Swoon, v. i. मुह् 4 P -वि-ध्या-°, मूर्च्छ् 1 P. -s. मूर्च्छा, मोहः 'fell in a s.' मोहपरायणो बभूव, मूर्च्छा... -ing, a. मूढ, मुग्ध, मूर्च्छोपगत, मोहवश.

Swoop, s. अवपातः, सहसाक्रमणं-आपतनं. -v. i. सहसा अवपत्य ग्रह् 9 U or आक्रम् 1 U, 4 P.

Sword, s. असिः, खड्गः, निस्त्रिंशः, कृपाणः, करवा(पा)लः, चंद्रहासः, रिष्टिः, मंडलाग्रः, कौक्षेयकः; 's.-belt' खड्गबंधनं; 's.-stick' कूटासिः; 's.-man' खड्गिन्, खड्गधरः, आसिकः.

Syce, s. अश्वबंधः-पालः.

Sycophant, s. चाटुकारः-पटुः, अतिलालनपरः, अत्यनुरोधिन् m. -**Sycophancy,** s. चाटूक्ति f., चाटुकारित्वं; *See* **Flatter,-y.**

Syllable, s. अक्षरं; 'of one s.' एकाच्, एकाक्षर; 'of many s. s' अनेकाच्, बह्वक्षर.

Syllabus, s. सारः, संक्षेपः, सारांशः.

Syllogism, s. न्यायः. -**Syllogistic,** a. न्यायसंगत, न्याय्य, न्याय in comp.

Sylph, s. तन्वंगी, तनुगात्री. 2 विद्याधरी. दिव्यांगना.

Sylvan, वन्य, आरण्यक.

Symbol, s. चिह्नं, लक्षणं, लिंगं, संज्ञा, प्रतिरूपं. -ic, a. लाक्षणिक-सांकेतिक (की f.), संकेतरूप.

Symmetry, s. सौष्ठवं, चतुरस्रता, यथाप्रमाणता, अंगसंयोगः, अवयवसंगति f. -ical a. सम, चतुरस्र, सम-यथा-स-प्रमाण, संगतावयव.

Sympathy, s. सहानुभवः, संवेदनं, अनुकंपा, समदुःखता, समदुःखिता; समसुखिता. oft by समदुःख-सुख; 'the birds ever screamed as if out of s.' विहगाः समदुःखा इव चुक्रुशुः (R. viii. 39). 2 स्वभावप्रकृति-साम्यं, आनुगुण्यं, साधर्म्यं आनुरूप्यं. -etic, a. समदुःख-सुखिन्, सदय, स्निग्ध, सहदुःखिन्,-सुखिन्. -ize, v. i. सह-सम-दुःखिन्-a. भू &c.; *See* (s.); 'I s. with you in your distress' त्वद्दुःखदुःखितोऽहं; त्वत्समदुःखभागहं; 'many s. with us in our success' बहवः अस्मदभ्युदयेन सुखभाजो भवंति-मोदंते-प्रीयंते &c.

Symphony, s. एकतानता, स्वरैक्यं, साम्यं; *See* **Harmony.** -ious, a. सम or संवादिस्वर or ग्राम.

Symposium, s. सह-पान-भोजनं.

Symptom, *s.* लिंगं, लक्षणं; *See* **Indication. -atic,** *a.* सूचक, बोधक.

Synagogue, *s.* समाजः, सभागृहं.

Synchronous, *a.* एक-सम-कालीन. **-Synchronism,** *s.* यौगपद्य, समकालीनता. **-Synchronize,** *v. i.* युगपद्-एक-काले-वृत् 1 A or भू 1 P or जन् 4 A.

Syncope, *s.* मूर्छा.

Syndicate, *s.* सभा, संसद् *f.*, सदस् *f. n.*

Synod, *s.* समाजः, सभा, परिषद् *f.* **-ic,** *a.* चांद्र in comp.; (चांद्रमासः).

Synonym, *s.* पर्यायः, तुल्यार्थशब्दः, पर्यायशब्दः. **-ous,** *a.* समानार्थ, तुल्य-एक-अर्थ, सहार्थ.

Synopsis, *s.* सारसंग्रहः-पत्रकं. **-Synoptical,** *a.* सारभूत.

Syntax, *s.* कारकप्रक्रिया, वाक्यरचनाविचारः.

Synthesis, *s.* संयोगः, संकलनं. **-Synthetical,** *a.* सांयोगिक (की *f.*); संयोग in comp.; संयोगात्मक.

Syphilis, *s.* उपदंशः.

Syringe, *s.* शृंग-गर्क, बस्ति *m. f.*

Syrup, *s.* मधुरं, मधु *n.*, लेह्यं.

System, *s.* पद्धति *f.*, रीति *f.*, सरणि-णी *f.*, क्रमः, पर्यायः; *See* **Manner. 2** कल्पना, प्रयोगः. **3** शास्त्र. 4 (Of the body) कायव्यूहः. 5 (Of philosophy) दर्शनं; ' the solar s. ' सौरं जगत्. **-atic,** *a.* अनुज्झितक्रम, यथापद्धति, यथाक्रम, क्रमानुगत. **-atically,** *adv.* यथाक्रमं, यथापद्धति. **-atize,** *v. t.* व्यव-स्था *c.* (स्थापयति), यथाक्रमं रच् 10 or विन्यस् 4 U; *See* **Method,-ize,** &c.

Systole, *s.* हृत्संकोचः.

T.

Tabard, *s.* तनुत्राणः.

Tabasheer, *s.* *See* **Manna.**

Tabby, *a.* चित्र, शबल, कर्बुरित.

Tabernacle, *s.* पटवेश्मन् *n.*, पटमंडपः, दूष्यं; (fig.) अचिरस्थायी आवासः.

Tabes, *s.* क्षयः, क्षयथुः.

Tablature, *s.* *See* **Picture.**

Table, *s.* फलकः-कं, आधारः, मंचः; ' t. for writing ' लेखनाधारः, लिपिफलकाधारः. **2** पत्रं. **3** (Of metal &c.), पत्रं, फलकं; 'sitting at the same t.' सहभोजिन्, पांक्तेयः; ' t. of contents ' सूची-निर्देश-पत्रं, सूचिनी *f.*, अनुक्रमणिका; ' t. of numbers ' अंकपत्रं-आली; ' be at t. ' भुज् 7 A; ' to keep good t. ' भोजनविशेषान् उपकल्प् *c.*; ' t.-land ' अधित्यका, ऊर्ध्वभूमि *f.*, मालं क्षेत्रं, सानु *m. n.*, प्रस्थः; ' t.-talk ' विस्रंभालापः-कथा. **-Tablet,** *s.* पट्टिका, पट्टः, फलकः, पत्रं; ' on the t. of your heart ' हृत्पट्टिकायां **-Tabular,** *a.* पत्राकार.

Taboo, *See* **Interdict.**

Tabor, *s.* मुरजः, मृदंगः.

Tacit, *a.* तूष्णीं कृत, मानस (सी *f.*); ' t. consent ' मानसाज्ञा; ' t. obedience ' निर्विकल्प-निर्विवाद-आज्ञापालनं. **-ly,** *adv.* तूष्णीं, जोषं, मूकभावेन, मनसा; निर्विकल्पं.

Taciturn, *a.* संवृतिमत्, मौनिन्, अनालापशील, तूष्णीक, तूष्णींशील, भाषणविरक्त, मितवाक्-कथ. **-ity,** *s.* संवृति *f.*, मौनं, मूकभावः, अनालापः, मितवाक्, कथाविरक्ति *f.*, वाग्यम.

Tack. *v. t.* आ-बंध् 9 P, वि-आ-नह् 4 P. **2** (a vessel) नौमार्गं परि-वृत् *c.* **-s.** कीलकः, गुणः. **-ing,** *s.* नौमार्गपरिवृत्ति *f.*

Tackle, *s.* (नौ-)सज्जा, रज्ज्वादिसामग्री. **-v. t.** सज्जीकृ 8 U, संनह् *c.* **-ing,** *s.* *See* (*s.*) above

Tact, *s.* कौशलं, नैपुण्यं, वैदग्ध्यं, युक्ति *f.*, चातुर्यं; *See* **Skill. -Tactics,** *s.* युक्तिकौशलं; (of war) बलविन्यासकौशलं, व्यूहरचनाविद्या. **-Tactician,** *s.* युक्तिकुशलः, व्यूहपंडितः.

Tactile, *a.* *See* **Tangible.**

Tadpole, *s.* भेकशिशुः-शावकः.

Tag, *s.* अग्रं.

Tail, *s.* लांगू(गु)लं, पुच्छः-च्छं, लूमं; वालहस्तः, वालधिः (bushy end). **-ed,** *a.* पुच्छिन्, लांगूलयुक्त.

Tailor, *s.* सौचिकः, तुन्नवायः, सूचिकः; 't.'s work ' सूच्या सेवनं, सूचिकर्मन् *n.*

Taint, *v. t.* दुष् *c.* (दूषयति), लिप् 6 P, कलंकयति (D.). **-s.** दूषणं, कलंकः, दोषः; See **Stain.**

Take, *v. t.* ग्रह् 9 U, प्रति-परि-° (in all senses) अगृहीते राक्षसे (Mu. 1); उपदेशं गृह्णाति &c.; आ-दा 3 A. प्रति-इष् 6 P; स्वी-अंगी-कृ 8 U. **2** धृ 1 P, 10, आ-अव-लंब् 1 A. **3** (A word in a sense) परि-ग्रह्; तत्रायशब्द आनंतर्यार्थः परिगृह्यते (S. B. 23) 'is taken in the sense of' &c. 4 नी 1 P, वह् 1 P, हृ 1 P. **5** उपलभ् 1 A, अवगम् 1 P. **6** अनुभू 1 P; *See* **Suffer, Affect. 7** लभ्, आप् 5 P, अधिगम्, आ-सद् *c.*; *See* **Get. 8 Captivate,** q.v.; 't. food' आहारं सेव् 1 A; ' t. the field ' रणभूमिं अवतॄ 1 P, रणाजये युध् 4 A; 't. rest' विश्रम् 4 P; 't. root' मूलं बंध् 9 P; 't. heart' समाश्वस् 2 P, धैर्यं अवलंब्-अवष्टंभ् 9 P; *See* **Courage;** 't. fire' दह् pass., अग्निं उप-इ

2 P; 't. in hand' प्रतिपद् 4 A, उ(ऊ)रीकृ 't. place'; *See* **Happen**; 't. part in' हस्तं दा 3 U, संमिन्-सहकारिन्-सहाय-*a.* भू; 'took part in the massacre' विशसने सहायो बभूव; 't. aim' सं-धा 3 U; 't. one's way' सिध्-साध् c. (साधयति), साधयामो वर्त्म (S. 1); 't. effect' फल् 1 P, सफलीभू 1 P; 't. possession of' आक्रम् 1 U, 4 P, आविश् 6 P; 't. to task' निर्भर्त्स् 10 A, परुषं भिद् 1 P. -*v. i.* सिध् 4 P, संपद् 4 A, गुणं आवह्. 2 आश्रि 1 U, व्रज् 1 P. **-away**, अप-वि-नी 1 P, अप-, हृ 1 P, अप-ऊह् 1 U, विमुह् c.; *S.* **Remove**. **-back**, सं-प्रतिसं-हृ, प्रत्या-दा, प्रत्यानी. **-down**, अवतॄ c., नि-अव-पत् c., अधो नी. 2 लिख् 6 P. **-for**, मन् 4 A; *See* **Consider**; 'mischievousness is t. en for assiduity' चापल्यमुद्योगितां मजते. **-in**, ग्रह्, सेव्; (in the stomach) ग्रस् 1 A; नि-,ग 6 P. 2 विप्र-लभ् 1 A; *See* **Cheat**. **-off**, अपनी, अवतॄ c., उन्मुच् 6 P, अपकृष्. **-out**, बहिर्नी, अपनी. **-to**, सेव्, आश्रि, अवलंब्. **-up**, प्रतिपद्, अंगी-स्वी-कृ. 2 आरभ् 1 A, प्रवृत् c. 3 **Occupy**, **Engross**, q. v. **-upon**, (oneself) अंगीकृ, प्रति-पद्, उ(ऊ)रीकृ; (निर्वाहः प्रतिपन्नवस्तुषु Mu. 2). **-er**, *s.* ग्रहीतृ *m.*, ग्राहिन्-हारिन्-हृत् in comp. **-ing**, *a.* मोहिन्, मनोहारिन्, चित्ताकर्षिन्, मनोज्ञ; *See* **Charming**. 2 ग्राहिन्, &c. -*s.* आदानं, ग्रहणं, स्वीकारः.

Tale, *s.* कथा, उप-,आख्यानं, आख्यायिका. 2 परि-,गणना, संख्यानं; 't.-bearer' सूचकः, कर्णेजपः; 't.-bearing' पैशुन्यं, उपजापः.

Talent, *s.* मति *f.*, बुद्धि *f.*, धीशक्ति *f.* प्रज्ञा, बुद्धि or मति प्रभावः or विभवः, बुद्धिकौशलं. 2 गुणः. **-ed**, *a.* धीमत्, प्रज्ञ, सुधी, गुणिन्, गुणवत्.

Talisman, *s.* कवचः-चं, माया, रक्षाकरंडकः.

Talk, *v. i.* आ-सं-लप् 1 P, सं-,भाष् 1 A, संवद् 1 P, संमंत्र् 10 A; *See* **Converse**. -*s.* आलापः, संवादः, सं-,कथा, सं-,भाषणं, कथाप्रसंगः. 2 किंवदंती, प्रवादः; *See* **Report**; 'idle t.' प्र-,जल्पितं, प्रलापः; 'popular t.' जनप्रवादः; 'fine t.' शाब्दपांडित्यं; 'mere t.' वाङ्मात्रं. **-ative**, *a.* बहुभाषिन्, जल्पनशील, जल्प(ल्पा)क, वावदूक. **-ativeness**, *s.* वावदूकता, जल्पकता, बहुभाषित्वं. **-er**, *s.* कथकः, वक्तृ *m.*, आलापिन् *m.*

Tall, *a.* उच्च, तुंग, उन्नत, उच्छ्रित, प्रांशु; 't. in stature' उच्च or दीर्घ-देह or मूर्ति; 't. person' प्रांशुः. **-ness**, *s.* उच्चता, उच्छ्रायः, उन्नति *f.*, उच्छ्रायः; 't. of stature देहदीर्घता-उच्चता.

Tallow, *s.* (मेदाकृतिः) वसा, वपा; 't. chandler' वसावर्तिकाविन् *m.*

Tally, *v. i.* सं-वद् 1 P, तुल्य-अनुरूप-अनुगुण-*a.* भू 1 P; 't.-ing of hands' अक्षरसंवादः. -*s.* **Match**, q. v.

Talon, *s.* नखः-खं,नखरः-रं.

Tamarind, *s.* चिंचा, तिंतिडी-डिका, अम्लिका, आम्लि(म्ली)का.

Tamarix, *s.* पिचुलः, झावुकः.

Tambour, -ine, *s.* *See* **Drum** (1).

Tame, *v. t.* वि-नी 1 P, दम् c. (दमयति), नियम् 9 P, वशीकृ 8 U; (fury) शम् c. (शमयति). -*a.* विनीत, दांत, वश्य, अधीन. 2 ग्राम्य, गृहपुष्ट, गृह्य-गृह-ग्राम-in comp; 't. dove' गृहकपोतः; 't. hog' ग्राम्यशूकरः, विड्वराहः. 3 निस्तेजस्, नष्टवीर्य; नीरस, निःसत्त्व; *See* **Spiritless**. **-ed**, *a.* दांत, शांतकौर्य, विनीत. **-er**, *s.* विनेतृ *m.*, दमयिता. **-ing**, *s.* दमनं. **-ly**, *adv.* नष्टवीर्यवत्, कापुरुषवत्, क्लीबवत्. **-ness**, *s.* वश्यता, गृह्यता, &c.

Tamper, (with) *v. i.* **Meddle**, q. v. 2 (Witness &c.) कपटेन-छलेन-वशीकृ 8 U; दुष् c. (दूषयति), अन्यथा कृ, विकृ.

Tan, *v. t.* श्यामीकृ 8 U, सं-धा 3 U, शुध् c.; परिष्कृ c. **-ner**, *s.* चर्मकारः, चर्मशोधनकृत् *m.*

Tangent, *s.* स्पर्शः, स्पर्शरेखा.

Tangible, *a.* स्पर्शनीय, स्पृश्य. 2 स्पर्शवेद्य, प्रकट सुस्पष्ट, विभाव्यमान.

Tangle, *v.* **Entangle**, q. v. **-ed**, *a.* जटिल, संमिश्र, संकुल, संकीर्ण.

Tank, *s.* तडागः-गं, जलाशयः, कासारः, वापी, दीर्घिका (large t.); *See* **Pond**.

Tankard, *s.* चषकः.

Tantalize, *v. t.* आशां-तृष्णां-वृध् c., आशां वर्धयित्वा विप्रलभ् 1 A, जाताशाः खंड् 10 or भंज् 7 P. 2 (general) **Cheat**, q. v.

Tantamount, *a.* सम, तुल्य, समार्थक, तुल्यार्थक.

Tantrum, *s.* निष्कारण वैरभावः or दुःशील.

Tap, *v. t.* लघु आ-अभि-हन् 2 U or प्र-हृ 1 P 2 छिद्रयति (D.), छिद्रं कृ 8 U. -*s.* मृदु-लघु-चपेटः, लघ्वाघातः-प्रहारः.

Tape, *s.* दीर्घपट्टः-पंधनी.

Taper, *s.* दीपिका, क्षुद्रदीपः.

Tapering, *a.* वृत्तानुपूर्व (K. I. 35) गोपुच्छाकार,शुंडाकृति.

Tapestry, *s.* चित्रयवनिका.

Tapeworm, *s.* कृमिः, अंत्रकीटः.

Tapis, *s.* *See* **Tapestry**.

Tar, *s.* अ-,रालः, सर्जरसः; *See* **Pitch**.

Tardy, *a.* मन्दगामिन्, दीर्घसूत्रिन्, मंद; *See* **Slow.**

Target, *s.* क्षुद्रचर्मन् *n.* **2** शरव्यं, लक्ष्यं-क्षं. **-eer,** *s.* चर्मधरः.

Tariff, *s.* (पण्य-) शुल्कपत्रिका.

Tarnish, *v. t.* दुष् *c.* (दूषयति). कलंकयति (D.); *See* **Stain.** **-v.** *i.* मलिनीभू 1 P, दुष् 4 P.

Tarpaulin, *s.* सर्जरसलिप्तं क्षामं.

Tarry, *v. i.* विलंब् 1 A, चिर(रा)यति (D.); अव-स्था 1 A.

Tart, *a.* अम्ल, क्षुक. **-s.** अम्लीय.

Tartar, *s.* दंतशर्करा, मलं, पिप्पिका.

Task, *s.* कार्यं, नियुक्तं कर्म, कर्तव्यं, कार्यभा-(भ)रः, व्रतं; 'one who does a t. imposed' व्रातीनः; 'to take to t.' अधि-क्षिप् 6 P, निर्भर्त्स् 10 A; *See* **Reproach.** **-v.** *t.* कार्यभारं न्यस् 4 U, गुरुकार्ये नियुज् 7 A, 10.

Tassel, *s.* कौशेयसूत्रगुच्छः.

Taste, *v. t.* आ-,स्वाद् 1 A or *c.*, रस् 10, भाक्ष् 9 P, लिह् 2 U. **-v.** *i.* Oft. by (*s.*). **-s.** आ-,स्वादः, रसः. **2** आ-,स्वादनं, रसनं. **3** (Sense of t.) रसनं, रसनेन्द्रियं, रुचि *f.* **4** अभि-,रुचिः, प्रवृत्ति *f.*, शीलं, व्यसनं; 't. s differ', 'different men have different t. s' भिन्नरुचिर्हि लोकः; 'he was not to her t.' स न तस्या रुचये बभूव (K. vi. 44); 'of like t. s' समानशील. **5** रसज्ञता, रसिकता; 'devoid of t.' अ-रसिक, अरसज्ञ. **-er,** *s.* आस्वादकः. **-y, -ful,** *a.* रुचिकर (रि *f.*), स्वादु, मिष्ट, सरस, सुरस, रुच्य. **2** हृद्य, मनोहर, हृदय-ग्राहिन्. **-fully,** *adv.* सकौशलं, रसज्ञतया, यथारुचि. **-less,** *a.* नीरस, विरस, रसहीन.

Tatter, *s.* चीरं, चीरचीवरं, नक्तकः, कर्पटः; *See* **Rag.** **-ed,** *a.* जीर्ण, जर्जरित.

Tattle,-er, *See* **Babble,-er.**

Tattoo, *v. t.* रंज् *c.* **-s.** पटहप्रणादः.

Taunt, *v. t.* आ-अधि-क्षिप् 6 P, निंद् 1 P, उपालभ् 1 A; *See* **Censure.** **2** सोल्लुंठनं-सोत्प्रासेन-वद् 1 P; 'enough of t. ing' अलमलमुपालम्भ. **-s.** आ-अधि-क्षेपः, उपालंभः, सोल्लुंठनोक्ति *f.* **-ing,** *a.* साक्षेप, सोपालंभ, आक्षेपगर्भ; *See* **Sarcastic.**

Taurus, *s.* वृषभः,-राशिः.

Taut, *a.* दृढं आतत.

Tautology, *s.* पुनरुक्ति *f.* पुनरुक्तत्वं, पौन-रुक्त्यं. **-ous,** *a.* पुनरुक्त, पुनरुक्तभूत.

Tavern, *s.* मंजा, शौंडापानं, शुंडा; पथिकाश्रमः; 't. -keeper' शौंडिकः.

Tawdry, *a.* बाह्योज्ज्वल, भ्राजशोभन, मिथ्या-शोभायुक्त.

Tawny, *a.* पिंग, पिंगल, पिशंग (गी *f.*), कपिल, कडार, कद्रु.

Tax, *s.* करः, बलिः, शुल्कः-ल्कं, राजस्वं. **2** भारः. **-v.** *t.* करं न्यस् 4 P (with loc.) or दा *c.* (दापयति) or ग्रह् 9 U (with abl.). **2** आयस् *c.*, अत्यंतं पीड् 10. **3** निंद् 1 P, दोषं ग्रह् 9 U; *See* **Censure.** **-able,** *a.* करार्ह, शुल्क-कर-अधीन. **-ation,** *s.* कर-ग्रहणं-आधानं, शुल्कसंकल्पनं.

Teach, *v. t.* अधि-इ *c.* (अध्यापयति), शिक्ष् *c.*, पठ् *c.*, उपदिश् 6 P, शास् 2 P. **-er,** *s.* अध्यापकः, शिक्षकः, गुरुः, उपदेष्टृ *m.*, शास्तृ *m.*; 'religious t.' उपाध्यायः, आचार्यः. **-ing,** *s.* अध्यापनं, शिक्षा-क्षण, उपदेशः.

Teak, *s.* अर्जुनः; 't.-wood' अर्जुनं, अर्जुनकाष्ठं.

Team, *s.* युग्मं or by pl.

Tear, *s.* अश्रु-स्रु *n.*, बाष्पः, अस्रं, नेत्रांबु *n.* -जलं-उदकं, नयनवारि, and sim. comp.; 'with t. s in eyes' सबाष्पं, सास्रं, बाष्पाकुलनयन-*a.*. 'starting of t. s' बाष्पोद्गमः, उद्बाष्पत्वं; 'flood of t. s' धारासु, अश्रुधारा; 'having the eyes filled with t. s' बाष्पाकुल, अश्रुनयन, सास्र, अश्रुमुख, अश्रुपरिप्लुतेक्षण, पर्यश्रु. **-ful,** *a.* सबाष्प, साश्रु अश्रु-संकुल-पूर्ण-परिप्लुत. **-fully,** *adv.* सास्रं, सबाष्पं, साश्रु.

Tear, *s.* छिद्रं, विदरः, भिदा; *See* **Rent.** **-v.** *t.* वि-,दॄ 9 P or *c.*, वि-,शॄ 9 P, विदल् *c.*, भिद्-निर्भिद्- 7 P; 'she tore her hair for grief' विललाप विकीर्णमूर्धजा (K. iv. 4); 't. to pieces' शकलीकृ, चूर्ण् 10. **-down,** अप-कृष् 1 P, निकृष्. **-off,** आच्छिद् 7 P, अप-नी 1 P, व्यपोह् 1 P, निर्हृ 1 P; 't. off the hair' केशान् उल्लुंच् 1 P; *See* **Pull** also; 'I am unable to t. myself off from the cane-bower' निर्गंतुं सहसा न वेतसगृहाच्छक्नोमि (S. 3). **-up,** उन्मूल् 10, उत्-वि-पट् 10, उद्-धृ 1 P, उच्छिद्, उत्खन्, व्यपकृष् *c.* **-v.** *i.* विदॄ-विभिद्-pass. **2** सवेगं चल् 1 P. **-ing,** *s.* वि-,दारणं, विभेदनं, पाटनं, &c.

Tease, *v. t.* क्लिश् 9 P, क्षुभ् *c.*, अर्द् 1 P or *c.*, बाध् 1 A, पीड् 10; *See* **Injure.**

Teat, *s.* वृंतं. **2** चूचुकं, स्तनाग्रं.

Technical, *a.* पारिभाषिक-सांकेतिक-(की *f.*). **-ity,** *s.* पारिभाषिकशब्दः, परिभाषा. **2** पारिभाषिकत्वं. **-ly,** *adv.* परिभाषा-नुसारेण.

Technology, *s.* परिभाषा. **2** शिल्प-कला-विज्ञानं; 'school for t.' शिल्पशाला.

Tedious, *a.* अतिदीर्घ, दीर्घसूत्र, दीर्घतर; 'passes the night ...'

अमावह, क्लांति-खेद-कर (रीf.). 3 मंद, मंथर, दीर्घसूत्रिन्, चिरक्रिय. -ly, *adv.* अति-सु-दीर्घं. -ness, s. अतिदैर्घ्यं, श्रमावहता; दीर्घता ex. by (*a.*)

Teem, v. i. **Abound,** q. v. **2** बाहुल्येन उत्पद् c. or प्र-सू 2, 4 A. -ing, *a.* परिपूर्ण, पूर्णगर्भ, आढ्य, समाकुल, आकीर्ण, प्रचुर; *See* **Abundant.**

Teetotal, *a.* मद्यनिवृत्तिविषयक. -(l) er, मद्यात् निवृत्तः, निवृत्तमद्यः.

Tegument, s. आवेष्टनं, आवरणं, कवचः-चं, पुटः-टं.

Telegram, s. विद्युत्प्रेरितवार्ता, विद्युत्संदेशः-वार्ता. -**Telegraph,** s. विद्युद्यंत्रं विद्युद्वार्तावहः.

Teleology, s. मीमांसा, हेतुविद्या.

Telephone, s. दूरभाषणयंत्रं.

Telescope, s. दूरदर्शनयंत्रं.

Tell, v. t. कथ् 10, आचक्ष् 2 A, शंस् 1 P, आ-नि-विद् c., आ-, ख्या 2 P or c. (ख्यापयति) (with dat.); वर्ण् 10, कत्त 10, श्रु c., नि-, गद् 1 P, व्या-उदा-हृ 1 P, अभि-धा 3 U, निरूप् 10; *See* **Say** also. **2** गण् 10, स-परिसं-ख्या; ' t. beads ' जप् 1 P. -v. i. सिध् 4 P, सफलीभू 1 P, गुणं-कार्यं-कृ, यशः-सिद्धिं-दा 3 U. **2** (upon) गुणं-कार्यं-जन् c. or उत्पद् c.; अवसद् c; अप-चि 5 U, क्षि 5 P or c. **2** दुर्बलीकृ; *See* **Impair;** ' t.-tale ' सूचकः, पिशुनः, कर्णेजपः. -er, s. कथकः, आख्यायकः. -ing, s. कथनं, शंसनं &c.

Temerity, s. साहसं, क्षिप्रकारिता, असमीक्ष्य-अविमृश्य-कारिता; *See* **Rashness.**

Temper, v. t. संमिश्र् 10, संयुज् 10, संयुक्त् 6 P. **2** मृदूकृ 8 U, स्निग्धीकृ, प्र-, शम् c. (शमयति), लघूकृ, लघयति (D.), नियम् 1 P; *See* **Moderate.** -s. शीलं, प्रकृति f., स्व-, भावः; ' good t. ' सुशीलं, सद्भावः, सौजन्यं; *See* under ' **Good. 2** समता, अक्षोभः, असंभ्रमः, संयमः, रोषाभावः, चित्त-स्वास्थ्यं, समता; ' to lose t. ' क्षुभ् 4 P, कुप्-क्रुध् 4 P. **3 Anger,** q. v. -**Temperament,** s. प्रकृतिः, स्वभावः, देह or शरीर-प्रकृतिः or स्वभावः; 'of a choleric t.' पित्त-प्रकृति. -**Temperate,** *a.* परि-, मित, सम-र्याद, नियत. **2** प्र-, शांत, अक्षुब्ध, धीर, अको-पन, अचंड. **3** संयत, संयमिन्, संयतवृत्ति, संयमशील; ' t. in eating' मिताहार, अल्पा-हार, मिताशिन्, संयताहार; ' t. in drinking ' &c.; *See* **Moderate. 4** सम-शीतोष्ण, मंदोष्ण. -ly, *a v.* धीरं, शांत्या, अक्षोभेण, निरुद्वेगं, शांतचेतसा. -**Temperance,** s. संयमः, निग्रहः, परिमितता, नियमः, नियतत्वं, मिताहारः, मिताशनं, मित-

Temperature, s. उष्ण-धर्म-परिमाणं.

Tempest,-ous, *See* **Storm,-y.**

Temple, s. देवालयः, देवतायतनं-निकेतनं, सिद्धायतनं, देवगृहं-भवनं-मंदिरं, and sim. comp.; मठः, विहारः (Jaina t.); ' endowment of a t.' देवस्वं. **2** कुंभः, कपोलः, शंखः.

Temporal, *a.* ऐहिक-सांसारिक-ऐहलौकिक-प्रापंचिक-लौकिक- (की f.).

Temporary, *a.* अचिरस्थायिन्, अचिर-अल्प-कालिक (की f.), अशाश्वत (ती f.), असनातन (नी f.), अचिर, अनित्य, क्षणिक. -ily, *adv.* स्वल्पकालं, अचिरं, अशाश्वतं.

Temporize, v. i. यथाकालं-यथासमयं-व्यवहृ 1 P; छंदोनुवृत् 1 A -ing, *a.* समयानु-वर्तिन्, कालानुरोधिन्.

Tempt, v. t. प्र-वि-लुभ् c., वि-आ-कृष् 1 P, वि-, मुह् c.; *See* **Allure. 2** परीक्ष् 1 A. -ation, s. प्र-वि-लोभनं, आकर्षणं, विकारहेतुः, विकारहेतौ सति विक्रियंते येषां न चेतांसि त एव धीराः (K. I. 59) 'these being t. s &c. '; ' liable to t. s ' प्रलोभनास्पदं. -er, s. प्र-वि-लोभकः मोहकः. -ing, s. आकर्षिन्, वि-, मोहिन्, प्रलोभिन्.

Ten, *a.* दशन्; ' in t. ways ' दशधा; ' t. times ' दशकृत्वः. -th, *a.* दशम (मी f.).

Tenable, *a.* रक्षणीय, प्रतिपादनीय.

Tenacious, *a.* ग्राहिन्, संलग्नशील. **2** धारणा-वत्; *See* **Retentive. 3** साग्रह, प्रतिनि-विष्ट, आग्रहिन्; दृढसंकल्प, स्वमताग्रहिन्; *See* **Obstinate. 4** श्यान, सांद्र, पिच्छिल. -ness,-**Tenacity,** s. ग्राहकत्वं, धारणा-शक्ति f. **2** ग्राहः; (एको ग्राहस्तु मीनानां), आ-, ग्रहः, अभिनिवेशः, दृढता, श्यानता.

Tenant, s. भूम्यधिवासिन् m.; (in general) गृहनिवासिन्. -v. t. परभूमिं आधिवस् 1 P or अधि-स्था 1 P.

Tend, v. i. प्रवणी-भू 1 P, प्रवृत् 1 A, प्रवह् 1 P, उद्दिश् 6 P, अभिसं-धा 3 U; oft. by आलु, शील in comp.; ' t. ing to fall ' पतयालु, पतनशील, पिपतिषु; ' t. ing to the same object ' तदुद्दिष्ट; ' t.s to the centre ' केंद्राभिमुखीभवति. **2** (to) आवह् 1 P; क्लृप् 1 A, संपद् 4 A (with dat.), (किंचिदप्यमपि मधुप्रयोजनं न मे धृतिमावहति Rat. 1); कल्पते रक्षणाय &c.; oft. by dat. with or without भू; *See* **Lead.** -v. t. चर् c., पा c. (पालयति), रक्ष् 1 P (of cattle only). -ency, s. प्रवृत्ति f., प्रव-णता, प्रावण्यं, स्वभावः, शीलता-आलुता in comp.

Tender, *a.* सुकुमार, कोमल, मृदु, पेलव; *See* **Delicate, Soft. 2** सुलभवेदन-दुःख, दुःसह, मृदु. **3** बाल, कौमार (री f.). 4

hearted' करुणात्मक, कोमल-मृदु-चित्त, क्लिन्नहृदय, दयार्द्रचित्त —*v. t.* उपानी 1 P, उपह 1 P. **2** उपक्षिप् 6 P, उपन्यस् 4 U. —*s.* उपन्यासः, प्रस्तावः. **-ly,** *adv.* सकरुणं, सदयं, सानुकंपं,सादरं,करुणार्द्रबुद्ध्या. **-ness,** *s.* मार्दवं, कोमलता, स्निग्धता, कारुण्यं, दयालुता, वात्सल्यं, &c.

Tendon, *s.* शि(सि)रा; स्नायु *f.*, स्नसा. **-Tendinous,** *a.* शिराल;स्नायुमय (यी *f.*)

Tendril, *s.* तंतुः; (of creepers) प्रतानं, किसलयः-यं; *See* **Shoot.**

Tenement, *s.* भवनं, आयतनं; 'earthly t.' देहः. **2** स्थावरं.

Tenet, *s.* मतं, अभिप्राय..

Tenour, *s.* भावः, भावार्थः, अभिप्रायः, तात्पर्यं. **2** क्रमः, अन्वयः.

Tense, *s.* कालः. —*a* आतत. **-ion,** *s.* आ-, ततिf.

Tent, *s.* वस्त्र-पट-वेश्मन् *n.*,दूष्यं-ष्यं,पटमंडपः-गृहं; 'royal t.' उपकार्या, उपकारिका; 'pitch a t.' दूष्यं रच् 10 or उप-क्लृप् c.

Tentative, *a.* परीक्षार्थं कृत, तत्कालोपयुक्त.

Tenuous, *a.* *See* **Thin. -Tenuity,** *s.* *See* **Thinness.**

Tepid, *a.* कोष्ण, कवोष्ण, ईषदुष्ण, मंदोष्ण.

Tercentenary, *a.* त्रिशतवर्षोत्सविन् —*s.* त्रिशतसांवत्सरिको विधिः.

Tergiversation, *s.* वाक्छलं, अपलापः; *See* **Prevarication.**

Term, *s.* पर्यंतः, अंतः. **2** मर्यादा, अवधिः, सीमा; 'the utmost t.' परमावधिः; 't. of life' आयुर्मर्यादा, आयुःसीमा; 'the t. of life is small' स्वल्पं आयुः. **3** कार्यनिर्वाहसमयः-कालः. **4** पदं, शब्दः, संज्ञा. **5** व्यवहारः, वृत्ति *f.*, भावः; 'on friendly t.'s' मित्रभावेन, सद्भावेन, मैत्र्या, सुखेन; 'ill t.s' अप्रीति *f.*, विरोधः, असंतोषः. **6** (Math.) पदं. **7** अवयवः (of a syllogism). **8** (T. s) समयः, संकेतः, संविद् *f.*, प्रतिज्ञा. —*v. t.* आ-ख्या 2 P, अभि-धा 3 U, आह्वे 1 P; *See* **Call, Name. -less,** *a.* निरवधि, अनंत. **-inable,** *a.* अंत्य, सीमा in comp. **-inal,** *a.* अंत्य,अंतिम. **-inus,** *s.* अंतः,सीमन् *f.* **-Terminate,** *v. t.* अव-सो 4 P, समाप् c. —*v. i.* समाप् pass. **-ion,** *s.* अंतः, अवसानं, परिणामः, निष्ठा, समाप्ति *f.*, निवृत्ति *f.* **2** प्रत्ययः.

Termagant, *s.* अतिकलहप्रिया, कर्कशा, चंडी; *See* **Shrew, Scold.**

Terminology, *s.* परिभाषा.

Terpsichorean, *a.* नृत्यसंबंधिन्.

Terrace, *s.* अलिंदः,-भूमि *f.*, प्रघा(घ)णः. **2** **Roof,** q. v. **3** वितर्दि *f.*, वेदिका.

Terraqueous, *a.* जलस्थलात्मक.

Terrene, Terrestrial, *a.* पार्थिव (वी *f.*), भौमिक (की *f.*), भौम (मी *f.*), भू in comp. **2** लौकिक, ऐहिक (की *f.*); *See* **Worldly. 3** भूचर, स्थलज, भूवासिन्; 't. globe' भूगोलः.

Territory, *s.* प्र-,देशः, राष्ट्रं, राज्यं, भूमि *f.* **-ial,** *a.* राष्ट्रिय; by (*s.*) in comp.

Terror, *s.* सं-,त्रासः, भयं, साध्वसं, शंका. **2** भयहेतुः- स्थानं, शंकास्थानं; 'a t. to the wicked' शठानां भयप्रदाता (Mr. 9). **-Terrible,-Terrific,** *a.* घोर, दारुण, भीषण, भीम, उग्र, कराल, विकट. **-Terribly,** *adv.* दारुणं, बलवत्, घोरं, उग्रं. **-Terrify,** *v. t.* सं-,त्रस् c., भी c., *See* **Fright, -ful,** &c.

Terse, *a.* लाघवान्वित, संक्षिप्त, लघुपद. **-ness,** *s.* लाघवं, संक्षेपः.

Tertian, *s.* तृतीयकः-ज्वरः, त्र्यैहिकविषमः (t. ague).

Tertiary, *a.* तृतीयक, तृतीयिन्.

Test, *v. t.* परीक्ष् 1 A, (मायां मदीयामुद्भाव्य परीक्षितोसि R. II. 62), विमृश् 6 P, (शाक्यप्रयोगेषु च मां विमृशतु M. 1). —*s.* परीक्षा, विमर्शः, प्रतीति *f.* **2** प्रमाणं; (something whereby to t.) निकषः, निकषग्रावन् *m.*; 'this should be put to t.' एतत्प्रतीतिकरणार्थ; *See* **Touch.**

Testaceous, *a.* कंबुविशिष्ट, शंखवासिन्.

Testament, *s.* मृत्युलेखः-पत्र, इच्छापत्रं. **2** संहिता. **-ary,** *a.* मृत्युपत्रदत्त.

Testator, *s* मृत्युलेखकर्तृ *m.*

Testicles, *s.* अंडः,-कोषः-शः, मुष्कः, वृषण फलं (in dual).

Testify, *v. t.* साक्ष्यं दा 3 U, प्रमाणयति (D.), प्रमाणीकृ 8 U. **2** प्रकाश् c., विवृ 5 U, व्यंज् 7 P or c., प्रकटीकृ; आविष्कृ; (by words) ब्रू 2 U, वच् 2 P &c.

Testimony, *s.* साक्ष्यं, प्रमाणं, प्रामाण्यं. **-Testimonial,** *s* प्रमाणपत्रं-लेखः.

Testy, *a.* *See* **Fretful.**

Tetanus, *s.* धनुर्वातः.

Tete-a-tete, *s.* रहः-संलापः-प्रत्यासत्ति *f.*

Tether, *s.* बंधनरज्जु *f.*-सूत्रं. —*v. t.* (रज्ज्वा) बंध् 9 P.

Tetrad, *s.* चतुष्टयं, चतुष्कं.

Tetragon, *s.* चतुर्भुजः, चतुरस्रं. **-al,** *a.* चतुरस्र, चतुष्कोण.

Text, *s.* मूलं, मूलपंक्ति *f.*, मूलग्रंथः. **2** श्रुति *f.*, सूत्रं, वचनं, वाक्यं **-ual,** *a.* मौलिक (की *f.*), मौल (ली *f.*).

Textile, *a.* तांतव (वी *f.*), तंतुनिर्मित.

Texture, *s.* विन्यासः, वि-,रचना-नं, ऊति *f.*, वापः-यः. **2** तंतु-सूत्र-गुणः. **3** तांतवं.

Tew *v. t.* *See* **Ply.**

Than, *conj.* Ex. by abl. of word following it; मत्तोपि बलाद्दूरीयसी &c.; with

'better' ex. by न च, न तु, न पुनः; *See* **Prefer, Better**; oft. ex. by अपेक्ष्य (with acc.), अपेक्षया in comp.

Thank, *v. t.* उपकृत-अनुगृहीत-*a.* अस्मि इति वद् 1 P, ('Say,' q. v.); कृतज्ञतां दृश् c. or आविष्कृ 8 U. कृतोपकारं स्तु 2 U or प्रशंस् 1 P; 't-ed his deliverer' भवतानुगृहीतः-उपकृतः-अस्मि इति रक्षितारमुवाद; '(I) t. you', 'thanks' अनुगृहीतोस्मि, महाननुग्रहः प्रसादः. 't. God' दिष्ट्या. **-s.** (Thanks) कृतज्ञतादर्शनं-प्रकाशनं, उपकारस्तुति *f.*, धन्यवादः; better ex. by (*v.*); 'accept my t. s' by (*v.*). **-ful,** *a.* कृतज्ञ, कृतवेदिन्, उपकारज्ञ, कृतज्ञतादर्शिन्. **-fully,** *adv.* कृतज्ञतापूर्वं, कृतज्ञतया. **-less,** *a.* अकृतज्ञ, कृतघ्न. **-Thanksgiving,** *s. See* (*s.*).

That, *a.* तद् (सः-सा-तत्). 2 यद् ((यः-या-यत्), oft. by comp.; 'he t. has strength' सबल, बलिन् &c. **-conj.** इति (after assertions) यथा, यत् (at beginning) with or without इति; sometimes not ex. 2 (Purpose) इति with pot. mood or अर्थं in comp.; 'Oh t.' *See* **Would.**

Thatch, *s.* छदिस् *f.*, पटलं, तृणपटलं-छदिः. **-v. t.** तृणच्छदिना आ-,छद् 10. **-er,** *s.* तृणपटलकारः.

Thaw, *v. i.* द्रु 1 P. विली 4 A. गल् 1 P. द्रु c., द्रवीकृ, वि-ली c.; *See* **Melt.** **-s.** हिम or तुषार-द्रुति *f.* or स्रावः.

The, (Article) Ex. by तद् (सः-सा-तत्) or अदस् (असौ-अदः), gen. not ex. 2 (With comp. adj.) by यथा यथा-तथा तथा; यथा यथा यौवनमतिचक्राम तथा तथा अनपत्यताजन्मा अवर्धतास्य संतापः (Ka. 59), 't. older he grew, t. greater his torment' &c.; 't. sooner, t. better' यथा यथा लघु कार्यं संपाद्यते तथा तथा अधिकं श्रेयो भवेत्; 't. more so' विशेषतः, विशेषेण.

Theatre, *s.* रंगः,-भूमि *f.*,-शाला, नृत्य-नाट्य शाला, नाटकगृहं. **-Theatrical,** *a.* नाटक, नाट्य in comp.; 't. performance' नाटकप्रयोगः.

Theft, *s. See* under **Thieve.**

Theism, *s.* ईश्वरवादः, आस्तिक्यवादः, आस्तिक्यं. **-Theist,** *s.* ईश्वरवादिन् *m.*, आस्तिकः.

Theme, *s.* विषयः, प्रकरणं, वस्तु *n.*, प्रबंधः.

Then, *adv.* तदा, तदानीं, तस्मिन्काले. 2 ततः, अनंतरं, अथ. 3 तर्हि; तत्; 'now and t.' कदापि, कदाचित्; 'so t.' एवं, तर्हि; 'what t.' ततः किं. **-Thence,** *adv.* ततः, तस्मात्, तस्मात् स्थानात्; 't.-forth', 't. forward' ततः प्रभृति-आरभ्य, तदाप्रभृति.

Theocracy, *s.* ईश्वरप्रभुत्वं, ईश्वरकर्तृकत्वं.

Theogony, *s.* देवोत्पत्ति *f.* -वंशः.

Theology, *s.* ईश्वर-ब्रह्म-ज्ञानं, परमार्थविद्या, अध्यात्म-ज्ञानं-विद्या. **-ian,** *s.* परमार्थविद् *m.*, ईश्वरज्ञानविशारदः, ब्रह्म-विद्-ज्ञानिन्, वेदांती, अध्यात्मवादी. **-ical,** *a.* ex. by (*s.*) in comp., आध्यात्मिक-पारमार्थिक-(की *f.*).

Theorem, *s.* प्रमेयोपपाद्यं.

Theory, *s.* मतं, सिद्धांतः; वादः; 't. of evolution' परिणामवादः; नास्तिकमतं &c. 2 कल्पना, तर्कः, मनःसृष्टि *f.* 3 आगमः, शास्त्रं, उपपत्ति *f.* (as opp. to 'practice' प्रयोगः), शास्त्रेष्वप्यगाभिनौ प्रयोगनिपुणौ च (M. 3) 'well versed in t. and practice'; oft. मंत्रतंत्रं 't. and practice.' **-Theoretical,** *a.* व्यवहारायोग्य, काल्पनिक-अव्यावहारिक- (की *f.*). **-ally,** *adv.* कल्पनापूर्वं. **-Theorize,** *v. t.* मतं उपकल्प् c.

Theosophy, *s.* ईश्वरवादः-ज्ञानं. **-ist,** *s.* अध्यात्मविद्.

Therapeutic, *a.* शांतिकर (री *f.*), रोगघ्न (घ्नी *f.*); 't. s' भेषजशास्त्रं.

There, *adv.* तत्र, तस्मिन्स्थाने, तत्स्थले. 2 (Expletive) by अस्ति. **-interj.** पश्य, पश्य; 'here and t.' इतस्ततः; 't.-about' (t. s) तत्रैव कुत्रापि; तत्स्थानसमीपे; (with number) उप-आसन्न in comp.; *See* **Nearly, About**; '20 or t.-abouts' उप-आसन्न-विंशाः (नराः) &c., 't.-after' ततः, तदनु, ततः परं, तदनंतरं; 't.-at' तेन, तत्र; तदुपरि; ततः; 't.-by' तेन; तेनोपायेन, तद्द्वारेण; 't.-fore' अतः, तस्मात्, तस्मात् कारणात्-हेतोः, ततः; तत्, इति हेतोः, अनेन कारणेन-हेतुना; 't.-in' तस्मिन्विषये; 't.-of' तत्रत्य, तत्रस्थ, तत्रस्थ (*a.*); तस्य, अस्य, तदीय; 't.-upon' ततः, &c.

Thermal, *a.* उष्णतासंबंधिन्.

Thermometer, *s.* उष्णमापनयंत्रं.

Thesis, *s.* प्रतिज्ञा, पूर्वपक्षः. 2 प्रबंधः.

Thews, *s. See* **Muscle,** (1). 2 शरीरबलं.

Thick, *a.* घन, निबिड, अविरल, सांद्र, गाढ; नीरंध्र, इयान. 2 स्थूल, महत्, विपुल; *See* **Large.** 3 मंद, जड, स्थूल; *See* **Dull**; 't.-headed' मंदधी; 't.-skinned' कठिन, सहिष्णु; मंद, स्थूल. 4 पंकिल, कलुषित, आविल. 5 (Of a solid body) घन. **-s.** तुमुलं, शिरस् *n.*, मूर्धन् *m.*, संकुलं; 'in the t. of the fight' रणशिरसि, रणसंमर्द-भूमि. **-adv.** अविरतं, निरंतरं, अविरलं, निबिडं, by (*a.*) in comp.; 't. sown' घनोप्त, सांद्राच्छादित &c; 't-set' सु-, संहत, उपचित.

-en, v. t. घनीकृ 8 U, निबिडीकृ &c. -v. i. घनीभू 1 P, निबिडीभू; 'the horizon t.-ed' दिङ्मंडलं (अभ्रपटलैः) घनीभूतं, अभ्रपटलाकीर्णं. -et, s. गहनं, गुल्मः-ल्मं, निबिडारण्यं, वृक्ष-तरु-गहनं. -ly, adv. निरंतरं, अविरलं, निबिडं, गाढं. -ness, s. घनता, सांद्रता, संहति f., &c. 2 बेधः, घनता, पिंडत्वं. 3 (Of voice) स्वरभंगः.

Thieve, v. t. चुर् 10, मुष् 9 P, स्तेन् 10. -ish, a. अपहरण or चौर्य-शील or वृत्ति. चौर्यासक्त. -ishness, s. चौर्यासक्ति f. -Thief, s. स्तेनः, चोरः, चौरः, तस्करः, दस्युः, मोषकः, कुंभीलकः, पा(प)टच्चरः, प्रतिरोधिः, परास्कंदिः, मलिम्लुचः, ऐकागारिकः. -Theft, s. स्तेयं, मोषः, चौर्यं, चौ(चो)रिका, स्तैन्यं.

Thigh, s. ऊरुः (m.), सक्थि n.; 'having beautiful t.s' वामोरुः-रू.

Thimble, s. अंगुलित्राणं, अंगुलिसुत्रं.

Thin, a. प्र-,तनु, सूक्ष्म, विरल, अस्थूल, श्लक्ष्ण. 2 कृश, क्षीण, शात; 'grown t.' तन्वंग-कर्शितांग (गी f.); 'having a t. waist' तनुमध्यम, क्षीणमध्यम; See **Slender.** -v. t. विरलयति (D.), ऊनी-विरली-कृ 8 U, संख्यां अप-चि 5 U or क्षि 5 P or c. 2 तनूकृ, तक्ष् 1, 5 P, उल्लिख् 6 P. -ly, adv. विरलं, असंहतं. -ness, s. तनुता, सूक्ष्मता, वैरल्यं, कार्श्यं; क्षीणता.

Thing, s. वस्तु n., द्रव्यं, पदार्थः, अर्थः. 2 विषयः, अर्थः.

Think, v. चिंत् 10, ध्यै 1 P, विमृश् 6 P, आ-पर्या-लोच् 10, वि-,तर्क् 10, वि-चार् c., मनसा क्लृप् c., सं-,भू c. 2 मन् 4 A, गण् 10; See **Consider;** 't. much of' बहु मन्; 'I t. so' इति मे मतिः; 'does not t. of going to his capital' नगरगमनाय मतिं S. 2); 't. of' स्मृ 1 P, मनसि कृ 'I never thought of winter' हेमंतः समुपस्थास्यति इति चिंता नैव मनसि कृता, इति नयालोचितं. -er, s. सूरिः, मुनिः; (lit.) चिंतकः; See **Philosopher.** -Thought, s. (act) चिंता, ध्यानं; आलोचनं; (result also) विचारः, विमर्शः, विचारणा-णं, भावना, मनोव्यापारः, चित्तचेष्टा. 2 मतं, अभिप्रायः, मनोरथः. 3 मति f., बुद्धि f., कल्पना, विचारः, संकल्पः, मनोगतं, चित्तं, मनस् n., तर्कः, चित्त-मनो-वृत्ति f., भावना; 'one's inmost t. s' अंतर्गतं मनः; 'evil t.' कुमतिः; 'benevolent t.' परहितबुद्धिः; 'swift as t.' मनोजव; 'beyond t.' अचिंत्य; 'in t., word or (actual) deed' मनोवाक्कायकर्मभिः. -ful, a. चिंताशील, विचार-विवेक-शील, विमृश्य-समीक्ष्य-कारिन्, आत्मदर्शिक (की f.), सावधान, अप्रमत्त. 2 चिंता-कुल-पर-निमग्न, ध्यानपर. -fully, adv. विचिंत्य, विमृश्य, विचार्य, आलोच्य, सविवेकं, पर्यालोच्य. -fulness, s. सविचारता, विवेकिता, समीक्ष्यकारिता. -less, a. प्रमत्त, अनवहित, असावधान. See **Negligent.** 2 निश्चिंत, वीतचिंत. 3 असमीक्ष्य-अविमृश्य-कारिन्, क्षिप्रकारिन्, विवेक-विचार-हीन, सहसा, मूढ. -lessly, adv. मोहात्, रभसा, अविमृश्य, अविवेकेन, अविचारेण. -lessness, s. अविवेकः, अविचारः, रभसः, मोहः.

Thirst, v. t. तृष् 4 P, (fig. also); पा desid. (पिपासति), उदन्यति (D.). -s, तृष्णा, (fig. also); द्रव्यतृष्णा, जीवितवृष्णा &c.; पिपासा, तृषा, तृष् f., उदन्या, पानेच्छा. -y, a तृषित, पिपासित, तृषार्त-आकुल-आतुर, सतृष्ण, पिपासु, उदकार्थिन् तृष्णाविष्ट-आक्रांत.

Thirteen, a. त्रयोदशन्. -th a. त्रयोदश (शी f.).

Thirty, a. त्रिंशत् f. -ieth, a. त्रिंश (शी f.), त्रिंशत्तम (मी f.).

This, pron. a. एतद् (एषः-एषा-एतत्), इदं (अयं-इयं-इदं); 't. way', 't. way' इतः इतः.

Thistle, s. गोक्षुरः-रकः, गोकंटकः, भक्षटकः, स्वादुकंटकः, पलंकषा, इक्षुगंधा, श्वदंष्ट्रा, (plant).

Thither, adv. तत्र. -ward, adv. तं देशं प्रति.

Thong, s. वरत्रा, न(व)ध्री, चर्मरज्जु f.

Thorax, s. उरः-वक्षः n.,-स्थलं.

Thorn, s. कंटकः-कं, शल्यं; शिताग्रः, तरु-कुसुम-नखः; (fig.) कंटकः, शल्यं; 'he is a t. in your side' अंतःप्रसुप्तं शल्यं-कंटकं-इव स त्वां पीडयति; 'there is no rose without a t.' सुखं नाम दुःखमिश्रितमस्त्येव, दुःखासंभिन्नं सुखं नैव प्राप्यते. 2 कंटलकता-वृक्षः; 't.-apple' धत्तूरः, धुस्तूरः, उन्मत्तः, कितवः, धूर्तः, कनकाह्वयः, मातुलः, मदनः; (fruit) मातुलपुत्रकः. -less, a. निष्कंटक. -y, a. कंटकावृत, कंटकाकीर्ण, कंटकित, सकंटक.

Thorough, a. संपूर्ण, सम्यच्, साद्यंत, पर्याप्त; See **Complete**; 't.-bred' अभिजात, अतिकुलीन; (horse) आजानेयः, कुलीनः; 't.-fare' राजमार्गः, घंटापथः, संसरणं; सर्वसामान्यपथः, सर्वजनपथः. -ly, adv. सम्यक्, संपूर्णं, साद्यंतं; by पार in comp.; 'who has t. learnt the lores' विद्यानां पारदृश्वनः (R. I. 23); 't. mastered all lores' ततार सर्वा विद्याः (R. III. 30). -ness, s. पूर्णता, परिपूर्ति f, विशेषता.

Thou, pron. त्वं; 'to t. and thee' त्वंकृ 8 U: 'do not t. your elders' गुरुषु त्वंकारं न प्रयोजयेत्. -Thine, a. त्वदीय, तावक (की f.), तावकीन, त्वत्क, भवदीय, त्वद् in comp.

Though, *adv.* अपि, यद्यपि; ' as t. ' इव.

Thousand, *a., s.* सहस्रं, दशशतं; ' t.s of times ' सहस्रशः-वारं; ' in a t. ways or parts ' सहस्रधा; ' ten t. ' अयुतं; ' hundred t. लक्षं; ' by t. s. ' सहस्रशः **-th,** *a.* सहस्रतम (मी *f.*).

Thrall, *s.* दासः. **-dom,** *s.* दास्यं, दासवृत्ति *f.*, दासत्वं; *See* **Slave,-ery. 2** वशता, पारतंत्र्यं, अधीनता.

Thrash, *v. t.* परुषं-बलवत्-तड् 10 or प्र-हृ 1 P. **2** निस्तुषीकृ 8 U, पू 9 U; *See* **Thresh.**

Thread, *s.* सूत्रं, तंतुः, (fig. also), (आशातंतुः), गुणः,तंत्रं; 't. of a story' कथाप्रबंधः-अनुबंधः-संदर्भः-अन्वयः,अनु-,संधानं,प्रबंधार्थः; ' t.-bare ' सूत्रदरिद्र; अयं पटः सूत्रदरिद्रतां गतः (Mr. 2), सूत्रशेष; जर्जर. **-***v. t.* सूत्र् 10; गु(गुं)फ् 6 P, ग्रंथ् 9 P; ' t. one's way ' मंदं मंदं प्रसृप् 1 P. **-y,** *a.* सूत्र-तंतु-मय (यी *f.*).

Threat, *s.* तर्जनं, तर्जितं, भर्त्सनं, अपकारगिर् *f.* **-en,** *v. t.* सं-,तर्ज् 1 P, 10 A, निर्-, भर्त्स् 10 A, भी c. **-***v. i.* प्रत्या-सद् 1 P, लग्न-*a.* संपद् 4 A, उपक्रम् 1 P; ' war t. s' प्रत्यासीदति रणप्रसंगः; *See* **Impend. -ening,** *a.* भर्त्सनकृत्; अनिष्टसंवादिन् प्रत्यासन्नभय, विभीषक. **-eningly,** *adv.* तर्जयत्-*a.*

Three *a.* त्रि (तिसृ *f.*); ' aggregate of t. त्रयं, त्रितयं, त्रिकं, त्रयी; 't. months' त्रिमासं, मासत्रयं; ' two or t. ' द्वित्र, त्रिचतुर, &c.; ' t.-cornered ' त्रिकोण; ' t.-eyed ' त्रिलोचनः, त्रिनयनः; &c.; ' t.-fold ' त्रिगुण; ' t.-fourths ' त्रिपादः, पादत्रयं; ' 2 and t.-fourths ' पादोनत्रयं. **-Third,** *a.* तृतीय. **-***s.* तृतीयभागः-अंशः. **-ly,** *adv.* तृतीयस्थाने **-Thrice,** *adv.* त्रिः, त्रिवारं.

Thresh, *v. t.* मृद् 9 P, परि-,पू 9 U, निस्तुषीकृ 8 U, कंड् 10. **2** तड् 10, प्र-हृ 1 P. **-ed,** *a.* निस्तुषित, निस्तुष, पूत, बहुलीकृत. **-ing,** *s.* पावनं, बहुलीकरणं, कंडनं, निस्तुषीकरणं; ' t. floor ' खलधान्यं; ' t. instrument ' मुसलः-लं. अयोग्रं, कंडनी.

Threshold, *s.* देहली, द्वारपिंडी, ग्रहावग्रहणी; (fig.) प्रारंभः.

Thrift, *s.* मितव्ययः-व्ययिता. **2** सं-वि-वृद्धि *f.* **-y,** *a.* मितव्ययिन्, अल्पव्यय; *See* **Frugal.**

Thrill, *s.* प्र-,कंपः, स्फुरण, हर्षः; (of joy, horror, &c.) रोमांचः, पुलकः; उद्धर्षः; ' t. of joy ' हर्षरोमांचः, पुलकोद्गमः, रोमहर्षः, ' a t. came over her body ' तस्या गात्रं रोमांचितं-पुलकितं-कंटकितं-बभूव; 'with a t. of horror ' साध्वसरोमांचितगात्रः. **-***v.* स्फुर् 6 P, हृष् 4 P, प्र-,कंप् 1 A; gen. ex. by पुलकित, रोमांचित, कंटकित, (*a.*); ' be t.-ed with joy ' आनंदपुलकिततनुर्बभूव. **-ing,** *a.* लो(रो)महर्षण (णी *f.*), पुलकित, रोमांचित, &c.

Thrive, *v. i.* प्र-,वृध् 1 A, प्र-उप-चि pass., संऋध् 4, 5 P, उन्नतिं-उत्कर्षं-आप् 5 P; *See* **Prosper, Flourish. -ing,** *a.* वर्धिष्णु, प्र-उप-चीयमान, समृद्ध.

Throat, *s.* कंठः, गलः, कृकः, निगरणः; 'relating to t. ' कंठ्य; ' up to the t. ' आकंठं, आकंठात्.

Throb, *v. t.* प्र-,स्पंद् 1 A, स्फुर् 6 P, वेप् 1A, कंप् 1 A. **-bing,** *s.* स्पंदः, स्पंदनं; स्फुरणं, स्फुरितं, कंपः.

Throe, *s.* यातना, वेदना, व्यथा; (of delivery) प्रसववेदना, प्रसवकालव्यथा.

Throne, *s.* सिंहासनं, नृपासनं, &c.; भद्रासनं; ' ascended the ancestral t. ' भेजे पैतृकमासनं (R. xvii. 28); ' getting the t. ' राजपदप्राप्ति *f.*; ' having lost his t. ' छत्रभ्रष्टः. **-***v. t.* अभिषिच् 6 P, राज्ये अभिषिच्, सिंहासनं आरुह् c.; ' t. ed king ' अभिषिक्तो राजा.

Throng, *s.* जनसंमर्दः-संकुलं, लोकनिवहः. **-***v. t.* आ-समा-कॄ 6 P, संबाध् 1 A. **-***v. i.* जनाकीर्ण-जनसंबाध-*a.* भू; *See* **Crowd. -ed,** *a.* आ-समा-कीर्ण, जनसंकुल-संबाधित.

Throttle, *v. t.* गलं निष्पीड् 10, गलनिष्पीडनेन व्या-पद् c., गलहस्तयति (*D.*).

Through, *prep.* Ex. by instr. or abl. **2** मध्येन, अंतरेण; ' t. the branches ' विटपांतरेण. **3** पारं, तीरांतरं यावत्. **4** मुखेन; द्वारेण, द्वारा, in comp; सखीमुखेनोचे ' spoke t. her friend '. **-***adv.* समग्रं, साद्यंतं, शेषं यावत्, आसमाप्तेः; oft. by पारं गम् or दृश् 1 P; ' he has learnt the Vedas t. ' श्रुतिपारं गतः, श्रुतिपारदृश्वा, ' to get t. ' तारयति-पारयति (*D.*), समाप् c. **-Throughout,** *prep.* Ex. by सर्व, समस्त; *See* **All;** आ or यावत् in comp.; ' t. one's life ' यावज्जीवं-वेन, आजीवितांतात् ' t. the town ' अखिले नगरे, नगरे सर्वत्र. **-***adv* सर्वत्र, अशेषतः; सर्वत्र वैतालीयं छंदः ' the metre is Vaitāli'ya t. '

Throw, *v. t.* प्र-,क्षिप् 6 P, प्र-,अस् 4 P, पत् c., प्र-,मुच् 6 P, विसृज् 6 P, इर् c , प्रेष् c., (with loc. of place); ' t. a glance ' दृष्टिं-चक्षुः-क्षिप् or दा 3 U or पत् c.; ' t. into disorder ' विजली-आकुली-कृ 8 U, व्युह् भंज् 7 P; ' t. dice ' अक्षान् आवप् 1 P or पत् c. **-about,** उत्-वि क्षिप्, इतस्ततः चल् c.; बाहुक्षेपं ' t. ing about the arms. ' **-away,** निः-वि-क्षिप्, अपास्,

अप-हा 3 P, अपव्यध् 4 P, त्यज् 1 P; (time) क्षिप्, हृ 1 P यं c. (यापयति). 2 निरस्, प्रत्याख्या 2 P; *See* **Reject;** ' it was t.-ing words away ' निरर्थकं-मोघं-एव तद् भाषणं, वाचा यासमर्थकं भाषणं; ' kindness was not thrown away upon him ' सोऽभूदयं कृतज्ञतयास्मरत्; ' to be thrown away pon ' विफलीभू 1 P, विफलतां गम् 1 P, लर्थ-अर्थ-नाशं-गम्-या &c.; गता नाशं तारा उपकृतमसाधाविव जने (Mr. 5); असत्पुरुषसेवेव दृष्टिर्विफलतां गता (Mr. 1). **-down,** पत् c., अधः क्षिप् or पत्; प्र-भ्रंश् c., प्र-च्यु c. **-off** निः-प्र-क्षिप्, अव-निर्-धू 5, 9 U, निराकृ, अपव्यध्, अप-सृ c.; ' t. one off his guard ' असावधान-*a.* कृ; ' t. off the veil or mask ' स्वरूपं प्रकटीकृ or वि-वृ 5 U or प्रकाश् c. **-out, Reject,** q. v. **2** निः-,सृ c., अपास्. **3** (Hints) सूच् 10, उप-क्षिप्, उपन्यस्, व्यंज् c. **-up,** उद्‌स्, उत्क्षिप् &c. (from the stomach) उद्वम् 1 P, उद्-गृ 6 P, 'I have thrown a wall around ' उपक्षिप्तो मया भित्तिबंधः (M. 5). **-s.** प्र-,क्षेपः-पणं, प्रासनं, प्रेरणं &c. **-er,** *s.* क्षेप्तृ *m.*, प्रासकः.

Thrum, *s.* दशाः-वस्त्रयः (pl.).

Thrush, *s.* सारिका, शारि *f*

Thrust, *v. t.* अपव्यध् 4 P, प्र-सृ c., प्र-क्षिप् 6 P; ' t. away ', ' t. out ' निरस् 4 U, निः-सृ c., बहिष्कृ 8 U; (the hand &c.) प्र-सृ c.; ' t. into ' प्र-नि-विश् c.; ' t. on ' प्रचुद् c., c. प्रचल् c. **-s.** आघातः, प्रहारः ताडनं; (with fist) मुष्टिप्रहारः-आघातः.

Thumb, *s.* अंगुष्ठः; ' under one's t. ' आयत्त, वश्य. **-v. t.** अंगुष्ठेन परामृश् 6 P or स्पृश् 6 P or अंक् 10.

Thump, *v. t.* आहन् 2 U, तड् 10, प्र-हृ 1 P. **-s.** आ-अभि-घातः, प्रहारः.

Thunder, *s.* मेघगर्जनं, घनध्वनिः, जीमूतस्तनितं, मेघगर्जितं; and sim. comp.; वि-, स्फूर्जथुः- थुः, स्फूर्जितं, स्तनितं, रसितं; गर्जितं, गर्जनं-ना; 't. bolt' वज्रः-ज्रं, कुलिशं, भिदुरं, पविः, अशनि *m. f.*, शतकोटिः, स्वरुः, शंबः, ह्रादिनी, दंभोलिः; ' t. clap ' वज्रनिर्घोषः-निर्घातस्वनः-निष्पेषः; *See* (*s.*); 't.-storm' अशनिवर्षः-पातः; ' t.-struck ' अशनिताडित, वज्राहत, *See* **Astounded.** **-v.** गर्ज् 1 P, स्तन् 1 P, वि-स्फूर्ज् 1 P; ' shouldst t. reproof ' यत्त्वं (साक्षेपमिव) नदसि सिंहनादैः (Mr. 5). **-er,** *s.* वज्रिन् *m.*, कुलिशभृत्, वज्रपाणिः.

Thursday, *s.* गुरुवासरः.

Thus, *adv.* एवं, इत्थं, इति. अनेन प्रकारेण, अनया रीत्या.

Thwack. *See* **Smack.**

Thwart, *v. t.* खंड् 10, वि-प्रति-हन् [illegible] P, मोघीकृ 8 U. नि-प्रति-वि-रुध् 7 U; प्रतिबध्नाति-प्रतीपयति (D.); क ईप्सितार्थस्थिरनिश्चयं मनः प्रतीपयेत् (K. v. 5); *See* **Frustrate, Baffle.**

Tiara, *s.* मुकुटं, किरीटः, मौलिः.

Tick, *s.* यूका. **2 Credit,** q. v.

Ticket, मिर्द्रेशनी, अभिज्ञानपत्रं.

Tickle, *v.* कुतकुतयति (D.), कंडूयति (D.); (fig.) **Please, Gratify,** q v. **-er,** *s.* कंडूयनकः.

Tide, *s.* वेला (of the sea). **2** स्रोतस् *n.*, ओघः, वेगः, रयः; *See* **Stream.** **-v. t.** (over) तॄ 1 P, सं-उत्-°.

Tidy, *a.* **Neat,** q v.

Tidings, *s.* वार्ता, प्रवृत्ति *f.*; *See* **News.**

Tie, *v. t.* नि-,बंध् 9 P, पिनह् 4 P: (together) योक्त्रयति (D.), संबंध्, संश्लिष् c., संसंज् c., सं-युज् 7 U, 10, संधा 3 U; (flowers &c.) गुंफ् 6 P, सं-ग्रंथ् 9 P. **-s.** नियंधनं, (द्वितीयं मनसो निबंधनं); संश्लेषणं, बंधः-धनं-नी, ग्रंथिः; ' t. of a yoke ' योक्त्रं, आबंधः; ' this (child) is the mutual t. of parents ' एतदन्योन्यसंश्लेषणं पित्रोः (U. 3). **2** दामन् *f. n.*, गुणः, तंतुः. **2 Fetter,** q. v. **4** संगः, बंधः; ' worldly t. s ' संसारबंधः; ' free from t. s ' निः-संग, मुक्तसंग. **-er,** *s.* पंक्ति-श्रेणि-*f.*; *See* **Line.**

Tiffin, *s.* उपाहारः.

Tiger, *s.* व्याघ्रः, शार्दूलः, द्वीपिन् *m.*

Tight, *a.* अशिथिल, दृढ, गाढ, संसक्त, सुसंहत. **2** अतिपिनद्ध, गाढ-दृढ-बद्ध, संनिबद्ध; ' I am chained down by this t bark-garment ' अतिपिनद्धेन वल्कलेन नियंत्रितास्मि (S. 1); 'the coat sits t. on your body ' अंगानंतरवर्ती-अंगसंसक्तः-कंचुकः. **3** आतत. **4** संबाध. **-en,** *v. t.* दृढीकृ 8 U, नियम् 1 P, दृढयति (D.). **-ly,** *adv.* दृढं, प्र-गाढं, अशिथिलं; ' tied t. ' दृढबद्ध &c. **-ness,** *s.* दृढता, घनता, सुसंसक्ति *f.*, संहति *f.*, आनतर्यं.

Till, *adv. prep.* यावत् (with acc. of noun) or यावत् न (followed by तावत्); ' t. now ' अद्यावधि, अद्य यावत्; gen. by आ in comp. or with abl.; ' t. death ' आमरणं, आमृत्योः; ' t. the learned are satisfied ' आपरितोषाद्विदुषां (S. 1). **-v. t.** कृष् 1 P, 6 U. **-age, -Tilth** *s.* कृषिकर्मन् *n.*, कृषि *f.* **-er,** *s.* कृषकः, कर्षकः, कृषीवलः; क्षेत्राजीवः.

Tilt, *s.* वितानं, उल्लोचः. **2** प्रासक्रीडा-युद्धं. **-v. t.** आवृश् 10. **2** प्रासयुद्धे प्रवृत् 1 A. **-v. i.** आ-अव-नम् 1 P, भुज् 6 P.

Timber, *s.* काष्ठं, दारु *n.*

Timberel, *s.* *See* **Drum.**

Time, *s.* कालः, समयः, वेला. 2 (Occasion) अवसरः, प्रसंगः, प्रस्तावः. 3 वारः, वासरः. 5 अवधिः, मर्यादा. 5 तालः, लयः. 6 (Personified) कालः. 7 (With numerals) गुणं, कृत्वः, वारं, in comp.; '10 t. s' दशकृत्वः, दशगुणं, त्रिवारं, &c.; 'from t. to t.' काले काले; 'losing or wasting t.' कालहरणं कालक्षेपः-हानिः; 'by this t.' अनेन समयेन, इयता कालेन; 'after a long t.' चिरात्, बहोः कालात्; 'for a long t.' चिरं, महांतं कालं; 'of the same t.' समकालीन, समकालिक (की *f.*); 'at the right t.' काले, यथावसरं, प्राप्तकालं; 'in time' यथासमयं-अवसरं, काले; 'in a short t.' अचिरेणात्; 'at the t. when' यदा-तदा; 'at the same t.' समं, एकावसरं, तत्कालं, तत्क्षणं; 'at all t. s.' सदा, सर्वदा; 'at other t.' अन्यदा; 'at t. s.' काले काले, अंतरा अंतरा; 'at this, that, t.' अधुना, तदा; 'at any t.' यदा कदा; 'come at any t.' यदा इच्छसि तदा-यथेष्टकाले-आगच्छ; 'of our, those, t. s' इदानींतन-तदानींतन-(नी *f.*); 'high t.' उचितः समयः; 'it is high t. to bathe and take our meals' समयः स्नानभोजनं सेवितुं (V. 2); 'good for the t. being' आपातरमणीय, आपाततो रम्य; 'hard t. s.' आपत्कालः; विपत्समयः, आपद् *f.*; 'dark t. s.' कलिकालः; 'from t. to t.' अनुवेलं, वारंवारं; 'many t. s' बहुशः, बहुवारं, काले काले; 't.-server', 't.-serving' कालानुवर्तिन्, समयानुरोधिन्; 'I shall not do so next t.' नैवं वारांतरं विधास्यामि; 'what is the t. now' का वेला अधुना वर्तते; 'begging is out of t.' अनवसरग्रस्तोऽर्थिभावः (Mal. 9); 'sign of the t.' कालधर्मः; 'without loss of t.' अकालक्षेपेण, अविलंबितं; 'one keeping or beating t. with the hands' पाणिघः, पाणिवादः; करकिसलयतालैर्मुग्धया नर्त्यमानः (U. 3) 'by keeping t. with her hands' &c.; 'quick, mean, slow, t.' द्रुतं, मध्यं, विलंबितं; 'out of t.' विताल, वैतालिक (की *f.*). –*v. t.* कालं निर्णी 1 P or परिकल्प् c., कालानुरूप *a.* कृ 8 U. –**ly,** *a.* Ex. by (*s.*) in comp.; 'showering t.' कालसमयवर्षिणः; सामयिक (की *f.*); कालकृतोद्योगात् 'by t. attempts.' –*adv.* काले, यथासमयं-कालं.

Timid, Timorous, *a.* भीरु, कातर, ससाध्वस, त्रस्त, सभय, दीन, भीरुहृदय, चकित. –**ity, –ness,** *s.* सं-,त्रासः, कातर्यं, साध्वसं, &c., भीरुता-त्वं, चित्तवैक्लव्यं. –**ly,** *adv.* ससाध्वसं, चकितं, सभयं.

Tin, *s.* त्रपु *n.*, वंगं, रंगं, पिच्चटं; 't.-man' वंग-त्रपु-कारः; 'calx of t.' त्रपुभस्मन् *n.*

Tincture, *s.* आभा, छाया, आभासः; ईषन्मिश्रणं-संसर्गः. 2 औषधाधिवासितो मद्यार्कः; निर्यासः, (extract). –*v.* (lit.) ईषद् मिश्र 10 or अधिवास् 10; (fig.) ex. by (*s.*); 't. ed with truth' सत्याभास.

Tinder, *s.* इंधनं, एधस् *n.*, शीघ्रदाह्यं.

Tine, *s.* शूलः. 2 मृगविषाणशाखा.

Tinge, *s.* रंगः, रागः; आभा, छाया, आभासः; 'speech with a t. of falsehood' असत्याभासं वचनं. –*v. t.* रंज् c. –**ed,** *a.* सराग.

